





A 469470 DUPL


1817
ARTES
SCIENTIA
VERITAS
LIBRARY OF THE
UNIVERSITY OF MICHIGAN
TUEBOR
SI QUAERIS PENINSULAM AMOENAM
CIRCUMSPICE





Somadeva's Mährchensammlung.



KATHA SARIT SAGARA.

Die Mährchensammlung

des

Sri Somadeva Bhatta aus Kaschmir.

Erstes bis fünftes Buch.

Sanskrit und Deutsch

herausgegeben

von

Dr. *Hermann Brockhaus*.

Leipzig:
F. A. Brockhaus.

Paris:
Brockhaus & Avenarius.
Rue Richelieu, No. 60.

1839.

Seiner Majestät

FRIEDRICH AUGUST

König von Sachsen u. s. w.

in ehrfurchtsvollster Ergebenheit

gewidmet

von dem

Herausgeber.

Vorrede.

Die hier zum erstenmale gedruckte Sammlung Indischer Mährchen und Erzählungen übergebe ich dem Publikum als einen nicht unwichtigen Beitrag zur Literaturgeschichte. Die tiefen Forschungen des verstorbenen Sylvestre de Sacy über die Fabelsammlung des Bidpai führten auf Indien als ursprüngliches Vaterland dieser sinnreichen Fabeln zurück, die dann in mannichfaltiger Umwandlung ganz Asien und Europa durchwanderten; denselben Ursprung glaubte man den Mährchen, die in der Tausend und Einen Nacht und ähnlichen arabischen und persischen Werken uns aufbewahrt sind, zuschreiben zu dürfen. Einige Auszüge, die Herr H. H. Wilson in einem Calcuttaer Journale aus der vorliegenden Sammlung mittheilte, lieferten dazu mehrere Beweise, und die ganze Frage regte so mein Interesse an, dass ich mich zu der Bearbeitung des Originals entschloss. Meine Kenntniss aber dieses Zweiges der mittelalterlichen Literatur des Orients und Occidents ist zu wenig ausgedehnt, um die einzelnen Züge der Übereinstimmung der hier gegebenen Indischen Erzählungen mit entsprechenden in den verschiedenen Mährchen- und Novellensammlungen des Mittelalters angeben zu können; ich hätte nur solche berühren können, die keinem Freunde der Poesie unbekannt sind, sehr dankbar aber werde ich für alle dergleichen Nachweisungen sein, die, späterhin vielleicht zu einem Ganzen vereinigt, eine belehrende Übersicht des Gemeinschaftlichen und wieder nationell Eigenthümlichen gewähren könnten.*)

*) Sehr schätzbare Vorarbeiten zu einem solchen Werke finden sich in der Einleitung zu der trefflichen Ausgabe des „Roman des sept sages“ von Dr. *H. A. Keller*, Tübingen 1836; sowie in den Arbeiten des Herrn *A. Loiseleur Deslongchamps*: „Essai sur les fables Indiennes“, und „Essai historique sur les contes Orientaux“, Paris 1838.

Über den Verfasser unseres Werkes, *Somadeva*, kann ich wenig berichten. Am Schluss des Gedichtes nennt er sich den Sohn des *Râma* und einen Eingeborenen des Landes *Kaschmir*, und erwähnt zugleich, dass er diese Sammlung begonnen habe, um die Königin *Sûryavatî* über den Verlust ihres Enkels, des Königs von Kaschmir, *Harscha Deva*, durch heitere Erzählungen zu trösten. Dieser König, dessen Regierung zu den glänzendsten, wenngleich nicht glücklichsten Epochen der Geschichte von Kaschmir gehört, kam in einem Aufruhr um im Jahre 1125 nach Chr. Geb. Somadeva ist demnach ein ziemlich junger Schriftsteller, aber die Elemente seines Werkes sind unbedingt älter, da er selbst eingesteht, dass er blos eine frühere ausführlichere Sammlung, die sogenannte *Vrihat Kathâ* (d. h. „*die ausgedehnte Erzählung*"), bearbeitet habe, um so dieses „*Meer der Mährchenströme*" zu bilden. *) Sein Verdienst beruht wol hauptsächlich in der gleichmässigen stylistischen Redaction des früher unter mancherlei Formen in Prosa und Versen Zerstreuten.

Die vollständigen Handschriften dieses Buches sind in Indien ziemlich selten, doch war ich so glücklich, deren mehrere in London und Oxford benutzen zu können. Es sind die folgenden:

A. (Nr. 2212—2214 des Catalogs der Sanskrit-Handschriften in der Bibliothek des East India House) 3 Bände in 4., aus der Sammlung von *Johnson*. Die Handschrift gehört zu den schönsten der ganzen Bibliothek; sie ist sehr deutlich mit glänzender Dinte auf wechselnd gelbem, blauem, grünem und anderm bunten Papiere geschrieben, und wahrscheinlich nach einer älteren Bengali-Handschrift copirt. Der Text ist den Worten nach bei weitem der beste, wenn auch sonst voll Fehler und Nachlässigkeiten des Copisten; er bildet die Grundlage meiner Ausgabe.

B. (Nr. 159 der Sammlung von *Taylor*) 3 Bände in 4. Zum Gebrauch dieses verdienstvollen Gelehrten abgeschrieben, ziemlich correct, weicht aber öfters von *A.* ab; stammt aus dem westlichen Indien.

M. Ein Fragment, nur die 5 ersten Bücher enthaltend, aus der Sammlung des Obersten *Mac Kenzie*. Ein Band in Folio.

*) Die einzelnen Bücher nennt der Verfasser *lambaka*, wahrscheinlich eine Woge, wie im Englischen *a surge*, die kleineren Abtheilungen oder Capitel aber *taranga*, das heisst Welle.

C. (Nr. 352 und 361) aus *Colebrooke's* Sammlung; leider
ır incorrect geschrieben und auch nicht ganz vollständig.

W. Die Handschrift, die Herr Professor *H. H. Wilson* in
ıares copiren liess, 4 Bände in 4. Der Text stimmt meist
A. überein. — Der ebengenannte ausgezeichnete Gelehrte,
ısen wohlwollende Freundschaft und Liberalität in der Mit-
ilung der herrlichen Schätze seiner Bibliothek ich nicht genug
ımen kann und wofür ich ihm hier öffentlich meinen wärm-
n Dank wiederhole, war so gütig, mir noch eine Abschrift
ganzen Werkes aus Calcutta besorgen zu lassen, *D.* Diese
mmt aus der Handschrift, die der verstorbene Oberst *Wilford*
n Sanskrit-College in Calcutta geschenkt hat; sie ist sehr
ıtlich und für eine Devanagari-Handschrift ziemlich correct
ıchrieben. *)

Nach meinen Kräften habe ich mich bemüht, den gramma-
:h-correctesten und dem Sinne nach besten Text aus den ver-
iedenen Lesarten der angeführten Handschriften zu construi-
t. Nicht überall ist mir dies gelungen, viele Stellen sind mir
leutlich oder ganz unerklärlich geblieben, doch habe ich es
strengen Grundsatz durchgeführt, keine Conjecturen in den
xt aufzunehmen, sondern nur durch Handschriften autorisirte
sarten. Ich selbst kann meine Arbeit nur einen Versuch zu
er Ausgabe und Übersetzung nennen. Jeder aber, der aus
lischen Handschriften ein Werk zuerst herausgegeben hat,
ne dass ein Calcuttaer Textabdruck oder eine Übersetzung
Arbeit erleichterte, ohne von irgend einer Glosse oder
mmentar unterstützt zu sein, oder des mündlichen Unter-
htes einheimischer Gelehrten geniessen zu können, — jeder,
;e ich, wird mit Nachsicht die vielen Mängel meiner Arbeit
ırtheilen, die mir nicht verborgen sind. Belehrung und Ver-
ısserungen werden Niemanden willkommener sein als mir, da
n Leser gewiss an den schwierigen Stellen, deren das Buch
nche enthält, so mühselig arbeiten wird, um sie zu erklären,
eben ich selbst. — Die Varianten und sonstigen Hülfsmittel
: Rechtfertigung meines Textes musste ich leider weglassen;
se Zugaben, für so wichtig und nothwendig ich sie auch hal-

*) Den Theil dieser Handschrift, der hier gedruckt vorliegt, habe ich der könig-
en Bibliothek zu Dresden geschenkt.

te, würden den Umfang des Werkes und somit die Kosten auf eine zu bedeutende Weise vermehrt haben. — Die Übersetzung macht auf weiter nichts Anspruch, als den des Sanskrit unkundigen Freunden volksthümlicher Dichtung den Inhalt dieser Sammlung zu erschliessen. Ob ich in der Bearbeitung der folgenden Bücher, die noch manches Werthvolle und Schöne enthalten, fortfahren kann, hängt von der Vereinigung mancher glücklicher Umstände ab; doch soll es mir genügen, auf diese reiche Quelle der Belehrung über Indische Zustände aufmerksam gemacht und denjenigen, die es erfreut, die feineren Beziehungen der Völker zu einander durch Jahrhunderte und Jahrtausende hindurch zu verfolgen, den Faden nachgewiesen zu haben, der zu sicheren Resultaten führen kann.

Noch muss ich dankbar des Herrn Prof. *Bopp* in Berlin erwähnen, der sich aus reinem Interesse an der Wissenschaft freiwillig der Revision der Correcturbogen unterzogen hat.

Denen ich unter Allen am liebsten aber dieses Buch gesendet hätte, meine beiden Freunde *Friedrich Rosen* und *Robert Lenz*, die mit steter Theilnahme lange Zeit hindurch in England meine Arbeit förderten, mit denen ich im innigsten geistigen und freundschaftlichen Verkehre gelebt habe, — beide, in der Blüthe der Jahre den Wissenschaften und ihren Freunden und Ältern entrissen, deckt ein frühes Grab. Friede sei ihrer Asche!

Jena, September 1839.

Der Herausgeber.

Inhaltsverzeichniss.

Erstes Buch.

Erstes bis achtes Capitel.

Zweites Buch.

Neuntes bis vierzehntes Capitel.

Drittes Buch.

Funfzehntes bis zwanzigstes Capitel.

Viertes Buch.

Einundzwanzigstes bis dreiundzwanzigstes Capitel.

Fünftes Buch.

Vierundzwanzigstes bis sechsundzwanzigstes Capitel.

अथ

श्री सोमदेव भट्ट विरचिते

कथा सरित् सागरे

कथा पीठं नाम

प्रथमो लम्बकः

श्रीरामायणभारत-
वृहत्कथानां कवीन् नमस्कुर्मः
त्रिस्रोता इव सरसा
सरस्वती स्फुरति यैर् भिन्ना ।

Goovardhana.

TARANGA. 1.

श्रियं दिशतु वः शम्भोः श्यामः कण्ठो मनोभुवा
अङ्कस्थपार्वतीदृष्टिपाशैर् इव विवेष्टितः । 1
सन्ध्यानृत्योत्सवे ताराः करेण 'उद्धूय विघ्नजित्
शीत्कारशीकरैर् अन्याः कल्पयन्न् इव पातु वः । 2
प्रणम्य वाचं निःशेषपदार्थोद्द्योतदीपिकां
वृहत्कथायाः सारस्य संग्रहं रचयाम्य् अहं । 3
आद्यम् अत्र कथापीठं, कथामुखम् अतःपरं,
ततो लावाणको नाम तृतीयो लम्बको भवेत् । 4
नरवाहनदत्तस्य जननं च, ततः परं
स्याच् चतुर्दारिकाख्यश् च, ततो मदनमञ्चुका । 5
ततो रत्नप्रभा नाम लम्बकः सप्तमो भवेत्,
सूर्यप्रभाभिधानश् च लम्बकः स्याद् अथ 'अष्टमः । 6
अलङ्कारवती च 'अथ, ततः शक्तियशा भवेत्,
वेलालम्बकसंज्ञश् च भवेद् एकादशस् ततः । 7

शशाङ्कवत्य् अपि ततस्, ततश् च मदिरावती,
महाभिषेकानुगतस् ततः स्यात् पञ्चलम्बकः । 8
ततः सुरतमञ्जर्य् अप्य्, अथ पद्मावती भवेत्
ततो विषमशीलाख्यो लम्बको ऽष्टादशो भवेत् । 9
यथा मूलं तथा 'एव 'एतन् न मनाग् अप्य् अतिक्रमः
ग्रन्थविस्तरसंक्षेपमात्रभाषा च विद्यते । 10
औचित्यान्वयरक्षा च यथाशक्त्य् अभिधीयते
कथारसाविघातेन काव्यांशस्य च योजना । 11
वैदग्ध्यख्यातिलोभाय मम न 'एव 'अयम् उद्यमः
किंतु नानाकथाजालस्मृतिसौकर्यसिद्धये । 12

अस्ति किन्नरगन्धर्वविद्याधरनिषेवितः
चक्रवर्ती गिरीन्द्राणां हिमवान् इति विश्रुतः । 13
माहात्म्यम् इयतीं भूमिम् आरूढं यस्य भूभृतां
यद् भवानी सुता भावं त्रिजगज्जननी गता । 14
उत्तरं शिखरं तस्य कैलासाख्यो महान् गिरिः
योजनानां सहस्राणि बहून्य् आक्रम्य तिष्ठति । 15
मन्दरो मथिते ऽप्य् अब्धौ न सुधासिततां गतः,
अहं तु अयत्नाद् इति यो हसति 'इव मरीचिभिः । 16

चराचरगुरुस् तत्र निवसत्य् अम्बिकासखः
गणैर् विद्याधरैः सिद्धैः सेव्यमानो महेश्वरः । 17
पिङ्गोत्तुङ्गजटाजूटगतो यस्य ऽश्नुते नवः
सन्ध्यापिशङ्गपूर्वाद्रिशृङ्गसङ्गसुखं शशी । 18
येन ऽन्धकासुरपतेर् एकस्य ऽर्पयता हृदि
शूलं त्रिजगतो ऽप्य् अस्य हृदयाच् चित्रम् उद्धृतं । 19
चूडामणिषु यत्पादनखाग्रप्रतिमाङ्किताः
प्रसादप्राप्तचन्द्रार्धा इव भान्ति सुरासुराः । 20
तं कदाचित् समुत्पन्नविश्रम्भा रहसि प्रिया
स्तुतिभिस् तोषयामास भवानी पतिम् ईश्वरं । 21
अस्याः स्तुतिपरो हृष्टस् ताम् अङ्कम् अधिरोप्य सः,
किं ते प्रियं करोमि ऽइति बभाषे शशिशेखरः । 22
ततः प्रोवाच गिरिजा, प्रसन्नो ऽसि यदि प्रभो
रम्यां काञ्चित् कथां ब्रूहि देव ऽतीवनवां मम । 23
भूतं भव्यं भविष्यद् वा किं तत् स्यात् जगति प्रिये,
भवती यन् न जानीयाद् इति शर्वो ऽप्य् उवाच तां । 24
ततः सा वल्लभा तस्य निर्बन्धम् अकरोत् प्रभोः;
प्रियप्रणयहेवाकं यतो मानवतीमनः । 25
ततस् तच्चाटुबुद्ध्या ऽएव तत्प्रभावनिबन्धनां
तस्याः स्वल्पां कथाम् एवं शिवः सम्प्रत्य् अवर्णयत् । 26

अस्ति माम् ईक्षितुं पूर्वं ब्रह्मा नारायणास् तथा
मही भ्रमन्तौ हिमवत्पादमूलम् अवापतुः । 27
ततो ददृशतुस् तत्र ज्वालालिङ्गं महत् पुरा,
तस्य ऽन्तम् ईक्षितुं प्रायाद् एक ऊर्ध्वम् अधो ऽपरः । 28
अलब्धान्तौ तपोभिर् मां तोषयामासतुश् च तौ;
आविर्भूय मया च ऽउक्तौ, वरः को ऽप्य् अर्थ्यताम् इति । 29
तच् छ्रुत्वा ऽएव ऽअब्रवीद् ब्रह्मा, पुत्रो मे ऽस्तु भवान् इति.
अपूज्यस् तेन जातो ऽसाव् अत्यारोहेण निन्दितः । 30
ततो नारायणो देवः स वरं माम् अयाचत,
भूयासं तव शुश्रूषापरो ऽहं भगवन् इति । 31
अतः शरीरीभूतो ऽसौ मम जातस् त्वदात्मना,
यो हि नारायणः सा त्वं, शक्तिः शक्तिमतो मम । 32

किंच, मे पूर्वजाया त्वम् इत्य् उक्तवति शङ्करे,
कथं ते पूर्वजाया ऽअहम् इति वक्ति स्म पार्वती । 33
प्रत्युवाच ततो भर्गः, पुरा दक्षप्रजापतेः
देवि त्वं च तथा ऽअन्याश् च बह्व्यो ऽजायन्त कन्यकाः । 34
स मह्यं भवतीं प्रादाद्, धर्मादिभ्यो ऽपराश् च ताः.
यज्ञे कदाचिद् आहूतास् तेन जामातरो ऽखिलाः । 35
वर्जितस् त्व् अहम् एव ऽएकस्; ततो ऽप्य् अपृच्छत स त्वया,
किं न भर्ता मम ऽआहूतस् त्वया तात ऽउच्यताम् इति । 36

कपालमाली भर्ता ते, कथम् आहूयते मखे?
इत्य् उवाच गिरं सो ऽथ त्वत्कर्णविषसूचिकां । 37
पापो ऽयम्, अस्मात् जातेन किं देहेन मम ऽमुना?
इति कोपाद् अथ त्यक्तं शरीरं तत् प्रिये त्वया । 38
स च दक्षमखस् तेन मन्युना नाशितो मया.
ततो जाता हिमाद्रेस् त्वम्, अब्धेश् चन्द्रकला यथा । 39
अथ स्मर तुषाराद्रिं तपोऽर्थम् अहम् आगमं,
पिता त्वां च नियुङ्क्ते स्म शुश्रूषायै मम ऽतिथेः । 40
तारकान्तकमत्पुत्रप्राप्तये प्रहितः सुरैः
लब्धावकाशो विध्यन् मां तत्र दग्धो मनोभवः । 41
ततस् तीव्रेण तपसा क्रीतो ऽहं धीरया त्वया,
ततश् च तत् संचयाय मया सोढं तव प्रिये । 42
इत्थं मे पूर्वजाया त्वं. किम् अन्यत् कथ्यते तव?
इत्य् उक्त्वा विरते शम्भौ देवी कोपाकुला ऽब्रवीत् । 43
धूर्तस् त्वं, न कथां हृद्यां कथयस्य् अर्थितो ऽपि सन्,
गङ्गां वहन् नमन् सन्ध्यां विदितो ऽसि न किं मम? । 44
तच् छ्रुत्वा प्रतिपेदे ऽस्या विहितानुनयो हरः
कथां कथयितुम् दिव्यां, ततः कोपं मुमोच सा । 45
न ऽइह केश्चित् प्रवेष्टव्यम् इत्य् उक्तेन तया स्वयं
निरुद्धे नन्दिना द्वारि, हरो वक्तुं प्रचक्रमे । 46

एकान्तसुखिनो देवा, मनुष्या नित्यदुःखिनः,
दिव्यमानुषचेष्टा तु परभागेन हारिणी. । 47
विद्याधराणां चरितम् अतस् ते वर्णयाम्य् अहं
इति देव्या हरो यावद् वक्ति, तावद् उपागमत् । 48
प्रसादवित्तकः शम्भोः पुष्पदन्तो गणोत्तमः,
न्यषेधि च प्रवेशो ऽस्य नन्दिना द्वारि तिष्ठता । 49
निष्कारणं निषेधो ऽद्य मम 'अपि 'इति कुतूहलात्
अलक्षितो योगवशात् प्रविवेश स तत्क्षणात् । 50
प्रविष्टः श्रुतवान् सर्वं वर्ण्यमाणं पिनाकिना
विद्याधराणां सप्तानाम् अपूर्वं चरिताद्भुतं । 51
श्रुत्वा च गत्वा भार्यायै जयायै सो ऽप्य् अवर्णयत्.
को हि वित्तं रहस्यं वा स्त्रीषु शक्नोति गूहितुं? । 52
सा 'अपि तद्विस्मयाविष्टा गत्वा गिरिसुताग्रतः
जगौ जया प्रतीहारीः. स्त्रीणां वाक्संयमः कुतः? । 53
ततश् चुकोप गिरिजा, न 'अपूर्वं वर्णितं त्वया
जानाति हि जया 'अप्य् एतद् इति च 'ईश्वरम् अभ्यधात् । 54
प्रणिधानाद् अथ ज्ञात्वा जगाद 'एवम् उमापतिः,
योगीभूत्वा प्रविश्य 'इदं पुष्पदन्तस् तथा 'अशृणोत् । 55
जयायै वर्णितं तेन, न 'अन्यो जानाति कः प्रिये.
श्रुत्वा 'इत्य् आनाययद् देवी पुष्पदन्तम् अतिक्रुधा । 56

मर्त्यो भव ऽतिविनीत इति विह्वलन्तं शशाप सा,
माल्यवन्तं च विज्ञप्तिं कुर्वाणं तत्कृते गणं । 57
निपत्य पादयोस् ताभ्यां जयया सह बोधिता
शापान्तं प्रति शर्वाणी शनैर् वचनम् अब्रवीत् । 58
विन्ध्याटव्यां कुवेरस्य शापात् प्राप्तः पिशाचतां
सुप्रतीकाभिधो यक्षः काणभूत्याख्यया स्थितः । 59
तं दृष्ट्वा संस्मरन् जातिं यदा तस्मै कथाम् इमां
पुष्पदन्त प्रवक्तासि तदा शापाद् विमोक्ष्यसे । 60
काणभूतिः कथां तां तु यदा श्रोष्यति माल्यवान्
काणभूतौ तदा मुक्ते कथां प्रख्याप्य मोक्ष्यसे । 61
इत्य् उक्त्वा शैलतनया व्यरमत्, तौ च तत्क्षणात्
विद्युत्पुञ्जाव् इव गणौ दृष्टनष्टौ बभूवतुः । 62
अथ जातु याति काले
गौरी पप्रच्छ शङ्करं सदया,
देव मया तौ शप्तौ
प्रमथवरौ कुत्र भुवि जातौ? । 63
अवदच् च चन्द्रमौलिः,
कौशाम्बी इत्य् अस्ति या महानगरी
तस्यां स पुष्पदन्तो
वररुचिनामा प्रिये जातः । 64

अन्यच् च, माल्यवान् अपि
नगरवरे सुप्रतिष्ठिताख्ये सः
जातो गुणाढ्यनामा,
देवि तयोर् एष वृत्तान्तः । 65
एवं निवेद्य स विभुः सततानुवृत्त-
भृत्यावमाननविभावनसानुतापं
कैलासशैलतटकल्पितकल्पवल्ली-
लीलागृहेषु दयितां रमयन् उवास । 66

। इति ।
॥ प्रथमस् तरङ्गः ॥

TARANGA. 2.

ततः स मर्त्यवपुषा पुष्पदन्तः परिभ्रमन्
नाम्ना वररुचिः किंच कात्यान इति श्रुतः । 1
पारं संप्राप्य विद्यानां, कृत्वा नन्दस्य मन्त्रितां,
खिन्नः समाययौ द्रष्टुं कदाचिद् विन्ध्यवासिनीं । 2
तपसा ऽऽराधिता देवी स्वप्नादेशेन सा च तं
प्राहिणोद् विन्ध्यकान्तारं काणभूतिम् अवेक्षितुं । 3
व्याघ्रवानरसंकीर्णे निस्तोयपरुषद्रुमे
भ्रमंस् तत्र स च प्रांशुं न्यग्रोधतरुम् ऐक्षत । 4
ददर्श च समीपे ऽस्य पिशाचानां शतैर् वृतं
काणभूतिं पिशाचं तं वर्ष्मणा शालसन्निभं । 5
स काणभूतिना दृष्ट्वा कृतपादोपसंग्रहः
कात्यायनो जगाद ऽएनम् उपविष्टः क्षणान्तरे । 6
सदाचारो भवान् एव, कथम् एतां गतिं गतः?
तच् छ्रुत्वा कृतसौहार्दं काणभूतिस् तम् अब्रवीत् । 7
स्वतो मे न ऽस्ति विज्ञानं, किंतु शर्वान् मया श्रुतं
उज्जयिन्यां श्मशाने यच्, छृणु, तत् कथयामि ते । 8

कपालेषु श्मशानेषु कस्माद् देव रतिस् तव?
इति पृष्टस् ततो देव्या भगवान् इदम् अब्रवीत् । 9
पुरा कल्पक्षये वृत्ते जातं जलमयं जगत्,
मया ततो विभिद्य ऽऊरुं रक्तबिन्दुर् निपातितः । 10
जलान्तस् तद् अभूद् अण्डं, तस्माद् वेधा गतः पुमान्,
निरगच्छत् ततः सृष्टा सर्गाय प्रकृतिर् मया । 11
तौ च प्रजापतीन् अन्यान् सृष्टवन्तौ, प्रजाश् च ते;
अतः पितामहः प्रोक्तः स पुमान् जगति प्रिये । 12
एवं चराचरं सृष्ट्वा विश्वं दर्पम् अगाद् असौ
पुरुषस्, तेन मूर्धानम् अथ ऽएतस्य ऽअहम् अच्छिदं । 13
ततो ऽनुतापेन मया महाव्रतम् अगृह्यत;
अतः कपालपाणित्वं, श्मशानप्रियता च मे । 14
किंच, ऽएतन् मे कपालात्मजगद् देवि करे स्थितं,
पूर्वोक्ताण्डकपाले द्वे रोदसी कीर्तिते यतः । 15
इत्य् उक्ते शम्भुना तत्र श्रोष्यामि ऽइति सकौतुके
स्थिते मयि, ततो भूयः पार्वती पतिम् अभ्यधात् । 16
स पुष्पदन्तः कियता कालेन ऽअस्मान् उपैष्यति?
तद् आकर्ण्य ऽअवदद् देवीं माम् उद्दिश्य महेश्वरः । 17
पिशाचो दृश्यते यो ऽयम्, एष वैश्रवणानुगः
यक्षो, मित्रम् अभूच् च ऽअस्य रक्षः स्थूलशिरा इति । 18

संगतं तेन पापेन निरीक्ष्य 'एनं धनाधिपः,
विन्ध्याटव्यां पिशाचं तम् आदिशद् धनदेश्वरः । 19
भ्रात्रा 'अस्य दीर्घजङ्घेन पतित्वा पादयोस् ततः
शापान्तं प्रति विज्ञप्तो वदति स्म धनाधिपः । 20
शापावतीर्णाद् आकर्ण्य पुष्पदन्तान् महाकथां,
उक्त्वा माल्यवतस् तां च शापात् प्राप्तस्य मर्त्यतां, । 21
ताभ्यां गणाभ्यां सहितः शापम् एवं तरिष्यति;
इति 'इह धनदेन 'अस्य शापान्तो विहितस् तदा, । 22
त्वया च पुष्पदन्तस्य स एव 'इति स्मर प्रिये.
एतच् छ्रुत्वा वचः शम्भोः सहर्षो ऽहम् इह 'आगतः । 23
इत्थं मे शापदोषो ऽयं पुष्पदन्तागमावधिः.
इत्य् उक्त्वा विरते तस्मिन् काणभूतौ च, तत्क्षणं । 24
स्मृत्वा वररुचिर् जातिं सुप्तोत्थित इव 'अवदत्,
स एव पुष्पदन्तो ऽहं, मत्तस् तां च कथां शृणु । 25
इत्य् उक्त्वा ग्रन्थलक्षाणि सप्त सप्तमहाकथाः
कात्यायनेन कथिताः; काणभूतिस् ततो ऽब्रवीत् । 26
देव रुद्रावतारस् त्वं, को ऽन्यो वेत्ति कथाम् इमां,
त्वत्प्रसादाद् गतप्रायः स शापो मे शरीरतः । 27
तद् ब्रूहि निजवृत्तान्तं जन्मनः प्रभृति प्रभो,
मां पवित्रय भूयो ऽपि, न गोप्यं यदि मादृशे । 28

ततो वररुचिस् तस्य प्रणतस्य 'अनुरोधतः
सर्वम् आजन्मवृत्तान्तं विस्तराद् इदम् अब्रवीत् । 29

कौशाम्ब्यां सोमदत्ताख्यो नाम्ना 'अग्निशिख इत्य् अपि
द्विजो ऽभूत्, तस्य भार्या च वसुदत्ताभिधा 'अभवत् । 30
मुनिकन्या च सा शापात् तस्यां जाताव् अवातरत्;
तस्यां तस्माद् द्विजवराद् एष जातो ऽस्मि शापतः । 31
ततो मम 'अतिबालस्य पिता पञ्चत्वम् आगतः,
अतिष्ठद् वर्धयन्ती तु माता मां कृच्छ्रकर्मभिः । 32
अथ 'अभ्यगच्छतां विप्रौ द्वाव् अस्मद्गृहम् एकदा
एकरात्रिनिवासार्थं दूराध्वपरिधूसरौ । 33
तिष्ठतोस् तत्र च तयोर् उदभून् मुरजध्वनिः,
तेन माम् अब्रवीन् माता भर्तुः स्मृत्वा सगद्गदं । 34
नृत्यत्य् एष पितुर् मित्रं भवनन्दो नटः सुत.
अहम् अप्य् अवदं मातुर्, द्रष्टुम् एतद् व्रजाम्य् अहं, । 35
तव 'अपि दर्शयिष्यामि सपाठं सर्वम् एव तत्.
एतन् मद्वचनं श्रुत्वा विप्रौ तौ विस्मयं गतौ । 36
अवोचत् तौ च मन्माता, हे पुत्रौ न 'अत्र संशयः,
सकृच्छ्रुतम् अयं बालः सर्वं च 'आधारयेद् धृदि । 37
जिज्ञासार्थम् अथ 'आभ्यां मे प्रातिशाख्यम् अपठ्यत,
तथा 'एव 'एतन् मया सर्वं पठितं पश्यतोस् तयोः । 38

ततस् ताभ्यां सह गत्वा, दृष्ट्वा नाट्यं तथा 'एव तत्,
गृहम् एत्य 'अग्रतो मातुः सर्वं दर्शितं मया । 39
एकश्रुतधरत्वेन मां निश्चित्य कथाम् इमां
व्याडिनामा तयोर् एको मन्मातुः प्रणतो ऽब्रवीत् । 40
वेतसाख्ये पुरे मातर् देवस्वामिकरम्भकौ
अभूतां भ्रातरौ विप्राव् अतिप्रीतौ परस्परं । 41
तयोर् एकस्य पुत्रो ऽयम् इन्द्रदत्तो, परस्य तु
अहं व्याडिः समुत्पन्नो, मत्पिता 'अस्तं गतस् ततः । 42
तच्छोकाद् इन्द्रदत्तस्य पिता यातो महापथं,
अस्मज्जनन्योश् च ततः स्फुटितं हृदयं शुचा । 43
तेन 'अनाथौ, सति धने ऽप्य्, आवां विद्याभिकाङ्क्षिणौ
गतौ प्रार्थयितुं स्वामिकुमारं दक्षिणापथं । 44
तपःस्थितौ च तत्र 'आवां स स्वप्ने प्रभुर् आदिशत्,
अस्ति पाटलिकं नाम पुरं नन्दस्य भूपतेः । 45
तत्र 'अस्ति च 'एको वर्षाख्यो विप्रस्; तस्माद् अवाप्स्यथः
कृत्स्नां विद्याम्, अतस् तत्र युवाभ्यां गम्यताम् इति । 46
अथ 'आवां तत्पुरं यातौ, पृच्छतोस् तत्र च 'आवयोः,
अस्ति 'इह मूर्खो वर्षाख्यो विप्र इत्य् अवदज् जनः । 47
ततो दोलाधिरूढेन गत्वा चित्तेन तद्गृहं
गृहम् आवाम् अपश्याव वर्षस्य विधुरस्थिति । 48

मूषकैः कृतवल्मीकं भित्तिविश्लेषजर्जरं
विहायं हृदिषा क्षीनं जन्मक्षेत्रम् इव 'आपदां । 49
तत्र ध्यानस्थितं वर्षम् आलोक्य 'अभ्यन्तरे तदा
उपागतौ स्वस् तत्पत्नीं विहिताथित्यसत्क्रियां । 50
धूसरक्षामवपुषीं विशीर्णमलिनाम्बरां
गुणरागागतां तस्य रूपिणीम् इव दुर्गतिं । 51
प्रणामपूर्वम् आवाभ्यां तस्यै सो ऽथ निवेदितः
स्ववृत्तान्तश् च तद्भर्तुर्मौर्ख्यवार्ता च या श्रुता । 52
पुत्रौ, युवां मे का लज्जा, श्रूयतां कथयामि वां;
इत्य् उक्त्वा सा 'आवयोः साध्वी कथाम् एताम् अवर्णयत् । 53
शङ्करस्वामिनामा 'अत्र नगरे ऽभूद् द्विजोत्तमः,
मद्भर्ता च 'उपवर्षश् च तस्य पुत्राव् इमाव् उभौ । 54
अयं मूर्खो दरिद्रश् च, विपरीतो ऽस्य च 'अनुजः,
तेन च 'अस्य नियुक्ता 'अभूत् स्वभार्या गृहपोषणे । 55
कदाचिद् अथ संप्राप्ता प्रावृट्, तस्यां च योषितः
सगुडं पिष्टरचितं गुह्यरूपं जुगुप्सितं । 56
कृत्वा विप्राय मूर्खाय ददत्य् एवंकृते हि ताः
शीतकाले निदाघे च स्नाने क्लेशक्लमापहं । 57
दत्तं न प्रतिपद्यन्त इत्य् आचारो हि कुत्सितः,
तद् देवरगृहिण्या मे दत्तम् अस्मै सदक्षिणं । 58

तद् गृहीत्वा ऽयम् आयातो मया निर्भर्त्सितो भृशं,
मूर्खभावकृतेन ऽन्तर्मन्युना पर्यतप्यत । 59
ततः स्वामिकुमारस्य पादमूलं गतो ऽभवत्;
तपस्तुष्टेन तेन ऽस्य सर्वा विद्याः प्रकाशिताः । 60
सकृच्छ्रुतधरं विप्रं प्राप्य ऽएतास् त्वं प्रकाशयेः,
इत्य् आदिष्टः स तेन ऽएव सहर्षो ऽयम् इह ऽआगतः । 61
आगत्य ऽएव च वृत्तान्तं सर्वं मह्यं न्यवेदयत्.
तदाप्रभृत्य् अविरतं जपन् ध्यायंश् च तिष्ठति । 62
अतः श्रुतधरं कंचिद् अन्विष्य ऽआनयतं युवां,
तेन सर्वार्थसिद्धिर् वां भविष्यति न संशयः । 63
श्रुत्वा ऽएतद् वर्षपत्नीतस्, तूर्णं दौर्गत्यहानये
दत्वा हेमशतं च ऽअस्यै, निर्गतौ स्वस् ततः पुरात् । 64
अथ ऽआवां पृथिवीं भ्रान्तौ न च श्रुतधरं क्वचित्
लब्धवन्तौ, ततः श्रान्तौ प्राप्ताव् अद्य गृहं तव । 65
एकश्रुतधरः प्राप्तो बालो ऽयं तनयस् तव,
तद् एनं देहि, गच्छामो विद्याद्रविणसिद्धये । 66
इति व्याडिवचः श्रुत्वा मन्माता सादरा ऽअवदत्,
सर्वं संगतम् एव ऽएतद्, अस्त्य् अत्र प्रत्ययो मम । 67
तथा हि पूर्वं जाते ऽस्मिन्न् एकपुत्रे मम स्फुटा
गगणाद् एवम् उदभूद् अशरीरा सरस्वती । 68

एकान्तसुखिनो देवा, मनुष्या नित्यदुःखिनः,
दिव्यमानुषचेष्टा तु परभागेन हारिणी, । 47
विद्याधराणां चरितम् अतस् ते वर्णयाम्य् अहं
इति देव्या हरो यावद् वक्ति, तावद् उपागमत् । 48
प्रसादवित्तकः शम्भोः पुष्पदन्तो गणोत्तमः,
न्यषेधि च प्रवेशो ऽस्य नन्दिना द्वारि तिष्ठता । 49
निष्कारणं निषेधो ऽद्य मम अपि इति कुतूहलात्
अलक्षितो योगवशात् प्रविवेश स तत्क्षणात् । 50
प्रविष्टः श्रुतवान् सर्वं वर्ण्यमाणं पिनाकिना
विद्याधराणां सप्तानाम् अपूर्वं चरिताद्भुतं । 51
श्रुत्वा च गत्वा भार्यायै जयायै सो ऽप्य् अवर्णयत्,
को हि वित्तं रहस्यं वा स्त्रीषु शक्नोति गूहितुं? । 52
सा अपि तद्विस्मयाविष्टा गत्वा गिरिसुताग्रतः
जगौ जया प्रतीहारीः, स्त्रीणां वाक्संयमः कुतः? । 53
ततश् चुकोप गिरिजा, न अपूर्वं वर्णितं त्वया
जानाति हि जया अप्य् एतद् इति च ईश्वरम् अभ्यधात् । 54
प्रणिधानाद् अथ ज्ञात्वा जगाद एवम् उमापतिः,
योगीभूत्वा प्रविश्य इदं पुष्पदन्तस् तदा अशृणोत् । 55
जयायै वर्णितं तेन, न अन्यो जानाति कः प्रिये,
श्रुत्वा इत्य् आनाययद् देवी पुष्पदन्तम् अतिक्रुधा । 56

मर्त्यो भव ऽतिविनीत ऽइति विह्वलन्तं शशाप सा,
माल्यवन्तं च विज्ञप्तिं कुर्वाणं तत्कृते गणं । 57
निपत्य पादयोस् ताभ्यां जयया सह बोधिता
शापान्तं प्रति शर्वाणी शनैर् वचनम् अब्रवीत् । 58
विन्ध्याटव्यां कुवेरस्य शापात् प्राप्तः पिशाचतां
सुप्रतीकाभिधो यक्षः काणभूत्याख्यया स्थितः । 59
तं दृष्ट्वा संस्मरन् जातिं यदा तस्मै कथाम् इमां
पुष्पदन्त प्रवक्तासि तदा शापाद् विमोक्ष्यसे । 60
काणभूतिः कथां तां तु यदा श्रोष्यति माल्यवान्
काणभूतौ तदा मुक्ते कथां प्रख्याप्य मोक्ष्यसे । 61
इत्य् उक्त्वा शैलतनया व्यरमत्, तौ च तत्क्षणात्
विद्युत्पुञ्जाव् इव गणौ दृष्टनष्टौ बभूवतुः । 62
अथ जातु याति काले
गौरी पप्रच्छ शङ्करं सदया,
देव मया तौ शप्तौ
प्रमथवरौ कुत्र भुवि जातौ? । 63
अवदच् च चन्द्रमौलिः,
कौशाम्बी ऽइत्य् अस्ति या महानगरी
तस्यां स पुष्पदन्तो
वररुचिनामा प्रिये जातः । 64

अन्यच् च, माल्यवान् अपि
  नगरवरे सुप्रतिष्ठिताख्ये सः
ज्ञातो गुणाढ्यनामा,
  देवि तयोर् एष वृत्तान्तः । 65
एवं निवेद्य स विभुः सततानुवृत्त-
भृत्यावमाननविभावनसानुतापं
कैलासशैलतटकल्पितकल्पवल्ली-
लीलागृहेषु दयितां रमयन् उवास । 66

। इति ।
॥ प्रथमस् तरङ्गः ॥

TARANGA. 2.

ततः स मर्त्यवपुषा पुष्पदन्तः परिभ्रमन्
नाम्ना वररुचिः किंच कात्यान इति श्रुतः । 1
पारं संप्राप्य विद्यानां, कृत्वा नन्दस्य मन्त्रितां,
खिन्नः समाययौ द्रष्टुं कदाचिद् विन्ध्यवासिनीं । 2
तपसा ऽऽराधिता देवी स्वप्नादेशेन सा च तं
प्राहिणोद् विन्ध्यकान्तारं काणभूतिम् अवेक्षितुं । 3
व्याघ्रवानरसंकीर्णे निस्तोयपरुषद्रुमे
भ्रमंस् तत्र स च प्रांशुं न्यग्रोधतरुम् ऐक्षत । 4
ददर्श च समीपे ऽस्य पिशाचानां शतैर् वृतं
काणभूतिं पिशाचं तं वर्ष्मणा शालसन्निभं । 5
स काणभूतिना दृष्ट्वा कृतपादोपसंग्रहः
कात्यायनो जगाद ऽऽएनम् उपविष्टः क्षणान्तरे । 6
सदाचारो भवान् एव, कथम् एतां गतिं गतः?
तच् छ्रुत्वा कृतसौहार्दं काणभूतिस् तम् अब्रवीत् । 7
स्वतो मे न ऽस्ति विज्ञानं, किंतु शर्वान् मया श्रुतं
उज्जयिन्यां श्मशाने यच्, छृणु, तत् कथयामि ते । 8

कपालेषु श्मशानेषु कस्माद् देव रतिस् तव?
इति पृष्टस् ततो देव्या भगवान् इदम् अब्रवीत् । 9
पुरा कल्पक्षये वृत्ते जातं जलमयं जगत्,
मया ततो विभिद्य ऊरुं रक्तबिन्दुर् निपातितः । 10
जलान्तस् तद् अभूद् अण्डं, तस्माद् वेधा गतः पुमान्,
निरगच्छत् ततः सृष्टा सर्गाय प्रकृतिर् मया । 11
तौ च प्रजापतीन् अन्यान् सृष्टवन्तौ, प्रजास् च ते;
अतः पितामहः प्रोक्तः स पुमान् जगति प्रिये । 12
एवं चराचरं सृष्ट्वा विश्वं दर्पम् अगाद् असौ
पुरुषस्, तेन मूर्धानम् अथ एतस्य अहम् अच्छिदं । 13
ततो ऽनुतापेन मया महाव्रतम् अगृह्यत;
अतः कपालपाणित्वं, श्मशानप्रियता च मे । 14
किंच, एतन् मे कपालात्मजगद् देवि करे स्थितं,
पूर्वोक्ताण्डकपाले द्वे रोदसी कीर्तिते यतः । 15
इत्य् उक्ते शम्भुना तत्र श्रोष्यामि इति सकौतुके
स्थिते मयि, ततो भूयः पार्वती पतिम् अभ्यधात् । 16
स पुष्पदन्तः कियता कालेन अस्मान् उपैष्यति?
तद् आकर्ण्य अवदद् देवीं माम् उद्दिश्य महेश्वरः । 17
पिशाचो दृश्यते यो ऽयम्, एष वैश्रवणानुगः
यक्षो, मित्रम् अभूच् च अस्य रक्षः स्थूलशिरा इति । 18

संगतं तेन पापेन निरीक्ष्य 'एनं धनाधिपः,
विन्ध्याटव्यां पिशाचं तम् आदिशद् धनदेश्वरः । 19
भ्रात्रा 'अस्य दीर्घजङ्घेन पतित्वा पादयोस् ततः
शापान्तं प्रति विज्ञप्तो वदति स्म धनाधिपः । 20
शापावतीर्णाद् आकर्ण्य पुष्पदन्तान् महाकथां,
उक्त्वा माल्यवतस् तां च शापात् प्राप्तस्य मर्त्यतां, । 21
ताभ्यां गणाभ्यां सहितः शापम् एवं तरिष्यति;
इति 'इह धनदेन 'अस्य शापान्तो विहितस् तदा, । 22
त्वया च पुष्पदन्तस्य स एव 'इति स्मर प्रिये.
एतच् छ्रुत्वा वचः शम्भोः सहर्षो ऽहम् इह 'आगतः । 23
इत्थं मे शापदोषो ऽयं पुष्पदन्तागमावधिः.
इत्य् उक्त्वा विरते तस्मिन् काणभूतौ च, तत्क्षणं । 24
स्मृत्वा वररुचिर् जातिं सुप्तोत्थित इव 'अवदत्,
स एव पुष्पदन्तो ऽहं, मत्तस् तां च कथां शृणु । 25
इत्य् उक्त्वा ग्रन्थलक्षाणि सप्त सप्तमहाकथाः
कात्यायनेन कथिताः; काणभूतिस् ततो ऽब्रवीत् । 26
देव रुद्रावतारस् त्वं, को ऽन्यो वेत्ति कथाम् इमां,
त्वत्प्रसादाद् गतप्रायः स शापो मे शरीरतः । 27
तद् ब्रूहि निजवृत्तान्तं जन्मनः प्रभृति प्रभो,
मां पवित्रय भूयो ऽपि, न गोप्यं यदि मादृशे । 28

ततो वररुचिस् तस्य प्रणतस्य 'अनुरोधतः
सर्वम् आजन्मवृत्तान्तं विस्तराद् इदम् अब्रवीत् । 29

कौशाम्ब्यां सोमदत्ताख्यो नाम्ना 'अग्निशिख इत्य् अपि
द्विजो ऽभूत्, तस्य भार्या च वसुदत्ताभिधा 'अभवत् । 30
मुनिकन्या च सा शापात् तस्यां जाताव् अवातरत्;
तस्यां तस्माद् द्विजवराद् एष जातो ऽस्मि शापतः । 31
ततो मम 'अतिबालस्य पिता पञ्चत्वम् आगतः,
अतिष्ठद् वर्धयन्ती तु माता मां कृच्छ्रकर्मभिः । 32
अथ 'अभ्यगच्छतां विप्रौ द्वाव् अस्मद्गृहम् एकदा
एकरात्रिनिवासार्थं दूराध्वपरिधूसरौ । 33
तिष्ठतोस् तत्र च तयोर् उदभून् मुरजध्वनिः,
तेन माम् अब्रवीन् माता भर्तुः स्मृत्वा सगद्गदं । 34
नृत्यत्य् एष पितुर् मित्रं भवनन्दो नटः सुत.
अहम् अप्य् अवदं मातुर्, द्रष्टुम् एतद् व्रजाम्य् अहं, । 35
तव 'अपि दर्शयिष्यामि सपाठं सर्वम् एव तत्.
एतन् मद्वचनं श्रुत्वा विप्रौ तौ विस्मयं गतौ । 36
अवोचत् तौ च मन्माता, हे पुत्रौ न 'अत्र संशयः,
सकृच्छ्रुतम् अयं बालः सर्वं च 'आधारयेद् धृदि । 37
जिज्ञासार्थम् अथ 'आभ्यां मे प्रातिशाख्यम् अपठ्यत,
तथा 'एव 'एतन् मया सर्वं पठितं पश्यतोस् तयोः । 38

ततस् ताभ्यां सह गत्वा, दृष्ट्वा नाट्यं तथा 'एव तत्,
गृहम् एत्य 'अग्रतो मातुः सर्वं दर्शितं मया । 39
एकश्रुतधरत्वेन मां निश्चित्य कथाम् इमां
व्याडिनामा तयोर् एको मन्मातुः प्रणतो ऽब्रवीत् । 40
वेतसाख्ये पुरे मातर् देवस्वामिकरम्भकौ
अभूतां भ्रातरौ विप्राव् अतिप्रीतौ परस्परं । 41
तयोर् एकस्य पुत्रो ऽयम् इन्द्रदत्तो, परस्य तु
अहं व्याडिः समुत्पन्नो, मत्पिता 'अस्तं गतस् ततः । 42
तच्छोकाद् इन्द्रदत्तस्य पिता यातो महापथं,
अस्मज्जनन्योश् च ततः स्फुटितं हृदयं शुचा । 43
तेन 'अनाथौ, सति धने ऽप्य्, आवां विद्याभिकाङ्क्षिणौ
गतौ प्रार्थयितुं स्वामिकुमारं दक्षिणापथं । 44
तपःस्थितौ च तत्र 'आवां स स्वप्ने प्रभुर् आदिशत्,
अस्ति पाटलिकं नाम पुरं नन्दस्य भूपतेः । 45
तत्र 'अस्ति च 'एको वर्षाख्यो विप्रस्; तस्माद् अवाप्स्यथः
कृत्स्नां विद्याम्, अतस् तत्र युवाभ्यां गम्यताम् इति । 46
अथ 'आवां तत्पुरं यातौ, पृच्छतोस् तत्र च 'आवयोः,
अस्ति 'इह मूर्खो वर्षाख्यो विप्र इत्य् अवदञ् जनः । 47
ततो दोलाधिरूढेन गत्वा चित्तेन तत्क्षणं
गृहम् आवाम् अपश्याव वर्षस्य विधुरस्थिति । 48

मूषकैः कृतवल्मीकं भित्तिविश्लेषजर्जरं
विश्लायं छदिषा हीनं जन्मक्षेत्रम् इव 'आपदां । 49
तत्र ध्यानस्थितं वर्षम् आलोक्य 'अभ्यन्तरे तदा
उपागतौ स्वस् तत्पत्नीं विहिताथित्यसत्क्रियां । 50
धूसरक्षामवपुषीं विशीर्णमलिनाम्बरां
गुणरागागतां तस्य रूपिणीम् इव दुर्गतिं । 51
प्रणामपूर्वम् आवाभ्यां तस्यै सो ऽथ निवेदितः
स्ववृत्तान्तस् च तद्भर्तृमौर्ख्यवार्ता च या श्रुता । 52
पुत्रौ, युवां मे का लज्जा, श्रूयतां कथयामि वां;
इत्य् उक्त्वा सा 'आवयोः साध्वी कथाम् एताम् अवर्णयत् । 53
शङ्करस्वामिनामा 'अत्र नगरे ऽभूद् द्विजोत्तमः,
मद्भर्ता च 'उपवर्षस् च तस्य पुत्राव् इमाव् उभौ । 54
अयं मूर्खो दरिद्रस् च, विपरीतो ऽस्य च 'अनुजः,
तेन च 'अस्य नियुक्ता 'अभूत् स्वभार्या गृहपोषणे । 55
कदाचिद् अथ संप्राप्ता प्रावृट्, तस्यां च योषितः
सगुडं पिष्टरचितं गुह्यरूपं जुगुप्सितं । 56
कृत्वा विप्राय मूर्खाय ददत्य् एवंकृते हि ताः
शीतकाले निदाघे च स्नाने क्लेशक्लमापहे । 57
दत्तं न प्रतिपद्यन्त इत्य् आचारो हि कुत्सितः,
तद् देवरगृहिण्या मे दत्तम् अस्मै सदक्षिणं । 58

तद् गृहीत्वा ऽयम् आयातो मया निर्भर्त्सितो भृशं,
मूर्खभावकृतेन ऽन्तर्मन्युना पर्यतप्यत । 59
ततः स्वामिकुमारस्य पादमूलं गतो ऽभवत्;
तपस्तुष्टेन तेन ऽस्य सर्वा विद्याः प्रकाशिताः । 60
सकृच्छ्रुतधरं विप्रं प्राप्य ऽएतास् त्वं प्रकाशयेः,
इत्य् आदिष्टः स तेन ऽएव सद्यो ऽयम् इह ऽआगतः । 61
आगत्य ऽएव च वृत्तान्तं सर्वं मह्यं न्यवेदयत्.
तदाप्रभृत्य् अविरतं जपन् ध्यायंश् च तिष्ठति । 62
अतः श्रुतधरं कंचिद् अन्विष्य ऽआनयतं युवां,
तेन सर्वार्थसिद्धिर् वां भविष्यति न संशयः । 63

श्रुत्वा ऽएतद् वर्षपत्नीतस्, तूर्णं दौर्गत्यहानये
दत्त्वा हेमशतं च ऽअस्यै, निर्गतौ स्वस् ततः पुरात् । 64
अथ ऽआवां पृथिवीं भ्रान्तौ न च श्रुतधरं क्वचित्
लब्धवन्तौ, ततः श्रान्तौ प्राप्ताव् अद्य गृहं तव । 65
एकश्रुतधरः प्राप्तो बालो ऽयं तनयस् तव,
तद् एनं देहि, गच्छामो विद्याद्रविणसिद्धये । 66

इति व्याडिवचः श्रुत्वा मन्माता सादरा ऽअवदत्,
सर्वं संगतम् एव ऽएतद्, अस्त्य् अत्र प्रत्ययो मम । 67
तथा हि पूर्वं जाते ऽस्मिन्न् एकपुत्रे मम स्फुटा
गगणाद् एवम् उदभूद् अशरीरा सरस्वती । 68

एकश्रुतधरो जातो विद्यां वर्षाद् अवाप्स्यति,
किंच व्याकरणं लोके प्रतिष्ठां प्रापयिष्यति । 69
नाम्ना वररुचिस् च अयं, तत् तद् अस्मै हि रोचते
यद् यद् वरं भवेत् किंचिद्, इत्य् उक्त्वा वाग् उपारमत् । 70
अत एव विवृद्धे ऽस्मिन् बालके चिन्तयाम्य् अहं,
क्व स वर्ष उपाध्यायो भवेद्, इति दिवा निशं । 71
अद्य युष्मन्मुखात् ज्ञात्वा परितोषस् च मे परः,
तद् एनं नयतं, भ्राता युवयोर् एष का क्षतिः? । 72
इति मन्मातृवचनं श्रुत्वा तौ हर्षनिर्भरौ
व्याडीन्द्रदत्तौ तां रात्रिम् अबुध्येतां क्षणोपमां । 73
अथ उत्सवार्थम् अम्बायास् तूर्णं दत्त्वा धनं निजं
व्याडिना एव उपनीतो ऽहं वेदार्हत्वं मम इच्छता । 74
ततो मात्रा अभ्यनुज्ञातं कथंचिद् रुद्धबाष्पया
माम् आदाय निजोत्साहशमिताशेषतद्व्यथं । 75
मन्यमानौ च कौमारं पुष्पितं तदनुग्रहं
व्याडीन्द्रदत्तौ तरसा नगर्याः प्रस्थितौ ततः । 76
अथ क्रमेण वर्षस्य गृहं प्राप्ता वयं गुरोः,
स्कन्दप्रसादम् आयातं मूर्तं मां सो ऽप्य् अमन्यत । 77
कृत्वा अस्मान् अग्रतो ऽन्येद्युर् उपविष्टः शुचौ भुवि
वर्षोपाध्याय ओंकारम् अकरोद् दिव्यया गिरा । 78

तदनन्तरम् एव ऽस्य वेदाः साङ्गा उपस्थिताः,
अध्यापयितुम् अस्मांश् च प्रवृत्तो ऽभूद् असौ ततः । 79
सकृच्छ्रुतं मया तत्र, द्विःश्रुतं व्याडिना तथा,
त्रिःश्रुतं च ऽइन्द्रदत्तेन गुरुणा ऽउक्तम् अगृह्यत । 80
ध्वनिम् अथ तम् अपूर्वं दिव्यम् आकर्ण्य सद्यः
सपदि विलसदन्तर्विस्मयो विप्रवर्गः
किम् इदम् इति समन्ताद् द्रष्टुम् अभ्येत्य, वर्षं
स्तुतिमुखरमुखश्रीर् अर्चति स्म प्रणामैः । 81
किमपि तद् अवलोक्य तत्र चित्रं
प्रमदवशान् न परं तदा ऽउपवर्षः
अपि विततमहोत्सवः समग्रः
समजनि पाटलिपुत्रपौरलोकः । 82
राजा ऽपि तं गिरिशसूनुवरप्रभावम्
आलोक्य तस्य परितोषम् उपेत्य नन्दः
वर्षस्य वेश्म वसुभिः स किल ऽआदरेण
तत्कालम् एव समपूरयद् उन्नतश्रीः । 83

। इति ।
॥ द्वितीयस् तरङ्गः ॥

TARANGA. 3.

एवम् उक्त्वा वररुचिः शृण्वत्य् एकाग्रमानसे
काणभूतौ वने तत्र पुनर् एव ऽइदम् अब्रवीत् । 1

कदाचिद् याति काले ऽथ कृते स्वाध्यायकर्मणि
इति वर्ष उपाध्यायः पृष्टो ऽस्माभिः कृताह्निकः । 2
इदम् एवंविधं कस्मान् नगरं क्षेत्रतां गतं
सरस्वत्याश् च लक्ष्म्याश् च, तद् उपाध्याय कथ्यतां । 3
तच् छ्रुत्वा सो ऽब्रवीद् अस्मान्, शृणुत ऽएतत्कथाम् इमां.

तीर्थं कनखलं नाम गङ्गाद्वारे ऽस्ति पावनं । 4
यत्र काञ्चनपातेन जाह्नवी देवदन्तिना
उशीनरगिरिप्रस्थाद् भित्त्वा तम् अवतारिता । 5
दाक्षिणात्यो द्विजः कश्चित् तपस्यन् भार्यया सह
तत्र ऽआसीत्, तस्य च ऽअत्र ऽएव जायन्ते स्म त्रयः सुताः । 6
कालेन स्वर्गते तस्मिन् सभार्ये, ते च तत्सुताः
स्थानं राजगृहं नाम जग्मुर् विद्यार्जनेच्छया । 7

तत्र च ऽधीतविद्यास् ते त्रयो ऽप्य् अनाथ्यदुःखिताः
ययुः स्वामिकुमारस्य दर्शने दक्षिणापथं । 8
ततस् ते चिञ्चिनीं नाम नगरीम् अम्बुधेस् तटे
गत्वा, भोजिकसंज्ञस्य विप्रस्य न्यवसन् गृहे । 9
स च कन्या निजास् तिस्रस् तेभ्यो दत्वा धनानि च,
तपसे ऽनन्यसन्तानो गङ्गां याति स्म भोजिकः । 10
अथ तेषां निवसतां तत्र श्वशुरवेश्मनि
अवग्रहकृतस् तीव्रो दुर्भिक्षः समजायत । 11
तेन भार्याः परित्यज्य साध्वीस् तास्, ते त्रयो ययुः.
स्पृशन्ति न नृशंसानां हृदयं बन्धुबुद्धयः । 12
ततस् तु मध्यमा तासां सगर्भा ऽभूत्, ततश् च ताः
भवनं यज्ञदत्तस्य पितृमित्रस्य शिश्रियुः । 13
तत्र तस्थुर् निजान् भर्तॄन् ध्यायन्त्यः क्लिष्टवृत्तयः.
आपद्य् अपि सतीवृत्तं किं मुञ्चन्ति कुलस्त्रियः? । 14
कालेन मध्यमा च ऽत्र तासां पुत्रम् असूत सा,
अन्योन्यातिशयस् तस्मिन् स्नेहश् च ऽासाम् अवर्धत । 15
कदाचिद् व्योममार्गेण विहरन्तं महेश्वरं
अङ्कस्था स्कन्दजननी तद् दृष्ट्वा सदया ऽवदत् । 16
देव पश्य, शिशाव् अस्मिन् एतास् तिस्रो ऽपि योषितः
बद्धस्नेहा दधत्य् आशाम्, एषो ऽस्मान् जीवयेद् इति । 17

तत् तथा कुरु येन 'अयम् एता बालो ऽपि जीवयेत्;
इत्य् उक्तः प्रियया देवो वरदः स जगाद तां । 18
अनुगृह्णाम्य् अमुं; पूर्वं सभार्येण 'अमुना यतः
आराधितो ऽस्मि, तेन 'अयं भोगार्थं निर्मितो भुवि । 19
एतज्जाया च सा जाता पाटली नाम भूपतेः
महेन्द्रवर्मणः पुत्री, भार्या 'अस्य 'एव भविष्यति । 20
इत्य् उक्त्वा स विभुः स्वप्ने साध्वीस् तिस्रो जगाद ताः,
नाम्ना पुत्रक एव 'अयं युष्माकं बालपुत्रकः । 21
अस्य सुप्तप्रबुद्धस्य शीर्षान्ते च दिने दिने
सुवर्णलक्षं भविता, राजा 'अयं च भविष्यति । 22
ततः सुप्तोत्थिते तस्मिन् बाले ताः प्राप्य काञ्चनं
यज्ञदत्तसुताः साध्व्यो ननन्दुः फलितव्रताः । 23
अथ तेन सुवर्णेन वृद्धकोषो ऽचिरेण सः
बभूव पुत्रको राजा; तपोऽधीना हि संपदः । 24
कदाचिद् यज्ञदत्तो ऽथ रहः पुत्रकम् अब्रवीत्,
राजन् दुर्भिक्षदोषेण क्वापि ते पितरो गताः । 25
तत् सदा देहि विप्रेभ्यो, येन 'आयान्ति निशम्य ते;
ब्रह्मदत्तकथां च 'एतां कथयाम्य् अत्र ते, शृणु । 26
वाराणस्याम् अभूत् पूर्वं ब्रह्मदत्ताभिधो नृपः;
सो ऽपश्यद् हंसयुगलं प्रयातं गगने निशि । 27

विस्फुरत्कनकछायं राजहंसशतैर् वृतं
विद्युत्पुञ्जम् इव ऽकाण्डे सिताभ्रपरिवेष्टितं । 28
पुनस्तद्दर्शनोत्कण्ठा तथा ऽस्य ववृधे ततः,
यथा नृपतिसौख्येषु बबन्ध न रतिं क्वचित् । 29
मन्त्रिभिः सह संमन्त्र्य, ततश् च ऽकारयत् सरः
स राजा स्वमते कान्तं प्राणिनां च ऽभयं ददौ । 30
तत्र कालेन तौ प्राप्तौ हंसौ राजा ददर्श सः,
विश्वस्तौ च ऽपि पप्रछ हैमे वपुषि कारणं । 31
व्यक्तवाचौ ततस् तौ च हंसौ राजानम् ऊचतुः,
पुरा जन्मान्तरे काकाव् आवां जातौ महीपते । 32
बल्यर्थं युध्यमानौ च पुण्ये शून्ये शिवालये
विनिपत्य विपन्नौ स्वस् तत्स्थानद्रोणिकान्तरे । 33
जातौ जातिस्मराव् आवां हंसौ हेममयौ ततः;
तच् छ्रुत्वा तौ यथाकामं पश्यन् राजा तुतोष सः । 34

अतो ऽनन्यादृशाद् एव पितॄन् दानाद् अवाप्स्यसि;
इत्य् उक्तो यज्ञदत्तेन पुत्रकस् तत् तथा ऽकरोत् । 35
श्रुत्वा प्रदानवार्तां ताम् आययुस् ते द्विजातयः,
परिज्ञाताः परां लक्ष्मीं पत्नीश् च सह लेभिरे । 36
आश्चर्यम्! अपरित्याज्यो दृष्टनष्टापदाम् अपि
अविवेकान्धबुद्धीनां स्वानुभावो दुरात्मनां । 37

कालेन राज्यकामास् ते पुत्रकं तं जिघांसवः
निन्युस् तद्दर्शनव्याजाद् द्विजा विन्ध्यवासिनीं । 38
बधकान् स्थापयित्वा च देवीगर्भगृहान्तरे
तम् ऊचुः, पूर्वम् एकस् त्वं पश्य देवीं, व्रज ऽन्तरं । 39
ततः प्रविष्टो विश्वासात् स दृष्ट्वा हन्तुम् उद्यतान्
पुरुषान् पुत्रको ऽपृच्छत्, कस्मान् निहथ माम् इति । 40
पितृभिस् ते प्रयुक्ताः स्मः स्वर्णं दत्वा ऽइति च ऽब्रुवन्;
ततस् तान् मोहितान् देव्या बुद्धिमान् पुत्रको ऽवदत् । 41
ददाम्य् एतद् अनर्घ्यं वो रत्नालङ्करणं निजं,
मां मुञ्चत; करोम्य् अत्र न ऽउद्भेदं, यामि दूरतः । 42
एवम् अस्त्व् इति तत् तस्माद् गृहीत्वा बधका गताः,
हतः पुत्रक इत्य् ऊचुस् तत्पितॄणां पुरो मृषा । 43
ततः प्रतिनिवृत्तास् ते हत्वा राज्यार्थिनो द्विजाः
मन्त्रिभिर् द्रोहिणो बुद्धाः कृतघ्नानां शिवं कुतः? । 44

अत्र ऽन्तरे स राजा ऽपि पुत्रकः सत्यसङ्गरः
विवेश विन्ध्यकान्तारं विरक्तः स्वेषु बन्धुषु । 45
भ्रमन् अवाप तत्र ऽसौ बाहुयुद्धैकतत्परौ
पुरुषौ द्वौ; ततस् तौ स पृष्टवान्, कौ युवाम् इति । 46
मयासुरसुताव् आवां, तदीयं च ऽस्ति नौ धनं,
इदं भाजनम्, एषा च यष्टिर्, एते च पादुके; । 47

तन्निमित्तं युद्धं नौ, यो बली स हरेद् इति
एतत् तद्वचनं श्रुत्वा हसन् प्रोवाच पुत्रकः । 48
कियद् एतद् धनं पुंसस्? ततस् तौ समवोचतां,
पादुके परिधाय 'एते खेचरत्वम् अवाप्यते । 49
यष्ट्या यल् लिख्यते किंचित् सत्यं संपद्यते हि तत्,
भाजने यो य आहारश् चिन्त्यते स स तिष्ठति । 50
तच् छ्रुत्वा पुत्रको ऽवादीत्, किं युद्धेन? अस्त्व् अयं पणः,
धावन् बलाधिको यः स्यात् स एव 'एतद् ध्रियाद् इति । 51
एवम् अस्त्व् इति तौ मूढौ धावितौ, सो ऽपि पादुके
अध्यास्य 'उदपतद् व्योम गृहीत्वा यष्टिभाजने । 52
अथ दूरं क्षणाद् गत्वा ददर्श नगरीं शुभां
आकर्षिकाख्यां, तस्यां च नभसो ऽवततार सः । 53
वञ्चनप्रवणा वेश्या, द्विजा मत्पितरो यथा,
बणिजो धनलुब्धाश् च, गेहे कस्य वसाम्य् अहं? । 54
इति संचिन्तयन् प्राप स राजा विजनं गृहं
जीर्णं, तदन्तरे च 'एकां वृद्धां योषितम् ऐक्षत । 55
प्रदानपूर्वं संतोष्य तां वृद्धाम्, आदृतस् तया
उवास 'अलक्षितस् तत्र पुत्रकः शीर्णसद्मनि । 56
कदाचित् सा 'अथ संप्रीता वृद्धा पुत्रकम् अब्रवीत्,
चिन्ता मे पुत्र यद् भार्या सदृशी न 'अस्ति ते क्वचित् । 57

इह राज्ञस् तु तनया पाटली इत्य् अस्ति कन्यका,
उपर्य् अन्तः पुरे सा च रत्नम् इत्य् अभिरक्ष्यते । 58
एतद् वृद्धावचस् तस्य दत्तकर्णस्य शृण्वतः
विवेश तेन एव पथा लब्धरन्ध्रो हृदि स्मरः । 59
द्रष्टव्या सा मया अद्य एव कान्ता इति कृतनिश्चयः
निशायां नभसा तत्र पादुकाभ्यां जगाम सः । 60
प्रविश्य सो ऽद्रिशृङ्गाग्रतुङ्गवातायनेन तां
अन्तःपुरे ददर्श अथ सुप्तां रहसि पाटलीं । 61
सेव्यमानाम् अविरतं चन्द्रकान्त्या अङ्गलग्नया
जित्वा जगद् इदं श्रान्तां मूर्तां शक्तिं मनोभुवः । 62
कथं प्रबोधयाम्य् एताम् इति यावद् अचिन्तयत्,
इत्य् अकस्माद् वहिस् तावद् यामिकः पुरुषो जगौ । 63

आलिङ्ग्य मधुरहुंकृतिम्
अलसोन्मिषदीक्षणां कान्तां
यद् बोधयन्ति सुप्तां,
जन्मनि यूनां तद् एव फलं । 64

श्रुत्वा एव एतदुपोद्घातम् अङ्गैर् उत्कम्पविह्वलैः
आलिलिङ्ग स तां कान्तां, प्राबुध्यत ततश् च सा । 65
पश्यन्त्यास् तं नृपं तस्या लज्जाकौतुकयोर् दृशि
अभूद् अन्योन्यसंमर्दो रचयन्त्यां गतागतं । 66

अथ आलापे कृते, वृत्ते गान्धर्वोद्वाहकर्मणि,
अवर्धत तयोः प्रीतिर् दम्पत्योर्, न तु यामिनी । 67
आमन्त्र्य अथ बधूम् उत्कां, तद्गतेन एव चेतसा
आययौ पश्चिमे भागे तद् वृद्धावेश्म पुत्रकः । 68
इत्थं प्रतिनिशं तत्र कुर्वाणे ऽस्मिन् गतागतं,
संभोगचिह्नं पाटल्या ददृशे रक्षिभिस् तदा । 69
तैस् तद् आवेदितं तस्याः पितुः, सो ऽपि नियुक्तवान्
गूढम् अन्तःपुरे तत्र निशि नारीम् अवेक्षितुं । 70
तया च तस्य प्राप्तस्य तत्र अभिज्ञानसिद्धये
पुत्रकस्य प्रसुप्तस्य न्यस्तं वाससि लक्तकं । 71
प्रातस् तु तया विज्ञप्तो राजा चारान् व्यसर्जयत्;
सो ऽभिज्ञानाच् च तैः प्राप्तः पुत्रको जीर्णवेश्मनः । 72
आनीतो राजनिकटं, कुपितं वीक्ष्य तं नृपं,
पादुकाभ्यां खम् उत्पत्य पाटलीमन्दिरे ऽविशत् । 73
विदितौ स्वस्, तद् उत्तिष्ठ, गच्छावः पादुकावशात्;
इत्य् अङ्के पाटलीं कृत्वा जगाम नभसा ततः । 74
अथ गङ्गातटनिकटे
गगणाद् अवतीर्य, स प्रियां श्रान्तां
पात्रप्रभावजातैर्
आहारैर् नन्दयामास । 75

आलोकितप्रभावः
  पाटल्या पुत्रको ऽर्थितस् च ततः,
यष्ट्या लिलेख तत्र स
  नगरं चतुरङ्गबलयुक्तं । 76
तत्र स राजा भूत्वा,
  महाप्रभावे च सत्यतां प्राप्ते,
नमयित्वा तं श्वशुरं,
  शशास पृथ्वीं समुद्रान्तां । 77
तदिदं दिव्यं नगरं
  मायारचितं सपौरम्, अत एव
नाम्ना पाटलिपुत्रं
  क्षेत्रं लक्ष्मीसरस्वत्योः । 78

इति वर्षमुखाद् इमाम् अपूर्वां
  वयम् आकर्ण्य कथाम् अतीवचित्रां,
चिरकालम् अभूम, काणभूते,
  विलसद्विस्मयमोदमानचित्ताः । 79

। इति ।

॥ तृतीयस् तरङ्गः ॥

TARANGA. 4.

इत्य् आख्याय कथां मध्ये विन्ध्यान्तः काणभूतये,
पुनर् वररुचिस् तस्मै प्रकृतार्थम् अवर्णयत् । 1

एवं व्याडीन्द्रदत्ताभ्यां सह तत्र वसन्, क्रमात्
प्राप्तो ऽहं सर्वविद्यानां पारम् उत्क्रान्तशैशवः । 2

इन्द्रोत्सवं कदाचिच् च प्रेक्षितुं निर्गता वयं,
कन्याम् एकाम् अपश्याम कामस्य अस्त्रम् असायकं । 3

इन्द्रदत्तो मया पृष्टस् ततः, का इयं भवेद् इति,
उपवर्षसुता सा इयम् उपकोशा इति सो ऽब्रवीत् । 4

सा सखीभिश् च मां ज्ञात्वा, प्रीतिपेशलया दृशा
कर्षन्ती मन्मनः कृच्छ्राद्, अगच्छद् भवनं निजं । 5

पूर्णचन्द्रमुखी नीलनीरजोत्तमलोचना
मृणालनाललसितभुजा पीनस्तनोज्ज्वला । 6

कम्बुकण्ठी प्रबालाभरदनच्छदशोभिनी
स्मरभूपतिसौन्दर्यमन्दिरा इव इन्दिरा अपरा । 7

ततः कामशरापातनिर्भिन्ने हृदये न मे
निशि तस्याम् अभून् निद्रा तद्बिम्बोष्ठपिपासया । 8

कथंचिल् लब्धनिद्रो ऽहम् अपश्यं रजनीक्षये
शुक्लाम्बरधरां दिव्यां स्त्रियं; सा माम् अभाषत । 9
पूर्वभार्या 'उपकोशा ते, गुणज्ञा न 'अपरं पतिं
कंचिद् इच्छत्य्, अतश् चिन्ता पुत्र कार्या 'अत्र न त्वया । 10
अहं सदा शरीरान्तर्वासिनी ते सरस्वती
त्वद्दुःखं न 'उत्सहे द्रष्टुम् इत्य् उक्त्वा 'अन्तर्हिता 'अभवत् । 11
ततः प्रबुद्धो ज्ञातास्थो गत्वा 'अतिष्ठम् अहं शनैः
दयितामन्दिरासन्नबालचूततरोर् अधः । 12
अथ 'आगत्य समाख्यातं तत्सख्या मन्निबन्धनं,
उद्गाढम् उपकोशाया नवानङ्गविजृम्भितं । 13
ततो ऽहं द्विगुणीभूततापस् ताम् एवम् अब्रुवं,
अदत्तां गुरुभिः स्वेच्छम् उपकोशां कथं भजे? । 14
वरं हि मृत्युर् न 'अकीर्तिस्; तत् सखीहृदयं तव
गुरुभिर् यदि बुध्येत, तत् कदाचिच् छिवं भवेत् । 15
तद् एतत् कुरु भद्रे त्वं, तां सखीं मां च जीवय.
तच् छ्रुत्वा, सा गत्वा सख्या मातुः सर्वं न्यवेदयत् । 16
तया तत् कथितं भर्तुर् उपवर्षस्य तत्क्षणं,
तेन भ्रातुश् च वर्षस्य, तेन तच् च 'अभिनन्दितं । 17
विवाहे निश्चिते गत्वा व्याडिर् आनयति स्म तां
वर्षाचार्यनिदेशेन कौशाम्ब्या जननीं मम । 18

अथ ऽउपकोशा विधिवत् पित्रा मे प्रतिपादिता,
ततो मात्रा गृहिण्या च समं तत्र ऽअवसं सुखं । 19
अथ कालेन वर्षस्य शिष्यवर्गो महान् अभूत्;
तत्र ऽएकः पाणिनिर् नाम जडबुद्धितरो ऽभवत् । 20
स शुश्रूषापरिक्लिष्टः प्रेषितो वर्षभार्यया,
अगच्छत् तपसे खिन्नो विद्याकामो हिमालयं । 21
तत्र तीव्रेण तपसा तोषिताद् इन्दुशेखरात्
सर्वविद्यामुखं तेन प्राप्तं व्याकरणं नवं । 22
ततश् च ऽआगत्य माम् एव वादाय ऽआह्वयते स्म सः,
प्रवृत्ते च ऽआवयोर् वादे प्रयाताः सप्त वासराः । 23
अष्टमे ऽह्नि मया तस्मिन् जिते तत्समनन्तरं
नभःस्थेन महाघोरो हुंकारः शम्भुना कृतः । 24
तेन प्रनष्टम् ऐन्द्रं तद् अस्मद्व्याकरणं भुवि,
जिताः पाणिनिना सर्वे मूर्खीभूता वयं पुनः । 25
अथ संजातनिर्वेदः स्वगृहस्थितये धनं
हस्ते हिरण्यदत्तस्य निधाय बणिजो निजं, । 26
उक्त्वा तच् च ऽउपकोशायै, गतवान् अस्मि शङ्करं
तपोभिर् आराधयितुं निराहारो हिमाचलं । 27
उपकोशा हि मे श्रेयः काङ्क्षन्ती निजमन्दिरे
अतिष्ठत् प्रत्यहं स्नान्ती गङ्गायां नियतव्रता । 28

एकदा सा मधौ प्राप्ते क्षामापाण्डुमनोरमा
प्रतिपच्चन्द्रलेखा 'इव जनलोचनहारिणी, । 29
स्नातुं त्रिपथगां यान्ती दृष्टा राजपुरोधसा,
दण्डाधिपतिना च 'एव, कुमारसचिवेन च । 30
तत्क्षणात् ते गताः सर्वे स्मरसायकलक्ष्यतां;
सा 'अपि तस्मिन् दिने स्नान्ती कथमप्य् अकरोच् चिरं । 31
आगच्छन्तीं च सायं तां कुमारसचिवो हठात्
अग्रहीद्, अथ सा 'अप्य् एनम् अवोचत् प्रतिभावती । 32
अभिप्रेतम् इदं भद्र यथा तव तथा मम,
किंत्व् अहं सत्कुलोत्पन्ना प्रवासस्थितभर्तृका । 33
कथम् एवं प्रवर्तेय? पश्येत् कोऽपि कदाचन,
ततश् च ध्रुवम् अश्रेयस् त्वया सह भवेन् मम; । 34
तस्मान् मधूत्सवाक्षिप्तपौरलोकं गृहं मम
आगन्तव्यं ध्रुवं रात्रेः प्रथमे प्रहरे त्वया । 35
इत्य् उक्त्वा कृतसंन्यासा तेन क्षिप्ता विधेर् वशात्,
यावत् किंचिद् गता, तावन् निरुद्धा सा पुरोधसा । 36
तस्य 'अपि तत्र 'एव दिने तद्वद् एव तया निशि
संकेतकं द्वितीयस्मिन् प्रहरे पर्यकल्प्यत । 37
मुक्तां कथंचित् तेन 'अपि, प्रयातां किंचिद् अन्तरं
दण्डाधिपो रुणद्धि स्म तृतीयस् तां सुविह्वलां । 38

अथ तस्य ऽपि दिवसे तस्मिन् एव तथा ऽएव सा
संकेतकं त्रियामायां तृतीये प्रहरे व्यधात् । 39
दैवात् तेन ऽपि निर्मुक्ता सकम्पा गृहम् आगमत्;
सा स्वचेटीनां कर्तव्यसंविदं स्वैरम् अब्रवीत् । 40
वरं पत्यौ प्रवासस्थे मरणं कुलयोषितः
न तु रूपारमल्लोकलोचनापातपात्रता । 41
इति संचिन्तयन्ती च स्मरन्ती मां निनाय सा
शोचन्ती स्वं वपुः साध्वी निराहारा ऽएव तां निशां । 42
प्रातर् ब्राह्मणपूजार्थं व्यसर्जि बणिजस् तया
चेटी हिरण्यगुप्तस्य किंचिन् मृगयितुं धनं । 43
आगत्य सो ऽपि ताम् एवम् एकान्ते बणिग् अब्रवीत्,
भजस्व मां ततो भर्तृस्थापितं ते ददामि तत् । 44
तच् छ्रुत्वा साक्षिरहितां मत्वा भर्तृधनस्थितिं,
बणिजं पापम् आलोक्य खेदामर्षकदर्थिता । 45
तस्याम् एव ऽत्र संकेतं रात्रौ तस्य ऽपि पश्चिमे
शेषसंकेतकं यामे सा ऽकरोद्, अथ सो ऽगमत् । 46
ततः सा ऽकारयद् भूरि चेटीभिः कुण्डकस्थितं
कस्तूरिकादिसंयुक्तं कज्जलं तैलमिश्रितं । 47
तल्लिप्ताश् चीरखण्डाश् च चत्वारो विहितास् तया,
मञ्जूषा कारिता च ऽभूत् स्थूला सबहिरर्गला । 48

अथ तस्मिन् महावेशो वसन्तोत्सववासरे
आययौ प्रथमे यामे कुमारसचिवो निशि । 49
अलक्षितं प्रविष्टं तम् उपकोशा 'इदम् अब्रवीत्,
अस्नातं न स्पृशामि त्वां, तत् स्नाहि प्रविश 'अन्तरं । 50
अङ्गीकुर्वन् स तन् मूढम् चेटिकाभिः प्रवेशितः
अभ्यन्तरगृहं गुप्तम् अन्धकारमयं ततः । 51
गृहीत्वा तत्र तस्य 'अन्तर्वस्त्राण्य् आभरणानि च,
चीरखण्डं च तम् एकं दत्वा 'अन्तर्वाससः कृते । 52
आशिरःपादम् अङ्गेषु ताभिस् तत् तैलकज्जलं
अभ्यङ्गभंग्या पापस्य न्यस्तं घनम् अपश्यतः । 53
अतिष्ठन् मर्दयन्त्यस् तत्प्रत्यङ्गं यावद् अस्य ताः,
तावद् द्वितीये प्रहरे स पुरोधा उपागमत् । 54
मित्रं वररुचेः प्राप्तः किमप्य् एष पुरोहितः,
तद् इह प्रविश 'इत्य् उक्त्वा चेट्यस् तास् तं तथाविधं । 55
कुमारसचिवं नग्नं मञ्जूषायां ससंभ्रमं
निचिक्षिपुर्, अथ 'अबध्नन् अर्गलेन बहिस् च तां । 56
सो ऽपि स्नाननिभान् नीतस् तमस्य् अन्तः पुरोहितः,
तथा 'एव हृतवस्त्रादिस् तैलकज्जलमर्दनैः । 57
चीरखण्डधरस् तावच् चेटिकाभिर् विमोहितः,
यावत् तृतीये प्रहरे दण्डाधिपतिर् आगमत् । 58

तदागमनजं दृष्ट्वा चेटीभिः सहसा भयं
आप्नवत् सो ऽपि निक्षिप्तो मञ्जूषायां पुरोहितः । 59
तस्या दत्त्वा 'अर्गलं, ताभिः स्नानव्याजात् प्रवेश्य सः,
दण्डाधिपो ऽपि तत्र 'एव तावत् कज्जलमर्दनैः । 60
अन्यवद् विप्रलब्धो ऽभूच् चीरखण्डिककर्पटः,
यावत् स पश्चिमे यामे बणिक् तत्र 'आगतो ऽभवत् । 61
तद्दर्शनभयं दृष्ट्वा क्षिप्तो दण्डाधिपो ऽप्य् अथ
मञ्जूषायां स चेटीभिर्, दत्तं च वहिर् अर्गलं । 62
ते च त्रयो ऽन्धतामिस्रवासाभ्यासोद्यता इव
मञ्जूषास्था भिया 'अन्योन्यस्पर्शं लब्ध्वा 'अपि न 'आलपन् । 63
दृष्ट्वा 'अथ दीपं गेहे ऽत्र बणिजं तं प्रवेश्य सा
उपकोशा 'अवदद्, देहि तन् मे भर्त्रा 'अर्पितं धनं । 64
तच् छ्रुत्वा शून्यम् आलोक्य गृहं सो ऽप्य् अवदच् छठः,
उक्तं मया ददाम्य् एव यद् भर्त्रा स्थापितं धनं । 65
उपकोशा 'अपि मञ्जूषां श्रावयन्ती ततो ऽब्रवीत्,
एतद् धिरण्यगुप्तस्य वचः शृणुत देवताः । 66
इत्य् उक्त्वा च 'एव निर्वाप्य दीपं, सो ऽप्य् अन्यवद् बणिक्
लिप्तः स्नानापदेशेन चेटीभिः कज्जलैश् चिरं । 67
अग्य गच्छ, गता रात्रिर् इत्य् उक्तः स निशात्यये
अनिच्छन् गलहस्तेन ताभिर् निर्वासितस् ततः । 68

अथ चीरैकवसनो मषीलिप्तः पदे पदे
भक्ष्यमाणः श्वभिः प्राप् लज्जमानो गृहं निजं। 69
तत्र दासजनस्य 'अपि तां प्रक्षालयतो मषीं
न 'अशकत् संमुखे स्थातुं. कष्टो ह्य् अविनयक्रमः। 70
उपकोशा 'अप्य् अथ प्रातस् चेटिकानुगता गता
गुरूणाम् अनिवेद्य 'एव राज्ञो नन्दस्य मन्दिरं। 71
बणिग् हिरण्यगुप्तो मे भर्त्रा न्यासीकृतं धनं
जिहीर्षति 'इति विज्ञप्तस् तत्र राजा तया स्वयं। 72
तेन तच् च परिज्ञातुं तदा 'एव 'आनयितो बणिक्;
मद्धस्ते किंचिद् अप्य् अस्या देव न 'अस्ति 'इत्य् अभाषत। 73
उपकोशा ततो ऽवादीत्, सन्ति मे देव साक्षिणः,
मञ्जूषायां गतः क्षिप्ता भर्ता मे गृहदेवताः। 74
स्ववाचा पुरतस् तासाम् अनेन 'अङ्गीकृतं धनं,
ताम् आनय्य 'इह मञ्जूषां पृच्छन्तां देवतास् त्वया। 75
तच् छ्रुत्वा विस्मयाद् राजा तदानयनम् आदिशत्;
ततः क्षणात् सा मञ्जूषा प्रापिता बहुभिर् जनैः। 76
अथ 'उपकोशा वक्ति स्म, सत्यं वदत देवताः,
यद् उक्तं बणिजा तेन, ततो यात निजं गृहं। 77
नो चेद् दहाम्य् अहं युष्मान् सदस्य् उद्घाटयामि वा.
तच् छ्रुत्वा भीतभीतास् ते मञ्जूषास्था बभाषिरे। 78

सत्यं समन्तम् अस्माकम् अनेन ऽङ्गीकृतं धनं,
ततो निरुत्तरः सर्वं बणिक् तत् प्रत्यपद्यत । 79
उपकोशाम् अथ ऽभ्यर्च्य राज्ञा त्व् अतिकुतूहलात्
सदस्य् उद्घाटिता तत्र मञ्जूषा स्फोटितार्गला । 80
निष्कृष्टास् ते ऽपि पुरुषास् तमःपिण्डा इव त्रयः,
कृच्छ्राच् च प्रत्यभिज्ञाता मन्त्रिभिर् भूभृता तथा । 81
प्रहसत्स्व् अथ सर्वेषु, किम् एतद् इति कौतुकात्
राज्ञा पृष्टा सती सर्वम् उपकोशा शशंस तत् । 82
अचिन्त्यं शीलगुप्तानां चरित्रं कुलयोषितां;
इति च ऽभिननन्दुस् ताम् उपकोशां सभासदः । 83
ततस् ते हृतसर्वस्वाः परदारैषिणो ऽखिलाः
राज्ञा निर्वासिता देशाद्. अशीलं कस्य भूतये? । 84
भगिनी मे त्वम् इत्य् उक्त्वा, दत्वा प्रीत्या धनं बहु,
उपकोशा ऽपि भूपेन प्रेषिता गृहम् आगमत् । 85
वर्षोपवर्षौ तद् बुद्ध्वा साध्वीं ताम् अभ्यनन्दतां,
सर्वश् च विस्मयस्मेरः पुरे तत्र ऽभवज् जनः । 86

अत्र ऽन्तरे तुषाराद्रौ कृत्वा तीव्रतरं तपः,
आराधितो मया देवो वरदः पार्वतीपतिः । 87
तद् एव तेन शास्त्रं मे पाणिनीयं प्रकाशितं,
तदिच्छानुग्रहाद् एव मया पूर्णीकृतं च तत् । 88

ततो ऽहं गृहम् आगच्छम् अज्ञाताध्वपरिश्रमः
निशाकरकलामौलिप्रसादामृतनिर्भरः । 89
अथ मातुर् गुरूणां च कृतपादाभिवन्दनः
तत्र ऽउपकोशावृत्तान्तं तम् अश्रौषं महाद्भुतं । 90
तेन तौ परमां भूमिम् आत्मन्य् आनन्दविस्मयौ
तस्यां च सहजस्नेहबहुमानाव् अगच्छतां । 91

वर्षो ऽथ मन्मुखाद् ऐच्छच् छ्रोतुं व्याकरणं नवं,
ततः प्रकाशितं स्वामिकुमारेण ऽएव तस्य तत् । 92
ततो व्याडीन्द्रदत्ताभ्यां विज्ञप्तो दक्षिणां प्रति
गुरुर् वर्षो ऽब्रवीत्, स्वर्णकोटिर् मे दीयताम् इति । 93
अङ्गीकृत्य गुरोर् वाक्यं तौ च माम् इत्य् अवोचतां,
एहि राज्ञः सखे नन्दाद् याचितुं गुरुदक्षिणां । 94
गच्छामो, न ऽअन्यतो ऽस्माभिर् इयत् काञ्चनम् आप्यते,
नवाधिकाया नवतेः कोटीनाम् अधिपो हि सः । 95
वाचा तेन ऽउपकोशा च प्राग् धर्मभगिनी कृता,
अतः श्यालः स ते, किंचित् त्वद्गुणैः समवाप्यते । 96
इति निश्चित्य नन्दस्य कटकं भूपतेर् वयं
अयोध्यास्थम् अगच्छाम त्रयः सब्रह्मचारिणः । 97
प्राप्तमात्रेषु च ऽअस्मासु स राजा पञ्चतां गतः,
राष्ट्रे कोलाहलं जातं विषादेन सह ऽएव नः । 98

अवोचद् इन्द्रदत्तो ऽथ तत्त्वाणां योगसिद्धिमान्,
गतासोर् अस्य भूपस्य शरीरं प्रविशाम्य् अहं । 99
अर्थी वररुचिर् मे ऽस्तु, दास्याम्य् अस्मै च काञ्चनं,
व्याडी रक्षतु मे देहं ततः प्रत्यागमावधि । 100
इत्य् उक्त्वा नन्ददेहान्तर् इन्द्रदत्तः समाविशत्;
प्रत्युज्जीवति भूपे च राष्ट्रे तत्र 'उत्सवो ऽभवत् । 101
शून्ये देवगृहे देहम् इन्द्रदत्तस्य रक्षितुं
व्याडौ स्थिते, गतो ऽभूवम् अहं राजकुलं तदा । 102
प्रविश्य, स्वस्तिकारं च विधाय, गुरुदक्षिणां
योगनन्दो मया तत्र हेमकोटिं स याचितः । 103
ततः स शकटालाख्यं सत्यनन्दस्य मन्त्रिणं,
सुवर्णकोटिम् एतस्मै दापय 'इति समादिशत् । 104
मृतस्य जीवितं दृष्ट्वा सद्यश् च प्राप्तिम् अर्थिनः,
स तत्त्वं ज्ञातवान् मन्त्री· किम् अज्ञेयं हि धीमतां । 105
देव दीयत इत्य् उक्त्वा, स च मन्त्री 'इत्य् अचिन्तयत्,
नन्दस्य तनयो बालो, राज्यं च बहुशत्रु नः । 106
तत् सम्प्रत्य् अत्र रक्षामि तस्य देहम् अपि 'ईदृशं;
निश्चित्य 'एतत् स तत्कालं शवान् सर्वान् अदाहयत् । 107
चारैर् अन्विष्य, तन्मध्ये लब्ध्वा, देवगृहात् ततः
व्याडिं विधूय, तद् दग्धम् इन्द्रदत्तकलेवरं । 108

अत्र अन्तरे च राजानं हेमकोटिसमर्पने
त्वरमाणाम् अथ स्म आह शकटालो विचारयन्। 109
उत्सवाक्षिप्तचित्तो ऽयं सर्वः परिजनः स्थितः,
क्षणं प्रतीक्षताम् एष विप्रो यावद् ददाम्य् अहं। 110
अथ एत्य योगनन्दस्य व्याडिना क्रन्दितं पुरः,
अब्रह्मण्यम् अनुत्क्रान्तजीवो योगस्थितो द्विजः। 111
अनाथशव इत्य् अद्य बलाद् दग्धस् तव उदये.
तच् छ्रुत्वा योगनन्दस्य काप्य् अवस्था अभवच् छुचा। 112
देहदाहात् स्थिरे तस्मिन् जाते, निर्गत्य मे ददौ
सुवर्णकोटिं स ततः शकटालो महामतिः। 113
योगनन्दो ऽथ विजने सशोको व्याडिम् अब्रवीत्,
शूद्रीभूतो ऽस्मि विप्रो ऽपि, किं श्रिया स्थिरया अपि मे? 114
तच् छ्रुत्वा आश्वस्य तं व्याडिः कालोचितम् अभाषत,
ज्ञातो ऽसि शकटालेन, तद् एनं चिन्तय अधुना। 115
महामन्त्री ह्य् अयं स्वेच्छम् अचिरात् त्वां विनाशयेत्,
पूर्वनन्दसुतं कुर्याच् चन्द्रगुप्तं हि भूमिपं। 116
तस्माद् वररुचिं मन्त्रु मन्त्रित्वे कुरु, येन ते
एतद्बुद्ध्या भवेद् राज्यं स्थिरं दिव्यानुभावया। 117
इत्य् उक्त्वा एव गते व्याडौ दातुं तां गुरुदक्षिणां;
तदा एव आनीय दत्ता मे योगनन्देन मन्त्रिता। 118

अथ 'उक्तः स मया राज्ञा, ब्राह्मण्ये कारिते ऽपि ते,
राज्यं न 'एवं स्थिरं मन्ये शकटाले पदस्थिते । 119
तस्मान् नाशय युक्त्या 'एनम् इति मन्त्रे मया 'उदिते,
योगनन्दो ऽन्धकूपान्तः शकटालं तम् अक्षिपत् । 120
किंच पुत्रशतं तस्य तत्र 'एव क्षिप्तवान् असौ,
जीवन् द्विजो ऽमुना दग्ध इति दोषानुकीर्तनात् । 121
एकः शरावः शक्तूनाम् एकः प्रत्यहम् अम्भसः
शकटालस्य तत्र 'अन्तः सपुत्रस्य व्यधीयत । 122
स च 'उवाच ततः पुत्रान्, अमीभिः शक्तुभिः सुताः
एको ऽपि कृच्छ्राद् वर्तेत, भूयसां तु कथा 'एव का? । 123
तस्मात् स भक्षयत्व् एकः प्रत्यहं सजलान् अमून्,
यः शक्तो योगनन्दस्य कर्तुं वैरप्रतिक्रियां । 124
त्वम् एव शक्तो, भुंक्ष्व 'एतद् इति पुत्रास् तम् अब्रुवन्.
प्राणेभ्यो ऽपि हि धीराणां प्रिया शत्रुप्रतिक्रिया । 125
ततः स शकटालस् तैः प्रत्यहं शक्तुवारिभिः
एक एव 'अकरोद् वृत्तिं. कष्टं क्रूरा जिगीषवः! । 126
अबुद्ध्वा चित्तम् अप्राप्य विश्रम्भं प्रभविष्णुषु
न स्वेहं व्यवहर्तव्यम् आत्मनो भूतिम् इच्छता । 127
इति च 'अचिन्तयत् सो ऽथ शकटालो ऽन्धकूपगः
तनयानां क्षुधार्तानां पश्यन् प्राणोद्गमव्यथां । 128

ततः सुतशतं तस्य पश्यतस् तद् व्यपद्यत,
तत्कण्ठैर् वृतो जीवन् अतिष्ठत् स च केवलः । 129

योगनन्दश् च साम्राज्ये बद्धमूलो ऽभवत् ततः,
व्याडिर् अभ्याययौ तं च गुरवे दत्तदक्षिणः । 130

अभ्येत्य एव च सो ऽवादीच्, चिरं राज्यं सखे ऽस्तु ते,
आमन्त्रितो ऽसि, गच्छामि तपः कर्तुम् अहं क्वचित् । 131

तच् छ्रुत्वा योगनन्दस् तं बाष्पकण्ठो ऽभ्यभाषत,
राज्ये मे भुंक्ष्व भोगांस् त्वं, मुक्त्वा मां मा स्म गा इति । 132

व्याडिस् ततो ऽवदद्, राजन् शरीरे क्षणनश्वरे
एवंप्रायेषु असारेषु धीमान् को नाम मज्जति । 133

न हि मोहयति प्राज्ञं लक्ष्मीर् मरुमरीचिका;
इत्य् उक्त्वा एव स तत्कालं तपसे निश्चितो ययौ । 134

अगमद् अथ योगनन्दः
पाटलिपुत्रं स्वराजनगरं सः
भोगाय, काणभूते,
मत्सहितः सकलसैन्यवृतः । 135

तत्र उपकोशापरिचर्यमाणः,
समुद्वहन् मन्त्रिधुरां च तस्य,
अहं जनन्या गुरुभिश् च साकम्
आसाद्य लक्ष्मीम् अवसं चिराय । 136

बङ्क तत्र दिने दिने द्युसिन्धुः
कनकं मह्यम् अदात् तपःप्रसन्ना,
वदति स्म शरीरिणी च साक्षान्
मम कार्याणि सरस्वती सदा 'एव । 137

। इति ।
॥ चतुर्थस् तरङ्गः ॥

TARANGA. 5.

एवम् उक्त्वा वररुचिः पुनर् एतद् अवर्णयत्·
कालेन योगनन्दो ऽथ कामादिवशम् आययौ । 1
गजेन्द्र इव मत्तश् च न 'अपेक्षत स किंचन·
अकाण्डपातोपनता कं न लक्ष्मीर् विमोहयेत्? । 2
अचिन्तयं ततश् च 'अहं, राजा तावद् विशृङ्खलः,
तत्कार्यचिन्तया 'आक्रान्तः स्वधर्मो मे ऽवसीदति । 3
तस्माद् वरं सहायं तं शकटालं समुद्धरे,
क्रियते चेद् विरुद्धं च, किं स कुर्यान् मयि स्थिते? । 4
निश्चित्य 'एतन्, मया 'अभ्यर्थ्य राजानं सो ऽन्धकूपतः
उद्धृतः शकटालो ऽथ· मृदवो हि द्विजातयः । 5
दुर्जयो योगनन्दो ऽयं स्थिते वररुचाव्, अतः
आश्रये वैतसीं वृत्तिं कालं तावत् प्रतीक्षितुं । 6
इति संचिन्त्य स प्राज्ञः शकटालो मदिच्छया
अकरोद् राजकार्याणि पुनः संप्राप्य मन्त्रितां । 7

कदाचिद् योगनन्दो ऽथ निर्गतो नगराद् बहिः
क्षिप्यत्पञ्चाङ्गुलिं हस्तं गङ्गामध्ये व्यलोकयत् । 8

किम् एतद् इति पप्रछ माम् आह्रूय स तत्क्षणं,
अहं च द्वे निजाङ्गुल्यौ दिशि तस्याम् अदर्शयं । 9
तेन तस्मिंस् तिरोभूते हस्ते राजा ऽतिविस्मयात्
भूयो ऽपि तद् अपृछन् मां, ततश् च ऽहं तम् अब्रुवं । 10
पञ्चभिर् मिलितैः कियन् जगति ऽइह न साध्यते,
इत्य् उक्तवान् असौ हस्तः स्वाङ्गुलीः पञ्च दर्शयन् । 11
ततो ऽस्य राजन् अङ्गुल्याव् एते द्वे दर्शिते मया,
एकचित्ते द्वयोर् एव किम् असाध्यं भवेद् इति । 12
इत्य् उक्ते गूढविज्ञाने समतुष्यत् ततो नृपः,
शकटालो व्यषीदच् च मद्बुद्धिं वीक्ष्य दुर्जयां । 13

एकदा योगनन्दश् च दृष्टवान् महिषीं निजां
वातायनाग्रात् पृछन्तीं ब्राह्मणातिथिम् उन्मुखं । 14
तन्मात्राद् एव कुपितो राजा विप्रस्य तस्य सः
आदिशद् बधम्; ईर्ष्या हि विवेकपरिपन्थिनी । 15
हन्तुं बध्यभुवं तस्मिन् नियमाने द्विजे तदा,
अहसद् गतजीवो ऽपि मत्स्यो विपणिमध्यगः । 16
तदा ऽएव राजा तद् बुद्धा बधं तस्य न्यवारयत्
विप्रस्य, माम् अपृछच् च मत्स्यहासस्य कारणं । 17
निरूप्य कथयाम्य् एतद् इत्य् उक्ता, निर्गतं च मां
चिन्तितोपस्थिता ऽएकान्ते सरस्वत्य् एवम् अब्रवीत् । 18

अस्य तालतरोः पृष्ठे तिष्ठ रात्राव् अलक्षितः,
अत्र श्रोष्यसि मत्स्यस्य हासहेतुम् असंशयं । 19
तच् छ्रुत्वा निशि तत्र ’अहं गत्वा तालोपरिस्थितः
अपश्यं राक्षसीं घोरां बालैः पुत्रैः सह ’आगतां । 20
सा भक्ष्यं याचमानांस् तान् अवादीत्, प्रतिपाल्यतां,
प्रातर् वो विप्रमांसानि दास्याम्य्, अद्य हतो न सः । 21
कस्मान् न स हतो ऽद्य ’इति पृष्टा तैः सा ’अब्रवीत् पुनः,
तं हि दृष्ट्वा मृतो ऽपि ’इह मत्स्यो हसितवान् इति । 22
हसितं किमु तेन ’इति पृष्टा भूयः सुतैश् च सा
अवोचद् राक्षसी, राज्ञः सर्वा राज्ञ्यो ऽपि विप्लुताः । 23
सर्वत्र ’अन्तःपुरे ह्य् अत्र स्त्रीरूपाः पुरुषाः स्थिताः,
हन्यते ऽनपराधस् तु विप्र इत्य् अहसत् तिमिः । 24
भूतानां पार्थिवात्यर्थनिर्विवेकत्वहासिनां
सर्वान्तश्चारिणां ह्य् एता भवन्त्य् एव च विक्रियाः । 25
एतत् तस्या वचः श्रुत्वा ततो ऽपक्रान्तवान् अहं,
प्रातश् च मत्स्यहासस्य हेतुं राज्ञे न्यवेदयं । 26
प्राप्य च ’अन्तःपुरेभ्यस् तान् स्त्रीरूपान् पुरुषांस् तदा,
बह्वमन्यत मां राजा, बधाद् विप्रं च मुक्तवान् । 27

इत्यादिचेष्टितं दृष्ट्वा तस्य राज्ञो विशृङ्खलं
खिन्ने मयि, कदाचिच् च तत्र ’आगाच् चित्रकृन् नवः । 28

अलिखत् स महादेवीं योगनन्दं च तं पटे,
जीवति स्म च तच्चित्रं वाक्चेष्टारहितं त्व् अभूत् । 29
तं च चित्रकरं राजा तुष्टो वित्तैर् अपूरयत्,
तं च वासगृहे चित्रपटं भित्ताव् अकारयत् । 30
एकदा च प्रविष्टस्य वासके तत्र सा मम
अपूर्णलक्षणा देवी प्रतिभाति स्म चित्रगा । 31
लक्षणान्तरसंबन्धाद् अभ्यूह्य प्रतिभावशात्
अथ ऽकार्षम् अहं तस्यास् तिलकं मेखलापदे । 32
संपूर्णलक्षणां तेन कृत्वा ऽएनां गतवान् अहं;
प्रविष्टो योगनन्दो ऽथ तिलकं तं व्यलोकयत् । 33
केन ऽयं रचितो ऽत्र इति सो ऽपृच्छच् च महत्तरान्,
ते च न्यवेदयंस् तस्मै कर्तारं तिलकस्य मां । 34
देव्या गुप्तप्रदेशस्थम् इमं न ऽन्यो मया विना
वेत्ति, तज् ज्ञातवान् एवम् असौ वररुचिः कथं । 35
छन्नः कृतो ऽमुना नूनं मम ऽन्तःपुरविप्लवः,
दृष्टवान् अत एव ऽयं स्त्रीरूपांस् तत्र तान् नरान् । 36
इति संचिन्तयामास योगनन्दः क्रुधा ज्वलन्,
जायन्ते वत मूढानां संवादा अपि तादृशाः । 37
ततः स्वैरं समाहूय शकटालम् समादिशत्,
त्वया वररुचिर् बध्यो देवीविध्वंसनाद् इति । 38

यथा आज्ञापयसि इत्य् उक्त्वा शकटालो ऽगमद् बहिः,
अचिन्तयच् च, शक्तिः स्याद् धन्तुं वररुचिं न मे । 39
दिव्यबुद्धिप्रभावो ऽसाव्, उद्धर्ता च मम-आपदः,
विप्रश् च, तद् वरं गुप्तं सम्प्रति स्वीकरोमि तं । 40
इति निश्चित्य सो ऽभ्येत्य राज्ञः कोपम् अकारणं
बधान्तं कथयित्वा मे शकटालो ऽब्रवीत् ततः । 41
अन्यं कंचित् प्रवादाय हन्म्य् अहं, त्वं च मद्गृहे
प्रछन्नस् तिष्ठ, माम् अस्माद् रक्षितुं कोपनान् नृपात् । 42
इति तद्वचनाच् छन्नस् तद्गृहे ऽवस्थितो ऽभवं,
स च अन्यं हतवान् कंचिन् मद्बधाख्यातये निशि । 43
एवं प्रयुक्तनीतिं तं प्रीत्या अवोचम् अहं तदा,
एको मन्त्री भवान् येन हन्तुं मां न कृता मतिः । 44
न हि हन्तुम् अहं शक्यो, राक्षसो मित्रम् अस्ति मे,
ध्यातमात्रागतो विश्वं ग्रसते स मदिच्छया । 45
राजा त्व् इह इन्द्रदत्ताख्यः सखा बध्यो न मे द्विजः,
तच् छ्रुत्वा सो ऽब्रवीन् मन्त्री, रक्षो मे दर्श्यताम् इति । 46
ततो ध्यानागतं तस्मै तद् रक्षो ऽहम् अदर्शयं,
तद्दर्शनाच् च वित्रस्तो विस्मितश् च बभूव सः । 47
रक्षस्य् अन्तर्हिते तस्मिन् शकटालः स मां पुनः,
कथं ते राक्षसो मित्रं संजात इति पृष्टवान् । 48

ततो ऽहम् अवदं, पूर्वं रक्षार्थं नगरे भ्रमन्
रात्रौ रात्रौ क्षयं प्रापद् एकैको नगराधिपः । 49
तच् छ्रुत्वा योगनन्दो माम् अकरोन् नगराधिपं,
भ्रमंश् च ऽपश्यम् अत्र ऽहं भ्रमन्तं राक्षसं निशि । 50
स च माम् अवदद्, ब्रूहि विद्यते नगरे ऽत्र का
सुरूपा स्त्री ऽइति तच् छ्रुत्वा विहस्य ऽहं तम् अब्रुवं । 51
या यस्य ऽभिमता मूर्ख सुरूपा तस्य सा भवेत्.
तच् छ्रुत्वा ऽएव, त्वया ऽएकेन जितो ऽस्मि ऽइत्य् अवदत् स मां । 52
प्रश्नमोक्षाद् बधोत्तीर्णं मां पुनश् च ऽब्रवीद् असौ,
तुष्टो ऽस्मि ऽइति सुहृन् मे त्वं, संनिधास्ये च ते स्मृतः । 53
इत्य् उक्त्वा ऽन्तर्हिते तस्मिन्, यथागतम् अगाम् अहं,
एवम् आपत्सहायो मे राक्षसो मित्रतां गतः । 54
इत्य् उक्तवान् अहं भूयः शकटालेन च ऽर्थितः
गङ्गाम् अदर्शयं तस्मै मूर्तां ध्यानाद् उपस्थितां । 55
स्तुतिभिस् तोषिता सा च मया देवी तिरोदधे,
बभूव शकटालश् च सहायः प्रणतो मयि । 56

एकदा च स मन्त्री मां गुप्तस्थं खिन्नम् अब्रवीत्,
सर्वज्ञेन ऽपि खेदाय किम् आत्मा दीयते त्वया? । 57
किं न जानासि यद् राज्ञाम् अविचारतमा धियः,
अचिराच् च भवेच् छुदिस्, तथा च ऽत्र कथां शृणु । 58

आदित्यवर्मनामा 'अत्र बभूव नृपतिः पुरा,
शिववर्माभिधानो ऽस्य मन्त्री च 'अभून् महामतिः । 59
राज्ञस् तस्य 'एकदा च 'एका राज्ञी गर्भम् अधारयत्,
तद् बुद्ध्वा स नृपो ऽपृच्छद् इत्य् अन्तःपुररक्षिणः । 60
वर्षद्वयं प्रविष्टस्य वर्तते ऽन्तःपुरे ऽत्र मे,
तद् एषा गर्भसंभूतिः कुतः सम्प्रति, कथ्यतां । 61
अथ ऊचुस् ते, प्रवेशो ऽत्र पुंसो ऽन्यस्य 'अस्ति न प्रभो,
शिववर्मा तु ते मन्त्री प्रविशत्य् अनिवारितः । 62
तच् छ्रुत्वा अचिन्तयद् राजा, नूनं द्रोही स एव मे,
प्रकाशं च हते तस्मिन् अपवादो भवेन् मम । 63
इत्य् आलोच्य स तं युक्त्या शिववर्माणम् ईश्वरः
सामन्तस्य अन्तिकं सख्युः प्राहिणोद् भोगवर्मणः । 64
तद्वधं तस्य लेखेन संदिश्य तदनन्तरं
निगूढं स नृपस् तत्र लेखहारं व्यसर्जयत् । 65
याते मन्त्रिणि मासार्द्धे गते, भीत्या पलायिता
सा राज्ञी रक्षिभिर् लब्धा पुंसा स्त्रीवेषिणा सह । 66
आदित्यवर्मा तद् बुद्ध्वा सानुतापो ऽभवत् तदा,
किं मया तादृशो मन्त्री घातितो ऽकारणाद् इति । 67
अत्र अन्तरे स च प्राप निकटं भोगवर्मणः
शिववर्मा, स च ऽवाचयल् लेखम् अस्य गूढतः । 68

वाचयित्वा च तं लेखम् एकान्ते शिववर्मणे
शशंस बधनिर्देशं भोगवर्मा विधेर् वशात् । 69
शिववर्मा ऽप्य् अवोचत् तं सामन्तं मन्त्रिसत्तमः,
त्वं व्यापादय मां, नो चेन्, निहन्म्य् आत्मानम् आत्मना । 70
तच् छ्रुत्वा विस्मयाविष्टो भोगवर्मा जगाद तं,
किम् एतद् ब्रूहि मे विप्र, शापितो ऽसि न वक्षि चेत् । 71
अथ वक्ति स्म तं मन्त्री, हन्येय यत्र भूपते,
तत्र द्वादश वर्षाणि देशे देवो न वर्षति । 72
तच् छ्रुत्वा मन्त्रिभिः सार्धं भोगवर्मा व्यचिन्तयत्,
दुष्टः स राजा देशस्य नाशम् अस्माकम् इच्छति । 73
किं हि तत्र न सन्त्य् एव बधका गुप्तगामिनः?
तस्मान् मन्त्री न बध्यो ऽसौ, रक्ष्यः स्वात्मबधाद् अपि । 74
इति संमन्त्र्य दत्त्वा च रक्षकान्, भोगवर्मणा
शिववर्मा ततो देशात् प्रेषितो ऽभूत् ततः क्षणात् । 75
एवं प्रत्याययौ जीवन् स मन्त्री प्रज्ञया स्वया,
शुद्धिश् च ऽस्य ऽन्यतो जाता, न हि धर्मो ऽन्यथा भवेत् । 76

इत्थं तव ऽपि शुद्धिः स्यात्, तिष्ठ तावद् गृहे मम,
कात्यायन, नृपो ऽप्य् एष सानुतापो भविष्यति । 77

इत्य् उक्तः शकटालेन हन्तो ऽहं तस्य वेश्मनि
प्रतीक्षमाणो ऽवसरं तान्य् अहान्य् अत्यवाहयं । 78
तस्य ऽथ योगनन्दस्य, काणभूते, कदाचन
पुत्रो हिरण्यगुप्ताख्यो मृगयायै गतो ऽभवत् । 79
अश्ववेगात् प्रयातस्य कथंचिद् दूरम् अन्तरं
एकाकिनो वने तस्य वासरः पर्यहीयत । 80
ततश् च तां निशां नेतुं वृक्षम् आरोहति स्म सः,
क्षणात् तत्र एव च आरोहद् ऋक्षः सिंहेन भीषितः । 81
स दृष्ट्वा राजपुत्रं तं भीतं मानुषभाषया,
मा भैषीर् मम मित्रं त्वम् इत्य् उक्त्वा निर्भयं व्यधात् । 82
विश्रम्भाद् ऋक्षवाक्येन राजपुत्रो ऽथ सुप्तवान्,
ऋक्षस् तु जाग्रद् एव आसीद्, अधः सिंहो ऽथ सो ऽब्रवीत् । 83
ऋक्ष मानुषम् एतं मे क्षिप यावद् व्रजाम्य् अहं;
ऋक्षस् ततो ऽब्रवीत्, पाप न मित्रं घातयाम्य् अहं । 84
क्रमाद् ऋक्षे प्रसुप्ते ऽथ राजपुत्रे च जाग्रति,
पुनः सिंहो ऽब्रवीद्, एतम् ऋक्षं मे क्षिप मानुष । 85
तच् छ्रुत्वा आत्मभयात् तेन सिंहस्य आराधनाय सः
क्षिप्तो ऽपि न अपतच् चित्रम् ऋक्षो दैवप्रबोधितः । 86
मित्रद्रोहिन् भव उन्मत्त इति शापम् अदाच् च सः
तस्य राजसुतस्य एतद्वृत्तान्तावगमावधिं । 87

प्राप्य 'एव स्वगृहं प्रातर् उन्मत्तो ऽभून् नृपात्मजः,
योगनन्दश् च तद् दृष्ट्वा विषादं सहसा 'अगमत् । 88
अब्रवीच् च स, काले ऽस्मिन् जीवेद् वररुचिर् यदि,
इदं ज्ञायेत तत् सर्वं, धिङ् मे तद्वधपाटवं । 89
तच् छ्रुत्वा वचनं राज्ञः शकटालो व्यचिन्तयत्,
हन्त कात्यायनस्य 'अयं लब्धः कालः प्रकाशने । 90
न सो ऽत्र मानी तिष्ठेच् च, राजा मयि च विश्वसेत्.
इत्य् आलोच्य स राजानम् अब्रवीद् याचिताभयः । 91
राजन् अलं विषादेन, जीवन् वररुचिः स्थितः.
योगनन्दस् ततो ऽवादीद्, द्रुतम् आनीयताम् इति । 92
अथ 'अहं शकटालेन योगनन्दान्तिकं हठात्
आनीतस् तं तथाभूतं राजपुत्रं व्यलोकयं । 93
मित्रद्रोहः कृतो ऽनेन देव 'इत्य् उक्त्वा तथा 'एव सः
सरस्वतीप्रसादेन वृत्तान्तः कथितो मया । 94
ततस् तच्छापमुक्तेन स्तुतो ऽहं राजसूनुना,
त्वया कथम् इदं ज्ञातम् इत्य् अपृच्छत् स भूपतिः । 95
अथ 'अहम् अवदं, राजंल् लक्षणैर् अनुमानतः
प्रतिभातश् च पश्यन्ति सर्वं प्रज्ञावतां धियः । 96
तद् यथा तिलको ज्ञातस् तथा सर्वम् इदं मया.
इति मद्वचनात् सो ऽभूद् राजा लज्जानुतापवान् । 97

अथ 'अनादृतसत्कारः परिभुज्या 'एव लाभवान्
स्वगृहं गतवान् अस्मि. शीलं हि विदुषां धनं । 98
प्राप्तस्य 'एव च तत्रत्यो जनो ऽरोदीत् पुरो मम,
अभ्येत्य मां समुद्भ्रान्तम् उपवर्षो ऽब्रवीत् ततः । 99
राज्ञा हृतं निशम्य त्वाम् उपकोशा 'अग्निसाद् वपुः
अकरोद्, अथ मातुस् ते शुचा हृदयम् अस्फुटत् । 100
तच् छ्रुत्वा 'अभिनवोद्भूतशोकावेगविचेतनः
सद्यो ऽहम् अपतं भूमौ वातरुग्ण इव द्रुमः । 101
क्षणाच् च गतवान् अस्मि प्रलापानां रसज्ञतां,
प्रियबन्धुविनाशोत्थशोकाग्निः कं न तापयेत्? । 102
आसंसारे जगत्य् अस्मिन्न् एका नित्या ह्य् अनित्यता,
तद् एताम् ऐश्वरीं मायां किं जानन्न् अपि मुह्यसि । 103
इत्यादिभिर् उपागत्य वर्षेण वचनैर् अहं
बोधितो ऽथ यथातत्त्वं कथंचिद् धृतिम् आप्तवान् । 104
ततो विरक्तहृदयस् त्यक्त्वा सर्वं निबन्धनं
प्रशमैकसहायो ऽहं तपोवनम् अशिश्रियं । 105

दिवसेष्व् अथ गच्छत्सु तत् तपोवनम् एकदा
अयोध्यात उपागच्छद् विप्र एको मयि स्थिते । 106
स मया योगनन्दस्य राज्यवार्ताम् अपृच्छत,
प्रत्यभिज्ञाय मां सो ऽथ सशोकम् इदम् अब्रवीत् । 107

शृणु नन्दस्य यद् वृत्तं तत्सकाशाद् गते त्वयि,
लब्धावकाशस् तस्य ऽभूच् छकटालस् चिरेण सः । 108
स चिन्तयन् बधोपायं योगनन्दस्य युक्तितः,
क्षितिं खनन्तम् अद्राक्षीच् चाणक्याख्यं द्विजं पथि । 109
किं भुवं खनसि इत्य् उक्तो तेन पृष्टो ऽथ सो ऽब्रवीत्,
दर्भम् उन्मूलयाम्य् अत्र, पादो क्ष्य् एतेन मे क्षतः । 110
तच् छ्रुत्वा सहसा मन्त्री कोपिन क्रूरनिश्चयं
तं विप्रं योगनन्दस्य बधोपायम् अमन्यत । 111
नाम पृष्ट्वा ऽब्रवीत् तं च, हे ब्रह्मन् दापयामि ते
अहं त्रयोदशीश्राद्धं गृहे नन्दस्य भूपतेः । 112
दक्षिणातः सुवर्णस्य लक्षं तव भविष्यति,
भोक्ष्यसे धुरि च ऽन्येषाम्, एहि तावद् गृहं मम । 113
इत्य् उक्त्वा शकटालस् तं चाणक्यम् आनयद् गृहं,
श्राद्धाहे ऽदर्शयत् तं च राज्ञे, स श्रद्दधे च तं । 114
ततः स गत्वा चाणक्यो धुरि श्राद्ध उपाविशत्,
सुबन्धुनामा विप्रस् च ताम् ऐहद् धुरम् आत्मनः । 115
तद् गत्वा शकटालेन विज्ञप्तो नन्दभूपतिः
अवादीन्, न ऽपरो योग्यः सुबन्धुर् धुरि तिष्ठतु । 116
आगत्य ऽएतां च राजाज्ञां शकटालो भयानतः,
न मे ऽपराध इत्य् उक्त्वा चाणक्याय न्यवेदयत् । 117

सो ऽथ कोपेन चाणक्यो ज्वलन्न् इव समन्ततः
निजां मुक्त्वा शिखां तत्र प्रतिज्ञाम् अकरोद् इमां । 118
अवश्यं हन्त नन्दो ऽयं सप्तभिर् दिवसैर् मया
विनाश्यो, बन्धनीया च ततो निर्मन्युना शिखा । 119
इत्य् उक्तवन्तं कुपिते योगनन्दे पलायितं
अलक्षितं स्वगेहे तं शकटालो न्यवेशयत् । 120
तत्र उपकरणे दत्ते गुप्तं तेन एव मन्त्रिणा
स चाणक्यो द्विजः क्वापि गत्वा कृत्याम् असाधयत् । 121
तद्वशाद् योगनन्दो ऽथ दाहज्वरम् अवाप्य सः
सप्तमे दिवसे प्राप्ते पञ्चत्वं समुपागमत् । 122
हत्वा हिरण्यगुप्तं च शकटालेन तत्सुतं
पूर्वनन्दसुते लक्ष्मीश् चन्द्रगुप्ते निवेशिता । 123
मन्त्रित्वे तस्य च अभ्यर्थ्य वृहस्पतिसमं धिया
चाणक्यं स्थापयित्वा तं, स मन्त्री कृतकृत्यतां । 124
मन्वानो योगनन्दस्य कृतवैरप्रतिक्रियः,
पुत्रशोकेन निर्विषास् तद्विनाशाद् अगाद् वनं । 125

इति तस्य मुखाच् छ्रुत्वा विप्रस्य सुतराम् अहं,
काणभूते, गतः खेदं सर्वम् आलोक्य चञ्चलं । 126
खेदाच् च अहम् इमां द्रष्टुम् आगतो विन्ध्यवासिनीं,
तत्प्रसादेन दृष्ट्वा त्वां स्मृता जातिर् मया सखे । 127

दिव्यं प्राप्य च विज्ञानं मया ऽउक्ता ते महाकथा,
इदानीं क्षीणशापो ऽहं यतिष्ये देहम् उज्झितुं । 128
त्वं च सम्प्रति तिष्ठ ऽइह, यावद् आयाति ते ऽन्तिकं
शिष्ययुक्तो गुणाढ्याख्यस् त्यक्तभाषात्रयो द्विजः । 129
सो ऽपि ह्य् अहम् इव क्रोधाद् देव्या शप्तो गणोत्तमः
माल्यवान् नाम मत्पक्षपाती मर्त्यत्वम् आगतः । 130
तस्मै महेश्वरोक्ता ऽएषा कथनीया कथा त्वया,
ततस् ते शापनिर्मुक्तिस् तस्य च ऽअपि भविष्यति । 131

एवं वररुचिस् तत्र काणभूतिर् निवेद्य सः
प्रतस्थे देहमोक्षाय पुण्यं बदरिकाश्रमं । 132
गच्छन् ददर्श गङ्गायां सो ऽथ शाकासनं मुनिं
तत्समक्षं च तस्य ऽऋषेः कुशेन ऽअभूत् करक्षतिः । 133
ततो ऽस्य रुधिरं निर्यत् तेन शाकरसीकृतं
अहंकारपरीक्षार्थं कौतुकात् स्वप्रभावतः । 134
तद् दृष्ट्वा, हन्त सिद्धो ऽस्मि ऽइत्य् अगाद् दर्पम् असौ मुनिः;
ततो वररुचिः किंचिद् विहस्य ऽइव जगाद तं । 135
जिज्ञासनाय रक्तं ते मया शाकरसीकृतं,
यावन् न ऽअद्य ऽअप्य् अहंकारः परित्यक्तस् त्वया मुने । 136
ज्ञानमार्गे ह्य् अहंकारः परिघो दुरतिक्रमः,
ज्ञानं विना च न ऽअस्त्य् एव मोक्षो व्रतशतैर् अपि । 137

स्वर्गस् तु न मुमुक्षूणां त्रयी चित्तं विलोभयेत्,
तस्माद् अहंकृतित्यागाज् ज्ञाने यत्नं मुने कुरु । 138
विनीय एनं मुनिं, तेन प्रणतेन कृतस्तुतिः
तं बदर्याश्रमोद्देशं शान्तं वररुचिर् ययौ । 139

अथ स निबिडभक्त्या तत्र देवीं शरण्यां
शरणम् उपगतो ऽसौ मर्त्यभावं मुमुक्षुः,
प्रकटितनिजमूर्तिः सा अपि तस्मै शशंस
स्वयम् अनलसमुत्थां धारणां देहमुक्त्यै । 140
दग्ध्वा शरीरम् अथ धारणया तया तद्,
दिव्यां गतिं वररुचिः स निजां प्रपेदे;
विन्ध्याटवीभुवि ततश् च स काणभूतिर्
आसीद् अभीप्सितगुणाढ्यसमागमोत्कः । 141

। इति ।

॥ पञ्चमस् तरङ्गः ॥

TARANGA. 6.

ततः स मर्त्यवपुषा माल्यवान् विचरन् वने,
नाम्ना गुणाढ्यः सेवित्वा सातवाहनभूपतिं । 1
संस्कृताद्यास् तदग्रे च भाषास् तिस्रः प्रतिज्ञया
त्यक्त्वा, खिन्नमना द्रष्टुम् आययौ विन्ध्यवासिनीं । 2
तदादेशेन गत्वा च काणभूतिं ददर्श सः,
ततो जातिं निजां स्मृत्वा प्रबुद्धः सहसा ऽभवत् । 3
आश्रित्य भाषां पैशाचीं भाषात्रयविलक्षणां,
श्रावयित्वा निजं नाम, काणभूतिं च सो ऽब्रवीत् । 4
पुष्पदन्ताच् छ्रुतां दिव्यां शीघ्रं कथय मे कथां,
येन शापं तरिष्यावस्, त्वं च अहं च समं सखे । 5
तच् छ्रुत्वा प्रणतो हृष्टः काणभूतिर् उवाच तं,
कथयामि कथां, किंतु कौतुकं मे महत् प्रभो । 6
आजन्मचरितं तावच् छंस मे, कुर्व् अनुग्रहं,
इति तेन अर्थितो वक्तुं गुणाढ्यो ऽथ प्रचक्रमे । 7
प्रतिष्ठाने ऽस्ति नगरं सुप्रतिष्ठितसंज्ञकं,
तत्र अभूत् सोमशर्माख्यः को ऽपि ब्राह्मणसत्तमः । 8

वत्सश् च गुल्मकश् च एव द्वौ तस्य तनयौ, सखि,
जायेते स्म तृतीया च श्रुतार्था नाम कन्यका । 9
कालेन ब्राह्मणः सो ऽथ सभार्यः पञ्चतां गतः,
तत्पुत्रौ तौ स्वसारं च पालयन्ताव् अतिष्ठतां । 10
सा च अकस्मात् सगर्भा अभूत्; तद् दृष्ट्वा वत्सगुल्मयोः
तत्र अन्यपुरुषाभावाच् छङ्का अन्योन्यम् अजायत । 11
ततः श्रुतार्था चित्तज्ञा भ्रातरौ ताव् अभाषत,
पाप शङ्का न कर्तव्या, शृणुतं, कथयामि वां । 12
कुमारः कीर्तिसेनाख्यो नागराजस्य वासुकेः
भ्रातुः पुत्रो ऽस्ति, तेन अहं दृष्टा स्नातुं गता सती । 13
ततः स मदनाक्रान्तो निवेद्य अन्वयनामनी
गान्धर्वेण विवाहेन मां भार्याम् अकरोत् तदा । 14
विप्रजातिर् अयं, तस्मान् मम गर्भ इति स्वसुः
श्रुत्वा, कः प्रत्ययो ऽत्र इति वत्सगुल्माव् अवोचतां । 15
ततो रहसि सस्मार सा तं नागकुमारकं,
स्मृतमात्रागतः सो ऽथ वत्सगुल्माव् अभाषत । 16
भार्या कृता मया एव इयं, शापभ्रष्टा वराप्सराः
युष्मत्स्वसा, युवां च इह शापेन एव च्युतौ भुवि । 17
पुत्रो जनिष्यते च अत्र युष्मत्स्वसुर् असंशयं,
ततो ऽस्याः शापनिर्मुक्तिर् युवयोश् च भविष्यति । 18

इत्य् उक्का ऽन्तर्हितः सो ऽभूत्, ततः स्तोकैश् च वासरैः
श्रुतार्थायाः सुतो जातस्, त्वं हि जानीहि मां सखे । 19
गुणावतारो जातो ऽयं गुणाढ्यो नाम ब्राह्मणः,
इति तत्कालम् उदभूद् अन्तरिक्षात् सरस्वती । 20
क्षीणशापास् ततस् ते च जननीमातुला मम
कालेन पञ्चतां प्राप्ता, गतश् च ऽहम् अधीरतां । 21
अथ शोकं समुत्सृज्य बालो ऽपि गतवान् अहं
स्वावष्टम्भेन विद्यानां प्राप्तये दक्षिणापथं । 22
कालेन तत्र संप्राप्य सर्वा विद्याः प्रसिद्धिमान्
स्वदेशम् आगतो ऽभूवं दर्शयिष्यन् निजान् गुणान् । 23
प्रविशंश् च चिरात् तत्र नगरे सुप्रतिष्ठिते
अपश्यं शिष्यसहितः शोभां कामप्य् अहं तदा । 24
क्वचित् सामानि छन्दोगा गायन्ति स्म यथाविधि,
क्वचिद् विवादो विप्राणाम् अभूद् वेदविनिर्णये । 25
यो ऽत्र द्यूतकलां वेत्ति तस्य हस्तगतो निधिः,
इत्यादिकैतवैर् द्यूतम् अस्तुवन् कितवाः क्वचित् । 26
अन्योन्यं निजवाणिज्यकलाकौशलवादिनां
क्वचिच् च वणिजां मध्ये वणिग् एको ऽब्रवीद् इदं । 27
अर्थैः संयमवान् अर्थान् प्राप्नोति कियद् अद्भुतं,
मया पुनर् विना एव ऽर्थं लक्ष्मीर् आसादिता पुरा । 28

इत्य् उक्तः शकटालेन छन्नो ऽहं तस्य वेश्मनि
प्रतीक्षमाणो ऽवसरं तान्य् अहान्य् अत्यवाहयं । 78

तस्य 'अथ योगनन्दस्य, काणभूति, कदाचन
पुत्रो हिरण्यगुप्ताख्यो मृगयायै गतो ऽभवत् । 79
अश्ववेगात् प्रयातस्य कथंचिद् दूरम् अन्तरं
एकाकिनो वने तस्य वासरः पर्यहीयत । 80
ततश् च तां निशां नेतुं वृक्षम् आरोहति स्म सः,
क्षणात् तत्र 'एव च 'आरोहद् ऋक्षः सिंहेन भीषितः । 81
स दृष्ट्वा राजपुत्रं तं भीतं मानुषभाषया,
मा भैषीर् मम मित्रं त्वम् इत्य् उक्त्वा निर्भयं व्यधात् । 82
विश्रम्भाद् ऋक्षवाक्येन राजपुत्रो ऽथ सुप्तवान्,
ऋक्षस् तु जाग्रद् एव 'आसीद्, अधः सिंहो ऽथ सो ऽब्रवीत् । 83
ऋक्ष मानुषम् एतं मे क्षिप यावद् व्रजाम्य् अहं;
ऋक्षस् ततो ऽब्रवीत्, पाप न मित्रं घातयाम्य् अहं । 84
क्रमाद् ऋक्षे प्रसुप्ते ऽथ राजपुत्रे च जाग्रति,
पुनः सिंहो ऽब्रवीद्, एतम् ऋक्षं मे क्षिप मानुष । 85
तच् छ्रुत्वा 'आत्मभयात् तेन सिंहस्य 'आराधनाय सः
क्षिप्तो ऽपि न 'अपतच् चित्रम् ऋक्षो दैवप्रबोधितः । 86
मित्रद्रोहिन् भव 'उन्मत्त इति शापम् अदाच् च सः
तस्य राजसुतस्य 'एतद्वृत्तान्तावगमावधिं । 87

प्राप्य 'एव स्वगृहं प्रातर् उन्मत्तो ऽभून् नृपात्मजः,
योगनन्दश् च तद् दृष्ट्वा विषादं सहसा 'अगमत् । 88
अब्रवीच् च स, काले ऽस्मिन् जीवेद् वररुचिर् यदि,
इदं ज्ञायेत तत् सर्वं, धिङ् मे तद्वधपाटवं । 89
तच् छ्रुत्वा वचनं राज्ञः शकटालो व्यचिन्तयत्,
हन्त कात्यायनस्य 'अयं लब्धः कालः प्रकाशने । 90
न सो ऽत्र मानी तिष्ठेच् च, राजा मयि च विश्वसेत्,
इत्य् आलोच्य स राजानम् अब्रवीद् याचिताभयः । 91
राजन् अलं विषादेन, जीवन् वररुचिः स्थितः,
योगनन्दस् ततो ऽवादीद्, द्रुतम् आनीयताम् इति । 92
अथ 'अहं शकटालेन योगनन्दान्तिकं हठात्
आनीतस् तं तथाभूतं राजपुत्रं व्यलोकयं । 93
मित्रद्रोहः कृतो ऽनेन देव 'इत्य् उक्त्वा तथा 'एव सः
सरस्वतीप्रसादेन वृत्तान्तः कथितो मया । 94
ततस् तच्छापमुक्तेन स्तुतो ऽहं राजसूनुना,
त्वया कथम् इदं ज्ञातम् इत्य् अपृच्छत् स भूपतिः । 95
अथ 'अहम् अवदं, राजंल् लक्षणैर् अनुमानतः
प्रतिभातश् च पश्यन्ति सर्वं प्रज्ञावतां धियः । 96
तद् यथा तिलको ज्ञातस् तथा सर्वम् इदं मया,
इति मद्वचनात् सो ऽभूद् राजा लज्जानुतापवान् । 97

अथ अनादृतसत्कारः परिशुद्धा एव लाभवान्
स्वगृहं गतवान् अस्मि· शीलं हि विदुषां धनं। 98
प्राप्तस्य एव च तत्रत्यो जनो ऽरोदीत् पुरो मम,
अभ्येत्य मां समुद्भ्रान्तम् उपवर्षो ऽब्रवीत् ततः। 99
राज्ञा कृतं निशम्य त्वाम् उपकोशा अग्निसाद् वपुः
अकरोद्, अथ मातुस् ते शुचा हृदयम् अस्फुटत्। 100
तच् छ्रुत्वा अभिनवोद्भूतशोकावेगविचेतनः
सद्यो ऽहम् अपतं भूमौ वातरुग्ण इव द्रुमः। 101
क्षणाच् च गतवान् अस्मि प्रलापानां रसज्ञतां,
प्रियबन्धुविनाशोत्थशोकाग्निः कं न तापयेत्? । 102
आसंसारे जगत्य् अस्मिन् एका नित्या ह्य् अनित्यता,
तद् एताम् ऐश्वरीं मायां किं जानन्न् अपि मुह्यसि। 103
इत्यादिभिर् उपागत्य वर्षेण वचनैर् अहं
बोधितो ऽथ यथातत्त्वं कथंचिद् धृतिम् आप्तवान्। 104
ततो विरक्तहृदयस् त्यक्त्वा सर्वं निबन्धनं
प्रशमैकसहायो ऽहं तपोवनम् अशिश्रियं। 105

दिवसेषु अथ गच्छत्सु तत् तपोवनम् एकदा
अयोध्यात उपागच्छद् विप्र एको मयि स्थिते। 106
स मया योगनन्दस्य राज्यवार्ताम् अपृच्छत,
प्रत्यभिज्ञाय मां सो ऽथ सशोकम् इदम् अब्रवीत्। 107

शृणु नन्दस्य यद् वृत्तं तत्सकाशाद् गते त्वयि,
लब्धावकाशस् तस्य ऽभूच् छकटालश् चिरेण सः । 108
स चिन्तयन् बधोपायं योगनन्दस्य युक्तितः,
क्षितिं खनन्तम् अद्राक्षीच् चाणक्याख्यं द्विजं पथि । 109
किं भुवं खनसि इत्य् उक्तो तेन पृष्टो ऽथ सो ऽब्रवीत्,
दर्भम् उन्मूलयाम्य् अत्र, पादो ह्य् एतेन मे क्षतः । 110
तच् छ्रुत्वा सहसा मन्त्री कोपेन क्रूरनिश्चयं
तं विप्रं योगनन्दस्य बधोपायम् अमन्यत । 111
नाम पृष्ट्वा ऽब्रवीत् तं च, हे ब्रह्मन् दापयामि ते
अहं त्रयोदशीश्राद्धं गृहे नन्दस्य भूपतेः । 112
दक्षिणातः सुवर्णस्य लक्षं तव भविष्यति,
भोक्ष्यसे धुरि च ऽन्येषाम्, एहि तावद् गृहं मम । 113
इत्य् उक्त्वा शकटालस् तं चाणक्यम् आनयद् गृहं,
श्राद्धाहे ऽदर्शयत् तं च राज्ञे, स श्रद्दधे च तं । 114
ततः स गत्वा चाणक्यो धुरि श्राद्ध उपाविशत्,
सुबन्धुनामा विप्रश् च ताम् ऐच्छद् धुरम् आत्मनः । 115
तद् गत्वा शकटालेन विज्ञप्तो नन्दभूपतिः
अवादीत्, न ऽपरो योग्यः सुबन्धुर् धुरि तिष्ठतु । 116
आगत्य एतां च राजाज्ञां शकटालो भयानतः,
न मे ऽपराध इत्य् उक्त्वा चाणक्याय न्यवेदयत् । 117

सो ऽथ कोपेन चाणक्यो ज्वलन्न् इव समन्ततः
निद्रां मुक्ता शिखां तत्र प्रतिज्ञाम् अकरोद् इमां । 118
अवश्यं हन्त नन्दो ऽयं सप्तभिर् दिवसैर् मया
विनाश्यो, बन्धनीया च ततो निर्मन्युना शिखा । 119
इत्य् उक्तवन्तं कुपिते योगनन्दे पलायितं
अलक्षितं स्वगेहे तं शकटालो न्यवेशयत् । 120
तत्र उपकरणे दत्ते गुप्तं तेन एव मन्त्रिणा
स चाणक्यो द्विजः क्वापि गत्वा कृत्याम् असाधयत् । 121
तद्वशाद् योगनन्दो ऽथ दाहज्वरम् अवाप्य सः
सप्तमे दिवसे प्राप्ते पञ्चत्वं समुपागमत् । 122
हत्वा हिरण्यगुप्तं च शकटालेन तत्सुतं
पूर्वनन्दसुते लक्ष्मीश् चन्द्रगुप्ते निवेशिता । 123
मन्त्रित्वे तस्य च अभ्यर्थ्य बृहस्पतिसमं धिया
चाणक्यं स्थापयित्वा तं, स मन्त्री कृतकृत्यतां । 124
मन्वानो योगनन्दस्य कृतवैरप्रतिक्रियः,
पुत्रशोकेन निर्विण्णस् तद्विनाशाद् अगाद् वनं । 125
इति तस्य मुखाच् छ्रुत्वा विप्रस्य सुतराम् अहं,
काणभूते, गतः खेदं सर्वम् आलोक्य चञ्चलं । 126
खेदाच् च अहम् इमां द्रष्टुम् आगतो विन्ध्यवासिनीं,
तत्प्रसादेन दृष्ट्वा त्वां स्मृता जातिर् मया सखे । 127

दिव्यं प्राप्य च विज्ञानं मया ऽउक्ता ते महाकथा,
इदानीं क्षीणशापो ऽहं यतिष्ये देहम् उज्झितुं । 128
त्वं च सम्प्रति तिष्ठ ऽइह, यावद् आयाति ते ऽन्तिकं
शिष्ययुक्तो गुणाढ्याख्यस् त्यक्तभाषात्रयो द्विजः । 129
सो ऽपि ह्य् अहम् इव क्रोधाद् देव्या शप्तो गणोत्तमः
माल्यवान् नाम मत्पक्षपाती मर्त्यत्वम् आगतः । 130
तस्मै महेश्वरोक्ता ऽएषा कथनीया कथा त्वया,
ततस् ते शापनिर्मुक्तिस् तस्य च ऽअपि भविष्यति । 131
एवं वररुचिस् तत्र काणभूतिर् निवेद्य सः
प्रतस्थे देहमोक्षाय पुण्यं बदरिकाश्रमं । 132
गच्छन् ददर्श गङ्गायां सो ऽथ शाकाशनं मुनिं
तत्समक्षं च तस्य ऽऋषेः कुशेन ऽअभूत् करक्षतिः । 133
ततो ऽस्य रुधिरं निर्यत् तेन शाकरसीकृतं
अहंकारपरीक्षार्थं कौतुकात् स्वप्रभावतः । 134
तद् दृष्ट्वा, हन्त सिद्धो ऽस्मि ऽइत्य् अगाद् दर्पम् असौ मुनिः;
ततो वररुचिः किंचिद् विहस्य ऽइव जगाद तं । 135
जिज्ञासनाय रक्तं ते मया शाकरसीकृतं,
यावन् न ऽअद्य ऽअप्य् अहंकारः परित्यक्तस् त्वया मुने । 136
ज्ञानमार्गे ह्य् अहंकारः परिघो दुरतिक्रमः,
ज्ञानं विना च न ऽअस्त्य् एव मोक्षो व्रतशतैर् अपि । 137

स्वर्गस् तु न मुमुक्षूणां क्षयी चित्तं विलोभयेत्,
तस्माद् अहंकृतित्यागाज् ज्ञाने यत्नं मुने कुरु । 138
विनीय एनं मुनिं, तेन प्रणतेन कृतस्तुतिः
तं बदर्याश्रमोद्देशं शान्तं वररुचिर् ययौ । 139
अथ स निबिडभक्त्या तत्र देवीं शरण्यां
शरणम् उपगतो ऽसौ मर्त्यभावं मुमुक्षुः,
प्रकटितनिजमूर्तिः सा अपि तस्मै शशंस
स्वयम् अनलसमुत्थां धारणां देहमुक्त्यै । 140
दग्ध्वा शरीरम् अथ धारणया तया तद्,
दिव्यां गतिं वररुचिः स निजां प्रपेदे;
विन्ध्याटवीभुवि ततश् च स काणभूतिर्
आसीद् अभीप्सितगुणाढ्यसमागमोत्कः । 141

। इति ।
॥ पञ्चमस् तरङ्गः ॥

TARANGA. 6.

ततः स मर्त्यवपुषा माल्यवान् विचरन् वने,
नाम्ना गुणाढ्यः सेवित्वा सातवाहनभूपतिं । 1
संस्कृताद्यास् तदग्रे च भाषास् तिस्रः प्रतिज्ञया
त्यक्त्वा, खिन्नमना द्रष्टुम् आययौ विन्ध्यवासिनीं । 2
तदादेशेन गत्वा च काणभूतिं ददर्श सः,
ततो जातिं निजां स्मृत्वा प्रबुद्धः सहसा ऽभवत् । 3
आश्रित्य भाषां पैशाचीं भाषात्रयविलक्षणां,
श्रावयित्वा निजं नाम, काणभूतिं च सो ऽब्रवीत् । 4
पुष्पदन्ताच् छ्रुतां दिव्यां शीघ्रं कथय मे कथां,
येन शापं तरिष्यावस्, त्वं च अहं च समं सखे । 5
तच् छ्रुत्वा प्रणतो हृष्टः काणभूतिर् उवाच तं,
कथयामि कथां, किंतु कौतुकं मे महत् प्रभो । 6
आजन्मचरितं तावच् छंस मे, कुर्व् अनुग्रहं,
इति तेन अर्थितो वक्तुं गुणाढ्यो ऽथ प्रचक्रमे । 7
प्रतिष्ठाने ऽस्ति नगरं सुप्रतिष्ठितसंज्ञकं,
तत्र अभूत् सोमशर्माख्यः को ऽपि ब्राह्मणसत्तमः । 8

वत्सश् च गुल्मकश् च एव द्वौ तस्य तनयौ, सखे,
जायते स्म तृतीया च श्रुतार्था नाम कन्यका । 9
कालेन ब्राह्मणः सो ऽथ सभार्यः पञ्चतां गतः,
तत्पुत्रौ तौ स्वसरं च पालयन्ताव् अतिष्ठतां । 10
सा च अकस्मात् सगर्भा अभूत्; तद् दृष्ट्वा वत्सगुल्मयोः
तत्र अन्यपुरुषाभावाच् छङ्का अन्योन्यम् अजायत । 11
ततः श्रुतार्था चित्तज्ञा भ्रातरौ ताव् अभाषत,
पाप शङ्का न कर्तव्या, शृणुतं, कथयामि वां । 12
कुमारः कीर्तिसिनाख्यो नागराजस्य वासुकेः
भ्रातुः पुत्रो ऽस्ति, तेन अहं दृष्टा स्नातुं गता सती । 13
ततः स मदनाक्रान्तो निवेद्य अन्वयनामनी
गान्धर्वेण विवाहेन मां भार्याम् अकरोत् तदा । 14
विप्रजातिर् अयं, तस्मान् मम गर्भ इति स्वसुः
श्रुत्वा, कः प्रत्ययो ऽत्र इति वत्सगुल्माव् अवोचतां । 15
ततो रहसि सस्मार सा तं नागकुमारकं,
स्मृतमात्रागतः सो ऽथ वत्सगुल्माव् अभाषत । 16
भार्या कृता मया एव इयं, शापभ्रष्टा वराप्सराः
युष्मत्स्वसा, युवां च इह शापेन एव च्युतौ भुवि । 17
पुत्रो जनिष्यते च अत्र युष्मत्स्वसुर् असंशयं,
ततो ऽस्याः शापनिर्मुक्तिर् युवयोश् च भविष्यति । 18

इत्य् उक्त्वा ऽन्तर्हितः सो ऽभूत्, ततः स्तोकैश् च वासरैः
श्रुतार्थायाः सुतो जातस्, त्वं हि जानीहि मां सखे । 19
गुणावतारो जातो ऽयं गुणाढ्यो नाम ब्राह्मणः,
इति तत्कालम् उदभूद् अन्तरिक्षात् सरस्वती । 20
क्षीणशापास् ततस् ते च जननीमातुला मम
कालेन पञ्चतां प्राप्ता, गतश् च ऽहम् अधीरतां । 21
अथ शोकं समुत्सृज्य बालो ऽपि गतवान् अहं
स्वावष्टम्भेन विद्यानां प्राप्तये दक्षिणापथं । 22
कालेन तत्र संप्राप्य सर्वा विद्याः प्रसिद्धिमान्
स्वदेशम् आगतो ऽभूवं दर्शयिष्यन् निजान् गुणान् । 23
प्रविशंश् च चिरात् तत्र नगरे सुप्रतिष्ठिते
अपश्यं शिष्यसहितः शोभां कामप्य् अहं तदा । 24
क्वचित् सामानि छन्दोगा गायन्ति स्म यथाविधि,
क्वचिद् विवादो विप्राणाम् अभूद् वेदविनिर्णये । 25
यो ऽत्र द्यूतकलां वेत्ति तस्य हस्तगतो निधिः,
इत्यादिकैतवैर् द्यूतम् अस्तुवन् कितवाः क्वचित् । 26
अन्योन्यं निजबाणिज्यकलाकौशलवादिनां
क्वचिच् च बणिजां मध्ये बणिग् एको ऽब्रवीद् इदं । 27
अर्थैः संयमवान् अर्थान् प्राप्नोति कियद् अद्भुतं,
मया पुनर् विना ऽएव ऽर्थं लक्ष्मीर् आसादिता पुरा । 28

अत एव च लोके ऽहं प्रसिद्धो मूषकाख्यया,
एवं लक्ष्मीर् इयं प्राप्ता निर्धनेन सता मया । 49
तच् छ्रुत्वा तत्र ते ऽभूवन् बणिजो ऽन्ये सविस्मयाः.
धीर् न चित्रीयते कस्माद् अभित्तौ चित्रकर्मणा । 50

क्वचित् प्रतिग्रहप्राप्तहेममाषाष्टको द्विजः
छन्दोगः कश्चिद् इत्य् उक्तो विटप्रायेण केनचित् । 51
ब्राह्मण्याद् भोजनं तावद् अस्ति ते, तत् त्वया ऽमुना
लोकयात्रा सुवर्णेन वैदग्ध्याय ऽइह शिक्ष्यतां । 52
को मां शिक्षयति ऽइत्य् उक्ते तेन मुग्धेन सो ऽब्रवीत्,
या ऽएषा चतुरिका नाम वेश्या, तस्या गृहं व्रज । 53
तत्र किं करवाणि ऽइति द्विजेन ऽउक्तो विटो ऽब्रवीत्,
स्वर्णं दत्वा प्रयुञ्जीथा रञ्जयन् साम किंचन । 54
श्रुत्वा ऽइत्य् अगच्छद् छन्दोगो द्रुतं चतुरिकागृहं,
उपाविशत् प्रविश्य ऽअत्र कृतप्रत्युद्गतिस् तया । 55
माम् अद्य लोकयात्रां त्वं शिक्षय ऽएतेन साम्प्रतं,
इति जल्पन् स तत् तस्याः सुवर्णम् अर्पितवान् द्विजः । 56
प्रहसत्य् अथ तत्रस्थे जने, किंचिद् विचिन्त्य सः,
गोकर्णसदृशौ कृत्वा करौ ऽआबद्धसारणी । 57
तारस्वरं तथा साम गायति स्म जडाशयः,
यथा तत्र मिलन्ति स्म विटा हास्यदिदृक्षवः । 58

ते च ऽवोचन्, मृगालो ऽयं प्रविष्टो ऽत्र कुतो ऽन्यथा,
तच् छीघ्रम् अर्द्धचन्द्रो ऽस्य गले ऽस्मिन् दीयताम् इति । 59
अर्धचन्द्रं शरं मत्वा शिरश्छेदभयाद् द्रुतं,
शिक्षिता लोकयात्रा इति गर्जन् स निरगात् ततः । 60
तत्सकाशं ततो ऽगच्छद् येन ऽसौ प्रेषितो ऽभवत्,
वृत्तान्तं च ऽवदत् तस्मै, सो ऽपि च एनम् अभाषत । 61
साम सान्त्वं मया उक्तं ते, वेदस्य ऽवसरो ऽत्र कः?
किं वा आधाराधिक्रूडं हि जाड्यं वेद जडे जने । 62
एवं विहस्य गत्वा च तेन उक्ता सा विलासिनी,
द्विपदस्य पशोर् अस्य तत् सुवर्णतृणं त्यज । 63
हसन्त्या च तया त्यक्तं सुवर्णं, प्राप्य स द्विजः
पुनर् जातम् इव आत्मानं मन्वानो गृहम् आगतः । 64
एवंप्रायाण्य् अहं पश्यन् कौतुकानि पदे पदे
प्राप्तवान् राजभवनं महेन्द्रसदनोपमं । 65
ततश् च ऽन्तः प्रविष्टो ऽहं शिष्यैर् अग्रे निवेदितः
स्वास्थानस्थितम् अद्राक्षं राजानं सातवाहनं । 66
शर्ववर्मप्रभृतिभिर् मन्त्रिभिः परिवारितं,
रत्नसिंहासनासीनम् अमरैर् इव वासवं । 67
विहितस्वस्तिकारं माम् उपविष्टम् अथ ऽसने
राज्ञा कृतादरं च एवं शर्ववर्मादयो ऽस्तुवन् । 68

अयं देव भुवि ख्यातः सर्वविद्याविचक्षणः,
गुणाढ्य इति नाम अस्य यथार्थम् अत एव हि । 69
इत्यादितत्स्तुतिं दृष्ट्वा मन्त्रिभिः सातवाहनः
प्रीतः सपदि सत्कृत्य मन्त्रित्वे मां न्ययोजयत् । 70
अथ अहं राजकार्याणि चिन्तयन् अवसं सुखं
शिष्यान् अध्यापयंस् तत्र कृतदारपरिग्रहः । 71

कदाचित् कौतुकाद् भ्राम्यन् स्वैरं गोदावरीतटे
देवीकृतिर् इति ख्यातम् उद्यानं दृष्टवान् अहं । 72
तच् च अतिरम्यम् आलोक्य क्षितिस्थम् इव नन्दनं,
उद्यानपालः पृष्टो ऽभून् मया तत्र तदागमं । 73
स च माम् अवदत्, स्वामिन् वृद्धेभ्यः श्रूयते यथा,
पूर्वं मौनी निराहारो द्विजः कश्चित् समाययौ । 74
स दिव्यम् इदम् उद्यानं सदेवभवनं व्यधात्,
ततो ऽत्र ब्राह्मणाः सर्वे मिलन्ति स्म सकौतुकाः । 75
निर्बन्धात् तैः स पृष्टः स्वं वृत्तान्तम् अवदद् द्विजः;
अस्ति इह वककच्छाख्यो विषयो नर्मदातटे । 76
तस्मिन् अहं समुत्पन्नो विप्रस्, तस्य च मे पुरा
न भिक्षाम् अप्य् अदात् कश्चिद् दरिद्रस्य आलसस्य च । 77
अथ खेदाद् गृहं त्यक्त्वा विरक्तो जीवितं प्रति,
भ्रान्त्वा तीर्थान्य् अहं द्रष्टुम् अगच्छं विन्ध्यवासिनीं 78

दृष्ट्वा ततश् च तां देवीम् इति संचिन्तितं मया,
लोकः पशूपहारेण प्रीणाति वरदाम् इमां । 79
अहं तु आत्मानम् एव इह हन्मि मूर्खम् इमं पशुं;
निश्चित्य इति शिरश् छेत्तुं मया शस्त्रम् अगृह्यत । 80
तत्क्षणं सा प्रसन्ना मां देवी स्वयम् अभाषत,
पुत्र सिद्धो ऽसि, मा आत्मानं बधीस्, तिष्ठ मम अन्तिके । 81
इति देवीवरं लब्ध्वा संप्राप्ता दिव्यता मया,
ततः प्रभृति नष्टा मे बुभुक्षा च तृषा सह । 82
कदाचिद् अथ देवी मां तत्रस्थं स्वयम् आदिशत्,
गत्वा पुत्र प्रतिष्ठाने रचय उद्यानम् उत्तमं । 83
इत्य् उक्त्वा सा एव मे बीजं दिव्यं प्रादात्; ततो मया
इह आगत्य कृतं कान्तम् उद्यानं तत्प्रभावतः । 84
पाल्यम् एतच् च युष्माकम् इत्य् उक्त्वा स तिरोदधे,
एवं निर्मितम् उद्यानम् इदं देव्या पुरा प्रभो । 85
उद्यानपालाद् इत्य् एवमुद्देशे देव्यनुग्रहं
आकर्ण्य विस्मयाविष्टो गृहाय गतवान् अहं । 86

एवम् उक्ते गुणाढ्येन काणभूतिर् अभाषत,
सातवाहन इत्य् अस्य कस्मान् नाम अभवत् प्रभोः? । 87
ततो ऽब्रवीद् गुणाढ्यो ऽपि, शृणु एतत् कथयामि ते,
दीपिकर्णिर् इति ख्यातो राजा अभूत् प्राज्यविक्रमः । 88

तस्य शक्तिमती नाम भार्या प्राणाधिका ऽभवत्
एतान्तसुप्ताम् उद्याने सर्पस् तां जातु दष्टवान् । 89
गतायाम् अथ पञ्चत्वं तस्यां तद्गतमानसः
अपुत्रो ऽपि स जग्राह ब्रह्मचर्यव्रतं नृपः । 90
ततः कदाचिद् राज्यार्हपुत्रासद्भावदुःखितं
इत्य् आदिदेश तं स्वप्ने भगवान् इन्दुशेखरः । 91
अटव्यां द्रक्ष्यसि भ्राम्यन् सिंहारूढं कुमारकं,
तं गृहीत्वा गृहं गच्छेः, स ते पुत्रो भविष्यति । 92
अथ प्रबुद्धस् तं स्वप्नं स्मरन् राजा जहर्ष सः.
कदाचिच् च ययौ दूराम् अटवीं मृगयारसात् । 93
ददर्श तत्र मध्याह्ने सिंहारूढं स भूपतिः
बालकं पद्मसरसस् तीरे तपनतेजसं । 94
अथ राजा स्मरन् स्वप्नम् अवतारितबालकं
जलाभिलाषिणं सिंहं जघान एकशरेण तं । 95
स सिंहस् तद्वपुस् त्यक्त्वा सद्यो ऽभूत् पुरुषाकृतिः;
कष्टं किम् एतद् ब्रूहि इति राज्ञा पृष्टो जगाद च । 96
धनदस्य सखा यक्षः सातो नाम अस्मि भूपते,
सो ऽहं स्नान्तीम् अपश्यं प्राग् गङ्गायाम् ऋषिकन्यकां । 97
सा अपि मां वीक्ष्य संजातमन्मथा अभूद् अहं यथा,
गान्धर्वेण विवाहेन ततो भार्या कृता मया । 98

तच् च तद्बान्धवा बुद्ध्वा तां च मां च ऽशपन् क्रुधा,
सिंहौ भविष्यतः पापौ स्वेच्छाचारौ युवाम् इति । 99
पुत्रजन्मावधिं तस्याः शापान्तं मुनयो व्यधुः,
मम तु त्वच्छराघातपर्यन्तं तदनन्तरं । 100
अथ ऽऽवां सिंहमिथुनं संजातौ; सा ऽपि कालतः
गर्भिण्य् अभूत्, ततो जाते दारके ऽस्मिन् व्यपद्यत । 101
अयं तु वर्धितो ऽन्यासां सिंहीनां पयसा मया;
अद्य च ऽहं विमुक्तो ऽस्मि शापाद् बाणाहतस् त्वया । 102
तद् गृहाण महासत्त्वं मया दत्तम् अमुं सुतं,
अयं ह्य् अर्थः समादिष्टस् तैर् एव मुनिभिः पुरा । 103
इत्य् उक्त्वा ऽन्तर्हिते तस्मिन् सातनामनि गुह्यके,
स राजा तं समादाय बालं प्रत्याययौ गृहं । 104
सातेन यस्माद् ऊढो ऽभूत्, तस्मात् तं सातवाहनं
नाम्ना चकार, कालेन राज्ये च ऽनं न्यवेशयत् । 105
ततस् तस्मिन् गते ऽरण्यं द्वीपिकर्णौ क्षितीश्वरे,
संवृत्तः सार्वभौमो ऽसौ भूपतिः सातवाहनः । 106
एवम् उक्त्वा कथामध्ये काणभूत्यनुयोगतः
गुणाढ्यः प्रकृतं धीमान् अनुस्मृत्य ऽब्रवीत् पुनः । 107
ततः कदाचिद् अध्यास्त वसन्तसमयोत्सवे
देवीकृतं तद् उद्यानं स राजा सातवाहनः । 108

विहरन् स चिरं तत्र, महेन्द्र इव नन्दने,
वापीजले ऽवतीर्णो ऽभूत् क्रीडितुं कामिनीसखः । 109
असिञ्चत् तत्र दयिताः सहेलं करवारिभिः,
असिच्यत स ताभिस् च वशाभिर् इव वारणः । 110
मुखैर् धौताञ्जनाताम्रनेत्रैर् जह्रुर् जलाप्लुतैः
अङ्गैः सक्ताम्बरव्यक्तविभागैस् च तम् अङ्गनाः । 111
विचलत्पत्रतिलकाः स चक्रे वनमध्यगाः
च्युताभरणपुष्पास् ता, लता वायुर् इव, प्रियाः । 112
अथ एका तस्य महिषी राज्ञः स्तनभरालसा
शिरीषसुकुमाराङ्गी क्रीडन्ती श्रमम् अभ्यगात् । 113
सा जलैर् अभिषिञ्चन्तं राजानम् असहा सती
अब्रवीत्, मा उदकैर् देव परिताडय माम् इति । 114
तच् छ्रुत्वा मोदकान् राजा द्रुतम् आनाययत् तदा;
ततो विहस्य सा राज्ञी पुनर् एवम् अभाषत । 115
राजन् अवसरः को ऽत्र मोदकानां जलान्तरे?
उदकैः सिञ्च मा त्वं माम् इत्य् उक्तं हि मया तव । 116
सन्धिमात्रं न जानासि माशब्दोदकशब्दयोः,
न च प्रक[illegible]सि, मूर्खस् त्वं कथम् ईदृशः । 117
इत्य् उक[illegible] राज्ञ्या शब्दशास्त्रविदा नृपः
[illegible]तर्लज्जाक्रान्तो झटित्य् अभूत् । 118

परित्यक्तजलक्रीडो वीतदर्पश् च तत्क्षणं
ज्ञातावमानो निर्लक्ष्यः प्राविशन् निजमन्दिरं । 119
ततश् चिन्तापरो मुह्यन् आहारादिपराङ्मुखः
चित्रस्थ इव पृष्टो ऽपि न एव किंचिद् अभाषत । 120
पाण्डित्यं शरणं वा मे मृत्युर् वा इति विचिन्तयन्
शयनीयपरिन्यस्तगात्रः संतापवान् अभूत् । 121
अकस्माद् अथ राज्ञस् तां दृष्ट्वा अवस्थां तथाविधां,
किम् एतद् इति संभ्रान्तः सर्वः परिजनो ऽभवत् । 122
ततो ऽहं शर्ववर्मा च ज्ञातवन्तौ क्रमेण तां.
अत्र अन्तरे च स प्रायः पर्यक्षीयत वासरः । 123
अस्मिन् काले न च स्वस्थो राजा इत्य् आलोच्य, तत्क्षणं
आवाभ्यां राजहंसाख्य आहूतो राजचेटकः । 124
शरीरवार्तां भूपस्य स च पृष्टो ऽब्रवीद् इदं,
न ईदृशो दुर्मना देवो दृष्टः पूर्वं कदाचन । 125
विष्णुशक्तिदुहित्रा अद्य मिथ्यापण्डितया तया
विलक्षीकृत इत्य् आहुर् देव्यो ऽन्याः कोपनिर्भरं । 126
एतत् तस्य मुखाच् छ्रुत्वा राजचेटस्य, दुर्मनाः
शर्ववर्मद्वितीयो ऽहं संशयाद् इत्य् अचिन्तयं । 127
व्याधिर् यदि भवेद् राज्ञः प्रविशेयुश् चिकित्सकाः,
आधिर् वा यदि तत्र अस्य कारणं न उपलभ्यते । 128

न 'अस्त्य् एव हि विपत्तो ऽस्य राज्ये निहतकण्टके,
अनुरक्ताः प्रजाश् च 'एता, न हानिः परिदृश्यते । 129
तत् कस्माद् एष खेदः स्याद् ईदृशः सहसा प्रभोः?
एवं विचिन्तिते धीमान् शर्ववर्मा 'इदम् अब्रवीत् । 130
अहं जानामि राज्ञो ऽस्य मन्युर् मौर्ख्यानुतापतः,
मूर्खो ऽहम् इति पाण्डित्यं सदा 'एव 'अयं हि वाञ्छति । 131
उपलब्धो मया च 'एष पूर्वम् एव तदाशयः
राज्ञ्या 'अवमानितश् च 'अद्य तन्निमित्तम् इति श्रुतं । 132
एवम् अन्योन्यम् आलोच्य रात्रिं ताम् अतिवाह्य च,
प्रातर् आवाम् अगच्छाव वासवेश्म महीपतेः । 133
तत्र सर्वस्य रुद्धे ऽपि प्रवेशे, कथमप्य् अहं,
प्राविशं मम पश्चाच् च शर्ववर्वा लघुक्रमं । 134
उपविश्य 'अथ निकटे विज्ञप्तः स मया नृपः,
अकारणं कथं देव घर्तसे विमना इति । 135
तच् छ्रुत्वा 'अपि तथा 'एव 'आसीत् स तूष्णीं सातवाहनः,
शर्ववर्मा ततश् च 'इदम् अद्भुतं वाक्यम् अब्रवीत् । 136
श्रुतिमन्तं मां कुर्व् इति प्राग् उक्तं देव मे त्वया;
तेन 'अहं कृतवान् अद्य स्वप्नमाणवकं निशि । 137
स्वप्ने ततो मया दृष्टं नभसश् च्युतम् अम्बुजं,
तच् च दिव्येन केनापि कुमारेण विकासितं । 138

ततश् च निर्गता तस्माद् दिव्या स्त्री धवलाम्बरा,
तव देव मुखं सा च प्रविष्टा समनन्तरं । 139
इयद् दृष्ट्वा प्रबुद्धो ऽस्मि, सा च मन्ये सरस्वती
देवस्य वदने साक्षात् संप्रविष्टा न संशयः । 140
एवं निवेदितस्वप्ने शर्ववर्मणि, तत्क्षणं
माम् अस्तमौनः साकूतम् अवदत् सातवाहनः । 141
शिक्ष्यमाणः प्रयत्नेन कालेन कियता पुमान्
अधिगच्छति पाण्डित्यम्, एतन् मे कथ्यतां त्वया । 142
मम तेन विना ह्य् एषा लक्ष्मीर् न प्रतिभासते,
विभवैः किं नु मूर्खस्य, काष्ठस्य ऽऽभरणैर् इव । 143
ततो ऽहम् अवदं, राजन् वर्षैर् द्वादशभिः सदा
ज्ञायते सर्वविद्यानां मुखं व्याकरणं नरैः । 144
अहं तु शिक्षयामि त्वां वर्षषट्केन तद् विभो.
श्रुत्वा ऽऽएतत् सहसा सेर्ष्यं शर्ववर्मा किल ऽऽवदत् । 145
सुखोचितो जनः क्लेशं कथं कुर्याद् इयच् चिरं?
तद् अहं मासषट्केन देव त्वां शिक्षयामि तत् । 146
श्रुत्वा ऽऽएव ऽऽएतद् असम्भाव्यं तम् अवोचम् अहं रुषा,
षड्भिर् मासैस् त्वया देवः शिक्षितश् चेत्, ततो मया । 147
संस्कृतं प्राकृतं तद्वद् देशभाषा च सर्वदा
भाषात्रयम् इदं त्यक्तं, यन् मनुष्येषु सम्भवेत् । 148

शर्ववर्मा ततो ऽवादीन्, न चेद् एवं करोम्य् अहं,
द्वादश 'अब्दान् वहाम्य् एष शिरसा तव पादुके । 149
इत्य् उक्त्वा निर्गते तस्मिन्, अहम् अप्य् अगमं गृहं,
राजा 'अप्य् उभयतः सिद्धिं मत्वा शान्तो बभूव सः । 150
शर्ववर्मा चवीहस्तः प्रतिज्ञां तां सुदुस्तरां
पश्यन् सानुशयः सर्वं स्वभार्यायै शशंस तत् । 151
सा 'अपि तं दुःखिता 'अवोचत्, संकटे ऽस्मिंस् तव प्रभो
विना स्वामिकुमारेण गतिर् अन्या न दृश्यते । 152
तथा 'इति निश्चयं कृत्वा पश्चिमे प्रहरे निशि
शर्ववर्मा निराहारस् तत्र 'एव प्रस्थितो ऽभवत् । 153
तच् च चारमुखाद् बुद्ध्वा मया प्रातर् निवेदितं
राज्ञे; सो ऽपि तद् आकर्ण्य, किं भवेद् इत्य् अचिन्तयत् । 154
ततस् तं सिंहगुप्ताख्यो राजपुत्रो हितो ऽब्रवीत्,
त्वयि खिन्ने तदा देव निर्वेदो मे महान् अभूत् । 155
ततः श्रेयोनिमित्तं ते चण्डिकाग्रे निजं शिरः
छेत्तुं प्रारब्धवान् अस्मि गत्वा 'अस्मान् नगराद्-बहिः । 156
मा 'एवं कृथा, नृपस्य 'इच्छा सेत्स्यत्य् एव 'इत्य् अवारयत्
वाग् अन्तरिक्षाद् अथ मां, तन् मन्ये सिद्धिर् अस्ति ते । 157
इत्य् उक्त्वा नृपम् आमन्त्र्य सत्वरं शर्ववर्मणः
पश्चाच् चारद्वयं सो ऽथ सिंहगुप्तो व्यसर्जयत् । 158

सो ऽपि वार्तिकभक्तः सन् कृतमौनः सुनिश्चयः
प्राप स्वामिकुमारस्य शर्ववर्मा ऽन्तिकं क्रमात् । 159
शरीरनिरपेक्षेण तपसा तत्र तोषितः
प्रसादम् अकरोत् तस्य कार्त्तिकेयो यथेप्सितं । 160
आगत्य ऽग्रे ततो राज्ञि चाराभ्यां स निवेदितः
सिंहगुप्तविसृष्टाभ्याम् उदयः शर्ववर्मणः । 161
तच् छ्रुत्वा मम राज्ञश् च विषादप्रमदौ द्वयोः
अभूतां मेघम् आलोक्य हंसचातकयोर् इव । 162
आगत्य शर्ववर्मा ऽथ कुमारवरसिद्धिमान्
चिन्तितोपस्थिता राज्ञि सर्वा विद्याः प्रदत्तवान् । 163
प्रादुरासंश् च तास् तस्य सातवाहनभूपतेः
तत्क्षणं किं न कुर्याद् धि प्रसादः पारमेश्वरः । 164

अथ तम् अखिलविद्यालाभम् आकर्ण्य राज्ञः
प्रमुदितवति राष्ट्रे तत्र को ऽप्य् उत्सवो ऽभूत्,
अपि पवनविधूतास् तत्क्षणोल्लास्यमानाः
प्रतिवसतिपताका बद्धनृत्ता इव ऽऽसन् । 165
राजार्हरत्ननिचयैर् अथ शर्ववर्मा
तेन ऽर्चितो गुरुर् इति प्रणतेन राज्ञा,
स्वामीकृतश् च विषये वककच्छनाम्नि
कूलोपकण्ठविनिवेशिनि नर्मदायाः । 166

अयं देव भुवि ख्यातः सर्वविद्याविचक्षणः,
गुणाढ्य इति नाम अस्य यथार्थम् अत एव हि । 69
इत्यादितत्स्तुतिं दृष्ट्वा मन्त्रिभिः सातवाहनः
प्रीतः सपदि सत्कृत्य मन्त्रित्वे मां न्ययोजयत् । 70
अथ अहं राजकार्याणि चिन्तयन् अवसं सुखं
शिष्यान् अध्यापयंस् तत्र कृतदारपरिग्रहः । 71

कदाचित् कौतुकाद् भ्राम्यन् स्वैरं गोदावरीतटे
देवीकृतिर् इति ख्यातम् उद्यानं दृष्टवान् अहं । 72
तच् च अतिरम्यम् आलोक्य क्षितिस्थम् इव नन्दनं,
उद्यानपालः पृष्टो ऽभून् मया तत्र तदागमं । 73
स च माम् अवदत्, स्वामिन् वृद्धेभ्यः श्रूयते यथा,
पूर्वं मौनी निराहारो द्विजः कश्चित् समाययौ । 74
स दिव्यम् इदम् उद्यानं सदेवभवनं व्यधात्,
ततो ऽत्र ब्राह्मणाः सर्वे मिलन्ति स्म सकौतुकाः । 75
निर्बन्धात् तैः स पृष्टः स्वं वृत्तान्तम् अवदद् द्विजः;
अस्ति इह वककच्छाख्यो विषयो नर्मदातटे । 76
तस्मिन् अहं समुत्पन्नो विप्रस्, तस्य च मे पुरा
न भिक्षाम् अप्य् अदात् कश्चिद् दरिद्रस्य आलसस्य च । 77
अथ खेदाद् गृहं त्यक्त्वा विरक्तो जीवितं प्रति,
भ्रान्त्वा तीर्थान्य् अहं द्रष्टुम् अगच्छं विन्ध्यवासिनीं 78

दृष्ट्वा ततश् च तां देवीम् इति संचिन्तितं मया,
लोकः पशूपहारेण प्रीणाति वरदाम् इमां । 79
अहं तु आत्मानम् एव इह हन्मि मूर्खम् इमं पशुं;
निश्चित्य इति शिरश् छेत्तुं मया शस्त्रम् अगृह्यत । 80
तत्क्षणं सा प्रसन्ना मां देवी स्वयम् अभाषत,
पुत्र सिद्धो ऽसि, मा आत्मानं बधीस्, तिष्ठ मम अन्तिके । 81
इति देवीवरं लब्ध्वा संप्राप्ता दिव्यता मया,
ततः प्रभृति नष्टा मे बुभुक्षा च तृषा सह । 82
कदाचिद् अथ देवी मां तत्रस्थं स्वयम् आदिशत्,
गत्वा पुत्र प्रतिष्ठाने रचय उद्यानम् उत्तमं । 83
इत्य् उक्त्वा सा एव मे बीजं दिव्यं प्रादात्; ततो मया
इह आगत्य कृतं कान्तम् उद्यानं तत्प्रभावतः । 84
पाल्यम् एतच् च युष्माकम् इत्य् उक्त्वा स तिरोदधे.
एवं निर्मितम् उद्यानम् इदं देव्या पुरा प्रभो । 85
उद्यानपालाद् इत्य् एवमुद्देशे देव्यनुग्रहं
आकर्ण्य विस्मयाविष्टो गृहाय गतवान् अहं । 86

एवम् उक्ते गुणाढ्येन काणभूतिर् अभाषत,
सातवाहन इत्य् अस्य कस्मान् नाम अभवत् प्रभो? । 87
ततो ऽब्रवीद् गुणाढ्यो ऽपि, शृणु एतत् कथयामि ते.
दीपिकर्णिर् इति ख्यातो राजा अभूत् प्राज्यविक्रमः । 88

तस्य शक्तिमती नाम भार्या प्राणाधिका ऽभवत्,
एतान्तसुप्ताम् उद्याने सर्पस् तां जातु दष्टवान् । 89
गतायाम् अथ पञ्चत्वं तस्यां, तद्गतमानसः
अपुत्रो ऽपि स जग्राह ब्रह्मचर्यव्रतं नृपः । 90
ततः कदाचिद् राज्यार्हपुत्राभावदुःखितं
इत्य् आदिदेश तं स्वप्ने भगवान् इन्दुशेखरः । 91
अटव्यां द्रक्ष्यसि भ्राम्यन् सिंहारूढं कुमारकं,
तं गृहीत्वा गृहं गच्छेः, स ते पुत्रो भविष्यति । 92
अथ प्रबुद्धस् तं स्वप्नं स्मरन् राजा जहर्ष सः,
कदाचिच् च ययौ दूराम् अटवीं मृगयारसात् । 93
ददर्श तत्र मध्याह्ने सिंहारूढं स भूपतिः
बालकं पद्मसरसस् तीरे तपनतेजसं । 94
अथ राजा स्मरन् स्वप्नम् अवतारितबालकं
जलाभिलाषिणं सिंहं जघान एकशरेण तं । 95
स सिंहस् तद्वपुस् त्यक्त्वा सद्यो ऽभूत् पुरुषाकृतिः;
कष्टं किम् एतद् ब्रूहि इति राज्ञा पृष्टो जगाद च । 96
धनदस्य सखा यक्षः सातो नाम अस्मि भूपते,
सो ऽहं स्नान्तीम् अपश्यं प्राग् गङ्गायाम् ऋषिकन्यकां । 97
सा अपि मां वीक्ष्य संजातमन्मथा अभूद् अहं यथा,
गान्धर्वेण विवाहेन ततो भार्या कृता मया । 98

तच् च तद्बान्धवा बुद्ध्वा तां च मां च ऽशपन् क्रुधा,
सिंहौ भविष्यतः पापौ स्वेच्छाचारौ युवाम् इति । 99
पुत्रजन्मावधिं तस्याः शापान्तं मुनयो व्यधुः,
मम तु त्वच्छराघातपर्यन्तं तदनन्तरं । 100
अथ ऽावां सिंहमिथुनं संजातौ; सा ऽपि कालतः
गर्भिण्य् अभूत्, ततो जाते दारके ऽस्मिन् व्यपद्यत । 101
अयं तु वर्धितो ऽन्यासां सिंहीनां पयसा मया;
अद्य च ऽहं विमुक्तो ऽस्मि शापाद् बाणाहतस् त्वया । 102
तद् गृहाण महासत्त्वं मया दत्तम् अमुं सुतं,
अयं ह्य् अर्थः समादिष्टस् तैर् एव मुनिभिः पुरा । 103
इत्य् उक्त्वा ऽन्तर्हिते तस्मिन् सातनामनि गुह्यके,
स राजा तं समादाय बालं प्रत्याययौ गृहं । 104
सातेन यस्माद् ऊढो ऽभूत्, तस्मात् तं सातवाहनं
नाम्ना चकार, कालेन राज्ये च ऽेनं न्यवेशयत् । 105
ततस् तस्मिन् गते ऽरण्यं द्वीपिकर्णौ क्षितीश्वरे,
संवृत्तः सार्वभौमो ऽसौ भूपतिः सातवाहनः । 106

एवम् उक्त्वा कथामध्ये काणभूत्यनुयोगतः
गुणाढ्यः प्रकृतं धीमान् अनुस्मृत्य ऽब्रवीत् पुनः । 107
ततः कदाचिद् अध्यास्त वसन्तसमयोत्सवे
देवीकृतं तद् उद्यानं स राजा सातवाहनः । 108

विहरन् स चिरं तत्र, महेन्द्र इव नन्दने,
वापीजले ऽवतीर्णो ऽभूत् क्रीडितुं कामिनीसखः । 109
असिञ्चत् तत्र दयिताः सहेलं करवारिभिः,
असिच्यत स ताभिश् च वशाभिर् इव वारणः । 110
मुखैर् धौताञ्जनाताम्रनेत्रैर् जलैर् जलाप्लुतैः
अङ्गैः सक्ताम्बरव्यक्तविभागैश् च तम् अङ्गनाः । 111
विचलत्पत्रतिलकाः स चक्रे वनमध्यगाः
च्युताभरणपुष्पास् ता, लता वायुर् इव, प्रियाः । 112
अथ ऽएका तस्य महिषी राज्ञः स्तनभरालसा
शिरीषसुकुमाराङ्गी क्रीडन्ती श्रमम् अभ्यगात् । 113
सा जलैर् अभिषिञ्चन्तं राजानम् असहा सती
अब्रवीन्, मा ऽउदकैर् देव परिताडय माम् इति । 114
तच् छ्रुत्वा मोदकान् राजा द्रुतम् आनाययत् तदा;
ततो विहस्य सा राज्ञी पुनर् एवम् अभाषत । 115
राजन्न् अवसरः को ऽत्र मोदकानां जलान्तरे?
उदकैः सिञ्च मा त्वं माम् इत्य् उक्तं हि मया तव । 116
सन्धिमात्रं न जानासि माशब्दोदकशब्दयोः,
न च प्रकरणं वेत्सि, मूर्खस् त्वं कथम् ईदृशः । 117
इत्य् उक्तः स तया राज्ञ्या शब्दशास्त्रविदा नृपः
परिवारे हसत्य् अन्तर्लज्जाक्रान्तो झटित्य् अभूत् । 118

परित्यक्तजलक्रीडो वीतदर्पश् च तत्क्षणं
ज्ञातावमानो निर्लक्ष्यः प्राविशन् निजमन्दिरं । 119
ततश् चिन्तापरो मुञ्चन् आहारादिपराङ्मुखः
चित्रस्थ इव पृष्टो ऽपि न एव किंचिद् अभाषत । 120
पाण्डित्यं शरणं वा मे मृत्युर् वा इति विचिन्तयन्
शयनीयपरिन्यस्तगात्रः संतापवान् अभूत् । 121
अकस्माद् अथ राज्ञस् तां दृष्ट्वा अवस्थां तथाविधां,
किम् एतद् इति संभ्रान्तः सर्वः परिजनो ऽभवत् । 122
ततो ऽहं शर्ववर्मा च ज्ञातवन्तौ क्रमेण तां.
अत्र अन्तरे च स प्रायः पर्यहीयत वासरः । 123
अस्मिन् काले न च स्वस्थो राजा इत्य् आलोच्य, तत्क्षणं
आवाभ्यां राजहंसाख्य आहूतो राजचेटकः । 124
शरीरवार्तां भूपस्य स च पृष्टो ऽब्रवीद् इदं,
न ईदृशो दुर्मना देवो दृष्टः पूर्वं कदाचन । 125
विष्णुशक्तिदुहित्रा अद्य मिथ्यापण्डितया तया
विलक्षीकृत इत्य् आहुर् देव्यो ऽन्याः कोपनिर्भरं । 126
एतत् तस्य मुखाच् छ्रुत्वा राजचेटस्य, दुर्मनाः
शर्ववर्मद्वितीयो ऽहं संशयाद् इत्य् अचिन्तयं । 127
व्याधिर् यदि भवेद् राज्ञः प्रविशेयुश् चिकित्सकाः,
आधिर् वा यदि तत्र अस्य कारणं न उपलभ्यते । 128

न 'अस्त्य् एव हि विपत्तो ऽस्य राज्ये निहतकण्टके,
अनुरक्ताः प्रजाश् च 'एता, न हानिः परिदृश्यते । 129
तत् कस्माद् एष खेदः स्याद् ईदृशः सहसा प्रभोः?
एवं विचिन्तिते धीमान् शर्ववर्मा 'इदम् अब्रवीत् । 130
अहं जानामि राज्ञो ऽस्य मन्युर् मौर्ख्यानुतापतः,
मूर्खो ऽहम् इति पाण्डित्यं सदा 'एव 'अयं हि वाञ्छति । 131
उपलब्धो मया च 'एष पूर्वम् एव तदाशयः
राज्ञ्या 'अवमानितश् च 'अद्य तन्निमित्तम् इति श्रुतं । 132
एवम् अन्योन्यम् आलोच्य रात्रिं ताम् अतिवाह्य च,
प्रातर् आवाम् अगछाव वासवेश्म महीपतेः । 133
तत्र सर्वस्य रुद्धे ऽपि प्रवेशे, कथमप्य् अहं,
प्राविशं मम पश्चाच् च शर्ववर्वा लघुक्रमं । 134
उपविश्य 'अथ निकटे विज्ञप्तः स मया नृपः,
अकारणं कथं देव वर्तसे विमना इति । 135
तच् छ्रुत्वा 'अपि तथा 'एव 'आसीत् स तूष्णीं सातवाहनः,
शर्ववर्मा ततश् च 'इदम् अद्भुतं वाक्यम् अब्रवीत् । 136
श्रुतिमन्तं मां कुर्व् इति प्राग् उक्तं देव मे त्वया;
तेन 'अहं कृतवान् अद्य स्वप्नमाणवकं निशि । 137
स्वप्ने ततो मया दृष्टं नभसश् च्युतम् अम्बुजं,
तच् च दिव्येन केनापि कुमारेण विकासितं । 138

ततश् च निर्गता तस्माद् दिव्या स्त्री धवलाम्बरा,
तव देव मुखं सा च प्रविष्टा समनन्तरं । 139
इयद् दृष्ट्वा प्रबुद्धो ऽस्मि, सा च मन्ये सरस्वती
देवस्य वदने साक्षात् संप्रविष्टा न संशयः । 140
एवं निवेदितस्वप्ने शर्ववर्मणि, तत्क्षणं
माम् अस्तमौनः साकूतम् अवदत् सातवाहनः । 141
शिक्ष्यमाणः प्रयत्नेन कालेन कियता पुमान्
अधिगच्छति पाण्डित्यम्, एतन् मे कथ्यतां त्वया । 142
मम तेन विना ह्य् एषा लक्ष्मीर् न प्रतिभासते,
विभवैः किं नु मूर्खस्य, काष्ठस्य ऽआभरणैर् इव । 143
ततो ऽहम् अवदं, राजन् वर्षैर् द्वादशभिः सदा
ज्ञायते सर्वविद्यानां मुखं व्याकरणं नरैः । 144
अहं तु शिक्षयामि त्वां वर्षषट्केन तद् विभो.
श्रुत्वा ऽएतत् सहसा सेर्ष्यं शर्ववर्मा किल ऽअवदत् । 145
सुखोचितो जनः क्लेशं कथं कुर्याद् इयच् चिरं?
तद् अहं मासषट्केन देव त्वां शिक्षयामि तत् । 146
श्रुत्वा ऽएव ऽएतद् असम्भाव्यं तम् अवोचम् अहं रुषा,
षड्भिर् मासैस् त्वया देवः शिक्षितश् चेत्, ततो मया । 147
संस्कृतं प्राकृतं तद्वद् देशभाषा च सर्वदा
भाषात्रयम् इदं त्यक्तं, यन् मनुष्येषु सम्भवेत् । 148

शर्ववर्मा ततो ऽवादीन्, न चेद् एवं करोम्य् अहं,
द्वादश ऽब्दान् वहाम्य् एष शिरसा तव पादुके । 149
इत्य् उक्त्वा निर्गते तस्मिन्न्, अहम् अप्य् अगमं गृहं,
राजा ऽप्य् उभयतः सिद्धिं मत्वा शस्तो बभूव सः । 150
शर्ववर्मा चवीहस्तः प्रतिज्ञां तां सुदुस्तरां
पश्यन् सानुशयः सर्वं स्वभार्यायै शशंस तत् । 151
सा ऽपि तं दुःखिता ऽवोचत्, संकटे ऽस्मिंस् तव प्रभो
विना स्वामिकुमारेण गतिर् अन्या न दृश्यते । 152
तथा ऽइति निश्चयं कृत्वा पश्चिमे प्रहरे निशि
शर्ववर्मा निराहारस् तत्र ऽएव प्रस्थितो ऽभवत् । 153
तच् च चारमुखाद् बुद्ध्वा मया प्रातर् निवेदितं
राज्ञे; सो ऽपि तद् आकर्ण्य, किं भवेद् इत्य् अचिन्तयत् । 154
ततस् तं सिंहगुप्ताख्यो राजपुत्रो हितो ऽब्रवीत्,
त्वयि खिन्ने तदा देव निर्वेदो मे महान् अभूत् । 155
ततः श्रेयोनिमित्तं ते चण्डिकाग्रे निजं शिरः
छेत्तुं प्रारब्धवान् अस्मि गत्वा ऽस्मान् नगराद् बहिः । 156
मा ऽएवं कृथा, नृपस्य ऽइच्छा सेत्स्यत्य् एव ऽइत्य् अवारयत्
वाग् अन्तरिक्षाद् अथ मां, तन् मन्ये सिद्धिर् अस्ति ते । 157
इत्य् उक्त्वा नृपम् आमन्त्र्य सत्वरं शर्ववर्मणः
पश्चाच् चारद्वयं सो ऽथ सिंहगुप्तो व्यसर्जयत् । 158

सो ऽपि वार्तिकभक्तः सन् कृतमौनः सुनिश्चयः
प्राप स्वामिकुमारस्य शर्ववर्मा ऽन्तिकं क्रमात् । 159
शरीरनिरपेक्षेण तपसा तत्र तोषितः
प्रसादम् अकरोत् तस्य कार्त्तिकेयो यथेप्सितं । 160
आगत्य ऽग्रे ततो राज्ञि चाराभ्यां स निवेदितः
सिंहगुप्तविसृष्टाभ्याम् उदयः शर्ववर्मणः । 161
तच् छ्रुत्वा मम राज्ञश् च विषादप्रमदौ द्वयोः
अभूतां, मेघम् आलोक्य हंसचातकयोर् इव । 162
आगत्य शर्ववर्मा ऽथ कुमारवरसिद्धिमान्
चिन्तितोपस्थिता राज्ञि सर्वा विद्याः प्रदत्तवान् । 163
प्रादुरासंश् च तास् तस्य सातवाहनभूपतेः
तत्क्षणं· किं न कुर्याद् धि प्रसादः पारमेश्वरः । 164

अथ तम् अखिलविद्यालाभम् आकर्ण्य राज्ञः
प्रमुदितवति राष्ट्रे तत्र को ऽप्य् उत्सवो ऽभूत्,
अपि पवनविधूतास् तत्क्षणोल्लास्यमानाः
प्रतिवसतिपताका बद्धनृत्ता इव ऽऽसन् । 165
राजार्हरत्ननिचयैर् अथ शर्ववर्मा
तेन ऽर्चितो गुरुर् इति प्रणतेन राज्ञा,
स्वामीकृतश् च विषये वकच्छनाम्नि
कूलोपकण्ठविनिवेशिनि नर्मदायाः । 166

यो ऽग्रे चारमुखेन षण्मुखवर-
प्राप्तिं समाकर्णयत्,
संतुष्य आत्मसमं श्रिया नरपतिम्
तं सिंहगुप्तं व्यधात्;
राज्ञीं ताम् अपि विष्णुशक्तितनयां
विद्यागमे कारणं
देवीनाम् उपरि प्रसह्य कृतवान्
प्रीत्या अभिषिच्य स्वयं । 167

। इति ।

॥ षष्ठस् तरङ्गः ॥

TARANGA. 7.

ततो गृहीतमौनो ऽहं राजान्तिकम् उपागमं,
तत्र च श्लोकम् अपठद् द्विजः कश्चित् स्वयं कृतं । 1
तं च आचष्ट स्वयं राजा सम्यक् संस्कृतया गिरा,
तद् आलोक्य च तत्रस्थो जनः प्रमुदितो ऽभवत् । 2
ततः स शर्ववर्माणं राजा सविनयो ऽब्रवीत्,
स्वयं कथय देवेन कथं ते ऽनुग्रहः कृतः? । 3
तच् छ्रुत्वा अनुग्रहं राज्ञः शर्ववर्मा अभ्यभाषत,
इतो राजन् निराहारो मौनस्थो ऽहं तदा गतः । 4
ततो ऽतिविमना शेषे जाते तीव्रतपःकृशः
क्लान्तः पतितवान् अस्मि निःसंज्ञो धरणीतले । 5
उत्तिष्ठ पुत्र, सर्वं ते संपत्स्यत इति स्फुटं,
शक्तिहस्तः पुमान् एत्य जाने माम् अब्रवीत् तदा । 6
तेन अहम् अमृतासारसंसिक्त इव तत्क्षणं
प्रबुद्धः क्षुत्पिपासादिहीनः स्वस्थ इव अभवं । 7
अथ देवस्य निकटं प्राप्य भक्तिभराकुलः
स्नात्वा गर्भगृहं तस्य प्रविष्टो ऽभूवम् उन्मनाः । 8

ततो ऽन्तः प्रभुणा तेन स्कन्देन मम दर्शनं
दत्तं, ततः प्रविष्टा मे मुखे मूर्ता सरस्वती । 9
अथ ऽसौ भगवान् साक्षात् षड्भिर् आननपङ्क्तिः,
सिद्धो वर्णसमाम्नाय इति सूत्रम् उदेरयत् । 10
तच् छ्रुत्वा एव मनुष्यत्वसुलभाच् चापलाद् वत
उत्तरं सूत्रम् अभ्यूह्य स्वयम् एव मया ऽदितं । 11
अथ ऽब्रवीत् स देवो मां, न ऽवदिष्यः स्वयं यदि,
अभविष्यद् इदं शास्त्रं पाणिनीयोपमर्दकं । 12
अधुना स्वल्पतन्त्रत्वात् कातन्त्राख्यं भविष्यति,
मद्वाहनकलापस्य नाम्ना कालापकं तथा । 13
इत्य् उक्ता शब्दशास्त्रं तत् प्रकाश्य ऽभिनवं लघु,
साक्षाद् एव स मां देवः पुनर् एवम् अभाषत । 14
युष्मदीयः स राजा ऽपि पूर्वजन्मन्य् अभूद् ऋषिः,
भरद्वाजमुनेः शिष्यः कृष्णसंज्ञो महातपाः । 15
तुल्याभिलाषाम् आलोक्य स च एकां मुनिकन्यकां,
ययाव् अकस्मात् पुष्पेषुशराघातरसज्ञतां । 16
अतः स शप्तो मुनिभिर् अवतीर्ण इह ऽधुना,
सा च ऽवतीर्णा देवी त्व् एतस्य एव मुनिकन्यका । 17
इत्थम् ऋष्यवतारो ऽयं नृपतिः सातवाहनः;
दृष्टे त्वय्य् अखिला विद्याः प्राप्स्यत्य् एव त्वदिच्छया । 18

अक्लेशलभ्या हि भवन्त्य् उत्तमार्था महात्मनां
जन्मान्तरार्जिताः स्फारसंस्काराह्वितसिद्धयः । 19
इत्य् उक्त्वा अन्तर्हिते देवे निरगच्छम् अहं बहिः,
तण्डुला मे प्रदत्ताश् च तत्र देवोपजीविभिः । 20
ततो ऽहम् आगतो राजंस्, तण्डुलास् ते च मे पथि
चित्रं तावन्त एव आसन् भुज्यमाना दिने दिने । 21
एवम् उक्त्वा स्ववृत्तान्तं विरते शर्ववर्मणि,
उदतिष्ठन् नृपः स्नातुं प्रहृष्टः सातवाहनः । 22
ततो ऽहं कृतमौनत्वाद् व्यवहारबहिष्कृतः,
अनिच्छन्तं तम् आमन्त्र्य प्रणामेन एव भूपतिं, । 23
निर्गत्य नगरात् तस्माच् छिष्यद्वयसमन्वितः,
तपसे निश्चितो द्रष्टुम् आगतो विन्ध्यवासिनीं । 24
स्वप्नादेशेन देव्या च तया एव प्रेषितस् ततः
विन्ध्याटवीं प्रविष्टो ऽहं त्वां द्रष्टुं भीषणाम् इमां । 25
पुलिन्दवाक्याद् आसाद्य सार्थं देवात् कथंचन
इह प्राप्तो ऽहम्, अद्राक्षं पिशाचान् सुबहून् अमून् । 26
अन्योन्यालापम् एतेषां दूराद् आकर्ण्य, शिक्षिता
मया पिशाचभाषा इयं मौनमोक्षस्य कारणं । 27
उपगम्य ततश् च एतां, त्वां श्रुत्वा उज्जयिनीं गतं,
प्रतिपालितवान् अस्मि यावद् अभ्यागतो भवान् । 28

दृष्ट्वा त्वां स्वागतं कृत्वा चतुर्थ्या भूतभाषया
मया ज्ञातिः स्मृता इत्य् एष वृत्तान्तो मे ऽत्र जन्मनि । 29

एवम् उक्ते गुणाढ्येन काणभूतिर् उवाच तं,
त्वदागमो मया ज्ञातो यथा अद्य निशि, तच् छृणु । 30
राक्षसो भूतिवर्माख्यो दिव्यदृष्टिः सखा अस्ति मे,
गतवान् अस्मि च उद्यानम् उज्जयिन्यां तदास्पदं । 31
तत्र असौ निजशापान्तं प्रति पृष्टो मया अब्रवीत्,
दिवा न अस्ति प्रभावो नस्, तिष्ठ रात्रौ वदाम्य् अतः । 32
तथा इति च अहं तत्रस्थः प्राप्तायां निशि वल्गतां
तम् अपृच्छं प्रसङ्गेन भूतानां हर्षकारणं । 33
पुरा विरिञ्चिसंवादे यद् उक्तं शङ्करेण, तत्
शृणु वच्मि इति माम् उक्त्वा भूतिवर्मा अथ सो ऽब्रवीत् । 34
दिवा न एषां प्रभावो ऽस्ति ध्वस्तानाम् अर्कतेजसा
यक्षरक्षःपिशाचानां, तेन हृष्यन्त्य् अमी निशि । 35
न पूज्यन्ते सुरा यत्र, न च विप्रा यथोचितं,
भुज्यते ऽविधिना वा अपि, तत्र एते प्रभवन्ति च । 36
अमांसभक्षः साध्वी वा यत्र, तत्र न यान्त्य् अमी,
शुचीन् शूरान् प्रबुद्धांश् च न आक्रमन्ति कदाचन । 37
इत्य् उक्त्वा मे स तत्कालं भूतिवर्मा अब्रवीत् पुनः,
गच्छ आगतो गुणाढ्यस् ते शापमोक्षस्य कारणं । 38

श्रुत्वा 'एतद् आगतश् च 'अस्मि, त्वं च दृष्टो मया प्रभो,
कथयाम्य् अधुना तां ते पुष्पदन्तोदितां कथां । 39
किंत्व् एवं कौतुकं मे ऽस्ति, कथ्यतां केन हेतुना
स पुष्पदन्तस् त्वं च 'अपि माल्यवान् इति विश्रुतः । 40
काणभूतिर् इति श्रुत्वा गुणाढ्यस् तम् अभाषत,
गङ्गातीरे ऽग्रहारो ऽस्ति नाम्ना बहुसुवर्णकः । 41
तत्र गोविन्ददत्ताख्यो ब्राह्मणो ऽभूद् बहुश्रुतः,
तस्य भार्या 'अग्निदत्ता च बभूव पतिदेवता । 42
स कालेन द्विजस् तस्यां पञ्च पुत्रान् अजीजनत्,
ते च मूर्खाः सुरूपाश् च बभूवुर् अभिमानिनः । 43
अथो गोविन्ददत्तस्य गृहान् अतिथिर् आययौ
विप्रो वैश्वानरो नाम, वैश्वानर इव 'अपरः । 44
गोविन्ददत्ते तत्कालं गृहाद् अपि वहिःस्थिते,
तत्पुत्राणाम् उपागत्य कृतं तेन 'अभिवादनं । 45
हासमात्रं च तैस् तस्य कृतं प्रत्यभिवादनं,
ततः स कोपान् निर्गन्तुं प्रारेभे तद्गृहाद् द्विजः । 46
आगतेन 'अथ गोविन्ददत्तेन स तथाविधः
क्रुद्धः पृष्टो ऽनुनीतो ऽपि जगाद 'एवं द्विजोत्तमः । 47
पुत्रास् ते पतिता मूर्खास्, तत्संपर्काद् भवान् अपि,
तस्मान् न भोक्ष्ये वद्गेहे, प्रायश्चित्तं न मे भवेत् । 48

अथ गोविन्ददत्तस् तम् उवाच शपथोत्तरं,
न स्पृशाम्य् अपि जात्व् एतान् अहं कुतनयान् इति । 49
तद्भार्या ऽपि तथा ऽव ऽत्य तम् उवाच ऽतिथिप्रिया,
ततः कथंचिद् आतिथ्यं तत्र वैश्वानरो ऽग्रहीत् । 50
तद् दृष्ट्वा देवदत्ताख्यस् तस्य ऽकस् तनयस् तदा
अभूद् गोविन्ददत्तस्य नैर्घृण्येन ऽनुतापवान् । 51
व्यर्थं जीवितम् आलोक्य पितृभ्याम् अथ दूषितं
सनिर्वेदः स तपसे ययौ बदरिकाश्रमं । 52
ततः पर्णाशनः पूर्वं धूमपस् च ऽप्य् अनन्तरं
तस्थौ चिराय तपसे तोषयिष्यन् उमापतिं । 53
ददौ च दर्शनं तस्य शम्भुस् तीव्रतपोऽर्जितः,
तस्य ऽव ऽनुचरत्वं च स वव्रे वरम् ईश्वरात् । 54
विद्याः प्राप्नुहि, भोगांस् च भुवि भुंक्ष्व, ततस् तव
भविता ऽभिमतं सर्वम् इति शम्भुस् तम् आदिशत् । 55
ततः स गत्वा विद्यार्थी पुरं पाटलिपुत्रकं
सिषेवे वेदकुम्भाख्यम् उपाध्यायं यथाविधि । 56
तत्रस्थं तम् उपाध्यायपत्नी जातस्मरातुरा
हठाद् वव्रे. वत स्त्रीणां चञ्चलास् चित्तवृत्तयः । 57
तेन संत्यज्य तं देशम् अनङ्गकृतविप्लवः
स देवदत्तः प्रययौ प्रतिष्ठानम् अतन्द्रितः । 58

तत्र वृद्धम् उपाध्यायं वृद्धयां भार्यया ऽन्वितं
मन्त्रस्वाम्याख्यम् अभ्यर्थ्य विद्याः सम्यग् अधीतवान् । 59
कृतविद्यं च तं तत्र ददर्श नृपतेः सुता
सुशर्माख्यस्य सुभगं श्रीर् नाम, श्रीर् इव ऽच्युतं । 60
सो ऽपि तां दृष्टवान् कन्यां स्थितां वातायनोपरि
विहरन्तीं विमानेन चन्द्रस्य ऽइव ऽधिदेवतां । 61
बद्धाव् इव तया ऽन्योन्यं मारशृङ्खलया दृशा
न ऽपसर्तुं समर्थौ तौ बभूवतुर् उभाव् अपि । 62
सा ऽथ तस्य ऽएकया ऽङ्गुल्या, मूर्तया ऽइव स्मराज्ञया,
इतो निकटम् एहि ऽइति संज्ञां चक्रे नृपात्मजा । 63
ततः समीपं तस्यास् च ययाव् अन्तःपुराच् च सा,
सा च चिक्षेप दन्तेन पुष्पम् आदाय तं प्रति । 64
संज्ञाम् एताम् अजानानो गूढां राजसुताकृतां
स कर्तव्यविमूढः सन्न् उपाध्यायगृहं ययौ । 65
लुलोठ तत्र धरणौ न किंचिद् वक्तुम् ईश्वरः
तापेन दह्यमानो ऽन्तर्, मूकः प्रमुषितो यथा । 66
वितर्क्य कामजैस् चिह्नैर् उपाध्यायेन धीमता
युक्त्या पृष्टः कथंचिच् च यथावृत्तं शशंस सः । 67
तद् बुद्ध्वा तम् उपाध्यायो विदग्धो वाक्यम् अब्रवीत्,
दन्तेन पुष्पं मुञ्चन्त्या तया संज्ञा कृता तव । 68

यद् एतत् पुष्पदन्ताख्यं पुष्पाढ्यं सुरमन्दिरं
तत्र आगत्य प्रतीक्षेथाः; साम्प्रतं गम्यताम् इति । 69
श्रुत्वा इति ज्ञाततसंज्ञार्थः स तत्याज शुचं युवा;
ततो देवगृहस्य अन्तस् तस्य गत्वा स्थितो ऽभवत् । 70
सा अप्य् अष्टमीं समुद्दिश्य तत्र राजसुता आययौ,
एका एव देवं द्रष्टुं च गर्भागारम् अथ आविशत् । 71
स्पृष्टो ऽत्र द्वारपट्टस्य पश्चात् सो ऽथ प्रियस् तया,
गृहीता अनेन च उत्थाय सा कण्ठे सहसा ततः । 72
चित्रं कथं त्वया ज्ञाता सा संज्ञा इत्य् उदिते तया,
उपाध्यायेन सा ज्ञाता न मया इति जगाद सः । 73
मुञ्च माम्, अविदग्धस् त्वम् इत्य् उक्त्वा तत्क्षणात् क्रुधा
मन्त्रभेदभयात् सा अथ राजकन्या ततो ययौ । 74
सो ऽपि गत्वा विविक्ते तां दृष्टनष्टां स्मरन् प्रियां
देवदत्तो वियोगाग्निविगलज्जीवितो ऽभवत् । 75
दृष्ट्वा तं तादृशं शम्भुः प्राक् प्रसन्नः किल आदिशत्
गणं पञ्चशिखं नाम तस्य अभीप्सितसिद्धये । 76
स च आगत्य समाश्वास्य, स्त्रीवेशं स गणोत्तमः
अकारयत्, स्वयं च अभूद् वृद्धब्राह्मणरूपभृत् । 77
ततस् तेन समं गत्वा तं सुशर्मनृपान्तिकं
जनकं सुदृशस् तस्याः स जगाद गणाग्रणीः । 78

पुत्रो मे प्रेषितः क्वापि, तम् अन्वेष्टुं व्रजाम्य् अहं,
तन् मे स्नुषा इयं निक्षेपो राजन् सम्प्रति रक्ष्यतां । 79
तच् छ्रुत्वा शापभीतेन तेन आदाय सुशर्मणा
स्वकन्यान्तःपुरे गुप्ते स्त्री इति संस्थापितो युवा । 80
ततः पञ्चशिखे याते स्वप्रियान्तःपुरे वसन्
स्त्रीवेशः स द्विजस् तस्या विश्रम्भास्पदतां ययौ । 81
एकदा च उत्सुका रात्रौ तेन आत्मानं प्रकाश्य सा
गुप्तं गान्धर्वविधिना परिणीता नृपात्मजा । 82
तस्यां च धृतगर्भायां तं द्विजं स गणोत्तमः
स्मृतमात्रागतो रात्रौ ततो ऽनैषीद् अलक्षितं । 83
ततस् तस्य समुत्पाद्य यूनः स्त्रीवेशम् आशु तं,
प्रातः पञ्चशिखः सो ऽभूत् पूर्ववद् ब्राह्मणाकृतिः । 84
तेन एव सह गत्वा च सुशर्मनृपम् अभ्यधात्,
अद्य प्राप्तो मया राजन् पुत्रस्, तद् देहि मे स्नुषां । 85
ततः स राजा तां बुद्ध्वा रात्रौ क्वापि पलायितां,
तच्छापभयसंभ्रान्तो मन्त्रिभ्य इदम् अब्रवीत् । 86
न विप्रो ऽयम्, अयं को ऽपि देवो मद्वञ्चनागतः,
एवंप्राया भवन्ति इह वृत्तान्ताः सततं यतः । 87
तथा च पूर्वं राजा अभूत् तपस्वी करुणापरः
दाता धीरः शिविर् नाम सर्वसत्त्वाभयप्रदः । 88

तं वञ्चयितुम् इन्द्रो ऽथ कृत्वा श्येनवपुः स्वयं
मायाकपोतवपुषं धर्मम् अन्वपतद् द्रुतं । 89
कपोतः स भयाद् गत्वा शिविर् अङ्कम् अशिश्रियत्,
मनुष्यवाचा श्येनो ऽथ स तं राजानम् अब्रवीत् । 90
राजन् भक्ष्यम् इदं, मुञ्च कपोतं क्षुधितस्य मे,
अन्यथा मां मृतं विद्धि, कस् ते धर्मस् ततो भवेत् । 91
ततः शिविर् उवाच 'एनम्, एष मे शरणागतः
अत्याज्यस्, तद् ददाम्य् अन्यन् मांसम् एतत्समं तव । 92
श्येनो जगाद, यद्य् एवम् आत्ममांसं प्रयच्छ मे.
तथा 'इति तत् प्रहृष्टः सन् स राजा प्रत्यपद्यत । 93
यथा यथा च मांसं स्वम् उत्कृत्य 'आरोपयन् नृपः,
तथा तथा तुलायां स कपोतो ऽभ्यधिको ऽभवत् । 94
ततः शरीरं सकलं तुलां राजा 'अध्यरोपयत्;
साधु साधु समं त्व् एतद्, दिव्या वाग् उदभूत् ततः । 95
इन्द्रधर्मौ ततस् त्यक्त्वा रूपं श्येनकपोतयोः
तुष्टाव् अक्षतदेहं तं राजानं चक्रतुः शिविं । 96
दत्वा च 'अस्मै वरान् अन्यांस् ताव् अन्तर्धानम् ईयतुः.
एवं माम् अपि कोऽप्य् एष देवो जिज्ञासुर् आगतः । 97

इत्य् उक्त्वा सचिवान् स्वैरं स सुशर्मा महीपतिः
तम् उवाच भयप्रह्वो विप्ररूपं गणोत्तमं । 98

अभयं देहि, सा अद्य एव स्नुषा ते हारिता निशि,
मायया एव गता क्वापि रक्ष्यमाणा अप्य् अहर्निशं । 99
कृच्छ्रात् स दयया इव अथ विप्ररूपो गणो ऽवदत्,
तर्हि पुत्राय राजन् मे देहि स्वां तनयाम् इति । 100
तच् छ्रुत्वा शापभीतेन राज्ञा तस्मै निजा सुता
सा दत्ता देवदत्ताय, ततः पञ्चशिखो ययौ । 101
देवदत्तो ऽपि तां भूयः प्रकाशं प्राप्य वल्लभां
जजृम्भे ऽनन्यपुत्रस्य श्वशुरस्य विभूतिषु । 102
कालेन तस्य पुत्रं च दौहित्रम् अभिषिच्य सः
राज्ये महीधरं नाम सुशर्मा अशिश्रियि वनं । 103
ततो दृष्ट्वा सुतैश्वर्यं कृतार्थः स तपोवनं
राजपुत्र्या तया साकं देवदत्तो ऽप्य् अशिश्रियत् । 104
तत्र आराध्य पुनः शम्भुं, त्यक्त्वा मर्त्यकलेवरं,
तत्प्रसादेन तस्य एव गणभावम् उपागतः । 105
प्रियादत्तोज्झितात् पुष्पात् संज्ञां न ज्ञातवान् यतः,
अतः स पुष्पदन्ताख्यः संपन्नो गणसंसदि । 106
तद्भार्या च प्रतीहारी देव्या जाता जयाभिधा,
इत्थं स पुष्पदन्ताख्यो, मदाख्याम् अधुना शृणु । 107

यः स गोविन्ददत्ताख्यो देवदत्तपिता द्विजः
तस्य एव सोमदत्ताख्यः पुत्रो ऽहम् अभवं पुरा । 108

तेन 'एव मन्युना गत्वा, तपस् च 'अहं हिमाचले
अकार्षं बहुभिर् माल्यैः शङ्करं नन्दयन् सदा । 109
तथा 'एव प्रकटीभूतात् प्रसन्नाद् इन्दुशेखरात्
त्यक्तान्यभोगलिप्सेन तद्गणत्वं मया वृतं । 110

यत् पूजितो ऽस्मि भवता स्वयम् आहृतेन
माल्येन दुर्गवनभूमिसमुद्भवेन,
तन् माल्यवान् इति भविष्यसि मे गणस् त्वं;
इत्य् आदिशच् च विभुर् गिरिजापतिर् मां । 111

अथ मर्त्यवपुर् विमुच्य पुण्यां
सहसा तद्गणताम् अहं प्रपन्नः;
इति धूर्जटिना कृतं प्रसादाद्
अभिधानं मम माल्यवान् इति 'इदं । 112

सो ऽहं गतः पुनर् इह 'अद्य मनुष्यभावं
शापेन शैलदुहितुर् बत काणभूते,
तन् मे कथां हरकृतां कथय 'अधुना त्वं,
येन 'आवयोर् भवति शापदशोपशान्तिः । 113

। इति ।
॥ सप्तमस् तरङ्गः ॥

TARANGA. 8.

एवं गुणाढ्यवचसा सा 'अथ सप्तकथामयी
स्वभाषया कथा दिव्या कथिता काणभूतिना । 1
तथा 'एव च गुणाढ्येन पैशाच्या भाषया तया
निबद्धा सप्तभिर् वर्षैर् ग्रन्थलक्षाणि सप्त सा । 2
मा 'एतां विद्याधरा हार्षुर् इति ताम् आत्मशोणितैः
अटव्यां मष्यभावाच् च लिलेख स महाकविः । 3
तथा च श्रोतुम् आयातैः सिद्धविद्याधरादिभिः
निरन्तरम् अभूत् तत्र सवितानम् इव 'अम्बरं । 4
गुणाढ्येन निबद्धां च तां दृष्ट्वा 'एव महाकथां,
जगाम मुक्तशापः सन् काणभूतिर् निजां गतिं । 5
पिशाचा ये ऽपि तत्र 'आसन् अन्ये तत्सहचारिणः,
ते ऽपि प्रापुर् दिवं सर्वे दिव्याम् आकर्ण्य तां कथां । 6
प्रतिष्ठां प्रापणीया 'एषा पृथिव्यां मे वृहत्कथा,
अयम् अर्थो ऽपि मे देव्या शापान्तोक्ताव् उदीरितः । 7
तत् कथं प्रापयाम्य्, एनां कस्मै तावत् समर्पये?
इत्य् एव 'अचिन्तयत् तत्र स गुणाढ्यो महाकविः । 8

अथ 'एको गुणदेवाख्यो नन्दिदेवाभिधः परः
तम् ऊचतुर् उपाध्यायं शिष्याव् अनुगताव् उभौ । 9
तत्काव्यस्य 'अर्पणास्थानम् एकः श्रीसातवाहनः,
रसिको हि वहेत् काव्यं, पुष्पामोदम् इव 'अनिलः । 10
एवम् अस्त्व् इति तौ शिष्याव् अन्तिकं तस्य भूपतेः
प्राहिणोत् पुस्तकं दत्वा गुणाढ्यो गुणशालिनौ । 11
स्वयं च गत्वा तत्र 'एव प्रतिष्ठाने पुराद् बहिः
कृतसंकेत उद्याने तस्थौ देवीविनिर्मिते । 12
तच्छिष्याभ्यां च गत्वा तत् सातवाहनभूपतेः,
गुणाढ्यकृतिर् एषा 'इति दर्शितं काव्यपुस्तकं । 13
पिशाचभाषां तां श्रुत्वा, तौ च दृष्ट्वा तदाकृती,
विद्यामदेन सासूयं स राजा 'एवम् अभाषत । 14
प्रमाणं सप्त लक्षाणि, पैशाचं नीरसं वचः,
शोणितेन 'अक्षरन्यासो, धिक् पिशाचकथाम् इमां । 15
ततः पुस्तकम् आदाय गत्वा ताभ्यां यथागतं
शिष्याभ्यां तद् गुणाढ्याय यथावृत्तम् अकथ्यत । 16
गुणाढ्यो ऽपि तद् आकर्ण्य सद्यः खेदवशो ऽभवत्,
तत्त्वज्ञेन कृतावज्ञः को नाम 'अन्तर् न तप्यते? । 17
सशिष्यस् च ततो गत्वा नातिदूरं शिलोच्चयं
विविक्तरम्यभूभागम् अग्निकुण्डं व्यधात् पुरः । 18

तत्र ऽग्नौ पत्रम् एकैकं शिष्याभ्यां साश्रु वीक्षितः
वाचयित्वा स चिक्षेप श्रावयन् मृगपक्षिणः । 19
नरवाहनदत्तस्य चरितं शिष्ययोः कृते
ग्रन्थलक्षं कथाम् एकां वर्जयित्वा तदीप्सितां । 20
तस्मिंश् च तां कथां दिव्यां पठत्य् अपि दहत्य् अपि,
परित्यक्ततृणाहाराः शृण्वन्तः साश्रुलोचनाः । 21
आसन् अभ्येत्य तत्र ऽएव निश्चला बद्धमण्डलाः
निखिलाः खलु सारङ्गवराहमहिषादयः । 22

अत्र ऽन्तरे स राजा ऽभूद् अस्वस्थः सातवाहनः,
दोषं च ऽस्य ऽवदन् वैद्याः शुष्कमांसोपभोगजं । 23
आक्षिप्तास् तन्निमित्तं च सूपकारा बभाषिरे,
अस्माकम् ईदृशं मांसं ददते लुब्धका इति । 24
पृष्टाश् च लुब्धका ऊचुर्, नातिदूरे गिराव् इतः
पठित्वा पत्रम् एकैकं कोऽप्य् अग्नौ क्षिपति द्विजः । 25
तत् समेत्य निराहाराः शृण्वन्ति प्राणिनो ऽखिलाः,
न ऽन्यतो यान्ति, तेन ऽएषां शुष्कं मांसम् इदं क्षुधा । 26
इति व्याधवचः श्रुत्वा, कृत्वा तान् एव च ऽग्रतः,
स्वयं स कौतुकाद् राजा गुणाढ्यस्य ऽन्तिकं ययौ । 27
ददर्श तं समाकीर्णं जटाभिर् वनवासतः
प्रशान्तशेषशापाग्निधूमिकाभिर् इव ऽभितः । 28

अथ 'एनं प्रत्यभिज्ञाय सबाष्पमृगमध्यगं
नमस्कृत्य च, पप्रच्छ तं वृत्तान्तं महीपतिः । 29
सो ऽपि स्वं पुष्पदन्तस्य राज्ञि शापादिचेष्टितं
ज्ञानी कथावतारं तम् आचख्यौ भूतभाषया । 30
ततो गणावतारं तं मत्वा पादानतो नृपः
ययाचे तां कथां तस्माद् दिव्यां हरमुखोद्गतां । 31
अथ 'उवाच स तं भूपं गुणाढ्यः सातवाहनं,
राजन् षड् ग्रन्थलक्षाणि मया दग्धानि षट् कथाः । 32
लक्षम् एकम् इदं त्व् अस्ति कथा 'एका, सा 'एव गृह्यतां,
मच्छिष्यौ तव च 'अत्र 'एतौ व्याख्यातारौ भविष्यतः । 33
इत्य् उक्त्वा, नृपम् आमन्त्र्य, त्यक्त्वा योगेन तां तनुं,
गुणाढ्यः शापनिर्मुक्तः प्राप दिव्यं निजं पदं । 34

अथ तां गुणाढ्यदत्ताम्
आदाय कथां बृहत्कथां नाम्ना
नृपतिर् अगान् निजनगरं
नरवाहनदत्तचरितमयीं । 35
गुणदेवनन्दिदेवौ
तत्र च तौ तत्कथाकवेः शिष्यौ
क्षितिकनकवस्त्रवाहन-
भवनधनैः संविभेजे सः । 36

ताभ्यां सह च कथां ताम्
आश्वास्य, स सातवाहनस् तस्याः
तद्भाषया अवतारं
वक्तुं चक्रे कथापीठं । 37
सा च चित्ररसनिर्भरा कथा
विस्मृतामरकथा कुतूहलात्
तद्विधाय नगरे निरन्तरां
ख्यातिम् अत्र भुवनत्रये गता । 38

। इति ।
॥ अष्टमस् तरङ्गः ॥

समाप्तो ऽयं
कथापीठं नाम
प्रथमो लम्बकः





अथ

श्री सोमदेव भट्ट विरचिते

कथा सरित् सागरे

कथामुखं नाम

द्वितीयो लम्बकः

इदं गुरुगिरीन्द्रजा-

प्रणयमन्दरान्दोलनात्

पुरा किल कथामृतं

हरमुखाम्बुधेर् उद्गतं

प्रसह्य रसयन्ति ये,

विगतविघ्नलब्धर्द्धयो

धुरं दधति वैबुधीं

भुवि भवप्रसादेन ते ।

Somadeva.

TARANGA. 9.

गौरीनवपरिष्वङ्गे विभोः स्वेदाम्बु पातु वः
नेत्राग्निभीत्या कामेन वारुणास्त्रम् इव 'आश्रितं । 1
कैलासे धूर्जटेर् वक्त्रात् पुष्पदन्तं गणोत्तमं,
तस्माद् वररुचीभूतात् काणभूतिं च भूतले, । 2
काणभूतिर् गुणाढ्यं च, गुणाढ्यात् सातवाहनं
यत् प्राप्तं, शृणुत 'इदं तद् विद्याधरकथाद्भुतं । 3

अस्ति वत्स इति ख्यातो देशो, दर्पोपशान्तये
स्वर्गस्य निर्मितो धात्रा प्रतिमल्ल इव क्षितौ । 4
कौशाम्बी नाम तत्र 'अस्ति मध्यभागे महापुरी
लक्ष्मीविलासवसतिर् भूतलस्य 'इव कर्णिका । 5
तस्यां राजा शतानीकः पाण्डवान्वयसंभवः
जनमेजयपुत्रो ऽभूत्, पौत्रो राज्ञः परीक्षितः, । 6
अभिमन्युप्रपौत्रस्य, यस्य 'आदिपुरुषो ऽर्जुनः
त्रिपुरारिभुजस्तम्भदृष्टदोर्दन्दविक्रमः । 7

कलत्रं भूरि अभूत् तस्य, राज्ञी विष्णुमती तथा;
एका रत्नानि सुषुवे, न तावद् अपरा सुतं। 8
एकदा मृगयासंगाद् भ्राम्यतश् च अस्य भूपतेः
अभूत् साण्डिल्यमुनिना समं परिचयो वने। 9
सो ऽस्य पुत्रार्थिनो राज्ञः कौशाम्बीम् एत्य साधितं
मन्त्रपूतं चरुं राज्ञीं प्राशयन् मुनिसत्तमः। 10
ततस् तस्य सुतो जज्ञे सहस्रानीकसंज्ञकः,
शुशुभे स पिता येन, विनयेन गुणो यथा। 11
युवराजं क्रमात् कृत्वा शतानीको ऽथ तं सुतं,
संभोगैर् एव राजा अभूत् न तु भूभारचिन्तनैः। 12
अथ असुरैः समं युद्धे प्राप्ते साहायकेच्छया
दूतस् तस्मै विसृष्टो ऽभूद् राज्ञे शक्रेण मातलिः। 13
ततो योगन्धराख्यस्य हस्ते धुर्यस्य मन्त्रिणः,
सुप्रतीकाभिधानस्य मुख्यसेनापतेश् च सः। 14
समर्प्य पुत्रं राज्यं च, निहन्तुम् असुरान् रणे
शक्रान्तिकं शतानीकः सह मातलिना ययौ। 15
असुरान् यमदंष्ट्रादीन् बहून् पश्यति वासवे
हत्वा तत्र एव संग्रामे प्राप मृत्युं स भूपतिः। 16
मातल्यानीतदेहं च देवी तं नृपम् अन्वगात्,
राजलक्ष्मीश् च तत्पुत्रं सहस्रानीकम् आश्रयत्। 17

चित्रं तस्मिन् समारूढे पित्र्यं सिंहासनं नृपे
भरेण सर्वतो राज्ञां शिरांसि नतिम् आययुः । 18
ततः शक्रः सुहृत्पुत्रं विपन्नविजयोत्सवे
स्वर्गं सहस्रानीकं तं निनाय प्रेष्य मातलिं । 19
स तत्र नन्दने देवान् क्रीडतः कामिनीसखान्
दृष्ट्वा स्वोचितभार्यार्थी राजा शोकम् इव ऽविशत् । 20
विज्ञाय एतम् अभिप्रायं तम् उवाच ऽथ वासवः,
राजन् अलं विषादेन, वाञ्छा इयं तव सेत्स्यति । 21
उत्पन्ना हि क्षितौ भार्या तुल्या ते पूर्वनिर्मिता,
इमं च शृणु वृत्तान्तम् अत्र ते वर्णयाम्य् अहं । 22

पुरा पितामहं द्रष्टुम् अगाहं तत्सभाम् अहं,
विधूमो नाम पश्चाच् च मम एको वसुर् आगमत् । 23
स्थितेष्व् अस्मासु तत्र एव विरिञ्चिं द्रष्टुम् अप्सराः
अगाद् अलम्बुषा नाम वातविस्रंसितांशुका । 24
तां दृष्ट्वा एव स कामस्य वशं वसुर् उपागमत्,
सा ऽप्य् अप्सरा झटित्य् आसीत् तद्रूपाकृष्टलोचना । 25
तद् आलोक्य मम ऽपश्यन् मुखं कमलसंभवः,
अभिप्रायं विदित्वा ऽस्य ताव् अहं शप्तवान् क्रुधा । 26
मर्त्यलोके ऽवतारो ऽस्तु युवयोर् अविनीतयोः,
भविष्यथश् च तत्र एव युवां भार्यापती इति । 27

स वसुस् त्वं समुत्पन्नः सहस्रानीक, भूपतेः
शतानीकस्य तनयो भूषणं शशिनः कुले । 28
सा ऽप्य् अप्सरा अयोध्यायां कृतवर्मनृपात्मजा
जाता मृगावती नाम, सा ते भार्या भविष्यति । 29
इतीन्द्रवाक्यपवनैर् उद्भूतो हृदि भूपतेः
सस्नेहे तस्य झटिति प्राज्वलन् मदनानलः । 30
इतः संमान्य शक्रेण प्रेषितस् तद्रथेन सः
सह मातलिना राजा प्रतस्थे स्वां पुरीं प्रति । 31
गच्छन्तं च ऽप्सराः प्रीत्या तम् उवाच तिलोत्तमा,
राजन् वक्ष्यामि ते किंचित्, प्रतीक्षस्व मनाग् इति । 32
तद् अश्रुत्व एव हि ययौ स तां ध्यायन् मृगावतीं;
ततः सा लज्जिता कोपात् तं शशाप तिलोत्तमा । 33
यया हृतमना राजन् न शृणोषि वचो मम,
तस्याश् चतुर्दश समा वियोगस् ते भविष्यति । 34
मातलिस् तच् च शुश्राव, स च राजा प्रियोत्सुकः
ययौ रथेन कौशाम्बीम्, अयोध्यां मनसा पुनः । 35
ततो योगन्धरादिभ्यो मन्त्रिभ्यो वासवाच् छ्रुतं
मृगावतीगतं सर्वं शशंस उत्सुकया धिया । 36
याचितुं तां च कन्यां स तत्पितुः कृतवर्मणः
अयोध्यां प्राहिणोद् दूतं कालक्षेपासहो नृपः । 37

कृतवर्मा च तद्दूताच् छ्रुत्वा संदेशम् अभ्यधात्
हर्षाद् देव्यै कलावत्यै, ततः सा ऽप्य् एनम् अब्रवीत् । 38
राजन् सहस्रानीकाय देया ऽवश्यं मृगावती,
इमम् अर्थं च मे स्वप्ने जाने कोऽप्य् अवदद् द्विजः । 39
अथ हृष्टो मृगावत्या नृत्तगीतादिकौशलं
रूपं च ऽप्रतिमं तस्मै दूताय ऽदर्शयन् नृपः । 40
ददौ तां च स कान्तानां कलानाम् एकम् आस्पदं
कृतवर्मा सुतां तस्मै राज्ञे मूर्तिम् इव ऽऐन्दवीं । 41
परस्परगुणावाप्त्यै स श्रुतप्रज्ञयोर् इव
अभूत् सहस्रानीकस्य मृगावत्याश् च संगमः । 42

अथ तस्य ऽचिराद् राज्ञो मन्त्रिणां जज्ञिरे सुताः,
जज्ञे योगन्धरस्य ऽपि पुत्रो यौगन्धरायणः । 43
सुप्रतीकस्य पुत्रश् च रुमण्वान् इत्य् अजायत,
यो ऽस्य नर्मसुहृत् तस्य पुत्रो ऽजनि वसन्तकः । 44
ततस् तस्य ऽपि दिवसैः सहस्रानीकभूपतेः
बभार गर्भम् आपाण्डुमुखी राज्ञी मृगावती । 45
ययाचे सा ऽथ भर्तारं दर्शनातृप्तलोचनं
दोहदं रुधिरापूर्णलीलावापीनिमज्जनं । 46
स च ऽइच्छां पूरयन् राज्ञ्या लाक्षादिरसनिर्भरां
चकार धार्मिको राजा वापीं रक्तावृताम् इव । 47

तस्यां स्नान्तीम् अकस्माच् च लाक्षालिप्तां निपत्य तां
गरुडान्वयजः पक्षी जहार ऽमिषशङ्कया । 48
पक्षिणा क्वापि नीतां ताम् अन्वेष्टुम् इव तत्क्षणात्
ययौ सहस्रानीकस्य धैर्यं विह्वलचेतसः । 49
प्रियानुरक्तं चेतो ऽपि नूनं तस्य पतत्रिणा
जह्रे, येन स निःसंज्ञः पपात भुवि भूपतिः । 50
क्षणाच् च लब्धसंज्ञे ऽस्मिन् राज्ञि बुद्धा प्रभावतः
अवतीर्य द्युमार्गेण तत्र मातलिर् आययौ । 51
स राजानं तम् आश्वास्य सावधिं प्राग् यथाश्रुतं
तस्मै तिलोत्तमाशापं कथयित्वा ततो ऽगमत् । 52
हा प्रिये पूर्णकामा सा जाता पापा तिलोत्तमा,
इत्यादि च स शोकार्तो विललाप महीपतिः । 53
विज्ञातशापवृत्तान्तो बोधितश् च स मन्त्रिभिः
कथंचिज् जीवितं दध्रे पुनःसंगमवाञ्छया । 54

तां च राज्ञीं स पक्षीन्द्रः क्षणान् नीत्वा मृगावतीं
जीवन्तीं वीक्ष्य तत्याज दैवाद् उदयपर्वते । 55
त्यक्ता तस्मिन् गते च ऽथ राज्ञी शोकभयाकुला
ददर्श ऽनाथम् आत्मानं दुर्गमाद्रितटस्थितं । 56
एकाकिनीम् एकवस्त्रां क्रन्दन्तीम् अथ तां वने
ग्रासीकर्तुं प्रवृत्तो ऽभूद् उत्थाय ऽजगरो महान् । 57

निहृत्य ऽजगरं तं च शुभोदर्का तथा एव सा
दिव्येन मोचिता पुंसा दृष्टनष्टेन केनचित् । 58
ततो वनगजस्य अग्रे सा स्वयं मरणार्थिनी
आत्मानम् अक्षिपत्, सो ऽपि ररक्ष दयया इव तां । 59
चित्रं यच् श्वापदो ऽप्य् एमां पतिताम् अपि गोचरे
न अबधीद्! अथवा किं हि न भवेद् ईश्वरेच्छया? । 60
अथ प्रपाताभिमुखी बाला गर्भभरालसा
स्मरन्ती तं च भर्तारं मुक्तकण्ठं रुरोद सा । 61
तच् छ्रुत्वा मुनिपुत्रो ऽथ तत्र एकस् तां समाययौ
आगतः फलमूलार्थं शुचं मूर्तिमतीम् इव । 62
स च पृष्ट्वा यथावृत्तम् आश्वास्य च कथंचन
जमदग्न्याश्रमं राज्ञीं निनाय एमां दयार्द्रधीः । 63
तत्र मूर्तम् इव आश्वासं जमदग्निं ददर्श सा
तेजसा स्थिरबालार्कं कुर्वाणाम् उदयाचलं । 64
सो ऽपि तां पादपतितां मुनिर् आश्रितवत्सलः
राज्ञीं वियोगदुःखार्तां दिव्यदृष्टिर् अभाषत । 65
इह ते जनिता पुत्रि पुत्रो वंशधरः पितुः,
भविष्यति च भर्त्रा ते संगमो, मा शुचं कृथाः । 66
इत्य् उक्ता मुनिना साध्वी सा जग्राह मृगावती
आश्रमे ऽवस्थितिं तस्मिन्, आशां च प्रियसंगमे । 67

ततस् च दिवसेस् तत्र श्लाघनीयम् अनिन्दिता
सत्संगतिर् इव आचारं पुत्ररत्नम् असूत सा । 68
श्रीमान् उदयनो नाम्ना राजा जातो महायशाः,
भविष्यति च पुत्रो ऽस्य सर्वविद्याधराधिपः । 69
इत्य् अन्तरिक्षाद् उदभूत् तस्मिन् काले सरस्वती
आदधाना मृगावत्यास् चिरविस्मृतम् उत्सवं । 70
क्रमाद् उदयनः सो ऽथ बालस् तस्मिंस् तपोवने
अवर्धत निजैः सार्धं वयस्यैर् इव सद्गुणैः । 71
कृत्वा क्षत्रोचितान् सर्वान् संस्कारान् जमदग्निना
व्यनीयत स विद्यासु धनुर्वेदे च वीर्यवान् । 72
कृष्ट्वा च स्वकरान् माता तस्य स्नेहान् मृगावती
सहस्रानीकनामाङ्कं चकार कटकं करे । 73

हरिणाखेटके जातु भ्राम्यन्न् उदयनो ऽथ सः
शवरेण हठाक्रान्तम् अटव्यां सर्पम् ऐक्षत । 74
सदयः सुन्दरे तस्मिन् सर्पे तं शवरं च सः
उवाच, मुच्यताम् एष सर्पो मद्वचनाद् इति । 75
ततः स शवरो ऽवादीत्, जीविका इयं मम प्रभो,
कृपणो ऽहं हि, जीवामि भुजगं खेलयन् सदा । 76
विपन्ने पन्नगे पूर्वं, मन्त्रौषधिबलाद् अयं
ऽवष्टब्धम् च मया लब्धम् चिन्वता एतां महाटवीं । 77

श्रुत्वा ऽइत्य् उदयनस् त्यागी दत्वा ऽस्मै शवराय तत्
कटकं जननीदत्तं, स तं सर्पम् अमोचयत् । 78
गृहीतकटके याते शवरे, पुरतो नतिं
कृत्वा स भुजगः प्रीतो जगाद् ऽउदयनं तदा । 79
वसुनेमिर् इति ख्यातो ज्येष्ठो भ्राता ऽस्मि वासुकेः,
इमां वीणां गृहाण त्वं मत्तः संरक्षितात् त्वया । 80
तन्त्रीनिर्घोषरम्यां च श्रुतिभागविभाजितां,
ताम्बूलीस् च सह ऽम्लानिमालातिलकयुक्तिभिः । 81
तद्युक्तो जमदग्नेस् तं नागोत्क्षिप्तः स च ऽश्रमं
अगाद् उदयनो मातुर् दृशि वर्षन्न् इव ऽमृतं । 82

अत्र ऽन्तरे स शवरो ऽप्य् अटवीं प्राप्य पर्यटन्
आदाय ऽउदयनात् प्राप्तं कटकं तद् विधेर् वशात् । 83
विक्रीणानस् च तत् तत्र राजनामाङ्कम् आपणे
ऽवष्टभ्य राजपुरुषैर् निन्ये राजकुलं च सः । 84
कुतस् त्वया ऽइदं कटकं संप्राप्तम् इति तत्र सः
राज्ञा सहस्रानीकेन स्वयं शोकाद् अपृच्छत । 85
अथ ऽउदयाद्रौ सर्पस्य ग्रहणात् प्रभृति स्वकं
कटकप्राप्तिवृत्तान्तं शवरः स जगाद तं । 86
तद् बुद्धा शवराद् दृष्ट्वा दयितावलयं च तं
विचारदोलाम् आरोहत् सहस्रानीकभूपतिः । 87

क्षीणः शापः स ते राजन्, उदयाद्रौ च सा स्थिता
जमदग्न्याश्रमे जाया सपुत्रा ते मृगावती । 88
इति दिव्या तदा वाणी नन्दयामास तं नृपं
विप्रयोगनिदाघार्तं वारिधारा इव बर्हिणं । 89
अथ उत्कण्ठादीर्घे कथमपि दिने ऽस्मिन् व्यवसिते,
तम् एव अग्रे कृत्वा शबरम्, अपरेद्युः स नृपतिः
सहस्रानीकस् तां सरभसम् अवाप्तुं प्रियतमां
प्रतस्थे तत् सैन्यैः समम् उदयशैलाश्रमपदं । 90

। इति ।
॥ नवमस् तरङ्गः ॥

TARANGA. 10.

गत्वा 'अथ दूरम् अध्वानं राजा वसतिम् अग्रहीत्
दिने तस्मिन् स कस्मिंश्चिद् अरण्ये सरसस् तटे । 1
शयनीयगतः श्रान्तस् तत्र सेवारसागतं
सायं संगतकं नाम जगाद् कथकं नृपः । 2
कथाम् आख्याहि मे कांचिद् धृदयस्य विनोदिनीं
मृगावतीमुखाम्भोजदर्शनोत्सवकाङ्क्षिणः । 3
अथ संगतको ऽवादीद्, देव तप्यसि किं वृथा?
आसन्न एव देव्यास् ते क्षीणशापः समागमः । 4
संयोगा विप्रयोगाश् च भवन्ति बहवो नृणां,
तथा च 'अपि कथाम् एकां कथयामि, शृणु प्रभो । 5

मालवे यज्ञसोमाख्यो द्विजः कश्चिद् अभूत् पुरा,
तस्य च द्वौ सुतौ साधोर् जायेते स्म जनप्रियौ । 6
एकस् तयोर् अभून् नाम्ना कालनेमिर् इति श्रुतः,
द्वितीयश् च 'अपि विगतभय इत्य् आख्यया 'अभवत् । 7
पितरि स्वर्गते तौ च भ्रातरौ तीर्णशैशवौ
विद्याप्राप्त्यै प्रययतुः पुरं पाटलिपुत्रकं । 8

तत्र 'एव 'उपात्तविद्याभ्याम् उपाध्यायो निजे सुते
देवशर्मा ददौ ताभ्यां, मूर्ते विद्ये इव 'अपरे । 9

अथ 'अन्यान् वीक्ष्य तान् आढ्यान् गृहस्थान् ईर्ष्यया श्रियं
होमैः स साधयामास कालनेमिः कृतव्रतः । 10
सा च तुष्टा सती साक्षाद् एवं श्रीस् तम् अभाषत,
भूरि प्राप्स्यसि वित्तं च पुत्रं च पृथिवीपतिं । 11
किंतु अन्ते चौरसदृशो बधस् तव भविष्यति,
हुतम् अग्नौ त्वया यस्माद् आमिषं कलुषात्मना । 12
इत्य् उक्त्वा 'अन्तर्दधे लक्ष्मीः, कालनेमिर् अपि क्रमात्
महाधनो ऽभूत्, किंच 'अस्य दिनैः पुत्रो ऽप्य् अजायत । 13
श्रीवराद् एष संप्राप्त इति नाम्ना तम् आत्मजं
श्रीदत्तम् अकरोत्, सो ऽपि पिता पूर्णमनोरथः । 14
क्रमात् स वृद्धिं संप्राप्तः श्रीदत्तो ब्राह्मणो ऽपि सन्
अस्त्रेषुवाहुयुद्धेषु बभूव 'अप्रतिमो भुवि । 15

कालनेमिर् अथ भ्राता तीर्थार्थी सर्पभक्षितां
भार्याम् उद्दिश्य विगतभयो देशान्तरं ययौ । 16

श्रीदत्तो ऽपि गुणज्ञेन राज्ञा वल्लभशक्तिना
तत्र विक्रमशक्तेः स स्वपुत्रस्य कृतः सखा । 17
राजपुत्रेण तेन 'अस्य सहवासो ऽभिमानिना
बाल्ये दुर्योधनेन 'इव भीमस्य 'आसीत् तरस्विनः । 18

द्वाव् एतस्य ऽथ मित्रत्वं विप्रस्य ऽवन्तिदेशजौ
क्षत्रियौ बाहुशाली च वज्रमुष्टिश् च जग्मतुः । 19
बाहुयुद्धजिताश् च ऽन्ये दाक्षिणात्या गुणप्रियाः
स्वयंवरसुहृत्त्वेन मल्लिपुत्रास् तम् आश्रयन् । 20
महाबलव्याघ्रभटाव् उपेन्द्रबल इत्य् अपि
तथा निष्ठुरको नाम सौहार्दं तस्य चक्रिरे । 21
कदाचिद् अथ वर्षासु विहर्तुं जाह्नवीतटे
श्रीदत्तः सह तैर् मित्रै राजपुत्रसखो ययौ । 22
स्वभृत्यास् तत्र तं चक्रुर् निजं राजसुतं नृपं,
श्रीदत्तो ऽपि स तत्कालं राजा मित्रैर् अकल्प्यत । 23
तावता जातरोषेण राजपुत्रेण तेन सः
विप्रवीरो रणाय ऽशु समाहूतो मदस्पृशा । 24
स तेन बाहुयुद्धेन श्रीदत्तेन ऽथ निर्जितः
चकार हृदि बध्यं तु वर्धमानं कलंकितः । 25
ज्ञात्वा च तम् अभिप्रायं राजपुत्रस्य शङ्कितः
श्रीदत्तः सह तैर् मित्रैस् तत्समीपाद् अपासरत् । 26
उपसर्पन् स च ऽपश्यद् गङ्गामध्यगतां स्त्रियं
ह्रियमाणां जलौघेन, सागरस्थाम् इव श्रियं । 27
ततश् च ऽवततार ऽताम् उद्धर्तुं जलमध्यतः,
षड् बाहुशालिप्रमुखान् स्थापयित्वा तटे सखीन् । 28

तां च केशेषु अपि प्राप्तां निमग्नां दूरम् अम्भसि
अनुसर्तुं स्त्रियं सो ऽपि वीरस् तत्र एव मग्नवान् । 29
निमज्ज्य च ददर्श अत्र स श्रीदत्तः क्षणाद् इति
शैवं देवकुलं दिव्यं, न पुनर् वारि न स्त्रियं । 30
तद् दृष्ट्वा महद् आश्चर्यं श्रान्तो नत्वा वृषध्वजं
उद्याने सुन्दरे तत्र तां निनाय विभावरीं । 31
प्रातश् च देवम् ईशानं सा पूजयितुम् आगता
ददृशे तेन मूर्ता इव रूपश्रीः स्त्रीगुणान्विता । 32
ईश्वरं पूजयित्वा च सा ततो निजमन्दिरं
ययाव् इन्दुमुखी, सो ऽपि श्रीदत्तो ऽनुजगाम तां । 33
ददर्श मन्दिरं तच् च तस्याः सुरपुरोपमं,
प्रविवेश च संभ्रान्ता सा अवमानेन मानिनी । 34
सा अप्य् असंभाषमाणा एव तम् अन्तर्वासवेश्मनि
तन्वी न्यषीदत् पर्यङ्के स्त्रीसहस्रोपसेविता । 35
श्रीदत्तो ऽपि स तत्र एव निषसाद तदन्तिके,
अथ अकस्मात् प्रववृते तया साध्व्या प्ररोदितुं । 36
निपेतुः स्तनयोस् तस्याः संतता वाष्पविन्दवः,
श्रीदत्तस्य च तत्कालं कारुण्यं हृदये गतं । 37
ततः स च एनां पप्रच्छ, का त्वं, दुःखं च किं तव?
वद सुन्दरि, शक्तो ऽहं तन् निवारयितुं यतः । 38

ततः कथंचित् सा ऽब्रवादीद्, वयं दैत्यपतेर् बलेः
पौत्र्यो दशशतं, तासां ज्येष्ठा विद्युत्प्रभा ऽइत्य् अहं । 39
स नः पितामहो नीतो विष्णुना दीर्घबन्धनं,
पिता च बाहुयुद्धेन हतस् तेन ऽएव शौरिणा । 40
तं हत्वा तेन च निजात् पुरान् निर्वासिता वयं,
प्रवेशरोधकृत् तत्र सिंहश् च स्थापितो ऽन्तरे । 41
आवृतं तत् पदं तेन, दुःखेन हृदयं च नः,
स च यक्षः कुबेरस्य शापात् सिंहत्वम् आगतः । 42
मर्त्येभ्यश् च ऽअभिभवस् तस्य शापान्तः कथितः पुरा,
पुरप्रवेशोपायार्थे विज्ञप्तो विष्णुर् आदिशत् । 43
अतः स शत्रुर् अस्माकं केशरी जीयतां त्वया,
तदर्थम् एव च ऽआनीतो मया वीरभवान् इह । 44
मृगाङ्काख्यं खड्गं च जितात् तस्माद् अवाप्स्यसि,
पृथिवीं यत्प्रभावेन जित्वा राजा भविष्यसि । 45
तच् छ्रुत्वा स तथा ऽइत्य् अत्र श्रीदत्तो ऽतीततद्दिनः
अन्येद्युर् दैत्यकन्यास् ताः कृत्वा ऽअग्रे तत् पुरं ययौ । 46
जित्वा च बाहुयुद्धेन तत्र तं सिंहम् उद्धतं,
सो ऽपि शापविमुक्तः सन् बभूव पुरुषाकृतिः । 47
दत्त्वा च ऽअस्मै स खड्गं स्वं तुष्टः शापान्तकारिणे
महासुराङ्गनादुःखभारेण ऽअदर्शनं ययौ । 48

सो ऽथ सानुजया साकं श्रीदत्तो दैत्यकन्यया,
वह्निर्गतम् इव 'अनन्तं, तद् विवेश पुरोत्तमं । 49
अङ्गुलीयं विषघ्नं च सा 'अस्मै दैत्यसुता ददौ,
ततः सो ऽत्र स्थितस् तस्यां साभिलाषो ऽभवद् युवा । 50
सा 'अथ युक्त्या जगाद 'एनं, वाप्यां स्नानम् इतः कुरु,
आदाय 'एतं च मज्जेस् त्वं खड्गे ग्राहभयापहे । 51
तथा 'इति वाप्यां मग्नः सन् श्रीदत्तो जाह्नवीतटात्
तस्माद् एव समुत्तस्थौ यस्मात् पूर्वम् अवातरत् । 52
खड्गाङ्गुलीयके पश्यन् पातालाद् उत्तिथो ऽथ सः
विषण्णो विस्मितश् च 'आसीद् वञ्चितो ऽसुरकन्यया । 53

ततस् तान् सुहृदो ऽन्वेष्टुं स्वगृहाभिमुखो ययौ,
गच्छन् निष्ठुरकाख्यं च मित्रं मार्गे ददर्श सः । 54
स च 'उपेत्य प्रणम्य 'अथ नीत्वा 'एकान्ते च सत्वरं
तं पृष्टः स्वजनोदन्तम् एवं निष्ठुरको ऽब्रवीत् । 55
गङ्गान्तस् त्वां तदा मग्नम् अन्विष्य दिवसान् बहून्
स्वशिरांसि शुचा छेत्तुम् अभूम वयम् उद्यताः । 56
न पुत्राः साहसं कार्यं, जीवन्न् एष्यति वः सखा,
इत्य् अन्तरिक्षाद् वाणी नस् तम् उद्योगं न्यवारयत् । 57
ततश् च त्वत्पितुः पार्श्वम् अस्माकं प्रतिगच्छतां
मार्गे स[illegible]त्य पुमान् एको ऽब्रवीद् इदं । 58

नगरं न प्रवेष्टव्यं युष्माभिर् इह साम्प्रतं,
यतो वल्लभशक्तिः स विपन्नो ऽत्र महीपतिः । 59
दत्तं विक्रमशक्तेश् च राज्यं संभूय मन्त्रिभिः,
प्राप्तराज्यः स च 'अन्येद्युः कालनेमिर् अगाद् गृहं । 60
श्रीदत्तः क्व नु ते पुत्र इति च 'अमर्षनिर्भरः
तम् अपृच्छत्, स च 'अप्य् एनं, न 'अहं वेद्मि 'इत्य् अभाषत । 61
प्रह्लादितो ऽमुना पुत्र इति तेन निषूदितः
कालनेमिः स शूलायां राज्ञा चौर इति क्रुधा । 62
तद् दृष्ट्वा तस्य भार्यायाः स्वयं हृदयम् अस्फुटत्,
पापं पापान्तरे देयं दीर्घं हि क्रूरकर्मणां । 63
तेन च 'अन्विष्यते हन्तुं सो ऽपि विक्रमशक्तिना
श्रीदत्तस्, तद्वयस्याश् च यूयं, तद् गम्यताम् इतः । 64
इति तेन 'उदिताः पुंसा शोकार्तास् ते निजां भुवं
वाहुशाल्यादयः पञ्च संमन्त्र्य 'उज्जयिनीं ययुः । 65
प्रच्छन्नः स्थापितश् च 'अहं त्वदर्थम् इह तैः सखे,
तद् एहि, तावद् गच्छावस् तत्र 'एव सुहृदन्तिकं । 66
एवं निष्ठुरकाच् छ्रुत्वा पितराव् अनुशोच्य सः
निदधे प्रतिकारेच्छाम् इव खड्गे दृशं मुहुः । 67
कालं प्रतीक्षमाणो ऽथ वीरो निष्ठुरकान्वितः
प्रतस्थे तान् सखीन् प्राप्तुं स ताम् उज्जयिनीं पुरीं । 68

आमन्त्रनान्तं वृत्तान्तं सख्युस् तस्य च वर्णयन्
श्रीदत्तः स ददर्श ऽएकां क्रोशन्तीम् अबलां पथि । 69
अबला भ्रष्टमार्गा ऽअहं मालवं प्रस्थिता ऽइति तां
ब्रुवन्तीं दयया सो ऽथ सहप्रस्थायिनीं व्यधात् । 70
तया दयानुरोधाच् च स्त्रिया निष्ठुरकान्वितः
कस्मिंश्चिच् छून्ये नगरे दिने तस्मिन्न् उवास सः । 71
तत्र रात्राव् अकस्माच् च मुक्तनिद्रो ददर्श तां
स्त्रियं निष्ठुरकं हत्वा हर्षात् तन्मांसम् अश्नतीं । 72
उदतिष्ठत् तम् आकृष्य सो ऽथ खड्गं मृगाङ्कं,
सा ऽअपि स्त्री राक्षसीरूपं घोरं स्वं प्रत्यपद्यत । 73
स च केशेषु जग्राह निहन्तुं तां निशाचरीं,
तत्क्षणं दिव्यरूपं संप्राप्ता तम् उवाच सा । 74
मा मां बधीर्, महाभाग मुञ्च, न ऽएव ऽअस्मि राक्षसी,
अयं एवंविधः शापो मम ऽअभूत् कौशिकान् मुनेः । 75
तपस्यतो हि तस्य ऽअहं धनाधिपतिना ऽअमुना
विघ्नाय प्रेषिता पूर्वं तत्पदप्राप्तिकाङ्क्षिणाः । 76
ततः कान्तेन रूपेण तं क्षोभयितुम् अक्षमा
लज्जिता त्रासयन्त्य् एनम् अकार्षं भैरवं वपुः । 77
तद् दृष्ट्वा स मुनिः शापं सदृशं मय्य् अथ ऽआदधे,
राक्षसी भव पापे त्वं निघ्नती मानुषान् इति । 78

त्वत्तः केशग्रहे प्राप्ते शापान्तं मे स च ऽकरोत्,
इत्य् अहं राक्षसीभावम् इमं कष्टम् उपागमं । 79
मया ऽएव नगरं च ऽएतद् ग्रस्तम्, अद्य च मे चिरात्
त्वया कृतः स शापान्तस्, तद् गृहाण ऽअधुना वरं । 80
इति तस्या वचः श्रुत्वा श्रीदत्तः सादरो ऽभ्यधात्,
किम् अन्येन वरेण ऽअम्ब, जीवत्व् एष सखा मम । 81
एवम् अस्त्व् इति सा च ऽअस्मै वरं दत्वा तिरोदधे,
अक्षताङ्गः स च ऽउत्तस्थौ जीवन् निष्ठुरकः पुनः । 82
तेन ऽएव सह च प्रातः प्रहृष्टो विस्मितश् च सः
ततः प्रतस्थे श्रीदत्तः, प्राप च ऽउज्जयिनीं क्रमात् । 83
तत्र संभावयामास सखीन् मार्गोन्मुखान् स तान्
दर्शनेन, यथा ऽआयातो नीलकण्ठान् इव ऽअम्बुदः । 84
कृतातिथ्यविधिश् च ऽअसौ स्वगृहं वाहुशालिना
नीतो ऽभूत् कथिताशेषनिजवृत्तान्तकौतुकः । 85
तत्र ऽउपचर्यमाणः सन् पितृभ्यां वाहुशालिनः
स उवास समं मित्रैः श्रीदत्तः स्वगृहे यथा । 86

कदाचित् सो ऽथ संप्राप्ते मधुमासमहोत्सवे
यात्राम् उपवने द्रष्टुं जगाम सखिभिः सह । 87
तत्र कन्यां ददर्श ऽएकां राज्ञः श्रीविम्बकेः सुतां,
आगताम् आकृतिमतीं साक्षाद् इव मधुश्रियं । 88

सा मृगाङ्कवती नाम हृदयं तस्य तत्क्षणं
विवेश, दत्तमार्गा इव दृष्ट्या अस्य सविकाशया । 89
तस्या अपि मुहुः स्निग्धा प्रथमप्रेमशंसिनी
न्यस्ता तं प्रति दूती इव दृष्टिस् चक्रे गतागतं । 90
प्रविष्टां वृत्तगहनं ताम् अपश्यन्न् अथ क्षणात्
श्रीदत्तः शून्यहृदयो दिशो ऽपि न ददर्श सः । 91
ज्ञातं मया ते हृदयं सखे, मा अपह्नवं कृथाः,
तद् एहि तत्र एव गच्छामो, यत्र राजसुता गता । 92
इत्य् उक्तस् च इङ्गितज्ञेन सुहृदा वाहुशालिना
तथा इति स ययौ तस्याः संनिकर्षं सुहृत्सखः । 93
हा कष्टम् अहिना दष्टा राजपुत्री इति तत्क्षणं
आक्रन्द उद्भूत् तत्र श्रीदत्तहृदयज्वरः । 94
विषघ्नम् अङ्गुलीयं च विद्या च सुहृदो ऽस्य मे
अस्ति इति गत्वा जगदे कञ्चुकी वाहुशालिना । 95
स च तत्क्षणम् अभ्येत्य कञ्चुकी चरणानतः
निकटं राजदुहितुः श्रीदत्तम् अनयद् द्रुतं । 96
सो ऽपि तस्यास् तद् अङ्गुल्यां निचिक्षेप अङ्गुलीयकं,
ततो जजाप विद्यां च, तेन प्रत्युज्जिजीव सा । 97
अथ सर्वजने हृष्टे श्रीदत्तस्तुतितत्परे
तत्र एव ज्ञातवृत्तान्तो राजा विम्बकिर् आययौ । 98

तेन ऽसौ सखिभिः सार्धम् अगृहीताङ्गुलीयकः
प्रत्याजगाम श्रीदत्तो भवनं बाहुशालिनः । 99
तत्र तस्मै सुवर्णादि यत् प्रीतः प्राहिणोन् नृपः,
तद् बाहुशालिनः पित्रे समग्रं स समर्पयत् । 100

अथ तां चिन्तयन् कान्तां स तथा पर्यतप्यत,
यथा किंकार्यतामूढा वयस्यास् ते ऽस्य जज्ञिरे । 101
ततो भावनिका नाम राजपुत्र्याः प्रिया सखी
अङ्गुलीयार्पणव्याजात् तस्य ऽन्तिकम् उपाययौ । 102
उवाच च ऽएनं, मत्सख्यास् तस्याः सुभग साम्प्रतं
त्वं वा प्राणप्रदो भर्ता मृत्युर् वा ऽप्य्, एष निश्चयः । 103
इत्य् उक्ते भावनिकया, श्रीदत्तः सहसा ऽपि च,
बाहुशाली च, ते ऽन्ये च मन्त्रं संभूय चक्रिरे । 104
हरामो निभृतं युक्त्या राजपुत्रीम् इमां वयं,
निवासहेतोर् गुप्तं च गच्छामो मथुराम् इतः । 105
इति संमन्त्रिते सम्यक् कार्ये, सिद्धौ च संविदि
अन्योन्यं स्थापितायां, सा ययौ भावनिका ततः । 106
अन्येद्युर् बाहुशाली च वयस्यतृतयान्वितः
बाणिज्यव्यपदेशेन जगाम मथुरां प्रति । 107
स गच्छन् स्थापयामास वाहनानि पदे पदे
राजपुत्र्यभिसाराय गूढानि च तुराणि च । 108

श्रीदत्तो ऽपि ततः कांचिद् दुहित्रा सहितां स्त्रियं
सायं राजसुतावासे पाययित्वा मधु न्यधात् । 109
ततो ऽत्र दीपोद्देशेन दत्वा ऽग्निं वासवेश्मनि,
प्रछन्नं भावनिकया निन्ये राजसुता बहिः । 110
तत्क्षणं तां च संप्राप्य श्रीदत्तः स बहिःस्थितः
प्राक् प्रस्थितस्य निकटं प्राहिणोद् वाहुशालिनः । 111
ददौ मित्रद्वयं च ऽस्याः पश्चाद् भावनिकां तथा.
तन्मन्दिरे च दग्धा सा क्षीवा स्त्री सुतया सह । 112
लोकस् तु तां सखीयुक्तां मेने दग्धां नृपात्मजां.
प्रातस् च पूर्ववत् तत्र श्रीदत्तो ददृशे जनैः । 113
ततो रात्रौ द्वितीयस्यां स गृहीतमृगाङ्ककः
श्रीदत्तः प्रययौ पूर्वं प्रस्थितां तां प्रियां प्रति । 114
तया च रात्र्या ऽतिक्रम्य दूरम् अध्वानम् उत्सुकः
विन्ध्याटवीम् अथ प्राप स प्रातःप्रहरे गते । 115
तत्र ऽआदाव् अनिमित्तानि पश्चात् पथि ददर्श तान्
सर्वान् प्रहाराभिहतान् सहभावनिकान् सखीन् । 116
ते च दृष्ट्वा निजगदुस् तं संभ्रान्तम् उपागतं,
मुषिताः स्मो निपत्य ऽअद्य बह्वश्वारोहसेनया । 117
एकेन च ऽअश्वरोहेण राजपुत्री भयाकुला
अस्मास्व् एतदवस्थेषु नीता ऽअश्वम् अधिरोप्य सा । 118

दूरं न यावत् नीता च, तावद् गच्छ ऽनया दिशा,
अस्माकम् अन्तिके मा स्थाः, सर्वथा ऽभ्यधिका च सा । 119
इति तैः प्रेषितो मित्रैर् मुक्तः पश्यन् विवृत्त्य सः
जवेन राजतनयां श्रीदत्तो ऽनुससार तां । 120
गत्वा सुदूरं लेभे च ताम् अश्वारोहवाहिनीं,
युवानम् एकं तन्मध्ये क्षत्रियं स ददर्श च । 121
तेन ऽउपरि तुरङ्गस्य गृहीतां तां नृपात्मजां
अपश्यच् च, ययौ च ऽस्य क्षत्रयूनो ऽन्तिकं क्रमात् । 122
सान्त्वेन राजपुत्रीं ताम् अमुश्चन्तं च पादतः
अश्वाद् आक्षिप्य दृषदि श्रीदत्तस् तम् अचूर्णयत् । 123
तं हत्वा च तम् एव ऽश्वम् आरुह्य निजघान तान्
अन्यान् अपि बहून् क्रुद्धान् अश्वारोहान् प्रधावितान् । 124
हतशेषास् ततश् च ऽन्ये तद् दृष्ट्वा तस्य तादृशं
वीरस्य ऽमानुषं वीर्यं पलाय्य सभयं ययुः । 125
स च ऽपि तुरगारूढो राजपुत्र्या तया सह
मृगाङ्कवत्या श्रीदत्तः प्रतस्थे तान् सखीन् प्रति । 126
स्तोकं गत्वा च तस्य ऽश्वः संग्रामे व्रणितो भृशं
सभार्यस्य ऽवतीर्णस्य पपात, प्राप पञ्चतां । 127
तत्कालं च ऽस्य तत्र ऽएव सा मृगाङ्कवती प्रिया
त्रासायासपरिश्रान्ता तृषार्ता समपद्यत । 128

स्थापयित्वा च तां तत्र गत्वा दूरम् इतस् ततः
जलम् अन्विष्यतस् च अस्य सविता अस्तम् उपाययौ । 129
ततः स लब्धे ऽपि जले मार्गनाशवशाद् भ्रमन्
चक्रवाकवद् उत्कूजंस् तां निनाय निशां वने । 130
प्रातः प्राप च तत् स्थानं पतिताश्वोपलक्षितं,
न च तत्र क्वचित् कान्तां राजपुत्रीं ददर्श तां । 131
ततः स मोहाद् विन्यस्य भुवि खड्गं मृगाङ्कं
वृक्षाग्रम् आरुरोह एनाम् अवेक्षितुम् इतस् ततः । 132
तत्क्षणं तेन मार्गेण को ऽप्य् आगाच् छवराधिपः,
स च आगत्य एव जग्राह वृक्षमूलान् मृगाङ्कं । 133
तं दृष्ट्वा अपि स वृक्षाग्राद् अवतीर्य एव पृष्टवान्
प्रियाप्रवृत्तिम् अत्यार्तः श्रीदत्तः शवराधिपं । 134
इतस् त्वं गच्छ मत्पल्लीं; जाने सा तत्र ते गता,
अहं तत्र एव च एष्यामि, दास्याम्य् असिम् इमं च ते । 135
इत्य् उक्त्वा प्रेषितस् तेन शवरेण स च उत्सुकः
श्रीदत्तस् तां ययौ पल्लीं तदीयैः पुरुषैः सह । 136
श्रमं तावद् विमुञ्च इति तत्र उक्तः पुरुषैस् च तैः,
प्राप्य पल्लीपतेर् गेहं श्रान्तो निद्रां क्षणाद् ययौ । 137
प्रबुद्धस् च ददर्श स्वौ पादौ निगडसंयुतौ,
अलब्धतद्गती कान्ताप्राप्त्युपायोद्यमाव् इव । 138

अथ क्षणं दत्तसुखां क्षणान्तरविमाथिनीं
दैवस्य इव गतिं तत्र तस्थौ शोचन् स तां प्रियां। 139

एकदा तम् उवाच एत्य चेटी मोचनिकाभिधा,
आगतो ऽसि महाभाग कुत्र इह तव मृत्यवे। 140
कार्यसिद्धौ स हि क्वापि प्रयातः शवराधिपः,
आगत्य चण्डिकायास् त्वाम् उपहारीकरिष्यति। 141
एतदर्थं हि तेन त्वम् इतो विन्ध्याटवीतटात्
प्राप्य, युक्त्या प्रसह्य इह नीतः सम्प्रति बन्धनं। 142
भगवत्युपहारत्वे यत एव असि कल्पितः,
अत एव सदा वस्त्रैर् भोजनैश् च उपचर्यसे। 143
एकस् तु मुक्त्युपायस् ते विद्यते यदि मन्यसे,
अस्त्य् अस्य सुन्दरी नाम शवराधिपतेः सुता। 144
अत्यर्थं सा च दृष्ट्वा त्वां जायते मदनातुरा,
तां भजस्व वयस्यां मे, ततः क्षेमम् अवाप्स्यसि। 145
तया इत्य् उक्तो विमुक्त्यर्थी स श्रीदत्तस् तथा इति तां
गान्धर्वविधिना गुप्तं भार्यां व्यधित सुन्दरीं। 146
रात्रौ रात्रौ च सा तस्य बन्धनानि न्यवारयत्,
अचिराच् च सगर्भा सा सुन्दरी समपद्यत। 147
तत् सर्वम् अथ तन्माता बुद्ध्वा मोचनिकामुखात्
जामातृस्नेहतो गत्वा स्वैरं श्रीदत्तम् अब्रवीत्। 148

पुत्र श्रीचण्डनामा ऽसौ कोपनः सुन्दरीपिता
न त्वां क्षमेत, तद् गच्छ, विस्मर्तव्या न सुन्दरी । 149
इत्य् उक्त्वा मोचितः श्वश्र्वा, खड्गं श्रीचण्डहस्तगं
सुन्दर्यै निजम् आविध्य, श्रीदत्तः प्रययौ ततः । 150
विवेश च ऽथ्यां ताम् एव चिन्ताक्रान्तो निजाटवीं
मृगाङ्कवत्याः पदवीं तस्या जिज्ञासितुं पुनः । 151
निमित्तं च शुभं दृष्ट्वा तम् एव ऽद्देशम् आययौ,
यत्र ऽस्य ऽश्वो मृतः सो ऽथ, यत्र सा हारिता बधूः । 152
तत्र च ऽकं ददर्श ऽरात् लुब्धकं संमुखागतं,
दृष्ट्वा च पृष्टवांस् तस्याः प्रवृत्तिं हरिणीदृशः । 153
किं श्रीदत्तस् त्वम् इत्य् उक्तो लुब्धकेन च तत्र सः,
स एव मन्दभाग्यो ऽहम् इत्य् उवाच विनिःश्वसन् । 154
ततः स लुब्धको ऽवादीत्, तर्हि वच्मि सखे शृणु,
दृष्टा सा ते मया भार्या क्रन्दन्ती त्वाम् इतस् ततः । 155
पृष्ट्वा ततस् च वृत्तान्तम् आश्वास्य च कृपाकुलः
निजां पल्लीम् इतो ऽरण्याद् दीनां तां नीतवान् अहं । 156
तत्र च ऽलोक्य तरुणान् पुलिन्दान् सभयेन सा
मथुरानिकटं ग्रामं नीता नागस्थलं मया । 157
तत्र च स्थापिता गेहे स्थविरस्य द्विजन्मनः
विश्वदत्ताभिधानस्य न्यासीकृत्य सगौरवं । 158

ततश् च 'अहम् इह 'आयातो बुद्ध्वा त्वन्नाम तन्मुखात्,
ताम् अन्वेष्टुं ततो गच्छ शीघ्रं नागस्थलं प्रति । 159
इत्य् उक्तो लुब्धकेन 'आशु स श्रीदत्तस् ततो ययौ,
तं च नागस्थलं प्रापद् अपरेद्युर् दिनात्यये । 160
भवनं विश्वदत्तस्य प्रविश्य 'अथ विलोक्य तं
ययाचे, देहि मे भार्यां लुब्धकस्थापिताम् इति । 161
तच् छ्रुत्वा विश्वदत्तस् तं श्रीदत्तं निजगाद सः,
मथुरायां सुहृन् मे ऽस्ति ब्राह्मणो गुणिनां प्रियः । 162
उपाध्यायश् च मन्त्री च शूरसेनस्य भूपतेः,
तस्य हस्ते त्वदीया सा गृहिणी स्थापिता मया । 163
अयं हि विजनो ग्रामो न तद्रक्षाक्षमो भवेत्,
तत् प्रातस् तत्र गच्छ त्वम्, अद्य विश्रम्यताम् इह । 164
इत्य् उक्तो विश्वदत्तेन स नीत्वा 'अत्र 'एव तां निशां,
प्रातः प्रतस्थे, प्रापच् च मथुराम् अपरे दिने । 165
दीर्घाध्वमलिनस् तस्मिन् नगरे बहिर् एव सः
स्नानं चक्रे परिश्रान्तो निर्मले दीर्घिकाजले । 166
तत एव 'अम्बुमध्याच् च वस्त्रं चौरनिवेशितं
प्राप्तवान् अञ्चलग्रन्थिबद्धहारम् अशङ्कितं । 167
अथ तद् वस्त्रम् आदाय स तं हारम् अलक्षयन्
प्रियां दिदृक्षुः श्रीदत्तो विवेश मथुरां पुरीं । 168

तत्र तत् प्रत्यभिज्ञाय वस्त्रं हारम् अवाप्य च,
स चौर इत्य् अवष्टभ्य निन्ये नगररक्षिभिः । 169
दर्शितश् च तथाभूतो नगराधिपतेश् च तैः,
तेन ऽप्य् आवेदितो राज्ञि, राजा ऽप्य् अस्य ऽआदिशद् बधं । 170
ततो बध्यभुवं हन्तुं नीयमानं ददर्श तं
सा मृगाङ्कवती दूरात् पश्चात् प्रहतडिण्डिमं । 171
सो ऽयं मे नीयते भर्ता बधाय ऽइति ससंभ्रमं
सा गत्वा मन्त्रिमुख्यं तम् अब्रवीद् यद्गृहे स्थिता । 172
निवार्य बधकान् सो ऽथ मन्त्री विज्ञप्य भूपतिं
श्रीदत्तं मोचयित्वा तम् बधाद् आनाययद् गृहं । 173
कथं सो ऽयं पितृव्यो मे गत्वा देशान्तरं पुरा
इह ऽएव दैवाद् विगतभयः प्राप्तो ऽद्य मन्त्रितां? । 174
इति तं मन्त्रिणं सो ऽथ श्रीदत्तस् तद्गृहागतः
प्रत्यभिज्ञातवान् दृष्ट्वा पपात ऽअस्य च पादयोः । 175
सो ऽपि तं प्रत्यभिज्ञाय भ्रातुः पुत्रं सविस्मयः
कण्ठे जग्राह, सर्वं च वृत्तान्तं परिपृष्टवान् । 176
ततस् तस्मै स निखिलं श्रीदत्तः स्वपितुर् बधात्
आरभ्य निजवृत्तान्तं पितृव्याय न्यवेदयत् । 177
सो ऽपि मुक्त्वा ऽअश्रु विजने भ्रातुः पुत्रं तम् अभ्यधात्,
अधृतिं मा कृथाः पुत्र, मम सिद्धा हि यक्षिणी । 178

पञ्च वाजिसहस्राणि हेमकोटीश् च सप्त सा
प्रादात् मह्यम् अपुत्राय, तत् तव एव अखिलं धनं । 179
इत्य् उक्त्वा स पितृव्यस् तां श्रीदत्ताय अर्पयत् प्रियां,
श्रीदत्तो ऽप्य् आत्तविभवस् तत्र तां परिणीतवान् । 180
ततश् च तस्थौ तत्र एव संगतः कान्तया तया
मृगाङ्कवत्या सानन्दो, रात्र्या इव कुमुदाकरः । 181
वाक्कुशाल्यादिचिन्ता तु तस्य अभूत् पूर्णसंपदः
इन्दोः कलङ्कलेखा इव हृदि मालिन्यदायिनी । 182

एकदा स पितृव्यस् तं रहः श्रीदत्तम् अभ्यधात्,
पुत्र राज्ञः सुता अस्त्य् अस्य शूरसेनस्य कन्यका । 183
मया च अवन्तिदेशे सा नेया दातुं तदाज्ञया,
तत् तेन एव अपदेशेन हृत्वा तुभ्यं ददामि तां । 184
ततस् तदनुगे प्राप्ते वले सति च मामके,
यद् राज्यं ते श्रिया आदिष्टं, तत् प्राप्स्यस्य् अचिराद् इति । 185
निश्चित्य एतच् च तां कन्यां गृहीत्वा, ययतुस् ततः
श्रीदत्तस् तत्पितृव्यश् च ससैन्यौ सपरिग्रहौ । 186
ततो विन्ध्याटवीम् एतौ प्राप्तमात्राव् अतर्कितौ
चौरसेना अतिमहती रुरोध शरवर्षिणी । 187
प्रहारमूर्छितं बद्ध्वा श्रीदत्तं भग्नसैनिकं
निन्युश् चौराः स्वपल्लीं ते स्वीकृत्य सकलं धनं । 188

ते च तं प्रापयामासुश् चण्डिकासद्म भीषणं,
उपहाराय घण्टानां नादैर् मृत्युम् इव 'आह्वयन् । 189
तत्र 'अपश्यत् तं सपत्नी सा पल्लीपतिपुत्रिका
सुन्दरी द्रष्टुम् आयाता देवीं बालसुतान्विता । 190
निषिद्धवत्या मध्यस्थान् दस्यून् आनन्दपूर्णया
स श्रीदत्तस् तया साकं तन्मन्दिरम् अथ 'आविशत् । 191
तदा 'एव पल्लीराज्यं तत् प्राप, पित्रा यद् अर्पितं
प्राग् एव 'अनन्यपुत्रेण सुन्दर्यै गच्छता दिवं । 192
तं च चौरसमाक्रान्तं सपितृव्यपरिच्छदं
सकलत्रं च लेभे ऽसौ तं खड्गं च मृगाङ्ककं । 193
तत्र 'एव शूरसेनस्य सुतां तां परिणीय च
श्रीदत्तो ऽपि महान् राजा नगरे समपद्यत । 194
प्रणिधाय स दूतांश् च ततः श्वशुरयोस् तयोः
बिम्बकेस् तस्य तस्य 'अपि शूरसेनस्य भूपतेः । 195
तम् उपाजग्मतुश् तौ च सेनासमुदयान्वितौ,
तं विज्ञाय 'एव संबन्धं मुदा दुहितृवत्सलौ । 196
ते ऽपि रूढव्रणाः स्वस्थास् तद्वियुक्ता वयस्यकाः
बाहुशालिप्रभृतयस् तद् बुद्ध्वा तम् उपाययुः । 197
अथ श्वशुरसंयुक्तो गत्वा तं पितृघातिनं
चक्रे विक्रमशक्तिं स वीरः क्रोधानलाहुतिं । 198

ततश् च साब्धिवलयां श्रीदत्तः प्राप्य मेदिनीं
ननन्द विरहोत्तीर्णः स मृगाङ्कवतीसखः । 199

इत्थं, नरपते, दीर्घवियोगव्यसनार्णवं
तरन्ति च, लभन्ते च कल्याणं धीरचेतसः । 200

इति संगतकाच् छ्रुत्वा कथां स दयितोत्सुकः
तां निनाय निशां मार्गे सहस्रानीकभूपतिः । 201

ततो मनोरथारूढः पुरःप्रहितमानसः
प्रातः सहस्रानीको ऽसौ प्रतस्थे स्वां प्रियां प्रति । 202

दिनैः कतिपयैस् तं च जमदग्नेर् अवाप सः
मृगैर् अपि परित्यक्तचापलं शान्तम् आश्रमं । 203

ददर्श कल्पितातिथ्यं जमदग्निं च तत्र तं
प्रणतः पावनालोकम् आकारं तपसाम् इव । 204

स च तस्मै मुनी राज्ञे सपुत्रां तां समर्पयत्
चिरान् मृगावतीं राज्ञीं सानन्दाम् इव निर्वृतिं । 205

शापान्ते तच् च दम्पत्योस् तयोर् अन्योन्यदर्शनं
आनन्दवाष्पपूर्णायां ववर्ष इव अमृतं दृशि । 206

तत्पूर्वदर्शनं पुत्रम् आलिंग्य उदयनं स तं
मुमोच नृपतिः कृच्छ्राद् रोमाञ्चेन इव कीलितं । 207

ततः सोदयनां राज्ञीं ताम् आदाय मृगावतीं
आतपोवनम् उद्वाष्पैर् अनुयातो मृगैर् अपि । 208
आमन्त्र्य जमदग्निं च प्रतस्थे स्वां पुरीं प्रति
प्रशान्ताद् आश्रमात् तस्मात् सहस्रानीकभूपतिः । 209
शृण्वन् विरहवृत्तानि प्रियाया वर्णयंश् च सः
उत्तोरणपताकां तां कौशाम्बीं प्राप्तवान् क्रमात् । 210
समं च पत्नीपुत्राभ्यां प्रविवेश स तां पुरीं
पीयमान इव ऽत्पक्ष्मराजिभिः पौरलोचनैः । 211
अभ्यषिञ्चच् च तं तत्र झटित्य् उदयनं सुतं
यौवराज्ये महाराजः प्रेर्यमाणः स तद्गुणैः । 212
स्वमन्त्रिपुत्रांस् तस्मै स मन्त्रहेतोः समर्पयत्,
वसन्तकरुमण्वन्तौ तथा यौगन्धरायणं । 213
एभिर् मन्त्रिवरैर् एष कृत्स्नां प्राप्स्यति मेदिनीं,
इति वाग् उदभूद् दिव्या पुष्पवृष्ट्या समं तदा । 214
ततः सुते न्यस्तभरः स राजा चिरकाङ्क्षितं
जीवलोकसुखं भेजे मृगावत्या तया सह । 215

अथ तस्य जरां प्रशान्तिदूतीम्
उपयातां क्षितिपस्य कर्णमूलं
सहसा ऽएव विलोक्य जातकोपा,
वत दूरे विषयस्पृहा बभूव । 216

ततस् तं कल्याणं तनयम् अनुरक्तप्रकृतिकं
निवेश्य स्वे राज्ये जगदुदयहेतोर् उदयनं,
सहस्रानीको ऽसौ सचिवसहितः सप्रियतमो
महाप्रस्थानाय क्षितिपतिर् अगच्छद् हिमगिरिं । 217

। इति ।
॥ दशमस् तरङ्गः ॥

TARANGA. 11.

ततः स वत्सराज्यं च प्राप्य पित्रा समर्पितं
कौशाम्ब्यवस्थितः सम्यक् शशास 'उदयनः प्रजाः । 1
यौगन्धरायणाद्येषु भरं विन्यस्य मन्त्रिषु
स बभूव शनै राजा सुखेष्व् एकान्ततत्परः । 2
सदा सिषेवे मृगयां, वीणां घोषवतीं च तां
दत्तां वासुकिना पूर्वं नक्तं दिनम् अवादयत् । 3
तत्तन्त्रीकलनिर्ह्रादमोहमन्त्रवशीकृतान्
आनिनाय च संयम्य सदा मत्तान् वनद्विपान् । 4
स वरनारीवक्त्रेन्दुप्रतिमालंकृतां सुरां,
मन्त्रिणां च मुखच्छायां वत्सराजः समं पपौ । 5
कुलरूपानुरूपा मे भार्या क्वापि न विद्यते,
एका वासवदत्ताख्या कन्या कामयते परं । 6
कथं प्राप्येत सा च 'इति चिन्ताम् एकाम् उवाह सः.
सो ऽपि चण्डमहासेन उज्जयिन्याम् अचिन्तयत् । 7
तुल्यो मद्दुहितुर् भर्ता जगत्य् अस्मिन् न विद्यते,
अस्ति तु उद[illegible], विपक्षः स च मे सदा । 8

तत् कथं नाम जामाता, वश्यश् च स भवेन् मम?
उपायस् त्व् एक एव ऽस्ति यद् अटव्यां भ्रमत्य् असौ । 9
एकाकी द्विरदान् बध्नन् मृगयाव्यसनी नृपः,
तेन छिद्रेण तं युक्त्या ऽवष्टभ्य ऽऽनाययाम्य् अहं । 10
गान्धर्वज्ञस्य तस्य ऽएतां सुतां शिष्यीकरोमि च,
ततश् च ऽस्यां स्वयं तस्य चक्षुः स्निह्येद् असंशयं । 11
एवं स मम जामाता, वश्यश् च नियतं भवेत्,
न ऽन्यो ऽस्त्य् उपायः कोऽप्य् अत्र येन वश्यो भवेच् च सः । 12
इति संचिन्त्य तत्सिद्ध्यै स गत्वा चण्डिकागृहं
चण्डीम् अभ्यर्च्य तुष्टाव, चक्रे ऽस्या उपयाचितं । 13
एतत् संपत्स्यते राजन् अचिराद् वाञ्छितं तव,
इति शुश्राव तत्र ऽसाव् अशरीरां सरस्वतीं । 14
ततस् तुष्टः समागत्य बुद्धदत्तेन मन्त्रिणा
सह चण्डमहासेनस् तम् एव ऽर्थम् अचिन्तयत् । 15
मानोद्धतो वीतलोभो रक्तभृत्यो महाबलः
असाध्यो ऽपि स सामादेः, साम तावन् निरूप्यतां । 16
इति संमन्त्र्य स नृपो दूतम् एकं समादिशत्,
गच्छ, मद्वचनाद् ब्रूहि वत्सराजम् इदं वचः । 17
मत्पुत्री तव गान्धर्वशिष्या भवितुम् इच्छति,
स्नेहस् ते ऽस्मासु चेत्, तत् त्वं ताम् इह ऽएव ऽएत्य शिक्षय । 18

इत्य् उक्त्वा प्रेषितस् तेन दूतो गत्वा न्यवेदयत्
कौशाम्ब्यां वत्सराजाय संदेशं तं तथा एव सः । 19
वत्सराजो ऽपि तच् छ्रुत्वा दूताद् अनुचितं वचः
यौगन्धरायणस्य इदम् एकान्ते मन्त्रिणो ऽब्रवीत् । 20
किम् एतत् तेन संदिष्टं सदर्पं मम भूभुजा,
एवं संदिशतस् तस्य को ऽभिप्रायो दुरात्मनः? । 21
इत्य् उक्तो वत्सराजेन तदा यौगन्धरायणः
उवाच एनं महामन्त्री स स्वामिहितनिष्ठुरः । 22
भुवि व्यसनिताख्यातिः प्ररूढा ते लता इव या,
इदं तस्या महाराज कषायकटुकं फलं । 23
स हि त्वां रागिणं मत्वा कन्यारत्नेन लोभयन्
नीत्वा चण्डमहासेनो बद्ध्वा स्वीकर्तुम् इच्छति । 24
तन् मुञ्च व्यसनानि त्वं, सुखेन हि परैर् नृपाः
सीदन्तस् तेषु गृह्यन्ते खातेष्व् इव वनद्विपाः । 25
इत्य् उक्तो मन्त्रिणा धीरः प्रतिदूतं व्यसर्जयत्
स वत्सराजस् तं चण्डमहासेननृपं प्रति । 26
संदिदेश च, यद्य् अस्ति वाञ्छा मच्छिष्यतां प्रति
त्वत्पुत्र्यास्, तद् इह एव एषा भवता प्रेष्यताम् इति । 27
एवं कृत्वा च सचिवान् वत्सराजो जगाद सः
यामि चण्डमहासेनम् इह बद्ध्वा आनयामि तं । 28

तच् छ्रुत्वा तम् उवाच अग्र्यो मन्त्री यौगन्धरायणः,
न च एतच् छक्यते राजन् कर्तुं, न एव च युज्यते । 29
स हि प्रभाववान् राजा अस्वीकार्यश् च तव प्रभो,
तथा च तद्गतं सर्वं शृण्व् इदं कथयामि ते । 30

अस्ति इह उज्जयिनी नाम नगरी भूषणं भुवः
हसन्ती इव सुधाधौतैः प्रासादैर् अमरावतीं । 31
यस्यां वसति विश्वेशो महाकालवपुः स्वयं
शिथिलीकृतकैलासनिवासव्यसनो हरः । 32
तस्यां महेन्द्रवर्माख्यो राजा अभूद् भूभृतां वरः,
जयसेनाभिधानो ऽस्य बभूव सदृशः सुतः । 33
जयसेनस्य तस्य अथ पुत्रो ऽप्रतिमदोर्बलः
समुत्पन्नो महासेननामा नृपतिकुञ्जरः । 34
सो ऽथ राजा स्वराज्यं तत् पालयन् समचिन्तयत्,
न मे खड्गो ऽनुरूपो ऽस्ति, न च भार्या कुलोद्गता । 35
इति संचिन्त्य स नृपश् चण्डिकागृहम् आगमत्,
तत्र अतिष्ठन् निराहारो देवीम् आराधयंश् चिरं । 36
उत्कृत्य अथ स्वमांसानि होमकर्म स च अकरोत्,
ततः प्रसन्ना साक्षात् सा देवी चण्डी तम् अभ्यधात् । 37
प्रीता अस्मि ते, गृहाण इमं पुत्र खड्गोत्तमं मम,
एतत्प्रभावाच् छत्रूणाम् अजेयस् त्वं भविष्यसि । 38

किंच ऽअङ्गारवतीं नाम कन्यां त्रैलोक्यसुन्दरीं
अङ्गारकासुरसुतां शीघ्रं भार्याम् अवाप्स्यसि । 39
अतीवचण्डं कर्म ऽइह कृतं च ऽएतद् यतस् त्वया,
अतश् चण्डमहासेन इत्य् आख्या ते भविष्यति । 40
इत्य् उक्त्वा दत्तखड्गा सा देवी तस्य तिरोऽभवत्,
राज्ञः संकल्पसंपत्तिहृष्टिर् आविर् अभूत् पुनः । 41
सखड्गो मत्तहस्तीन्द्रो नडागिरिर् इति प्रभो,
द्वे तस्य रत्ने शक्रस्य कुलिशैरावणाव् इव । 42
तयोः प्रभावात् सुखितः कदाचित् सो ऽथ भूपतिः
अगाच् चण्डमहासेनो मृगयायै महाटवीं । 43
अतिप्रमाणं तत्र ऽएकं वराहं घोरम् ऐक्षत,
नैशं तम इव ऽअकाण्डे दिवा, पिण्डत्वम् आगतं । 44
स वराहः शरैर् अस्य तीक्ष्णैर् अप्य् अकृतव्रणः
आहत्य स्यन्दनं राज्ञः पलाय्य विलम् आविशत् । 45
राज्ञा ऽअपि रथम् उत्सृज्य तम् एव ऽअनुसरन् क्रुधा
धनुर्द्वितीयस् तत्र ऽएव प्राविशत् स विलान्तरं । 46
दूरं प्रविश्य च ऽअपश्यत् कान्तं पुरवरं महत्,
सविस्मयो न्यषीदच् च तदन्तर् दीर्घिकातटे । 47
तत्रस्थः कन्यकाम् एकाम् अपश्यत् स्त्रीशतान्वितां
संचरन्तीं, स्मरस्य ऽइव धैर्यनिर्भेदिनीम् इषुं । 48

सा ऽपि प्रेमरसासारवर्षिणा चक्षुषा मुहुः
स्नपयन्ती ऽइव राजानं शनकैस् तम् उपागमत् । 49
कस् त्वं सुभग, कस्माच् च प्रविष्टो ऽसि ऽइह साम्प्रतं?
इत्य् उक्तः स तया राजा यथातत्त्वम् अवर्णयत् । 50
यच् छ्रुत्वा नेत्रयुगलात् सरागाम् अश्रुसंततिं
हृदयाद् धीरतां च ऽअपि समं कन्या मुमोच सा । 51
का त्वं, रोदिषि कस्माच् च? पृष्टा तेन ऽइति भूभृता,
सा तं प्रत्यब्रवीद् एवं मन्मथाज्ञा ऽअनुवन्दिनी । 52
यो वराहः प्रविष्टो ऽत्र, स दैत्यो ऽङ्गारकाभिधः,
अहं च ऽएतस्य तनया नाम्ना ऽअङ्गारवती नृप । 53
वज्रसारमयश् च ऽअसौ, राजपुत्रीर् इमाः शतं
आछिद्य राज्ञां गेहेभ्यः परिवारं व्यधान् मम । 54
किंच ऽएष राक्षसीभूतः शापदोषान् महासुरः,
तृष्णाश्रमार्तश् च ऽअद्य त्वां प्राप्य ऽअपि त्यक्तवान् अयं । 55
इदानीं च ऽअस्तवाराहरूपो विश्राम्यति स्वयं,
सुप्तोत्थितश् च नियतं त्वयि पापं समाचरेत् । 56
इति मे तव कल्याणम् अपश्यन्त्या गलन्त्य् अमी
संतापक्वाथिताः प्राणा इव वाष्पाम्बुबिन्दवः । 57
इत्य् अङ्गारवतीवाक्यं श्रुत्वा राजा जगाद तां,
यदि मय्य् अस्ति ते स्नेहस्, तद् इदं मद्वचः कुरु । 58

प्रबुद्धस्य ऽस्य गत्वा त्वं रुदिहि स्वपितुः पुरः,
ततस् च नियतं स त्वां पृच्छेद् उद्वेगकारणं । 59
त्वां चेन् निपातयेत् कश्चित्, ततो मे का गतिर् भवेत्?
एतद् दुःखं मम इत्य् एवं स च वाच्यस् त्वया ततः । 60
एवं कृते ऽस्ति कल्याणं तव ऽपि च मम ऽपि च,
इत्य् उक्ता तेन सा राज्ञा तथा इत्य् अङ्गीचकार तं । 61
तं च छन्नम् अवस्थाप्य राजानं पापशङ्किनी
अगाद् असुरकन्या सा प्रसुप्तस्य ऽन्तिकं पितुः । 62
सो ऽथ दैत्यः प्रबुबुधे, प्रारेभे सा च रोदितुं,
किं पुत्रि रोदिषि इत्य् एवं स च ताम् अब्रवीत् ततः । 63
हन्यात् त्वां को ऽपि चेत् तात, तदा मे का गतिर् भवेत्?
इत्य् आर्ता तम् अवादीत् सा, स च विहस्य ततो ऽब्रवीत् । 64
को मां व्यापादयेत् पुत्रि? सर्वो वज्रमयो ह्य् अहं,
वामहस्ते ऽस्ति मे छिद्रं, तच् च चापेन रक्ष्यते । 65
इत्थम् आश्वासयामास स दैत्यस् तां निजां सुतां,
एतच् च निखिलं तेन राज्ञा छन्नेन शुश्रुवे । 66
ततः क्षणाद् इव उत्थाय कृत्वा स्नानं स दानवः
कृतमौनः प्रववृते देवं पूजयितुं हरं । 67
तत्कालं प्रकटीभूय स राजा ऽऽकृष्टकार्मुकः
उपेत्य प्रसभं दैत्यं रणाय ऽऽह्वयते स्म तं । 68

सो ऽप्य् उत्क्षिप्य करं वामं मौनस्थस् तस्य भूभृतः,
प्रतीक्षस्व क्षणं तावद् इति संज्ञां तदा ऽकरोत् । 69
राजा ऽपि लघुहस्तत्वात् करे तत्र एव तत्क्षणं
तस्मिन् मर्मणि तं दैत्यं पृषत्केन जघान सः । 70
स च मर्माहतो घोरं रावं कृत्वा महासुरः
अङ्गारको ऽपतद् भूमौ, निर्यज्जीवो जगाद च । 71
तृषितो ऽहं हतो येन, स माम् अद्भिर् न तर्पयेत्
प्रत्यब्दं यदि, तत् तस्य नश्येयुः पञ्च मन्त्रिणः । 72
इत्य् उक्त्वा पञ्चतां प्राप स दैत्यः, सो ऽपि तत्सुतां
ताम् अङ्गारवतीं राजा गृहीत्वा उज्जयिनीं ययौ । 73
परिणीतवतस् तस्य तत्र तां दैत्यकन्यकां
जातौ द्वौ तनयौ चण्डमहासेनस्य भूपतेः । 74
एको गोपालको नाम, द्वितीयः पालकस् तथा,
तयोर् इन्द्रोत्सवं च असौ जातयोर् अकरोन् नृपः । 75
ततस् तं नृपतिं स्वप्ने तुष्टो वक्ति स्म वासवः,
प्राप्स्यस्य् अनन्यसदृशीं मत्प्रसादात् सुताम् इति । 76
ततः कालेन जाता ऽस्य राज्ञः कन्या तु तन्व्य् अथ,
अपूर्वा निर्मिता धात्रा चन्द्रस्य इव अपरा तनुः । 77
कामदेवावतारो ऽस्याः पुत्रो विद्याधराधिपः
भविष्यति इति तत्कालम् उदभूद् भारती दिवः । 78

दत्ता मे वासवेन 'एषा तुष्टेन 'इति स भूपतिः
नाम्ना वासवदत्तां तां तनयाम् अकरोत् तदा । 79
सा च तस्य पितुर् गेहे प्रदेया सम्प्रति स्थिता,
प्राङ् मन्थाद् अर्णवस्य 'इव कमला कुक्षिकोटरे । 80

एवंविधप्रभावश्
चण्डमहासेनभूपतिः स किल
देव न शक्यो जेतुं
यथा, तथा दुर्गदेशस्थः । 81
किंच स वाञ्छति राजन्
दातुं तुभ्यं सदा 'एव तनयां तां,
प्रार्थयते तु स राजा
निजपक्षमहोदयं मानी । 82
सा च 'अवश्यं मन्ये
वासवदत्ता त्वया 'एव परिणेया.
सपदि स वासवदत्ता-
हृतहृदयो वत्सराजो ऽभूत् । 83

। इति ।

॥ एकादशस् तरङ्गः ॥

TARANGA. 12.

अत्र 'अन्तरे स वत्सेशप्रतिदूतस् तद् अब्रवीत्
गत्वा प्रतिवचश् चण्डमहासेनाय भूभृते । 1
सो ऽपि चण्डमहासेनस् तच् छ्रुत्वा 'एवं व्यचिन्तयत्,
स तावद् इह न 'आयाति मानी वत्सेश्वरो भृशं । 2
कन्या हि तत्र न प्रेष्या, भवेद् एवं हि लाघवं,
तस्माद् बद्ध्वा 'एव तं युक्त्या नृपम् आनाययाम्य् अहं । 3
इति संचिन्त्य संमन्त्र्य स राजा मन्त्रिभिः सह
अकारयत् स्वसदृशं महान्तं यन्त्रहस्तिनं । 4
तं च 'अन्तर् वीरपुरुषैः कृत्वा छन्नैर् अधिष्ठितं
विन्ध्याटव्यां स निदधे राजा यन्त्रमयं गजं । 5
तत्र तं चारपुरुषाः पश्यन्ति स्म विदूरतः
गजबन्धरसासक्तवत्सराजोपजीविनः । 6
ते च त्वरितम् आगत्य वत्सराजं व्यजिज्ञपन्,
देव दृष्टो गजो ऽस्माभिर् एको विन्ध्यवने भ्रमन् । 7
अस्मिन्न् इयति भूलोके न 'एव यो ऽन्यत्र दृश्यते,
वर्ष्मणा व्याप्तगगणो विन्ध्याद्रिर् इव जङ्गमः । 8

ततश् चारवचः श्रुत्वा वत्सराजो जहर्ष सः,
तेभ्यः सुवर्णलक्षं च प्रददौ पारितोषिकं । 9
तं चेद् गजेन्द्रं प्राप्नोमि प्रतिमल्लं नडागिरेः,
तत् स चण्डमहासेनो वश्यो भवति मे ध्रुवं । 10
ततो वासवदत्तां स्वां स स्वयं मे प्रयच्छति,
इति संचिन्तयन् सो ऽथ राजा ताम् अनयन् निशां । 11
प्रातश् च मन्त्रिवचनान्य् अकृत्वा गजतृष्णया
पुरस्कृत्य एव तांश् चारान् ययौ विन्ध्याटवीं प्रति । 12
प्रस्थानलग्नस्य फलं कन्यालाभं सबन्धनं
यद् ऊचुर् गणकास् तस्य, तत् स न एव व्यचारयत् । 13
प्राप्य विन्ध्याटवीं तस्य गजस्य क्षोभशङ्कया
वत्सराजः स्वसैन्यानि दूराद् एव न्यवारयत् । 14
चारमात्रसहायस् तु वीणां घोषवतीं दधत्
निजव्यसनविस्तीर्णां तां विवेश महाटवीं । 15
विन्ध्यस्य दक्षिणे पार्श्वे दूराच् चारैः प्रदर्शितं
गजं सत्यगजाभासं तं ददर्श स भूपतिः । 16
एकाकी वादयन् वीणां चिन्तयन् बन्धनानि सः
मधुरध्वनि गायंश् च शनैर् उपजगाम तं । 17
गान्धर्वदत्तचित्तत्वात् सन्ध्याधान्तवशाच् च सः
न तं वनगजं राजा मायागजम् अलक्षयत् । 18

सो ऽपि हस्ती तम् उत्कर्णतालो गीतरसाद् इव
उपेत्य उपेत्य विचलन् दूरम् आकृष्टवान् नृपं । 19
ततो ऽकस्माच् च निर्गत्य तस्माद् यन्त्रमयाद् गजात्
वत्सेश्वरं तं संनद्धाः पुरुषाः पर्यवारयन् । 20
तान् दृष्ट्वा नृपतिः कोपाद् आकृष्टक्षुरिको ऽथ सः
अग्रस्थान् योधयन् अन्यैर् एत्य पश्चाद् अगृह्यत । 21
संकेतमिलितैश् च अन्यैर् योधास् तैः सैनिकैः सह
निन्युर् वत्सेश्वरं चण्डमहासेनान्तिकं च तं । 22
सो ऽपि चण्डमहासेनो निर्गत्य अग्रे कृतादरः
वत्सेशेन समं तेन विवेश उज्जयिनीं पुरीं । 23
स तत्र ददृशे पौरैर् अवमानकलङ्कितः
शशी इव लोचानन्दो वत्सराजो नवागतः । 24
ततो ऽस्य गुणरागेण बधम् आशंक्य तत्र ते
पौराः संभूय सकलाश् चक्रुर् मरणनिश्चयं । 25
न मे वत्सेश्वरो बध्यः संधेय इति तान् ब्रुवन्
सो ऽथ चण्डमहासेनः पौरान् क्षोभाद् अवारयत् । 26
ततो वासवदत्तां तां सुतां तत्र एव भूपतिः
वत्सराजाय गान्धर्वशिक्षाहेतोः समर्पयत् । 27
उवाच च एनं, गान्धर्वं त्वम् एतां शिक्षय प्रभो,
ततः प्राप्स्यसि कल्याणं, मा विषादं कृथा इति । 28

तस्य दृष्ट्वा तु तां कान्तां वत्सराजस्य मानसं
तथा स्नेहाक्रान्तम् अभवन्, न यथा मन्युम् ऐक्षत । 29
तस्याश् च चक्षुर्मनसी सह तं प्रति जग्मतुः,
ह्रिया चक्षुर् निववृते, मनस् तु न कथंचन । 30
अथ वासवदत्तां तां गापयंस् तद्गतेक्षणः
तत्र गान्धर्वशालायां वत्सराज उवास सः । 31
अङ्के घोषवती तस्य कण्ठे गीतश्रुतिस् तथा
पुरो वासवदत्ता च तस्थौ चेतोविनोदिनी । 32
सा च वासवदत्ता ऽस्य परिचर्यापरा ऽभवत्
लक्ष्मीर् इव तदेकाग्रा बद्धस्य ऽप्य् अनपायिनी । 33

अत्र ऽन्तरे च कौशाम्ब्यां वत्सराजानुगे जने
आवृत्ते तं प्रभुं बुद्ध्वा बद्धं राष्ट्रं प्रचुक्षुभे । 34
उज्जयिन्याम् अवस्कन्दं दातुम् ऐच्छन् समं ततः
वत्सेश्वरानुरागेण क्रुद्धाः प्रकृतयस् तदा । 35
न ऽएव चण्डमहासेनो बलसाध्यो, महान् हि सः,
न च ऽएवं वत्सराजस्य शरीरे कुशलं भवेत् । 36
तस्मान् न युक्तो ऽवस्कन्दो, बुद्धिसाध्यम् इदं पुनः,
इति प्रकृतयः क्षोभान् न्यवार्यन्त रुमण्वता । 37
ततो ऽनुरक्तम् आलोक्य राष्ट्रम् अव्यभिचारि तत्
रुमण्वदादीन् आह स्म धीरो यौगन्धरायणः । 38

इह एव सर्वैर् युष्माभिः स्थातव्यं सततोद्यतैः,
रक्षणीयम् इदं राष्ट्रं, काले कार्यश् च विक्रमः । 39
वसन्तकद्वितीयस् तु गत्वा ऽहं प्रज्ञया स्वया
वत्सेशं मोचयित्वा तम् आनयामि न संशयः । 40
ज्वलाहतौ विशेषेण वैद्युताग्नेर् इव द्युतिः,
आपदि स्फुरति प्रज्ञा यस्य, धीरः स एव हि । 41
प्राकारभञ्जनान् योगांस् तथा निगडभञ्जनान्
अदर्शनप्रयोगांश् च जाने ऽहम् उपयोगिनः । 42
इत्य् उक्त्वा प्रकृतीः कृत्वा हस्तन्यस्ता रुमण्वतः
यौगन्धरायणः प्रायात् कौशाम्ब्याः सवसन्तकः । 43
प्रविवेश च तेन एव सह विन्ध्यमहाटवीं,
स्वप्रज्ञाम् इव सत्त्वाढ्यां, स्वनीतिम् इव दुर्गमां । 44
तत्र वत्सेशमित्रस्य विन्ध्यप्राग्भारवासिनः
गृहं पुलिन्दकाख्यस्य पुलिन्दाधिपतेर् अगात् । 45
तं सज्जं स्थापयित्वा च पथा तेन आगमिष्यतः
वत्सराजस्य रक्षार्थं भूरिसैन्यसमन्वितं । 46
गत्वा वसन्तकसखस् ततो यौगन्धरायणः
उज्जयिन्यां महाकालश्मशानं प्राप स क्रमात् । 47
विशेषतश् च वेतालैः क्रव्यगन्धिभिर् आवृतं
इतस् ततस् तमःश्यामैश् चिताधूमैर् इव अपरैः । 48

तत्र 'एनं दर्शनप्रीतो मित्रभावाय तत्क्षणं
योगेश्वराख्यो धृतवान् उपेत्य ब्रह्मराक्षसः । 49
तेन 'उपदिष्टया युक्त्या ततो यौगन्धरायणः
स चकार 'आत्मनः सद्यो रूपस्य परिवर्तनं । 50
बभूव तेन विकृतः कुब्जो वृद्धश् च तत्क्षणात्
उन्मत्तवेशः खल्वा् अट्टहास्यसंजननः परं । 51
तया 'एव युक्त्या स तदा शिरानद्धं पृथूदरं
चक्रे वसन्तकस्य 'अपि रूपं दन्तुरदुर्मुखं । 52
ततो राजकुलद्वारम् आदौ प्रेष्य वसन्तकं
विवेश 'उज्जयिनीं तां स तादृग् यौगन्धरायणः । 53
नृत्यन् गायंश् च तत्र 'असौ वटुभिः परिवारितः
दृष्टः सकौतुकं सर्वैर् ययौ राजगृहं प्रति । 54
तत्र राजावरोधानां तेन 'असौ कृतकौतुकः
अगाद् वासवदत्तायाः शनैः श्रवणगोचरं । 55
सा तम् आनाययामास चेटिकां प्रेष्य सत्वरं
गान्धर्वशालां. नर्मैकसोदरं हि नवं वयः । 56
स च तत्र 'आगतो बद्धं वत्सराजं ददर्श तं
उन्मत्तवेशो ऽपि गलद्बाष्पो यौगन्धरायणः । 57
चकार तस्मै संज्ञां च वत्सराजाय. सो ऽपि तं
प्रत्यभिज्ञातवान् राजा वेशप्रच्छन्नम् आगतं । 58

ततो वासवदत्तां च तच्चेटीः प्रति च आत्मनः
अदर्शनं युक्तिबलाद् व्यधाद् यौगन्धरायणः । 59
राजा त्व् एको ददर्श एनं, ताश् च सर्वाः सविस्मयं
वदन्ति स्म, गतो ऽकस्माद् उन्मत्तः क्वाप्य् असाव् इति । 60
तच् छ्रुत्वा तं च दृष्ट्वा अग्रे मत्वा योगबलेन तत्
युक्त्या वासवदत्तां तां वत्सराजो ऽब्रवीद् इदं । 61
गत्वा सरस्वतीपूजाम् आदाय आगच्छ दारिके,
तच् छ्रुत्वा सा तथा इत्य् उक्त्वा सवयस्या विनिर्ययौ । 62
यथोचितम् उपेत्य अथ ददौ वत्सेश्वराय सः
यौगन्धरायणस् तस्मै योगान् निगडभञ्जनान् । 63
अन्यान् वासवदत्ताया वीणातन्त्रीनियोचितान्
वशीकरणयोगांश् च राज्ञि ऽस्मै समम् अर्पयत् । 64
व्यजिज्ञपच् च तं, राजन् इह आयातो वसन्तकः
द्वारि स्थितो ऽन्यद्रूपेण, तं कुरुष्व अन्तिके द्विजं । 65
यदा वासवदत्ता इयं त्वयि विश्रम्भम् एष्यति,
तदा, वक्ष्यामि यद् अहं, कुर्यास् तत्, तिष्ठ सम्प्रति । 66
इत्य् उक्त्वा निर्ययौ शीघ्रं ततो यौगन्धरायणः,
आगाद् वासवदत्ता च पूजाम् आदाय तत्क्षणात् । 67
सो ऽथ ताम् अवदद् राजा, वहिर् द्वारि द्विजः स्थितः,
सरस्वत्यर्चने सो ऽस्मिन् दक्षिणार्थे प्रवेश्यतां । 68

तथा 'इति द्वारदेशात् स तत्र वासवदत्तया
विरूपाम् आकृतिं बिभ्रद् आनाय्यत वसन्तकः । 69
स च 'आनीतस् तम् आलोक्य वत्सेशम् अरुदच् शुचा,
ततश् च 'अप्रतिभेदाय स राजा निजगाद तं । 70
हे ब्रह्मन् रोगवैरूप्यं सर्वम् एतद् अहं तव
निवारयामि, मा रोदीस्, तिष्ठ 'इह 'एव मम 'अन्तिके । 71
महान् प्रसादो देव 'इति स च 'उवाच वसन्तकः,
सोऽथ तं विकृतं दृष्ट्वा राजा स्मितमुखो ऽभवत् । 72
तच् च 'आलोक्य 'आशयं बुद्ध्वा तस्य सो ऽपि वसन्तकः
हसति स्म 'अधिकोद्भूतविरूपाननवैकृतः । 73
तं हसन्तं तथा दृष्ट्वा क्रीडनीयकसन्निभं
तत्र वासवदत्ता 'अपि जहास च तुतोष च । 74
ततः सा नर्मणा बाला तं पप्रच्छ वसन्तकं,
किं विज्ञानं विजानासि भो ब्रह्मन् कथ्यताम् इति । 75
कथाः कथयितुं देवि जानामि 'इति स च 'अवदत्,
कथां कथय तर्ह्य् एकाम् इति सा 'अपि ततो ऽब्रवीत् । 76
ततस् तां राजतनयां रञ्जयन् स वसन्तकः
हास्यवैचित्र्यसरसाम् अवर्णयद् इमां कथां । 77

अस्ति 'इह मथुरा नाम पुरी कंसारिजन्मभूः,
तस्यां रूपिणिका 'इत्य् आसीत् ख्याता वारविलासिनी । 78
तस्या मकरदंष्ट्राख्या माता 'अभूद् वृद्धकुट्टनी,
तद्गुणाकृष्यमाणानां यूनां दृशि विषच्छटा । 79
पूजाकाले सुरकुलं स्वनियोगाय जातु सा
गता रूपिणिका दूराद् एकं पुरुषम् ऐक्षत । 80
स दृष्टः सुभगस् तस्या विवेश हृदयं तथा,
यथा मात्रा कृतास् तस्माद् उपदेशा विनिर्ययुः । 81
चेटिकाम् अथ सा 'अवादीद्, गच्छ, मद्वचनाद् अमुं
पुरुषं ब्रूहि, मद्गेहे त्वया 'अद्य 'आगम्यताम् इति । 82
तथा 'इति चेटिका सा च गत्वा तस्मै तद् अब्रवीत्,
ततः स किंचिद् विमृशन् पुरुषस् ताम् अभाषत । 83
लोहजङ्घाभिधानो ऽस्मि ब्राह्मणो, न 'अस्ति मे धनं,
तद् आढ्यजनलभ्ये हि को ऽहं रूपिणिकागृहे? । 84
न धनं वाञ्छति त्वत्तः स्वामिनी 'इत्य् उदिते तया,
स लोहजङ्घस् तद्वाक्यं तथा 'इति प्रत्यपद्यत । 85
ततश् चेटीमुखाद् बुद्ध्वा तच् च, सा गृहम् उत्सुका
गत्वा रूपिणिका तस्थौ तन्मार्गन्यस्तलोचना । 86
क्षणाच् च लोहजङ्घो ऽथ तस्या मन्दिरम् आययौ,
कुतो ऽयम् इति कुट्टन्या दृष्टो मकरदंष्ट्रया । 87

सा ऽपि रूपिणिका दृष्ट्वा स्वयम् उत्थाय सादरा
वासवेश्मान्तरं कृष्ट्वा कण्ठे लग्ना निनाय तं। 88
तत्र सा लोहजङ्घस्य तस्य सौभाग्यसंपदा
वशीकृता सती न ऽन्यत् फलं जन्मन्य् अमन्यत। 89
ततस् तया निवृत्तान्यपुरुषासङ्गया सह
यथासुखं स तत्र एव तस्थौ तन्मन्दिरे युवा। 90
तद् दृष्ट्वा शिक्षिताशेषवेशयोषिज् जगाद तां
माता मकरदंष्ट्रा सा खिन्ना रूपिणिकां रहः। 91
किम् अयं निर्धनः पुत्रि सेव्यते पुरुषस् त्वया?
शवं स्पृशन्ति सुजना गणिका, न तु निर्धनं। 92
क्व ऽनुरागः क्व वेश्या त्वम् इति ते विस्मृतं कथं?
सन्ध्या इव रागिणी वेश्या न चिरं पुत्रि दीप्यते। 93
नटी इव कृत्रिमं प्रेम गणिका ऽर्थाय दर्शयेत्,
तद् एनं निर्धनं मुञ्च, मा कृथा नाशम् आत्मनः। 94
इति मातुर् वचः श्रुत्वा रुषा रूपिणिका ऽब्रवीत्,
मा एवं वादीर्, मम ह्य् एष प्राणेभ्यो ऽप्य् अधिकः प्रियः। 95
धनम् अस्ति च मे भूरि, किम् अन्येन करोम्य् अहं?
तद् अम्ब न एव वक्तव्या भूयो ऽप्य् एवम् अहं त्वया। 96
तच् छ्रुत्वा लोहजङ्घस्य निर्वासनविधौ क्रुधा
तस्थौ मकरदंष्ट्रा सा तस्य उपायं विचिन्वती। 97

अथ मार्गागतं कंचित् क्षीणकोषं ददर्श सा
राजपुत्रं परिवृतं पुरुषैः शस्त्रपाणिभिः । 98
उपगम्य द्रुतं तं च नीत्वा एकान्ते जगाद सा,
निर्धनेन मम एकेन कामुकेन आवृतं गृहं । 99
तत् त्वम् आगच्छ तत्र अद्य, तथा च कुरु येन सः
गृहान् मम निवर्तेत, मदीयां च सुतां भज । 100
तथा इति राजपुत्रो ऽथ प्रविवेश स तद् गृहं,
तस्मिन् क्षणे रूपिणिका तस्थौ देवकुले च सा । 101
लोहजङ्घस् च तत्कालं वहिः क्वापि स्थितो ऽभवत्,
क्षणान्तरे च निःशङ्कस् तत्र एव समुपाययौ । 102
तत्क्षणं राजपुत्रस्य तस्य भृत्यैः प्रधाव्य सः
दृढं पादप्रहाराद्यैः सर्वेषु अङ्गेषु अताड्यत । 103
ततस् तैर् एव च अमेध्यपूर्णे क्षिप्तः स खातके
लोहजङ्घः कथमपि प्रपलायितवांस् ततः । 104
अथ आगता रूपिणिका तद् बुद्ध्वा शोकविह्वला
सा अभूद्, वीक्ष्य अथ प्रययौ राजपुत्रो यथागतं । 105
लोहजङ्घो ऽपि कुट्टन्या प्रसह्य स खलीकृतः
गन्तुं प्रववृते तीर्थं प्राणांस् त्यक्तुं वियोगवान् । 106
गच्छन् अटव्यां संतप्तः कुट्टनीमन्युना हृदि
त्वचि च ग्रीष्मतापेन छायाम् अभिललाष सः । 107

तरुम् अप्राप्नुवन् सो ऽथ लेभे हस्तिकलेवरं
जघनेन प्रविश्य ’अन्तर् निर्मांसं जम्बुकैर् वृतं । 108
चर्मावशेषे तत्र ’अन्तः परिश्रान्तः प्रविश्य सः
लोहजङ्घो ययौ निद्रां प्रविशद्वातशीतले । 109
अथ ’अकस्मात् समुत्थाय क्षणेन ’एव समन्ततः
मेघः प्रववृते तत्र धारासारेण वर्षितुं । 110
तेन निर्विवरं प्राप संकोचं हस्तिचर्म तत्,
क्षणाच् च तेन मार्गेण जलौघो भृशम् आययौ । 111
तेन ’अपहृत्य गङ्गायाम् अक्षेपि गजचर्म तत्,
तज् जलौघेन नीत्वा च समुद्रान्तर् न्यधीयत । 112
तत्र दृष्ट्वा च तच् चर्म निपत्य ’आमिषशङ्कया
हृत्वा ’अब्धेः पारम् अनयत् पक्षी गरुडवंशजः । 113
तत्र चञ्च्वा विदार्य ’एतद् गजचर्म विलोक्य च
अन्तःस्थं मानुषं पक्षी पलाय्य स ततो ययौ । 114
ततश् च चर्मणस् तस्मात् पक्षिसंरम्भबोधितः
तच्चञ्चुरचिताद् द्वाराल् लोहजङ्घो विनिर्ययौ । 115
दृष्ट्वा समुद्रपारस्थम् आत्मानं च सविस्मयः
अनिद्रं स्वप्नम् इव तत् स समग्रम् अमन्यत । 116
अथ द्वौ राक्षसौ तत्र घोरौ भीतो ददर्श सः,
तौ च ’अपि राक्षसौ दूराच् चकितौ तम् अपश्यतां । 117

रामात् पराभवं स्मृत्वा तं तथा ऽएव च मानुषं
दृष्ट्वा तीर्णाम्बुधिं भूयस् तौ भयं हृदि चक्रतुः । 118
संमन्त्र्य च तयोर् मध्याद् एको गत्वा तदा ऽएव तं
विभीषणाय प्रभवे यथादृष्टं न्यवेदयत् । 119
दृष्टरामप्रभावः सन् सो ऽपि राजा विभीषणः
मानुषागमनाद् भीतो राक्षसं तम् अभाषत । 120
गच्छ मद्वचनाद् भद्र प्रीत्या तं ब्रूहि मानुषं,
आगम्यतां गृहे ऽस्माकं, प्रसादः क्रियताम् इति । 121
तथा ऽइत्य् आगत्य तत् तस्मै स्वप्रभुप्रार्थनावचः
चकितो लोहजङ्घाय शशंस स च राक्षसः । 122
सो ऽप्य् अङ्गीकृत्य तद् विप्रो लोहजङ्घः प्रशान्तधीः
तेन ऽएव सद्वितीयेन सह लङ्कां ततो ऽगमत् । 123
तस्यां च दृष्टसौवर्णतत्तत्प्रासादविस्मितः
प्रविश्य राजभवनं स ददर्श विभीषणं । 124
सो ऽपि पप्रच्छ राजा तं कृतातिथ्यः कृताशिषं,
ब्रह्मन् कथम् इमां भूमिम् अनुप्राप्तो भवान् इति । 125
ततः स धूर्तो ऽवादीत् तं लोहजङ्घो विभीषणं,
विप्रो ऽहं लोहजङ्घाख्यो मथुरायां कृतस्थितिः । 126
सो ऽहं दारिद्र्यसंतप्तस् तत्र नारायणाग्रतः
निराहारः स्थितो ऽकार्षं गत्वा देवकुलं तपः । 127

विभीषणान्तिकं गच्छ, मद्भक्तः स हि ते धनं
दास्यति ’इत्य् आदिशत् स्वप्ने ततो मां भगवान् हरिः । 128
क्व ’अहं विभीषणः क्व ’इति मया ’उक्ते स पुनः प्रभुः
समादिशद्, व्रज ’अद्य ’एव तं द्रक्ष्यसि विभीषणं । 129
इत्य् उक्तः प्रभुणा सद्यः प्रबुद्धो ऽहम् इह ’अम्बुधेः
पारे ऽवस्थितम् आत्मानम् अपश्यं, वेद्मि न ’अपरं । 130
इत्य् उक्तो लोहजङ्घेन लङ्काम् आलोक्य दुर्गमां,
सत्यं दिव्यप्रभावो ऽयम् इति मेने विभीषणः । 131
तिष्ठ दास्यामि ते वित्तम् इत्य् उक्त्वा ब्राह्मणं च तं
दत्त्वा ’अथ रक्षसां हस्ते तम् अप्रेक्ष्यं नृघातिनां । 132
तत्रस्थात् स्वर्णमूलाख्याद् गिरेः संप्रेष्य राक्षसान्
आनाययत् पक्षिपोतं गरुडान्वयसंभवं । 133
तं च ’अस्मै लोहजङ्घाय मथुरायां गमिष्यते
तत्कालम् एव प्रददौ वशीकाराय वाहनं । 134
लोहजङ्घो ऽपि लङ्कायां वाहयन् अधिरुह्य तं
कंचित् कालं विशश्राम स विभीषणसत्कृतः । 135
एकदा तं च पप्रच्छ राक्षसेन्द्रं सकौतुकः,
लङ्कायां काष्ठमय्य् एषा कस्मात् सर्वा ’एव भूर् इति । 136
तच् छ्रुत्वा स च तद्वृत्तं तम् उवाच विभीषणः,
यदि ते कौतुकं ब्रह्मंस्, तद् इदं शृणु वच्मि ते । 137

पुरा प्रतिज्ञोपनतां नागानां दासभावतः
निष्क्रष्टुकामो जननीं गरुडः कश्यपात्मजः । 138
तन्मूल्यभूतां देवेभ्यः सुधाम् आहर्तुम् उद्यतः
बलस्य हेतोर् भक्ष्यार्थी स्वपितुर् निकटं ययौ । 139
स च एनं याचितो ऽवादीन्, महान्तौ गजकच्छपौ
अब्धौ स्तः पुत्र, तौ गच्छ भुंक्ष्व शापच्युताव् इति । 140
ततः स गरुडो गत्वा भक्ष्याव् आदाय ताव् उभौ
महतः कल्पवृक्षस्य शाखायां समुपाविशत् । 141
तां च शाखां भरात् सद्यो भग्नां चञ्च्वा बभार सः
अधःस्थिततपोनिष्ठबालखिल्यानुरोधतः । 142
लोकोपमर्दभीतेन तेन अथ पितुर् आज्ञया
आनीय विजने त्यक्ता सा शाखा इह गरुत्मता । 143
तस्याः पृष्ठे कृता लङ्का, तेन काष्ठमयी इह भूः
एतद् विभीषणाच् छ्रुत्वा लोहजङ्घस् तुतोष सः । 144

ततस् तस्मै महार्घाणि रत्नानि सुबहूनि च
विभीषणो ददाति स्म मथुरां गन्तुम् इच्छते । 145
भक्त्या च देवस्य हरेर् मथुरावर्तिनः कृते
हस्ते ऽस्य अब्जगदाशङ्खचक्रान् हेममयान् ददौ । 146
तद् गृहीत्वा अखिलं तस्मिन् विभीषणसमर्पिते
आरुह्य विहगे लक्षं योजनानां प्रयातरि । 147

उत्पत्य व्योममार्गेण लङ्कायास् तीर्णवारिधिः
स लोहजङ्घो मथुराम् अक्लेशेन जगाम तां । 148
तस्यां शून्ये विहारे च वाह्ये व्योम्नो ऽवतीर्य सः
स्थापयामास रत्नौघं, तं बबन्ध च पक्षिणं । 149
आपणे रत्नम् एकं च गत्वा विक्रीतवांस् ततः,
अथ वस्त्राङ्गरागादि क्रीतवान् भोजनं तथा । 150
तद् विहारे च तत्र 'एव भुक्त्वा दत्वा च पक्षिणे
वस्त्राङ्गरागपुष्पाद्यैर् आत्मानं तैर् अभूषयत् । 151
प्रदोषे च ययौ तस्यास् तत्र 'एव 'आरुह्य पक्षिणि
गृहं रूपिणिकायास् ताः शङ्खचक्रगदा वहन् । 152
तत्र 'उपरि ततः स्थित्वा स्थानवित् खेचरश् च सः
शब्दं चकार गम्भीरं रहःस्थां श्रावयन् प्रियां । 153
तं च श्रुत्वा 'एव निर्याता सा 'अपश्यद् रत्नराजितं
एवं नारायणाकल्पं व्योम्नि रूपिणिका निशि । 154
अहं हरिर् इह 'आयातस् त्वदर्थम् इति तेन सा
उक्ता प्रणम्य वक्ति स्म, दयां देवः करोतु इति । 155
अथ 'अवतीर्य संयम्य लोहजङ्घो विहङ्गमं
विवेश वासभवनं स तया कान्तया सह । 156
तत्र संप्राप्तभोगः स निष्क्रम्य क्षणान्तरे
तथा 'एव विहगारूढो जगाम नभसा ततः । 157

देवता विष्णुभार्या ऽहं, मर्त्यैः सह न मन्त्रये,
इति रूपिणिका प्रातस् तस्थौ मौनं विधाय सा । 158
कस्माद् एवंविधं पुत्रि वर्तसे, कथ्यतां त्वया,
इत्य् अपृच्छत सा मात्रा ततो मकरदंष्ट्रया । 159
निर्बन्धपृष्टा तस्यै च सा मात्रे मौनकारणं
शशंस रात्रिवृत्तान्तं दापयित्वा ऽन्तरे पटं । 160
सा तच् छ्रुत्वा ससंदेहा स्वयं तं कुट्टनी निशि
ददर्श विहगारूढं लोहजङ्घं ततः क्षणं । 161
प्रभाते च पटान्तःस्थाम् एत्य रूपिणिकां रहः
प्रह्वा मकरदंष्ट्रा सा कुट्टनी ऽइति व्यजिज्ञपत् । 162
देवस्य ऽनुग्रहात् पुत्रि त्वं देवीत्वम् इह ऽआगता,
अहं च ते ऽत्र जननी; तन् मे देहि सुताफलं । 163
वृद्धा ऽनेन ऽएव देहेन यथा स्वर्गं व्रजाम्य् अहं,
तथा देवस्य विज्ञप्तिं कुरुष्व, ऽनुगृहाण मां । 164
तथा ऽइति सा रूपिणिका तम् एव ऽर्थं व्यजिज्ञपत्
व्याजविष्णुं पुनर् नक्तं लोहजङ्घम् उपागतं । 165
ततः स देववेशस् तां लोहजङ्घो ऽब्रवीत् प्रियां,
पापा ते जननी, स्वर्गं व्यक्तं नेतुं न युज्यते । 166
एकादश्यां पुनः प्रातर् द्वारम् उद्घाट्यते दिवि,
तत्र च प्रविशन्त्य् अग्रे बहवः शाम्भवा गणाः । 167

तन्मध्ये कृततद्वेशा त्वन्माता असौ प्रवेश्यते,
तद् अस्याः पञ्चचूडत्वं क्षुरकृत्तं शिरः कुरु । 168
कण्ठं करङ्कमालाढ्यं, पार्श्वं च एकं सकज्जलं,
अन्यत् सिन्दूरलिप्तं च कुर्व् अस्या वीतवाससः । 169
एवं वध्व् एनां गणाकारां सुखं स्वर्गं नयाम्य् अहं,
इत्य् उक्त्वा स क्षणं स्थित्वा लोहजङ्घस् ततो ऽगमत् । 170
प्रातश् च सा रूपिणिका यथोक्तं तम् अकारयत्
वेशं मातुर्. अथ एषा अपि तस्थौ स्वर्गैकसंमुखी । 171
आययौ च पुनस् तत्र लोहजङ्घो निशागमे,
सा च रूपिणिका तस्मै मातरं तां समर्पयत् । 172
ततः स विहगारूढस् ताम् आदाय एव कुट्टनीं
नग्नां विकृतवेशां च जवाद् उदपतन् नभः । 173
गगणस्थः सन् तत्र एव प्रांशु देवकुलाग्रतः
स ददर्श शिलास्तम्भं चक्रेण उपरि लाञ्छितं । 174
तस्य पृष्ठे स चक्रैकसालम्बे तां न्यवेशयत्
खलीकारप्रतीकारपताकाम् इव कुट्टनीं । 175
इह तिष्ठ क्षणं, यावत् सान्निध्यानुग्रहं भुवि
गत्वा करोमि इत्य् उक्त्वा च तस्या दृष्टिपथाद् ययौ । 176
ततस् तत्र एव देवाग्रे दृष्ट्वा जागरणागतान्
रात्रौ यात्रोत्सवे लोकान् गगणाद् एवम् अब्रवीत् । 177

हे लोका इह युष्माकम् उपर्य् अद्य पतिष्यति
सर्वसंहारिणी मारी, तद् एत शरणं हरिं । 178
श्रुत्वा एतां गगणाद् वाणीं भीताः सर्वे ऽपि तत्र ते
माथुरा देवम् आश्रित्य तस्थुः स्वस्त्ययनादृताः । 179
सो ऽपि व्योम्नो ऽवतीर्य एव लोहजङ्घो व्यचालयत्,
तस्थाव् अदृष्टस् तन्मध्ये देववेशं निवार्य तं । 180
अद्य अपि न आगतो देवो, न च स्वर्गम् अहं गता,
इति च स्तम्भपृष्ठस्था कुट्टन्य् एवम् अचिन्तयत् । 181
अशक्ता एव उपरि स्थातुं श्रावयन्ती जनान् अधः,
हा हा अहं पतिता अस्मि इति सा चक्रन्द च बिभ्यती । 182
तच् छ्रुत्वा, पतिता सा इयं मारी इत्य् आशंक्य च आकुलाः,
देवि मा मा पत इत्य् ऊचुस् ते देवाग्रगता जनाः । 183
ततः सबालवृद्धास् ते माथुरास् तां विभावरीं
मारीपातभयोद्भ्रान्ताः कथमप्य् अत्यवाहयन् । 184
प्रातस् च दृष्ट्वा स्तम्भस्थां कुट्टनीं तां तथाविधां
प्रत्यभिज्ञातवान् सर्वः पौरलोकः सराजकः । 185
अतिक्रान्तभये जाते जातहास्ये ऽखिले जने
आययौ श्रुतवृत्तान्ता तत्र रूपिणिका अथ सा । 186
सा च दृष्ट्वा सवैलक्ष्या स्तम्भाग्रात् जननीं निजां
ताम् अवातारयत् सद्यस् तत्रस्थैस् तैर् जनैः सह । 187

तत सा कुट्टनी तत्र सर्वैस् तैः सकुतूहलैः
अपृच्छत यथावृत्तं, सा ऽपि तेभ्यः शशंस तत् । 188
ततः सिद्धादिचरितं तन् मत्वा ऽद्भुतहासितं
सराजविप्रवणिजो जनास् ते वाक्यम् अब्रुवन् । 189
येन इयं विप्रलब्धा हि वञ्चितानेककामुका,
प्रकटः सो ऽस्तु, तस्य इह पट्टबन्धो विधीयतां । 190
तच् छ्रुत्वा लोहजङ्घः स तत्र आत्मानम् अदर्शयत्,
पृष्टश् च आमूलतः सर्वं वृत्तान्तं तम् अवर्णयत् । 191
ददौ तच् च अत्र देवाय शङ्खचक्राद्युपायनं
विभीषणेन प्रहितं जनविस्मयकारकं । 192

अथ तस्य सपदि पट्टं
बद्धा संतुष्य माथुराः सर्वे,
स्वाधीनां रूपिणिकां
राजादेशेन तां चक्रुः । 193

ततश् च तत्र प्रियया समं तदा
समृद्धकोषो बहुरत्नसंचयैः
स लोहजङ्घः प्रतिकृत्य कुट्टनी-
निकारमन्युं न्यवसद् यथासुखं । 194

इत्य् अन्यनृपस्य वसन्तकस्य
मुखात् समाकर्ण्य कथाम्, अवापि
बद्धस्य वत्साधिपतेः समीपे
तोषः परो वासवदत्तया ऽन्तः । 195

। इति ।
॥ द्वादशस् तरङ्गः ॥

TARANGA. 13.

अथ वासवदत्ता सा शनैर् वत्सेश्वरं प्रति
गाढं बबन्ध सद्भावं पितृपक्षपराङ्मुखी । 1
ततो वत्सेशनिकटं पुनर् यौगन्धरायणः
विवेश 'अदर्शनं कृत्वा सर्वान् अन्यान् जनान् प्रति । 2
वसन्तकसमक्षं च विजने तं व्यजिज्ञपत्,
राजन् बद्धो भवांश् चण्डमहासेनेन मायया । 3
सुतां च दत्त्वा संमान्य त्वाम् अयं मोक्तुम् इच्छति,
तद् अस्य 'एनां स्वयं हृत्वा गच्छामस् तनयां वयं । 4
एवं ह्य् अस्य प्रतीकारो दृप्तस्य विहितो भवेत्,
अपौरुषकृतं लोके न 'एव स्याल् लाघवं च नः । 5
अस्ति च 'एतेन दत्ता 'अस्यास् तनयायाः करेणुका
राज्ञा वासवदत्ताया नाम्ना भद्रवती नृप । 6
सा च 'अनुगन्तुं वेगेन शक्या न 'अन्येन दन्तिना
मुक्त्वा नडागिरिं, सो ऽपि तां दृष्ट्वा 'एव न युध्यति । 7
तस्याश् च 'आषाढको नाम हस्त्यारोहो ऽत्र विद्यते,
स च दत्त्वा धनं भूरि स्वीकृत्य स्थापितो मया । 8

तद् आरुह्य करेणुं तां सह वासवदत्तया
सायुधेन ऽपयातव्यं नक्तं गुप्तम् इतस् त्वया । 9
इहत्यश् च महामात्रो द्विरदेङ्गितवित् तदा
मद्येन क्षीवतां नेयो, न ऽएतच् चेतयते यथा । 10
पुलिन्दकस्य सख्युस् ते पार्श्वम् अग्रे च याम्य् अहं
मार्गरक्षार्थम् इत्य् उक्त्वा ययौ यौगन्धरायणः । 11
वत्सराजो ऽपि तत् सर्वं कर्तव्यं हृदये व्यधात्,
अथ वासवदत्ता सा तस्य ऽअन्तिकम् उपाययौ । 12
ततस् तास् ताः सविश्रम्भाः कथाः कुर्वंश् तया सह
यौगन्धरायणोक्तं च तस्यै राजा शशंस सः । 13
सा च तत् प्रतिपद्य ऽएव निश्चित्य गमनं प्रति
आनाय्य ऽआषढकं सञ्जं हस्त्यारोहं चकार तं । 14
देवपूजापदेशेन दत्त्वा मद्यं मदान्वितं
सर्वाधोरणसंयुक्तं महामात्रं च सा ऽकरोत् । 15
ततः प्रदोषे विलसन्मेघशब्दसमाकुले
आषाढकः करेणुं तां सज्जीकृत्य ऽआनिनाय सः । 16
सज्ज्यमाना च सा शब्दं चकार करिणी किल,
तं च हस्तिरुताभिज्ञो महामात्रो ऽत्र सो ऽशृणोत् । 17
त्रिषष्टिं योजनान्य् अद्य यास्यामि ऽइत्य् आह हस्तिनी,
इत्य् उवाच स च ऽउद्दाममदविस्खलिताक्षरं । 18

विचारार्हं पुनस् तस्य मत्तस्य ऽभून् न मानसं,
तच् च हस्तिपकाः क्षीवास् तद्वाक्यं न एव शुश्रुवुः । 19
ततश् च वत्सराजो ऽत्र वीणाम् आदाय तां निजां
यौगन्धरायणात् प्राप्तैर् योगैः स्रंसितबन्धनः । 20
उपनीतप्रहरणः स्वैरं वासवदत्तया
करेणुकायाम् आरोहत् स तस्यां सवसन्तकः । 21
ततो वासवदत्ता ऽपि सह काञ्चनमालया
सख्या रहस्यधारिण्या तस्याम् एव ऽरुरोह सा । 22
अथ उज्जयिन्या निरगात् सहस्तिपकपञ्चमः
वत्सेशो निशि मत्तेभभिन्नप्राकारवर्त्मना । 23
तत्स्थानरक्षिणौ वीरौ स्वैरं स हतवान् नृपः
वीरबाहुं तथा तालभटं राजसुताव् उभौ । 24
ततः प्रतस्थे वेगेन स राजा दयितासखः
हृष्टः करेणुकारूढो दधत्य् आषाढके ऽङ्कुशं । 25
उज्जयिन्यां च तौ दृष्ट्वा हतौ प्राकाररक्षिणौ
राज्ञे न्यवेदयन् रात्रौ क्षुभिताः पुररक्षिणः । 26
सो ऽप्य् अन्विष्य क्रमाच् चण्डमहासेनः पलायितं
हृतवासवदत्तं तं वत्सराजम् अबुध्यत । 27
तत्पुत्रः पालकाख्यो ऽथ जातकोलाहले पुरे
अन्वधावन् तु वत्सेशम् अधिरुह्य नडागिरिं । 25

वत्सेशो ऽपि तम् आयान्तं पथि बाणैर् अयोधयत्,
नडागिरिः करेणुं तां दृष्ट्वा न प्रजहार च । 29
ततः स पालको भ्रात्रा पश्चाद् एत्य न्यवर्त्यत
गोपालकेन वाक्यज्ञः पितृकार्यानुरोधिना । 30
वत्सराजो ऽपि विश्रब्धं गन्तुं प्रववृते ततः,
गच्छतश् च ऽत्र शनकैः शर्वरी पर्यक्षीयत । 31
ततो विन्ध्याटवीं प्राप्य मध्याह्ने तस्य भूपतेः
त्रिषष्टियोजनायाता तृषिता ऽभूत् करेणुका । 32
अवतीर्णे सभार्ये च राज्ञि तस्मिन् जलानि सा
पीत्वा तद्दोषतः प्राप पञ्चतां हस्तिनी क्षणात् । 33
विषण्णो ऽथ स वत्सेशः सह वासवदत्तया
गगणाद् उद्गताम् एतां शृणोति स्म सरस्वतीं । 34
अहं मायावती नाम राजन् विद्याधराङ्गना
इयन्तं कालम् अभवं शापदोषेण हस्तिनी । 35
उपकारं च वत्सेश तव ऽद्य कृतवत्य् अहं,
करिष्यामि च भूयो ऽपि त्वत्पुत्रस्य भविष्यतः । 36
एषा वासवदत्ता च पत्नी ते न ऽएव मानुषी,
देवी ऽइयं कारणवशाद् अवतीर्णा क्षिताव् इति । 37
ततः स हृष्टो व्यसृजद् विन्ध्यसानुं वसन्तकं
पुलिन्दकाय सुहृदे वक्तुं स्वागमनं नृपः । 38

स्वयं च पादचारी सन् स शनैर् दयितान्वितः
तत्र एव गच्छन् उत्थाय दस्युभिः पर्यवार्यत । 39
धनुर्द्वितीयो दस्यूनां तेषां पञ्चोत्तरं शतं
पुरो वासवदत्ताया वत्सराजः स च अवधीत् । 40
तत्क्षणं सो ऽस्य राज्ञो ऽत्र मित्रं च आगात् पुलिन्दकः
यौगन्धरायणसखो वसन्तकपुरःसरः । 41
स तान् दस्यून् निवार्य अन्यान् वत्सेशं प्रणिपत्य तं
नयति स्म निजां पल्लीं भिल्लराजः सवल्लभं । 42
तत्र तां रात्रिम् आरण्यदर्भपाटितपादया
स वत्सेशो विशश्राम सह वासवदत्तया । 43
प्रातः सेनापतिश् च अस्य रुमण्वान् प्रापद् अन्तिकं
यौगन्धरायणेन प्राग् दूतं संप्रेष्य बोधितः । 44
आगाच् च कटकं सर्वं तथा व्याप्तदिगन्तरं,
यथा विन्ध्याटवी प्राप सा संबाधरसज्ञतां । 45
प्रविश्य कटके तस्मिंस् तस्याम् एव अटवीभुवि
तस्थाव् उज्जयिनीवार्तां ज्ञातुं वत्सेश्वरो ऽथ सः । 46
तत्रस्थं च तम् अभ्यागाद् उज्जयिन्या बणिक् तदा,
यौगन्धरायणसुहृत्, स च आगत्य अब्रवीद् इदं । 47
देवचण्डमहासेनः प्रीतो जामातरि त्वयि,
प्रेषितश् च प्रतीहारस् तेन इह भवदन्तिकं । 48

स च ऽआगच्छन् स्थितः पश्चाद्, अहम् अग्रत एव तु
प्रच्छन्नः सत्वरो देवं विज्ञापयितुम् आगतः । 49
एतच् छ्रुत्वा स वत्सेशो जहर्ष च, शशंस च
सर्वं वासवदत्तायाः, सा ऽअपि हर्षम् अगात् परं । 50
कृतबन्धुपरित्यागा विवाहविधिसत्वरा
अथ वासवदत्ता सा सलज्जा च ऽउत्सुका तथा । 51
ततः स्वात्मविनोदाय निकटस्थं वसन्तकं
सा जगाद, कथा काचित् त्वया मे ऽवर्ण्यताम् इति । 52
स च मुग्धदृशस् तस्या भर्तृभक्तिविवर्धिनीं
वसन्तकस् तदा धीमान् इमाम् अकथयत् कथां । 53

अस्ति ऽइह नगरी लोके ताम्रलिप्ता ऽइति विश्रुता,
तस्यां च धनदत्ताख्यो बणिग् आसीन् महाधनः । 54
स च ऽअपुत्रो बहून् विप्रान् संघाव्य प्रणतो ऽब्रवीत्,
तथा कुरुत, पुत्रो मे यथा स्याद् अचिराद् इति । 55
ततस् तम् ऊचुर् विप्रास् ते, न ऽएतत् किंचन दुष्करं,
सर्वं हि साधयन्ति ऽइह द्विजाः श्रौतेण कर्मणा । 56
तथा च पूर्वम् अभवद् राजा कश्चिद् अपुत्रकः,
पञ्चोत्तरशतं च ऽअभूत् तस्य ऽअन्तःपुरयोषितां । 57

पुत्रीयिष्ट्या च तस्य 'एको जन्तुर् नाम सुतो ऽजनि
तत्पत्नीनाम् अशेषाणां नूतनेन्दूदयो दृशि । 58
जानुभ्यां पर्यटन्तं च बालं जातु पिपीलिका
ऊरुदेशे ददंश 'एनं मुक्तफूत्कारकातरं । 59
तावत् तु तुमुलाक्रन्दम् अन्तःपुरम् अजायत,
राजा 'अपि पुत्र पुत्र 'इति चक्रन्द प्राकृतो यथा । 60
क्षणात् तस्मिन् समाश्वस्ते बाले ऽपास्तपिपीलिके
दुःखैककारणं राजा स निनिन्द 'एकपुत्रतां । 61
अस्ति कश्चिद् उपायो मे येन स्युर् बहवः सुताः?
इति तत्परितापेन पप्रच्छ ब्राह्मणांश् च सः । 62
ते तं प्रत्यब्रुवन्, राजन् उपायो ऽत्र तव 'अस्त्य् अयं,
हत्वा 'एनं ते सुतं वह्नौ तन्मांसं हूयते ऽखिलं । 63
तद्गन्धाघ्राणतो राज्ञ्यः सर्वाः प्राप्स्यन्ति ते सुतान्.
एतच् छ्रुत्वा स राजा तत् तथा सर्वम् अकारयत् । 64
स्वपत्नीसमसंख्यांश् च स पुत्रान् प्राप्तवान् नृपः.
अतस् तव 'अपि होमेन साधयावो वयं सुतं । 65
इत्य् उक्त्वा धनदत्तं ते ब्राह्मणाः कॢप्तदक्षिणाः
होमं चक्रुस्, ततस् तस्य बणिजो जातवान् सुतः । 66
गुहसेनाभिधानश् च स बालो ववृधे क्रमात्.
पिता 'अथ धनदत्तो ऽस्य भार्याम् अन्विष्यति स्म सः । 67

ततः स तत्पिता तेन तनयेन समं ययौ
द्वीपान्तरं स्नुषाहेतोर् बणिज्याव्यपदेशतः । 68
तत्र देवस्मितां नाम धर्मगुप्ताद् बणिग्वरात्
स्वपुत्रगुहसेनस्य कृते कन्याम् अयाचत । 69
धर्मगुप्तस् तु संबन्धं न तम् अङ्गीचकार सः
आलोच्य ताम्रलिप्तां तां दूरां दुहितृवत्सलः । 70
सा तु देवस्मिता दृष्ट्वा गुहसेनं तदा ऽएव तं
तद्गुणाकृष्टचित्तत्वाद् बन्धुत्यागैकनिश्चया । 71
सखीमुखेन कृत्वा च संकेतं सह तेन सा
प्रियेण पितृयुक्तेन रात्रौ द्वीपात् ततो ययौ । 72
ताम्रलिप्ताम् अथ प्राप्य तयोः कृतविवाहयोः
जायापत्योर् मिथःप्रेमपाशबद्धम् अभून् मनः । 73
अथ ऽअस्तं पितरि प्राप्ते प्रेरितो ऽभूत् स्वबन्धुभिः
कटाहद्वीपगमने गुहसेनो बणिज्यया । 74
तच् च ऽअस्य गमनं भार्या तदा न ऽअङ्गीचकार सा
सेर्ष्या देवस्मिता कामम् अन्यस्त्रीसंगशङ्किनी । 75
ततः पत्न्याम् अनिच्छन्त्यां प्रेरयत्सु च बन्धुषु
कर्तव्यनिश्चलो मुग्धो गुहसेनो बभूव सः । 76
अथ गत्वा निराहारम् चक्रे देवकुले व्रतं,
उपायम् इह देवो मे निर्दिशत्व् इति चिन्तयन् । 77

सा ऽपि देवस्मिता तद्वत् तेन सार्धं व्यधाद् व्रतं,
ततो ऽनयोः शिवः स्वप्ने दम्पत्योर् दर्शनं ददौ । 78
द्वे च रक्ताम्बुजे दत्वा स देवस् ताव् अभाषत,
हस्ते गृह्णीतम् एकैकं पद्मम् एतद् उभाव् अपि । 79
दूरस्थत्वे च यद्य् एकः शीलत्यागं करिष्यति,
तद् अन्यस्य करे पद्मं म्लानिम् एष्यति, न ऽन्यथा । 80
एतच् छ्रुत्वा प्रबुध्य ऽएव दम्पती ताव् अपश्यतां
अन्योन्यस्य ऽइव हृदयं हस्तस्थं रक्तम् अम्बुजं । 81
ततः स चक्रे प्रस्थानं गुहसेनो धृताम्बुजः,
सा तु देवस्मिता तस्थौ गृहे पद्मार्पितेक्षणा । 82
गुहसेनो ऽपि तं प्राप कटाहद्वीपम् आशु सः,
कर्तुं प्रववृते च ऽत्र रत्नानां क्रयविक्रयौ । 83
हस्ते च तस्य तद् दृष्ट्वा सदा ऽएव ऽअम्लानम् अम्बुजं
तत्र केचिद् बणिक्पुत्राश् चत्वारो विस्मयं ययुः । 84
ते युक्त्या तं गृहं नीत्वा पाययित्वा भृशं मधु
पप्रच्छुः पद्मवृत्तान्तं, सो ऽपि क्षीवः शशंस तं । 85
ततस् तं चिरनिर्वाह्यरत्नादिक्रयविक्रयं
विचिन्त्य गुहसेनं ते चत्वारो ऽपि बणिक्सुताः । 86
संमन्त्र्य कौतुकात् पापास् तद्भार्याशीलविप्लवं
चिकीर्षवो ययुः शीघ्रं ताम्रलिप्ताम् अलक्षिताः । 87

तत्र उपायं विचिन्वन्तः सुगतायतने स्थितां
प्रव्राजिकाम् उपाजग्मुर् नाम्ना योगकरण्डिकां । 88
प्रीतिपूर्वं च ताम् ऊचुर्, भगवत्य् अस्मदीप्सितं
साध्यते चेत् त्वया, तत् ते दास्यामो ऽर्थान् बहून् इति । 89
सा अप्य् उवाच, ध्रुवं यूनां कापि स्त्री वाञ्छिता इह वः,
तद् ब्रूत साधयाम्य् एव, धनलिप्सा तु न अस्ति मे । 90
अस्ति सिद्धिकरी नाम शिष्या मे बुद्धिशालिनी,
तत्प्रसादेन संप्राप्तम् असंख्यं हि धनं मया । 91
कथं शिष्याप्रसादेन भूरि प्राप्तं धनं त्वया?
इति तैः सा बणिक्पुत्रैः पृष्टा प्रव्राजिका अब्रवीत् । 92
कौतुकं यदि, तत् पुत्राः श्रूयतां वर्णयामि वः.
इह को ऽपि बणिक् पूर्वम् आययाव् उत्तरापथात् । 93
तस्य इहस्थस्य मच्छिष्या सा गत्वा शिश्रिये गृहे
युक्त्या कर्मकरीभावं कृतरूपविवर्तना । 94
विश्वास्य बणिजं तं च तद्गृहात् स्वर्णसंचयं
सर्वं मुषित्वा प्रछन्नं प्रत्यूषे सा अथ निर्ययौ । 95
नगरीनिर्गतां दृष्ट्वा शङ्काशीघ्रगतिं च तां
मृदङ्गहस्तो मोषाय डोम्बः को ऽप्य् अन्वगाद् द्रुतं । 96
न्यग्रोधस्य तलं प्राप्य सा दृष्ट्वा तम् उपागतं
डोम्बं सिद्धिकरी धूर्ता सदैन्या इव इदम् अब्रवीत् । 97

भर्त्रा सह ईर्ष्याकलहं कृत्वा ऽहं निर्गता गृहात्
मर्तुं, तद् भद्र पाशो ऽत्र त्वया मे रच्यताम् इति । 98
पाशेन म्रियताम् एषा, किम् एतां हन्म्य् अहं स्त्रियं,
मत्वा इति तत्र वृत्ते ऽसौ डोम्बः पाशम् असज्जयत् । 99
ततः सिद्धिकरी डोम्बं सा मुग्धा इव जगाद तं,
क्रियते कथम् उद्बन्धस् त्वया मे दर्श्यताम् इति । 100
ततः स डोम्बस् तं दत्वा मृदङ्गं पादयोर् अधः,
इत्थं क्रियत इत्य् उक्त्वा स्वकण्ठे पाशम् अर्पयत् । 101
सा ऽपि सिद्धिकरी सद्यस् तम् मृदङ्गम् अचूर्णयत्
पादाघातेन, डोम्बो ऽथ सो ऽपि पाशे व्यपद्यत । 102
तत्कालम् आगतो ऽन्वेष्टुं वृक्षमूले ददर्श सः
मुषिताशेषकोषां तां दूरात् सिद्धिकरीं बणिक् । 103
सा ऽपि दृष्ट्वा तम् आयान्तं वृक्षे तस्मिन् अलक्षितं
आरुह्य तस्थौ शाखायां पत्रौघछन्नविग्रहा । 104
स च ऽआगत्य बणिग् यावत् सभृत्यः पाशबन्धनं
डोम्बम् एव तम् अद्राक्षीन्, न तु सिद्धिकरीं क्वचित् । 105
मा नाम वृक्षम् आरूढा सा भवेद् इति तत्क्षणं
एको ऽस्य बणिजो भृत्यस् तरुम् आरोहति स्म तं । 106
सदा त्वय्य् एव मे प्रीतिर्, इह ऽआरूढस् त्वम् एव च,
तत् सुन्दर तव ऽएव इदं धनम्, एहि भजस्व मां । 107

त्य् उक्त्वा 'आलिंग्य चुम्बन्ती सा 'अस्य सिद्धिकरी मुखं
णिग्भूतस्य दशनैर् जिह्वां मूढधियो ऽच्छिनत् । 108
पपात व्यथाक्रान्तो मुखेन रुधिरं वमन्
ह्वात् तस्माल् ललल्ल 'इति किमप्य् अप्रस्फुटं ब्रुवन् । 109
द् दृष्ट्वा स बणिग् भीतो भूतग्रस्तम् अवेत्य तं
अगृहं भृत्यसहितः पलाय्य 'एव ततो ययौ । 110
थ 'अवतीर्य वृक्षाग्रात् तद्वद् भीता च तापसी
ागाद् गृहं समादाय तत् सा सिद्धिकरी धनं । 111
वंविधा हि मच्छिष्या बहुप्रज्ञानशालिनी,
वं च तत्प्रसादेन पुत्राः प्राप्तं मया धनं । 112

इत्य् उक्त्वा तान् बणिक्पुत्रान् अथ प्रव्राजिका निजां
त्कालम् आगतां शिष्याम् एतेभ्यस् ताम् अदर्शयत् । 113
गाद् च 'एनांस्, तत् पुत्राः सद्भावं वदत 'अधुना,
ां स्त्रियं वाञ्छथ, क्षिप्रं ताम् अहं साधयामि वः । 114
च् छ्रुत्वा ते च ताम् ऊचुर्, या 'एषा देवस्मिताभिधा
हसेनबणिग्भार्या, तया नः संगमं कुरु । 115
त्वा 'इति प्रतिजज्ञे तत् कार्यं प्रव्राजिका 'अथ सा,
ाणिक्सुतानां च 'एतेषां स्वगृहं स्थितये ददौ । 116
ज्ञयित्वा 'अथ तत्रत्यं जनं भक्ष्यादिदानतः
हसेनगृहं तत् सा विवेश सह शिष्यया । 117

ततो देवस्मितावासगृहद्वारम् उपागतां
तां शुनी शृङ्खलाबद्धा रुरोध अपूर्वरोधिनी । 118
ततो देवस्मिता दृष्ट्वा सा तां प्रावेशयत् स्वयं,
किम् आगता स्याद् एषा इति विचिन्त्य प्रेष्य चेटिकां । 119
प्रविष्टा च आशिषं दत्वा कृत्वा व्याजकृतादरां
सा तां देवस्मितां साध्वीं पापा प्रव्राजिका अभ्यधात् । 120
सदा एव त्वद्दिदृक्षा मे भवत्य्, अद्य पुनर् मया
स्वप्ने दृष्टा असि, तेन अहम् उत्का त्वां द्रष्टुम् आगता । 121
भर्त्रा विनाकृतां त्वां च दृष्ट्वा मे दूयते मनः,
प्रियोपभोगबन्ध्ये हि विफले रूपयौवने । 122
इत्यादिभिर् वचोभिस् तां साध्वीं विश्वास्य सा अचिरं
आमन्त्र्य च आययौ तावद् गृहं प्रव्राजिका निजं । 123
द्वितीये ऽह्नि गृहीत्वा च मरिचक्षोदनिर्भरं
मांसखण्डं पुनः सा तद् ययौ देवस्मितागृहं । 124
द्वारशून्यै ददौ तस्यै मांसखण्डं च तत्र तं,
सा अपि तं भक्षयामास सद्यः समरिचं शुनी । 125
ततो मरिचदोषेण तस्या दृग्भ्याम् अवारितं
अश्रु प्रववृते, तस्याः प्रस्नौति स्म च नासिका । 126
सा अपि प्रव्राजिका तस्मिन् क्षणे देवस्मितान्तिकं
प्रविश्य तत्कृतातिथ्या प्रारेभे रोदितुं शठा । 127

पृष्टा च देवस्मितया सा कृच्छ्राद् एवम् अब्रवीत्,
सखि सम्प्रति पश्य एतां वह्निः प्ररुदतीं शुनीं । 128
एषा ह्यू अद्य परिज्ञाय मां जन्मान्तरसंगतां
प्रवृत्ता रोदितुं, तेन कृपया अश्रु मम उद्गतं । 129
तच् छ्रुत्वा वह्निर् आलोक्य शुनीं तां रुदतीम् इव,
किम् एतच् चित्रम् इति सा दध्यौ देवस्मिता क्षणं । 130
प्रव्राजिका अथ सा अवादीत्, पुत्रि पूर्वत्रजन्मनि
अहम् एषा च भार्ये द्वे विप्रस्य अभूव कस्यचित् । 131
स च आवयोः पतिर् दूरं देशान्तरम् इतस् ततः
वारं वारं प्रयाति स्म राजादेशेन दूत्यया । 132
तत्प्रवासे च कुर्वन्त्या स्वेच्छं पुरुषसंगमं
मया भूतेन्द्रियग्रामो न उपभोगैर् अवञ्च्यत । 133
भूतेन्द्रियानभिद्रोहो धर्मो हि परमो मतः,
अतो जातिस्मरा पुत्रि जाता अहम् इहजन्मनि । 134
एषा तु शीलम् एव एकं ररक्ष अज्ञानतस् तदा,
तेन श्वयोनौ पतिता किंतु जातिं स्मरन्त्य् असौ । 135
को ऽयं धर्मो, ध्रुवं धूर्तरचना इयं कृता अनया,
इति संचिन्त्य सुप्रज्ञा सा तां देवस्मिता अब्रवीत् । 136
इयच् चिरं मया धर्मो न ज्ञातो भगवत्य् अयं,
तत् त्वं केनापि कान्तेन पुंसा मे संगमं कुरु । 137

ततः प्रव्राजिका 'अवादीत्, केचिद् द्वीपान्तरागताः
इह स्थिता बणिक्पुत्रास्, तर्हि तान् आनयामि ते । 138
इत्य् उक्त्वा सा प्रमुदिता ययौ प्रव्राजिका गृहं,
सा च देवस्मिता स्वैरं स्वचेटीर् इत्य् अभाषत । 139
नूनं दृष्ट्वा तद् अम्लानं हस्ते मद्भर्तुर् अम्बुजं,
पृष्ट्वा तं च यथावृत्तं मद्यपं जातु कौतुकात् । 140
मद्विध्वंसाय केऽप्य् एते द्वीपात् तस्माद् इह 'आगताः
बणिक्पुत्राः शठास्, तैस् च प्रयुक्ता 'इयं कुतापसी । 141
तद् धुस्तूरसंयुक्तं मद्यम् आनयत द्रुतं
दत्वा च, कारयध्वं च शुनः पादम् अयोमयं । 142
इति देवस्मितोक्तास् तास् चेट्यस् चक्रुस् तथा 'एव तत्,
एका च चेटी तद्रूपं तद्वाक्याद् अकरोत् तदा । 143
सा 'अपि प्रव्राजिका तस्माद् बणिक्पुत्रचतुष्टयात्
अहंप्रथमिकादिष्टाद् आदाय 'एकम् अथ 'आययौ । 144
स्वशिष्यावेशसंछन्नं तं च देवस्मितागृहे
तत्र सायं प्रवेश्य 'एव निर्गत्य 'अप्रकटं ययौ । 145
ततो ऽत्र तं बणिक्पुत्रं तत् सधुस्तूरकं मधु
चेटी देवस्मितावेशा सा सादरम् अपाययत् । 146
तेन सो ऽविनयेन 'एव मधुना हृतचेतनः
हृत्वा वस्त्रादि चेटीभिस् तत्र चक्रे दिगम्बरः । 147

पुनः पादेन दत्त्वा ऽर्द्धं ललाटे ताभिर् एव च
नीत्वा सो ऽशुचिसंपूर्णे क्षिप्तो ऽभूत् खातके निशि। 148
यामे ऽथ पश्चिमे संज्ञां लब्ध्वा ऽत्मानं ददर्श सः
स्वपापोपनते मग्नम् अवीचाव् इव खातके। 149
अथ ऽत्थाय कृतस्नानो ललाटे ऽङ्कं परामृशन्
नग्नः सन् स बणिक्पुत्रो ययौ प्रव्राजिकागृहं। 150
मम ऽव ऽकस्य हास्यत्वं मा भूद् इति स तत्र तान्,
आगछन् मुषितो ऽस्मि ऽइति सखीन् अन्यान् अभाषत। 151
जागरेण ऽतिपानेन शिरोऽर्तिं व्यपदिश्य च
प्रातः स तस्थौ वस्त्रेण वेष्टयित्वा ऽङ्कितं शिरः। 152
तथा ऽव च पुनः सायं द्वितीयो ऽपि बणिक्सुतः
एत्य देवस्मितागेहं खलीकारम् अवाप्तवान्। 153
सो ऽप्य् एत्य नग्नो वक्ति स्म, तत्र ऽव ऽभरणान्य् अहं
स्थापयित्वा ऽथ निर्यातो मुषितस् तस्करैर् इति। 154
प्रातः सो ऽपि शिरःशूलव्यपदेशेन वेष्टनं
कृत्वा प्रछादयामास ललाटतटम् अङ्कितं। 155
एवं सापह्नवाः सर्वे बणिक्पुत्राः क्रमेण ते
प्रापुः साङ्कं खलीकारम् अर्थनाशं च लज्जिताः। 156
अस्या अपि भवत्व् एवम् इति ते च खलीकृतिं
तस्याः प्रव्राजिकायास् ताम् अप्रकाश्य ततो ययुः। 157

सा ऽथ प्रव्राजिका ऽन्येद्युर् जगाम सह शिष्यया,
कृतप्रयोजना ऽस्मि ऽइति हृष्टा देवस्मितागृहं । 158
तत्र देवस्मिता सा तां कृत्वा ऽदरम् अपाययत्
मधु धुस्तूरसंयुक्तं परितोषाद् इव ऽआहृतं । 159
तेन मत्तां सशिष्यां च छिन्नश्रवणनासिकां
ताम् अप्य् अशुचिपङ्कान्तः क्षेपयामास सा सती । 160
गत्वा मे ते बणिक्पुत्राः पतिं हन्युः कदाचन,
इत्य् आकुला च सा श्वश्र्वास् तं वृत्तान्तम् अवर्णयत् । 161
ततः श्वश्रूर् अवादीत् तां, पुत्रि साधु कृतं त्वया,
किंतु पुत्रस्य मे तस्य कदाचिद् अहितं भवेत् । 162
ततो देवस्मिता ऽवोचद्, यथा शक्तिमती पतिं
ररक्ष प्रज्ञया पूर्वम्, अमुं रक्षाम्य् अहं तथा । 163
कथं शक्तिमती पुत्रि ररक्ष पतिम् उच्यतां,
इति पृष्टा तया श्वश्र्वा सा ऽथ देवस्मिता ऽब्रवीत् । 164
अस्मद्देशे पुरस्य ऽन्तर् मणिभद्र इति श्रुतः
पूर्वैः कृतप्रतिष्ठो ऽस्ति महायक्षः प्रभावितः । 165
तस्य ऽउपयाचितान्य् एत्य तत्रत्याः कुर्वते जनाः
तत्तद्वाञ्छितसंसिद्धिहेतोस् तैस् तैर् उपायनैः । 166
यो नरः प्राप्यते तत्र रात्रौ सह परस्त्रिया
स्थाप्यते सो ऽस्य यक्षस्य गर्भागारे तया समं । 167

प्रातस् तत्र ऽएव सस्त्रीकः स नीत्वा राजसंसदि
प्रकटीकृततद्वृत्तो निगृह्यत इति स्थितिः । 168
एकदा तत्र नक्तं च संगतः परजायया
बणिक् समुद्रदत्ताख्यः प्राप्तो ऽभूत् पुररक्षिणा । 169
नीत्वा च तेन क्षिप्तो ऽभूत् सपरस्त्रीक एव सः
यक्षदेवगृहे तस्मिन् दृढदत्तार्गले बणिक् । 170
तत्क्षणं बणिजस् च ऽअस्य महाप्रज्ञा पतिव्रता
भार्या शक्तिमती नाम तं वृत्तान्तम् अबुध्यत । 171
सा ऽअथ धीरा ऽअन्यरूपेण तद् यक्षायतनं निशि
पूजाम् आदाय साश्वासं सखीजनयुता ययौ । 172
तत्र ऽएत्य दक्षिणालोभाद् एतस्या एव भक्षकः
ददौ प्रवेशम् उद्घाट्य द्वारम् उक्त्वा पुराधिपं । 173
सा च प्रविश्य सस्त्रीके दृष्टे पत्यौ विलक्षिते
स्वं वेशं कारयित्वा तां निर्याहि ऽइत्य् अवदत् स्त्रियं । 174
सा च निर्गत्य रात्रौ स्त्री तद्वेशा ऽएव ततो ययौ
तस्थौ शक्तिमती तत्र तेन भर्त्रा समं तु सा । 175
प्रातश् च राजाधिकृतैर् एत्य यावन् निरूप्यते
तावत् स्वपत्न्या ऽएव युतः सर्वैः स ददृशे बणिक् । 176
तद् बुद्ध्वा यक्षभवनान् मृत्योर् इव मुखान् नृपः
दण्डयित्वा पुराध्यक्षं बणिजं तम् अमोचयत् । 177

एवं शक्तिमती पूर्वं ररक्ष प्रज्ञया पतिं,
अहं तथा ऽएव भर्तारं गत्वा रक्षामि बुद्धितः । 178

इति देवस्मिता श्वश्रूं रहु उक्त्वा मनस्विनी
स्वचेटिकाभिः सहिता बणिग्वेशं चकार सा । 179
आरुह्य च प्रवहणं बणिज्याव्याजतस् ततः
कटाहद्वीपम् अगमद् यत्र सो ऽस्याः पतिः स्थितः । 180
गत्वा तं च पतिं तत्र बणिङ्मध्ये ददर्श सा
गुहसेनं समाश्वासम् इव मूर्तिधरं वहिः । 181
सो ऽपि तां पुरुषाकारां दूराद् दृष्ट्वा पिवन् इव,
प्रियायाः सदृशः को ऽयं बणिक् स्याद् इत्य् अचिन्तयत् । 182
सा च देवस्मिता तत्र गत्वा भूपं व्यजिज्ञपत्,
विज्ञप्तिर् मे ऽस्ति, तत् सर्वाः संघट्यन्तां प्रजा इति । 183
ततः सर्वान् समानीय पौरान् राजा सकौतुकः,
का ते विज्ञप्तिर् अस्ति ऽइति बणिग्वेशाम् उवाच तां । 184
ततो देवस्मिता ऽवादीद्, इह मध्ये मम स्थिताः
पलाय्य दासाश् चत्वारस्, तान् मे देवः प्रयच्छतु । 185
अथ ताम् अवदद् राजा, सर्वे पौरा इमे स्थिताः,
तत् सर्वं प्रत्यभिज्ञाय निजान् दासान् गृहाण तान् । 186
ततस् तया जगृहिरे स्वगृहे प्राक् खलीकृताः
बणिक्सुतास् ते चत्वारः शिरःस्व् आबद्धशाटकाः । 187

सार्थवाहसुता एते, कथं दासा भवन्ति ते?
इति क्रुद्धाश् च ताम् ऊचुस् तत्रस्था बणिजस् तदा । 188
ततः प्रत्यब्रवीत् सा तान्, यदि न प्रत्ययो ऽस्ति वः,
ललाटं वीक्ष्यताम् एषां शुनः पादाङ्कितं मया । 189
तथा 'इति तेषाम् उन्मोच्य चतुर्णां शीर्षपट्टकान्
सर्वे ऽपि ददृशुस् तत्र शुनः पादं ललाटगं । 190
लज्जिते ऽथ बणिग्ग्रामे राजा संजातविस्मयः,
किम् एतद् इति पप्रच्छ स तां देवस्मितां स्वयं । 191
सा शशंस यथावृत्तं, सर्वे ऽपि जहसुर् जनाः,
न्याय्यास् ते भवतीदासा इति तां च 'अवदन् नृपः । 192
ततो ऽन्ये बणिजस् तेषां चतुर्णां दास्यमुक्तये
ददुस् तस्यै धनं भूरि साध्व्यै दण्डं च भूपतेः । 193

आदाय तद् धनम् अवाप्य पतिं च तं स्वं
देवस्मिता सकलसज्जनपूजिता सा
प्रत्याययौ निजपुरीम् अथ ताम्रलिप्तां,
न 'अस्या बभूव च पुनः प्रियविप्रयोगः । 194

इति स्त्रियो देवि महाकुलोद्गतैर्
विशुद्धधीरैश् चरितैर् उपासते

सदा एव भर्तारम् अनन्यमानसाः,
पतिः सतीनां परमं हि दैवतं । 195

इत्य् आकर्ण्य वसन्तकस्य वदनाद् एताम् उदारां कथां
मार्गे वासवदत्तया नवपरित्यक्ते पितुर् वेश्मनि
तल्लज्जासदनं विधाय विदधे वत्सेश्वरे भर्तरि
प्राक्प्रौढप्रणयावबद्धम् अपि तद्गत्यैकतानं मनः । 196

। इति ।

॥ त्रयोदशस् तरङ्गः ॥

TARANGA. 14.

अथ विन्ध्यान्तरे तत्र वत्सराजस्य तिष्ठतः
पार्श्वं चण्डमहासेनप्रतीहारः समाययौ । 1
स च ऽआगत्य प्रणम्य ऽएनं राजानम् इदम् अब्रवीत्,
राजा चण्डमहासेनस् तव संदिष्टवान् इदं । 2
युक्तं वासवदत्ता यत् स्वयम् एव त्वया हृता,
तदर्थम् एव हि मया त्वम् आनीत इह ऽअभवः । 3
संयतस्य च न ऽएव ऽइह दत्ता ऽएषा ते मया स्वयं,
न ऽएवम् अस्मासु ते प्रीतिर् भवेद् इति विशङ्किना । 4
तद् इदानीम् अविधिना मम ऽअस्या दुहितुर् यथा
न विवाहो भवेद्, राजन् प्रतीक्षेथास् तथा मनाक् । 5
गोपालको हि नचिराद् अत्र ऽएव ऽएष्यति मत्सुतः,
स च ऽअस्याः स्वसुर् उद्वाहं यथाविधि विधास्यति । 6
इति ऽइमं वत्सराजाय संदेशम् अवधार्य सः
ततः तद् वासवदत्तायै प्रतीहारो न्यवेदयत् । 7
ततः सानन्दया साकं तया वासवदत्तया
हृष्टो वत्सेश्वरस् चक्रे कौशाम्बीगमने मनः । 8

गोपालकस्य 'आगमनं प्रतीक्षेथां युवाम् इह,
तेन 'एव सह पश्चाच् च कौशाम्बीम् आगमिष्यथः । 9
इत्य् उक्त्वा स्थापयामास स तत्र 'एव महीपतिः
श्वाशुरं तं प्रतीहारं स्वमित्रं च पुलिन्दकं । 10
ततो ऽनुयातो नागेन्द्रैः स्रवद्भिर् मदनिर्झरान्
अनुरागातिर् विन्ध्यप्राग्भारैर् इव जङ्गमैः । 11
तुरङ्गसैन्यसंघातखुराघातसशब्दया
स्तूयमान इव 'उत्क्रान्तवन्दिसंदर्भया भुवा । 12
नभोविलङ्घिभिः सेनारजोराशिभिर् उद्धतैः
सपक्षभूभृदुल्लासशङ्कां कुर्वन् शतक्रतोः । 13
स प्रतस्थे ततो देव्या सह वासवदत्तया
स्वपुरीं प्रति राजेन्द्रः प्रातर् एव 'अपरे ऽहनि । 14
ततश् च दिवसैर् द्वित्रैर् विषयं तम् अवाप्य सः
विशश्राम निशाम् एकां रुमण्वन्मन्दिरे नृपः । 15
अन्येद्युस् तां च कौशाम्बीं चिरात् प्राप्तमहोत्सवः
मार्गोत्सुखोन्मुखजनां प्रविवेश प्रियासखः । 16
तदा च स्त्रीभिर् आरब्धमङ्गलस्नानमण्डना
चिराद् उपगते पत्यौ बभौ नारी 'इव सा पुरी । 17
ददृशुश् च 'अत्र पौरास् तं वत्सराजं बधूसखं
प्रशान्तशोकाः, शिखिनः सविद्युतम् इव 'अम्बुदं । 18

हर्म्याग्रसंस्थाः पिदधुः पौरनार्यो मुखैर् नभः
व्योमगङ्गान्तरोत्फुल्लहेमाम्बुरुहविभ्रमैः । 19
ततः स्वं राजभवनं वत्सराजो विवेश सः
नृपश्रिया इव अपरया सह वासवदत्तया । 20
सेवागतनृपाकीर्णं मागधोद्गीतमङ्गलं
सुप्तप्रबुद्धम् इव तद् रेजे राजगृहं ततः । 21
अथ वासवदत्ताया भ्राता गोपालको ऽचिरात्
आययौ सहकृत्वा तौ प्रतीहारपुलिन्दकौ । 22
कृतप्रत्युद्गमं राज्ञा तम् आनन्दम् इव अपरं
प्राप वासवदत्ता सा प्रहर्षोत्फुल्ललोचना । 23
अमुं भ्रातरम् एतस्याः पश्यन्त्या, मा स्म भूत् त्रपा,
इति इव तस्यास् तत्कालं रुरोध अश्रु विलोचने । 24
पितृसंदेशवाक्यैश् च तेन प्रोत्साहिता अथ सा
मेने कृतार्थम् आत्मानं स्वजनेन समागतं । 25
ततो यथावद् ववृते तस्या वत्सेश्वरस्य च
व्यग्रो गोपालको ऽन्येद्युस् तत्र उद्वाहमहोत्सवे । 26
रतिवल्लीनवोद्भिन्नम् इव पल्लवम् उज्ज्वलं
पाणिं वासवदत्तायाः सो ऽथ वत्सेश्वरो ऽग्रहीत् । 27
सा अपि प्रियकरस्पर्शसान्द्रानन्दनिमीलिता
सकम्पस्वेददिग्धाङ्गी गाढरोमाञ्चचर्चिता । 28

सा संमोहनवायव्यवारुणास्त्रैर् निरन्तरैः
विद्धा इव पुष्पचापेन तत्क्षणं समलक्ष्यत । 29
दृशि धूमाभिताम्रायां तस्या वह्निप्रदक्षिणे
मदिरामधुमाधुर्यसूत्रपातम् इव अकरोत् । 30
गोपालकार्पितै रत्नै राज्ञां च उपयनैस् तदा
पूर्णकोषो दधौ सत्यं वत्सेशो राजराजतां । 31
निर्वर्तितविवाहौ ताव् आदौ लोकस्य चक्षुषि
बधूवरौ विविशतुः पश्चात् स्वे वासवेश्मनि । 32
अथ संमानयामास पट्टबन्धादिना स्वयं
निजोत्सवे वत्सराजो गोपालकपुलिन्दकौ । 33
राज्ञां संमाननार्थं च पौराणां च यथोचितं
यौगन्धरायणस् तेन रुमण्वांश् च न्ययुज्यत । 34
ततो ऽब्रवीद् रुमण्वन्तम् एवं यौगन्धरायणः,
राज्ञा कष्टे नियुक्तौ स्वो, लोकचित्तं हि दुर्ग्रहं । 35
अरञ्जितश् च बालो ऽपि दोषम् उत्पादयेद् ध्रुवं,
तथा च शृणु इमां बालविनष्टककथां सखे । 36
बभूव रुद्रशर्माख्यः कश्चन ब्राह्मणः पुरा,
बभूवतुश् च तस्य द्वे गृहिण्यौ गृहमेधिनः । 37
एका सुतं प्रसूय एव तस्य पञ्चत्वम् आययौ,
तत्सुतो ऽपरमातुश् च हस्ते तेन अर्पितो ऽथ सः । 38

सा च किंचिद् विवृद्धस्य रूक्षं तस्य ऽशनं ददौ,
सो ऽपि तेन ऽभवद् बालो धूसराङ्गः पृथूदरः । 39
मातृहीनस् त्वया ऽयं मे कथं शिशुर् उपेक्षितः?
इति ताम् अपरां पत्नीं रुद्रशर्मा ऽथ सो ऽभ्यधात् । 40
सेव्यमानो ऽपि हि स्नेहैर् ईदृग् एव किमप्य् असौ,
किं करोम्य् अहम् अस्य इति सा ऽप्य् एवं पतिम् अब्रवीत् । 41
नूनम् एवं स्वभावो ऽयम् इति मेने च स द्विजः,
स्त्रीणाम् अलीकमुग्धं हि वचः को मन्यते मृषा । 42
बाल एव विनष्टो ऽयम् इति बालविनष्टकः
नाम्ना स बालकस् तत्र संवृत्तो ऽभूत् पितुर् गृहे । 43
असाव् अपरमाता मां कदर्थयति सर्वदा,
वरं प्रतिक्रियां कांचित् तत् एतस्याः करोम्य् अहं । 44
इति संचिन्तयामास सो ऽथ बालविनष्टकः
व्यतीतपञ्चवर्षो ऽपि वयसा वत बुद्धिमान् । 45
अथ आगतं राजकुलाज् जगाद पितरं रहः,
तात द्वौ मम तातौ स्त इत्य् अर्धाविष्टया गिरा । 46
एवं प्रत्यहम् आह स्म स बालः, सो ऽपि तत्पिता
तां सोपपतिम् आशंक्य भार्यां स्पर्शे ऽप्य् अवर्जयत् । 47
सा ऽपि दध्यौ, विना दोषं कस्मान् मे कुपितः पतिः,
किंस्विद् बालविनष्टेन कृतं किंचिद् भवेद् इति । 48

सादरं स्नपयित्वा च दत्वा स्निग्धं च भोजनं
कृत्वा 'उत्सङ्गे च पप्रच्छ सा तं बालविनष्टकं । 49
पुत्र किं रोषितस् तातो रुद्रशर्मा त्वया मयि?
तच् छ्रुत्वा 'एव स तां बालो जगाद् 'अपरमातरं । 50
अतो ऽधिकं ते कर्तास्मि, न चेद् अद्य 'अपि शाम्यसि,
स्वपुत्रपोषिणी कस्मात् त्वं मां क्लिश्नासि सर्वदा । 51
तच् छ्रुत्वा प्रणाता सा तं बभाषे शपथोत्तरं,
पुनर् न 'एवं करिष्यामि, तत् प्रसादय मे पतिं । 52
ततः स बालो ऽवादीत् तां, तर्ह्य् आयातस्य मत्पितुः
आदर्शं दर्शयत्व् एका त्वच्चेटी, वेद्म्य् अहं परं । 53
तथा 'इत्य् उक्त्वा तया चेटी नियुक्ता रुद्रशर्मणः
आगतस्य क्षणात् तस्य दर्शयामास दर्पणं । 54
तत्र तस्य 'एव तत्कालं प्रतिबिम्बं स दर्शयन्,
सो ऽयं द्वितीयस् तातो मे तात 'इत्य् आह स्म बालकः । 55
तच् छ्रुत्वा विगताशङ्कस् ताम् अकारणदूषितां
पत्नीं प्रति प्रसन्नो ऽभूद् रुद्रशर्मा तदा 'एव सः । 56
एवम् उत्पादयेद् दोषं बालो ऽपि विकृतिं गतः,
तद् अयं रञ्जनीयो नः सम्यक् परिकरो ऽखिलः । 57
इत्य् उक्त्वा सरुमण्वत्कः सो ऽथ यौगन्धरायणः
सर्वं संमानयामास वत्सराजोत्सवे जनं । 58

तथा च राजलोकं तौ रञ्जयामासतुर् यथा,
मदेकप्रवणाव् एताव् इति सर्वो ऽप्य् अमन्यत । 59
तौ च ऽप्य् अपूजयद् राजा सचिवौ स्वकरार्पितैः
वस्त्राङ्गरागाभरणैर् ग्रामैश् च सवसन्तकौ । 60
कृतोद्वाहोत्सवः सो ऽथ युक्तो वत्सेश्वरस् तया
मनोरथफलान्य् एव मेने वासवदत्तया । 61
चिराद् उन्मुद्रितः स्नेहात् को ऽप्य् अभूत् सततं तयोः
निशान्तक्लिष्टचक्राह्वरीतिद्वेष्यो रसक्रमः । 62
यथा यथा च दम्पत्योः प्रौढिं परिचयो ययौ
तयोस् तथा तथा प्रेम नवीभावम् इव ऽऽययौ । 63
गोपालको ऽथ विवाहं कर्तुं संदेशतः पितुः
प्रययौ शीघ्रम् आवृत्तिं वत्सराजेन याचितः । 64
सो ऽपि वत्सेश्वरो जातु चपलः पूर्वसंगतां
गुप्तं विरचितां नाम भेजे ऽन्तःपुरचारिकां । 65
तद्गोत्रस्खलिते देवीं पादलग्नः प्रसादयन्
लेभे सुभगसाम्राज्यम् अभिषिक्तस् तदश्रुभिः । 66
किंच बन्धुमतीं नाम राजपुत्रीं भुजार्जितां
गोपालकेन प्रहितां कन्यां देव्या उपायमत् । 67
तया मञ्जुलिका ऽइत्य् एव नाम्ना ऽन्येन ऽएव गोपितां
अपराम् इव लावण्यजलधेर् उद्गतां श्रियं । 68

वसन्तकसहायः सन् दृष्ट्वा ऽद्यानलतागृहे
गान्धर्वविधिना गुप्तम् उपयेमे स भूपतिः । 69
तच् च वासवदत्ता ऽस्य ददर्श निभृतस्थिता,
प्रचुकोप च, बद्ध्वा च सा ऽऽनिनाय वसन्तकं । 70
ततः प्रव्राजिकां तस्याः सखीं पितृकुलागतां
स सांकृत्यायनीं नाम शरणं शिश्रिये नृपः । 71
सा तां प्रसाद्य महिषीं तया सा ऽएव कृताज्ञया
ददौ बन्धुमतीं राज्ञे. पेशलं हि सतीमनः । 72
ततस् तं बन्धनाद् देवी सा मुमोच वसन्तकं,
स च ऽऽगत्य ऽग्रतो राज्ञ्या हसन् इति जगाद तां । 73
बन्धुमत्या ऽपराद्धं च, किं मया ते कृतं,
डुण्डुभेषु प्रहरथ क्रुद्धा यूयम् अहीन् प्रति । 74
एतत् त्वम् उपमानं मे व्याचक्ष्व ऽइति कुतूहलात्
देव्या पृष्टस् तया सो ऽथ पुनर् आह वसन्तकः । 75

पुरा कोऽपि रुरुर् नाम मुनिपुत्रो यदृच्छया
परिभ्रमन् ददर्श ऽएकां कन्याम् अद्भुतदर्शनां । 76
विद्याधरात् समुत्पन्नां मेनकायां ह्युयोषिति
स्थूलकेशेन मुनिना वर्धिताम् आश्रमे निजे । 77
सा च पृषद्वरा नाम दृष्टा तस्य रुरोर् मनः
जहार, सो ऽथ गत्वा तां स्थूलकेशाद् अयाचत । 78

स्थूलकेशो ऽपि ताम् अस्मै प्रतिशुश्राव कन्यकां,
आसन्ने च विवाहे ताम् अकस्माद् दष्टवान् अहिः । 79
ततो विषण्णहृदयः शुश्राव 'इमां गिरं दिवि,
एतां क्षीणायुषं ब्रह्मन् स्वायुषो ऽर्धेन जीवय । 80
तच् छ्रुत्वा स ददौ तस्यै तद् एव 'अर्धं निजायुषः,
प्रत्युज्जिजीव सा तेन, सो ऽपि तां परिणीतवान् । 81
अथ क्रुद्धो रुरुर् नित्यं यं यं सर्पं ददर्श सः,
तं तं जघान, भार्या मे दष्टा 'अमीभिर् भवेद् इति । 82
अथ 'एकस् तं जिघांसन्तं मर्त्यवाचा 'आह डुण्डुभः,
अहिभ्यः कुपितो ब्रह्मन् हंसि त्वं डुण्डुभान् कथं? । 83
अहिना ते प्रिया दष्टा, विभिन्नौ च 'अहिडुण्डुभौ,
अहयः सविषाः सर्वे, निर्विषा डुण्डुभा इति । 84
तच् छ्रुत्वा प्रत्यवादीत् तं, सखे को नु भवान् इति,
डुण्डुभो ऽप्य् अवदद्, ब्रह्मन् अहं शापच्युतो मुनिः । 85
भवत्संवादपर्यन्तः शापो ऽयम् अभवच् च मे,
इत्य् उक्त्वा 'अन्तर्हिते तस्मिन् भूयस् तान् न 'अबधीद् रुरुः । 86
तद् एतदुपमानाय तव देवि मया 'उदितं,
डुण्डुभेषु प्रहरथ क्रुद्धा यूयम् अहिषु इति । 87
एवम् अभिधाय वचनं
सनर्महासं वसन्तके विरते,

वासवदत्ता तं प्रति
तुतोष पार्श्वे स्थिता पत्युः । 88
इति मृदुमधुराणि वत्सराजस्
चरणागतः कुपितानुनायनानि
सततम् उदयनस् चकार देव्या
विविधवसन्तककौशलानि कामी । 89
रसना मदिरारसैकसक्ता,
कलवीणारवरागिणी श्रुतिस् च,
दयितामुखनिश्चला च दृष्टिः
सुखिनस् तस्य सदा बभूव राज्ञः । 90

। इति ।
॥ चतुर्दशस् तरङ्गः ॥

समाप्तो ऽयं
कथामुखं नाम
द्वितीयो लम्बकः

अथ

श्री सोमदेव भट्ट विरचिते

कथा सरित् सागरे

लावाणको नाम

तृतीयो लम्बकः

TARANGA. 15.

निर्विघ्नविश्वनिर्माणसिद्धये यदनुग्रहं
मन्ये स वव्रे धात्रा ऽपि तस्मै विघ्नजिते नमः । 1
आश्लिष्यमाणः प्रियया शङ्करो ऽपि यदाज्ञया
उत्कम्पते स भुवनं जयत्य् असमसायकः । 2

एवं स राजा वत्सेशः क्रमेण सुतराम् अभूत्
प्राप्तवासवदत्तस् तत्सुखासक्तैकमानसः । 3
यौगन्धरायणश् च ऽस्य महामन्त्री दिवानिशं
सेनापती रुमण्वांश् च राज्यभारम् उदूहतुः । 4
स कदाचिच् च चिन्तावान् आनीय रजनौ गृहं
निजगाद रुमण्वन्तं मन्त्री यौगन्धरायणः । 5
पाण्डवान्वयजातो ऽयं वत्सेशो, ऽस्य च मेदिनी
कुलक्रमागता कृत्स्ना पुरं च गजसाह्वयं । 6
तत् सर्वम् अजिगीषेण त्यक्तम् एतेन भूभृता,
इह एव च ऽस्य संजातं राज्यम् एकत्र मण्डले । 7

स्त्रीमद्यमृगयासक्तो निश्चितं ह्य् एष तिष्ठति,
अस्मासु राज्यचिन्ता च सर्वा ऽनेन समर्पिता । 8
तद् अस्माभिः स्वबुद्ध्या ऽएव तथा कार्यं, यथा ऽएव तत्
समग्रपृथिवीराज्यं प्राप्नोत्य् एष क्रमागतं । 9
एवं कृते हि भक्तिस् च मन्त्रिता च कृता भवेत्,
सर्वं च साध्यते बुद्ध्या, तथा च ऽएतां कथां शृणु । 10

आसीत् कश्चिन् महासेन इति नाम्ना पुरा नृपः,
स च ऽअन्येन ऽअभियुक्तो ऽभूद् राज्ञा च ऽअतिबलीयसा । 11
ततः समेत्य सचिवैः स्वकार्यभ्रंशरक्षिभिः
दापितः स महासेनस् तस्मै दण्डं किल द्विषे । 12
दत्तदण्डस् च राजा ऽअसौ मानी भृशम् अतप्यत,
किं मया विहितः शत्रोः प्रणाम इति चिन्तयन् । 13
तेन ऽएव च ऽअस्य गुल्मो ऽन्तः शोकेन ह्य् उदपद्यत,
गुल्माक्रान्तस् च कालेन स मुमूर्षुर् अभून् नृपः । 14
ततस् तद् औषधासाध्यं मत्वा ऽएको मतिमान् भिषक्,
मृता ते देव देवी ऽइति मिथ्या वक्ति स्म तं नृपं । 15
तच् छ्रुत्वा सहसा भूमौ पततस् तस्य भूपतेः
शोकावेगेन बलिना स गुल्मः स्वयम् अस्फुटत् । 16

रोगोत्तीर्णश्च् चिरं देव्या तया 'एव च सह 'ईप्सितान्
भोगान् स बुभुजे राजा, जिगाय च रिपून् पुनः । 17

तद् यथा स भिषग् बुद्ध्या चक्रे राजहितं, तथा
वयं राजहितं कुर्मः, साधयामो ऽस्य मेदिनीं । 18
परिपन्थी च तत्र 'एकः प्रद्योतो मगधेश्वरः,
पार्ष्णिग्राहः स हि सदा पश्चात्कोपं करोति नः । 19
तत् तस्य कन्यकारत्नम् अस्ति पद्मावती 'इति यत्,
तत् तस्य वत्सराजस्य कृते याचामहे वयं । 20
छन्नां वासवदत्तां च स्थापयित्वा स्वबुद्धितः
दत्वा 'अग्निं वासके वच्मो, देवी दग्धा 'इति सर्वतः । 21
न 'अन्यथा तां सुतां राज्ञे ददाति मगधाधिपः,
एतदर्थं स हि मया प्रार्थितः पूर्वम् उक्तवान् । 22
न 'अहं वत्सेश्वराय 'एतां दास्याम्य् आत्माधिकां सुतां,
तस्य वासवदत्तायां स्नेहो हि सुमहान् इति । 23
सत्यां देव्यां च वत्सेशो न 'एव 'अन्यां परिणेष्यति,
देवी दग्धा 'इति ज्ञातायां ख्यातौ सर्वं तु सेत्स्यति । 24
पद्मावत्यां च लब्धायां संबन्धी मगधाधिपः
पश्चात्कोपं न कुरुते, सहायत्वं च गच्छति । 25

ततः पूर्वां दिशं जेतुं [illegible] च तत्क्षणात्
इत्थं [illegible] [illegible] [illegible] [illegible] कृतं । २६
[illegible] च [illegible] [illegible] इव [illegible]
[illegible] इव पूर्वं हि दिव्या वाग् इत्य् [illegible] । २७
श्रुत्वा इति [illegible] ततो [illegible]
[illegible] च इत्य् [illegible] [illegible] [illegible] । २८
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] इव स्यात्. तथा [illegible] अत्र [illegible] [illegible] । २९

अस्ति माकन्दिका नाम नगरी जाह्नवीतटे
तस्यां मौनव्रतः कश्चिद् आसीत् प्रव्राजकः पुरा । ३०
स च भिक्षाशनो ऽनेकप्रव्राजकपरिवारितः
आस्ते देवकुलस्य अन्तर् मठिकायां कृतास्थितिः । ३१
प्रविष्टो जातु भिक्षार्थम् एकस्य वणिजो गृहे
स ददर्श शुभां कन्यां भिक्षाम् आदाय निर्गतां । ३२
दृष्ट्वा च अद्भुतरूपां तां स कामवशगः शठः
हा हा कष्टम् इति स्म आह वणिजस् तस्य शृण्वतः । ३३
गृहीतभिक्षश् च ततो जगाम निलयं निजं
ततस् तं स वणिग् गत्वा रहः पप्रच्छ विस्मयात् । ३४

किम् अद्य एतद् अकस्मात् त्वं मौनं त्यक्त्वा उक्तवान् इति,
तच् छ्रुत्वा वणिजं तं च परिव्राड् एवम् अब्रवीत् । 35
दुर्लक्षणा इयं कन्या ते, विवाहो ऽस्या यदा भवेत्,
तदा ससुतदारस्य क्षयः स्यात् तव निश्चितं । 36
तद् एतां वीक्ष्य दुःखं मे जातं, भक्तो हि मे भवान्,
तेन एवम् उक्तवान् अस्मि त्यक्त्वा मौनं भवत्कृते । 37
तद् एषा कन्यका नक्तं मञ्जूषायां निवेशिता
उपरिन्यस्तदीपायां गङ्गायां क्षिप्यतां त्वया । 38
तथा इति प्रतिपद्य एतद् गत्वा सो ऽथ भयाद् वणिक्
नक्तं चक्रे तथा सर्वं निर्विमर्शा हि भीरवः । 39
प्रव्राजको ऽपि तत्कालम् उवाच अनुचरान् निजान्,
गङ्गां गच्छत, तत्र अन्तर् वहन्तीं यां च पश्यथ । 40
पृष्ठस्थदीपां मञ्जूषां गुप्तम् आनयत इह तां,
उद्घाटनीया न च सा श्रुते ऽप्य् अन्तर् ध्वनाव् इति । 41
तथा इति च गत्वा यावद् गङ्गां न प्राप्नुवन्ति ते,
राजपुत्रः किमप्य् एकम् तावत् तस्याम् अवातरत् । 42
सो ऽत्र तां वणिजा क्षिप्तां मञ्जूषां वीक्ष्य दीपतः
भृत्यैर् आनाय्य सहसा कौतुकाद् उदघाटयत् । 43
ददर्श च अन्तः कन्यां तां हृदयोन्मादकारिणीं,
उपयेमे च गान्धर्वविधिना तां स तत्क्षणं । 44

मञ्जूषां तां च गङ्गायां तथा 'एव 'ऊर्ध्वस्थदीपिकां
कृत्वा तत्यात्र निक्षिप्य घोरं वानरम् अन्तरे । 45
गते ऽथ तस्मिन् संप्राप्तकन्यारत्ने नृपात्मजे
आययुस् तस्य चिन्वन्तः शिष्याः प्रव्राजकस्य ते । 46
ददृशुस् तां च मञ्जूषां गृहीत्वा तस्य च 'अन्तिकं
निन्युः प्रव्राजकस्य 'एनां, सो ऽथ हृष्टो जगाद तान् । 47
एको ऽहं साधये मन्त्रम् आदाय 'एताम् इह 'उपरि,
अथ तूष्णीं च युष्माभिः शयितव्यम् इमां निशां । 48
इत्य् उक्त्वा तां स मञ्जूषाम् आरोप्य मठिकोपरि
स परिव्राड् विवृतवान् बणिक्कन्याभिलाषुकः । 49
ततश् च तस्या निर्गत्य वानरो भीषणाकृतिः
तम् अभ्यधावत् स्वकृतो मूर्तिमान् इव दुर्णयः । 50
स तस्य दशनैर् नासां नखैः कर्णौ च तत्क्षणं
चिच्छेद पापस्य कपिर् निग्रहन्न इव क्रुधा । 51
तथाभूतो ऽथ स ततः परिव्राड् अवतीर्णवान्,
यत्नस्तम्भितहासाश् च शिष्यास् तं ददृशुस् तदा । 52
प्रातर् बुद्ध्वा च तत् सर्वं जहास सकलो जनः,
ननन्द स बणिक् सा च तत्सुता प्राप्तसत्पतिः । 53

एवं यथा स हास्यत्वं गतः प्रद्योतकस्, तथा
व्याजप्रयोगस्य असिद्धौ वयं गच्छेम जातुचित् । 54
बहुदोषो हि विरक्तो राज्ञो वासवदत्तया.
एवं रुमण्वता उक्तः सन् आह यौगन्धरायणः । 55
न अन्यथा उद्योगसिद्धिः स्याद्, अनुद्योगे च निश्चितं
राजनि व्यसनिन्य् एतन् नश्येद् अपि यथास्थितं । 56
लब्धा अपि मन्त्रिताख्यातिर् अस्माकं च अन्यथा भवेत्,
स्वामिसंभावनायाश् च भवेत् सा व्यभिचारिणी । 57
स्वायत्तसिद्धि राज्ञो हि प्रज्ञोपकरणं मताः
सचिवाः, को भवांस् तेषां कृते वा अप्य् अकृते ऽपि वा । 58
सचिवायत्तसिद्धेस् तु तत्प्रज्ञा एव अर्थसाधनं,
तय् एव चेन् निरुत्साहाः, श्रियो दत्तो जलाञ्जलिः । 59
अथ देवीपितुश् चण्डमहासेनाद् विशङ्कसे,
स सपुत्रश् च, देवी च वचः कुरुत एव मे । 60
इत्य् उक्तवन्तं धीराणां धुर्यं यौगन्धरायणं
प्रमादशङ्किहृदयो रुमण्वान् पुनर् अब्रवीत् । 61
अभीष्टस्त्रीवियोगार्त्या सविवेको ऽपि बाध्यते,
किं पुनर् वत्सराजो ऽयम्, अत्र च एतां कथां शृणु । 62

पुरा ऽभूद् देवसेनाख्यो राजा मतिमतां वरः,
श्रावस्ती इति पुरी तस्य राजधानी बभूव च । 63
तस्यां च पुर्याम् अभवद् बणिग् एको महाधनः,
तस्य उदपद्यत ऽनन्यसदृशी दुहिता किल । 64
उन्मादिनी इति नाम्ना च कन्यका सा ऽपि पप्रथे,
उन्माद्यति यतस् तस्या रूपं दृष्ट्वा ऽखिलो जनः । 65
तनया इयम् अनावेद्य राज्ञो देया क्वचिन् न मे,
स हि कुप्येद् इति पिता तस्याः सो ऽचिन्तयद् बणिक् । 66
ततश् च गत्वा राजानं देवसेनं व्यजिज्ञपत्,
देव ऽस्ति कन्यारत्नं मे, गृह्यताम् उपयोगि चेत् । 67
तच् छ्रुत्वा व्यसृजद् राजा सो ऽथ प्रत्ययितान् द्विजान्,
गत्वा सुलक्षणा सा वा न वा इत्य् आलोक्यताम् इति । 68
तथा इति ते द्विजा गत्वा तां दृष्ट्वा एव बणिक्सुतां
उन्मादिनीं ययुः क्षोभं सद्यः संजातमन्मथाः । 69
राजा ऽस्यां परिणीतायाम् एतदेकमनास् त्यजेत्
राजकार्याणि, नश्येच् च सर्वं, तस्मात् किम् एतया । 70
इति च प्रकृतिं प्राप्ता द्विजाः संमन्त्र्य ते गताः,
कुलक्षणा सा कन्या इति मिथ्या राजानम् अब्रुवन् । 71
ततो राज्ञा परित्यक्तां स ताम् उन्मादिनीं बणिक्
तत्सेनापतये प्रादाद् अन्तर्जातविमाननां । 72

भर्तृवेश्मनि हर्म्यस्था सा ऽथ ज्ञातु तम् आगतं
राजानं तेन मार्गेण बुद्ध्वा ऽऽत्मानम् अदर्शयत् । 73
दृष्ट्वा एव च स तां राजा जगत्संमोहनौषधिं
प्रयुक्ताम् इव कामेन जातोन्माद इव ऽभवत् । 74
गत्वा स्वभवनं ज्ञात्वा तां च पूर्वावधीरितां
उन्मना ज्वरसंतापपीडां गाढम् अवाप सः । 75
सा दासी न परस्त्री इति गृह्यतां, यदि वा ऽप्य् अहं
त्यजामि तां, देवकुले स्वीकरोतु ततः प्रभुः । 76
इति तेन च तद्भर्त्रा स्वसेनापतिना ततः
अभ्यर्थ्यमानो यत्नेन जगाद एवं स भूपतिः । 77
न ऽहं परस्त्रीम् आदास्ये, त्वं वा त्यक्ष्यसि तां यदि,
ततो नंक्ष्यति ते धर्मो, दण्ड्यो मे च भविष्यसि । 78
तच् छ्रुत्वा मन्त्रिणो ऽन्ये च तूष्णीम् आसन्, स च क्रमात्
स्मरज्वरेण तेन एव नृपः पञ्चत्वम् आययौ । 79

एवं स राजा नष्टो ऽभूद् धीरो ऽप्य् उन्मादिनीं विना,
विना वासवदत्तां तु वत्सराजः कथं भवेत् । 80
एतद् रुमण्वतः श्रुत्वा पुनर् यौगन्धरायणः
उवाच, सह्यते क्लेशो राजभिः कार्यदर्शिभिः । 81

रावणोच्छित्तये देवैः कृत्वा युक्तिं नियोजितः
सीतादेव्या न किं रामो विषेहे विरहव्यथां । 82
एतच् छ्रुत्वा च भूयो ऽपि रुमण्वान् अभ्यभाषत,
ते हि रामादयो देवास्, तेषां सर्वसहं मनः । 83
असह्यं तु मनुष्याणां, तथा च श्रूयतां कथा.

अस्ति इह बहुरत्नाढ्या मथुरा इति महापुरी । 84
तस्याम् अभूद् बणिक्पुत्रः को ऽपि नाम्ना य इह्लकः,
तस्य च अभूत् प्रिया भार्या तदेकाबद्धमानसा । 85
तया सह वसन् सो ऽथ कदाचित् कार्यगौरवात्
द्वीपान्तरं बणिक्पुत्रो गन्तुं व्यवसितो ऽभवत् । 86
तद्भार्या अपि च तेन एव सह गन्तुम् इयेष सा,
स्त्रीणां भावानुरक्तं हि विरहासहनं मनः । 87
ततः स च बणिक्पुत्रः प्रतस्थे कृतमङ्गलः,
न च तां सहजग्राह भार्यां कृतप्रसाधनां । 88
सा अथ तं प्रस्थितं पश्चात् पश्यन्ती साश्रुलोचना
अतिष्ठत् प्राङ्गणद्वारकवाटान्तविलम्बिनी । 89
गते दृष्टिपथात् तस्मिन् सा वियोगासहा ततः
निर्यातुं न अशकन् मुग्धा, प्राणास् तस्या विनिर्ययुः । 90

तद् बुद्ध्वा च बणिक्पुत्रः प्रत्यावृत्य च तत्क्षणं
ददर्श विह्वलः कान्ताम् एताम् उत्क्रान्तजीवितां । 91
मुन्दरापाण्डुरच्छायां विलोलालकलाञ्छनां
भुवि चान्द्रमसीं लक्ष्मीं दिवा सुप्तच्युताम् इव । 92
अङ्के कृत्वा च तां सद्यः क्रन्दतस् तस्य निर्ययुः
शोकाग्निज्वलिताद् देहाद् द्रुतं भीता इव 'सवः । 93

एवम् अन्योन्यविरहाद् दम्पती तौ विनेशतुः,
अतो ऽस्य राज्ञो देव्याश् च रक्त्या 'न्योन्यवियोगिता । 94
इत्य् उक्त्वा विरते तस्मिन् बद्धाशङ्के रुमण्वति
जगाद धैर्यजलधिर् 'धीमान् यौगन्धरायणः । 95
मया 'एतन् निश्चितं सर्वं, कार्याणि च महीभृतां
भवन्त्य् एवंविधान्य् एव, तथा च 'त्र कथां शृणु । 96

उज्जयिन्याम् अभूत् पूर्वं पुण्यसेनाभिधो नृपः,
स जातु बलिना 'न्येन राज्ञा गत्वा 'भ्ययुज्यत । 97
अथ तन्मन्त्रिणो धीरास् तम् अरिं वीक्ष्य दुर्जयं
मिथ्या, राजा मृत इति प्रवादं सर्वतो व्यधुः । 98

स्त्रीमद्यमृगयासक्तो निश्चिंतं ह्य् एष तिष्ठति,
अस्मासु राज्यचिन्ता च सर्वा ऽनेन समर्पिता । 8
तद् अस्माभिः स्वबुद्ध्या ऽएव तथा कार्यं, यथा ऽएव तत्
समग्रपृथिवीराज्यं प्राप्नोत्य् एष क्रमागतं । 9
एवं कृते हि भक्तिश् च मन्त्रिता च कृता भवेत्,
सर्वं च साध्यते बुद्ध्या, तथा च ऽएतां कथां शृणु । 10

आसीत् कश्चिन् महासेन इति नाम्ना पुरा नृपः,
स च ऽअन्येन ऽअभियुक्तो ऽभूद् राज्ञा च ऽअतिबलीयसा । 11
ततः समेत्य सचिवैः स्वकार्यभ्रंशरक्षिभिः
दापितः स महासेनस् तस्मै दण्डं किल द्विषे । 12
दत्तदण्डश् च राजा ऽसौ मानी भृशम् अतप्यत,
किं मया विहितः शत्रोः प्रणाम इति चिन्तयन् । 13
तेन ऽएव च ऽअस्य गुल्मो ऽन्तः शोकेन ह्य् उदपद्यत,
गुल्माक्रान्तश् च कालेन स मुमूर्षुर् अभून् नृपः । 14
ततस् तद् औषधासाध्यं मत्वा ऽएको मतिमान् भिषक्,
मृता ते देव देवी ऽइति मिथ्या वक्ति स्म तं नृपं । 15
तच् छ्रुत्वा सहसा भूमौ पततस् तस्य भूपतेः
शोकावेगेन बलिना स गुल्मः स्वयम् अस्फुटत् । 16

रोगोत्तीर्णश् चिरं देव्या तया 'एव च सह 'ईप्सितान्
भोगान् स बुभुजे राजा, जिगाय च रिपून् पुनः । 17

तद् यथा स भिषग् बुद्ध्या चक्रे राजहितं, तथा
वयं राजहितं कुर्मः, साधयामो ऽस्य मेदिनीं । 18
परिपन्थी च तत्र 'एकः प्रद्योतो मगधेश्वरः,
पार्ष्णिग्राहः स हि सदा पश्चात्कोपं करोति नः । 19
तत् तस्य कन्यकारत्नम् अस्ति पद्मावती 'इति यत्,
तत् तस्य वत्सराजस्य कृते याचामहे वयं । 20
छन्नां वासवदत्तां च स्थापयित्वा स्वबुद्धितः
दत्वा 'अग्निं वासके वच्मो, देवी दग्धा 'इति सर्वतः । 21
न 'अन्यथा तां सुतां राज्ञे ददाति मगधाधिपः,
एतदर्थं स हि मया प्रार्थितः पूर्वम् उक्तवान् । 22
न 'अहं वत्सेश्वराय 'एतां दास्याम्य् आत्माधिकां सुतां,
तस्य वासवदत्तायां स्नेहो हि सुमहान् इति । 23
सत्यां देव्यां च वत्सेशो न 'एव 'अन्यां परिणेष्यति,
देवी दग्धा 'इति ज्ञातायां ख्यातौ सर्वं तु सेत्स्यति । 24
पद्मावत्यां च लब्धायां संबन्धी मगधाधिपः
पश्चात्कोपं न कुरुते, सहायत्वं च गच्छति । 25

ततः पूर्वां दिशं जेतुं गच्छामो ऽन्यास् च तत्क्रमात्,
इत्थं वत्सेश्वरस्य 'एतां साधयामो ऽखिलां भुवं । 26
कृतोद्योगेषु च 'अस्मासु पृथिवीम् एष भूपतिः
प्राप्नुयाद् एव, पूर्वं हि दिव्या वाग् एतद् अब्रवीत् । 27
श्रुत्वा 'इति मन्त्रिवृषभाद् वचो यौगन्धरायणात्
सहासं च 'एतद् आशंक्य रुमण्वांस् तम् अभाषत । 28
व्याजं पद्मावतीहेतोः क्रियमाणं कदाचन
दोषाय 'अस्माकम् एव स्यात्, तथा ह्य् अत्र कथां शृणु । 29

अस्ति माकन्दिका नाम नगरी जाह्नवीतटे,
तस्यां मौनव्रतः कश्चिद् आसीत् प्रव्राजकः पुरा । 30
स च भिक्षाशनो ऽनेकपरिव्राट्परिवारितः
आस्त देवकुलस्य 'अन्तर् मठिकायां कृतस्थितिः । 31
प्रविष्टो जातु भिक्षार्थम् एकस्य बणिजो गृहे
स ददर्श शुभां कन्यां भिक्षाम् आदाय निर्गतां । 32
दृष्ट्वा च 'अद्भुतरूपां तां स कामवशगः शठः,
हा हा कष्टम् इति स्म 'आह बणिजस् तस्य शृण्वतः । 33
गृहीतभिक्षश् च ततो जगाम निलयं निजं,
ततस् तं स बणिग् गत्वा रहः पप्रच्छ विस्मयात् । 34

किम् अद्य 'एतद् अकस्मात् त्वं मौनं त्यक्त्वा 'उक्तवान् इति,
तच् छ्रुत्वा बणिजं तं च परिव्राड् एवम् अब्रवीत् । 35
दुर्लक्षणा 'इयं कन्या ते, विवाहो ऽस्या यदा भवेत्,
तदा ससुतदारस्य क्षयः स्यात् तव निश्चितं । 36
तद् एतां वीक्ष्य दुःखं मे जातं, भक्तो हि मे भवान्,
तेन 'एवम् उक्तवान् अस्मि त्यक्त्वा मौनं भवत्कृते । 37
तद् एषा कन्यका नक्तं मञ्जूषायां निवेशिता
उपरिन्यस्तदीपायां गङ्गायां क्षिप्यतां त्वया । 38
तथा 'इति प्रतिपद्य 'एतद् गत्वा सो ऽथ भयाद् बणिक्
नक्तं चक्रे तथा सर्वं निर्विमर्शा हि भीरवः । 39
प्रव्राजको ऽपि तत्कालम् उवाच 'अनुचरान् निजान्,
गङ्गां गच्छत, तत्र 'अन्तर् वहन्तीं यां च पश्यथ । 40
पृष्ठस्थदीपां मञ्जूषां गुप्तम् आनयत 'इह तां,
उद्घाटनीया न च सा श्रुते ऽप्य् अन्तर् ध्वनाव् इति । 41
तथा 'इति च गत्वा यावद् गङ्गां न प्राप्नुवन्ति ते,
राजपुत्रः किमप्य् एकस् तावत् तस्याम् अवातरत् । 42
सो ऽत्र तां बणिजा क्षिप्तां मञ्जूषां वीक्ष्य दीपतः
भृत्यैर् आनाय्य सहसा कौतुकाद् उदघाटयत् । 43
ददर्श च 'अन्तः कन्यां तां हृदयोन्मादकारिणीं,
उपयेमे च गान्धर्वविधिना तां स तत्क्षणं । 44

मञ्जूषां तां च गङ्गायां तथा ऽएव ऽऊर्ध्वस्थदीपिकां
कृत्वा तत्यात्र निक्षिप्य घोरं वानरम् अन्तरे । 45
गते ऽथ तस्मिन् संप्राप्तकन्यारत्ने नृपात्मजे
आययुस् तस्य चिन्वन्तः शिष्याः प्रव्राजकस्य ते । 46
ददृशुस् तां च मञ्जूषां गृहीत्वा तस्य च ऽअन्तिकं
निन्युः प्रव्राजकस्य ऽएनां, सो ऽथ हृष्टो जगाद तान् । 47
एको ऽहं साधये मन्त्रम् आदाय ऽएताम् इहः ऽउपरि,
अथ तूष्णीं च युष्माभिः शयितव्यम् इमां निशां । 48
इत्य् उक्त्वा तां स मञ्जूषाम् आरोप्य मठिकोपरि
स परिव्राड् विवृतवान् बणिक्कन्याभिलाषुकः । 49
ततश् च तस्या निर्गत्य वानरो भीषणाकृतिः
तम् अभ्यधावत् स्वकृतो मूर्तिमान् इव दुर्णयः । 50
स तस्य दशनैर् नासां नखैः कर्णौ च तत्क्षणं
चिच्छेद पापस्य कपिर् निग्रहज्ञ इव क्रुधा । 51
तथाभूतो ऽथ स ततः परिव्राड् अवतीर्णवान्,
यत्नस्तम्भितहासाश् च शिष्यास् तं ददृशुस् तदा । 52
प्रातर् बुद्ध्वा च तत् सर्वं जहास सकलो जनः,
ननन्द स बणिक् सा च तत्सुता प्राप्तसत्पतिः । 53

एवं यथा स ह्यास्यवं गतः प्रव्राजकस्, तथा
व्याजप्रयोगस्य ऽसिद्धौ वयं गह्येम जातुचित् । 54
बहुदोषो हि विरहो राज्ञो वासवदत्तया.
एवं रुमण्वता ऽउक्तः सन् आह यौगन्धरायणः । 55
न ऽअन्यथा ऽउद्योगसिद्धिः स्याद्, अनुद्योगे च निश्चितं
राजनि व्यसनिन्य् एतन् नश्येद् अपि यथास्थितं । 56
लब्धा ऽअपि मन्त्रिताख्यातिर् अस्माकं च ऽअन्यथा भवेत्,
स्वामिसंभावनायाश् च भवेत् सा व्यभिचारिणी । 57
स्वायत्तसिद्धि राज्ञो हि प्रज्ञोपकरणं मताः
सचिवाः, को भवांस् तेषां कृते वा ऽअप्य् अकृते ऽपि वा । 58
सचिवायत्तसिद्धिस् तु तत्प्रज्ञा ऽएव ऽअर्थसाधनं,
तय् एव चेन् निरुत्साहाः, श्रियो दत्तो जलाञ्जलिः । 59
अथ देवीपितुश् चण्डमहासेनाद् विशङ्कसे,
स सपुत्रश् च, देवी च वचः कुरुत एव मे । 60
इत्य् उक्तवन्तं धीराणां धुर्यं यौगन्धरायणं
प्रमादशङ्किहृदयो रुमण्वान् पुनर् अब्रवीत् । 61
अभीष्टस्त्रीवियोगार्त्या सविवेको ऽपि बाध्यते,
किं पुनर् वत्सराजो ऽयम्, अत्र च ऽएतां कथां शृणु । 62

पुरा ऽभूद् देवसेनाख्यो राजा मतिमतां वरः,
श्रावस्ती ऽइति पुरी तस्य राजधानी बभूव च । 63
तस्यां च पुर्याम् अभवद् बणिग् एको महाधनः,
तस्य ऽउदपद्यत ऽनन्यसदृशी दुहिता किल । 64
उन्मादिनी ऽइति नाम्ना च कन्यका सा ऽपि पप्रथे,
उन्माद्यति यतस् तस्या रूपं दृष्ट्वा ऽखिलो जनः । 65
तनया ऽइयम् अनावेद्य राज्ञो देया क्वचिन् न मे,
स हि कुप्येद् इति पिता तस्याः सो ऽचिन्तयद् बणिक् । 66
ततश् च गत्वा राजानं देवसेनं व्यजिज्ञपत्,
देव ऽस्ति कन्यारत्नं मे, गृह्यताम् उपयोगि चेत् । 67
तच् छ्रुत्वा व्यसृजद् राजा सो ऽथ प्रत्ययितान् द्विजान्,
गत्वा सुलक्षणा सा वा न वा ऽइत्य् आलोक्यताम् इति । 68
तथा ऽइति ते द्विजा गत्वा तां दृष्ट्वा ऽएव बणिक्सुतां
उन्मादिनीं ययुः क्षोभं सद्यः संजातमन्मथाः । 69
राजा ऽस्यां परिणीतायाम् एतदेकमनास् त्यजेत्
राजकार्याणि, नश्येच् च सर्वं, तस्मात् किम् एतया । 70
इति च प्रकृतिं प्राप्ता द्विजाः संमन्त्र्य ते गताः,
कुलक्षणा सा कन्या ऽइति मिथ्या राजानम् अब्रुवन् । 71
ततो राज्ञा परित्यक्तां स ताम् उन्मादिनीं बणिक्
तत्सेनापतये प्रादाद् अन्तर्जातविमाननां । 72

भर्तृवेश्मनि हर्म्यस्था सा ऽथ जातु तम् आगतं
राजानं तेन मार्गेण बुद्ध्वा ऽऽत्मानम् अदर्शयत् । 73
दृष्ट्वा एव च स तां राजा जगत्संमोहनौषधिं
प्रयुक्ताम् इव कामेन जातोन्माद इव ऽभवत् । 74
गत्वा स्वभवनं ज्ञात्वा तां च पूर्वावधीरितां
उन्मना ज्वरसंतापपीडां गाढम् अवाप सः । 75
सा दासी न परस्त्री इति गृह्यतां, यदि वा ऽप्य् अहं
त्यजामि तां, देवकुले स्वीकरोतु ततः प्रभुः । 76
इति तेन च तद्भर्त्रा स्वसेनापतिना ततः
अभ्यर्थ्यमानो यत्नेन जगाद एवं स भूपतिः । 77
न ऽहं परस्त्रीम् आदास्ये, त्वं वा त्यक्ष्यसि तां यदि,
ततो नंक्ष्यति ते धर्मो, दण्ड्यो मे च भविष्यसि । 78
तच् छ्रुत्वा मन्त्रिणो ऽन्ये च तूष्णीम् आसन्, स च क्रमात्
स्मरज्वरेण तेन एव नृपः पञ्चत्वम् आययौ । 79

एवं स राजा नष्टो ऽभूद् धीरो ऽप्य् उन्मादिनीं विना,
विना वासवदत्तां तु वत्सराजः कथं भवेत् । 80
एतद् रुमण्वतः श्रुत्वा पुनर् यौगन्धरायणः
उवाच, सह्यते क्लेशो राजभिः कार्यदर्शिभिः । 81

रावणोच्छित्तये देवैः कृत्वा युक्तिं नियोजितः
सीतादिव्या न किं रामो विषेहे विरहव्यथां । 82
एतच् छ्रुत्वा च भूयो ऽपि रुमण्वान् अभ्यभाषत,
ते हि रामादयो देवास्, तेषां सर्वसहं मनः । 83
असह्यं तु मनुष्याणां, तथा च श्रूयतां कथा.

अस्ति इह बहुरत्नाढ्या मथुरा इति महापुरी । 84
तस्याम् अभूद् बणिक्पुत्रः को ऽपि नाम्ना य इल्लकः,
तस्य च अभूत् प्रिया भार्या तदेकाबद्धमानसा । 85
तया सह वसन् सो ऽथ कदाचित् कार्यगौरवात्
द्वीपान्तरं बणिक्पुत्रो गन्तुं व्यवसितो ऽभवत् । 86
तद्भार्या अपि च तेन एव सह गन्तुम् इयेष सा,
स्त्रीणां भावानुरक्तं हि विरहासहनं मनः । 87
ततः स च बणिक्पुत्रः प्रतस्थे कृतमङ्गलः,
न च तां सहजग्राह भार्यां कृतप्रसाधनां । 88
सा अथ तं प्रस्थितं पश्चात् पश्यन्ती साश्रुलोचना
अतिष्ठत् प्राङ्गणद्वारकवाटान्तविलम्बिनी । 89
गते दृष्टिपथात् तस्मिन् सा वियोगासहा ततः
निर्यातुं न अशकन् मुग्धा, प्राणास् तस्या विनिर्ययुः । 90

तद् बुद्ध्वा च वणिक्पुत्रः प्रत्यावृत्य च तत्क्षणं
ददर्श विह्वलः कान्ताम् एताम् उत्क्रान्तजीवितां । 91
सुन्दरापाण्डुरच्छायां विलोलालकलाञ्छनां
भुवि चान्द्रमसीं लक्ष्मीं दिवा सुप्तच्युताम् इव । 92
अङ्के कृत्वा च तां सद्यः क्रन्दतस् तस्य निर्ययुः
शोकाग्निज्वलिताद् देहाद् द्रुतं भीता इव ऽसवः । 93

एवम् अन्योन्यविरहाद् दम्पती तौ विनेशतुः,
अतो ऽस्य राज्ञो देव्याश् च रक्ष्या ऽन्योन्यवियोगिता । 94
इत्य् उक्त्वा विरते तस्मिन् बह्वाशङ्के रुमण्वति
जगाद धैर्यजलधिर् धीमान् यौगन्धरायणः । 95
मया ऽेतन् निश्चितं सर्वं, कार्याणि च महीभृतां
भवन्त्य् एवंविधान्य् एव, तथा च ऽत्र कथां शृणु । 96

उज्जयिन्याम् अभूत् पूर्वं पुण्यसेनाभिधो नृपः,
स जातु बलिना ऽन्येन राज्ञा गत्वा ऽभ्ययुज्यत । 97
अथ तन्मन्त्रिणो धीरास् तम् अरिं वीक्ष्य दुर्जयं
मिथ्या, राजा मृत इति प्रवादं सर्वतो व्यधुः । 98

प्रछन्नं स्थापयामासुः पुण्यसेनं नृपं च ते,
अन्यं कंचिद् अधाक्षुश् च राजार्हविधिना शवं । 99
अराजकानाम् अधुना भव राजा त्वम् एव नः,
इति दूतमुखेन अथ तम् अरिं जगदुश् च ते । 100
तथा इत्य् उक्तवतस् तस्य रिपोस् तुष्टस्य ते ततः
मिलित्वा सैन्यसहिताः कटकं बिभिदुः क्रमात् । 101
भिन्ने च सैन्ये राजानं पुण्यसेनं प्रकाश्य तं
ते संप्राप्तबलाः शत्रुं तं निजघ्नुः स्वमन्त्रिणाः । 102

ईदृक्तराजकार्याणि भवेयुस्, तद् इदं वयं
देवीदाहप्रवादेन कार्यं धैर्येण कुर्महे । 103
इत्य् एतन्निश्चितमतेः श्रुत्वा यौगन्धरायणात्
रुमण्वान् अब्रवीद् एवं, तर्हि यद्य् एष निश्चयः । 104
तद् गोपालकम् आनीय देव्या भ्रातरम् आदृतं
संमन्त्र्य च समं तेन सम्यक् सर्वं विधीयतां । 105
एवम् अस्त्व् इति वक्ति स्म ततो यौगन्धरायणः,
तत्प्रत्ययाद् रुमण्वांश् च चक्रे कर्तव्यनिश्चयं । 106
अन्येद्युर् मन्त्रिमुख्यौ तौ दूतं व्यसृजतां निजं
गोपालकं तम् आनेतुम् उत्कण्ठाव्यपदेशतः । 107

कार्यहेतोर् गतः पूर्वं तद्दूतवचनाच् च सः
आगाद् गोपालकस् तत्र स्वयं मूर्त इव 'उत्सवः । 108
आगतं तदहस् च 'एनं स्वैरं यौगन्धरायणः
निनाय स रुमण्वत्कं गृहं गोपालकं निशि । 109
तत्र च 'अस्मै तद् उत्साहं शशंस स्वचिकीर्षितं,
यत् पूर्वं मन्त्रितं तेन सर्वं सह रुमण्वता । 110
स च राजहितैषी सन् दुःखावहम् अपि स्वसुः
गोपालको ऽनुमेने तत्, कर्तव्ये हि सतां मनः । 111
सर्वम् एतत् सुविहितं, देवीं दग्धाम् अवेत्य तु
प्राणांस् त्यजन् कथं रक्ष्यो वत्सेश इति चिन्त्यतां । 112
सदुपायादिसामग्रीसंभवे किल सत्य् अपि
मुख्यम् अङ्गं हि मन्त्रस्य विनिपातप्रतिक्रिया । 113
इति भूयो ऽपि तत्कालम् उक्ते तत्र रुमण्वता
उवाच 'आलोचिताशेषकार्यो यौगन्धरायणः । 114
न 'अस्त्य् अत्र चिन्ता यद् राजपुत्री गोपालकस्य सा
कनीयसी स्वसा देवी प्राणेभ्यो ऽप्य् अधिका प्रिया । 115
एतस्य च 'अल्पम् आलोक्य शोकं वत्सेश्वरस् तदा,
जीवेत् कदाचिद् देवी 'इति मत्वा धैर्यम् अवाप्स्यति । 116
अपि च 'उत्तमसत्त्वो ऽयं, शीघ्रं च परिणीयते
पद्मावती, ततो देवी दर्श्यते च 'अचिराद् इति । 117

एवम् एतद् विनिश्चित्य ततो यौगन्धरायणः
गोपालको रुमण्वांश् च पुनर् मन्त्रम् इति व्यधुः । 118
युक्त्या लावाणकं यामः सह देव्या नृपेण च,
पर्यन्तो मगधासन्नवर्ती हि विषयो ऽस्ति सः । 119
सुभगाखेटभूमित्वाद् राज्ञश् च ’असन्निधानकृत्
तत्र ’अन्तःपुरम् आदीप्य क्रियते यदि चिन्तितं । 120
देवी च स्थाप्यते युक्त्या नीत्वा पद्मावतीगृहे,
छन्नस्थिताया येन ’अस्याः सा ’एव स्यात् शीलसाक्षिणी । 121
एवं रात्रौ मिथः कृत्वा मन्त्रं सर्वे ऽपरे ऽहनि
यौगन्धरायणाद्यास् ते प्राविशन् राजमन्दिरं । 122
तत्र ’एवम् अथ विज्ञप्तो वत्सराजो रुमण्वता,
देव लावाणके ऽस्माकं गतानां वर्तते चिरं । 123
स च ’अतिरम्यो विषयस्, तत्र च ’आखेटभूमयः
शोभनाः सन्ति ते राजन् अश्वघासश् च सुग्रहः । 124
बाधते तं च नैकट्यात् सर्वं स मगधेश्वरः,
तत् तत्र रक्षाहेतोश् च विनोदाय च गम्यतां । 125
एतच् छ्रुत्वा च वत्सेशः समं वासवदत्तया
क्रीडैकलालसश् चक्रे गन्तुं लावाणके मतिं । 126
निश्चिते गमने ऽन्येद्युर् लग्ने च परिकल्पिते
अकस्मान् नारदमुनिः कान्तिद्योतितदिङ्मुखः । 127

अवतीर्य नभोमध्यात् प्रदत्तनयनोत्सवः
शशी इव स्वकुलप्रीत्या तं वत्सेश्वरम् अभ्यगात् । 128
गृहीतातिथ्यसत्कारः पारिजातमयीं स्रजं
प्रीतश् च स मुनिस् तस्मै ददौ प्रह्वाय भूभृते । 129
विद्याधराधिपं पुत्रं कामदेवांशम् आप्स्यसि,
इति वासवदत्तां च सो ऽभ्यनन्दत् कृतादरः । 130
ततश् च उवाच वत्सेशं स्थिते यौगन्धरायणे,
राजन् वासवदत्तां ते दृष्ट्वा ह्यत्र स्मृतं मया । 131
युधिष्ठिरादयो ऽभूवन् पुरा ते प्रपितामहाः,
पञ्चानां द्रौपदी तेषाम् एका पत्नी बभूव च । 132
सा च वासवदत्ता इव रूपेण अप्रतिमा अभवत्,
ततस् तद्दोषम् आशंक्य तान् एवम् अहम् अभ्यधां । 133
स्त्रीवैरं रक्षणीयं वस्, तद् धि बीजम् इह आपदां,
तथा हि शृणुत एतां च कथां वो वर्णयाम्य् अहं । 134
सुन्दोपसुन्दनामानौ भ्रातरौ द्वौ बभूवतुः
असुरौ विक्रमाक्रान्तलोकत्रितयदुर्जयौ । 135
तयोर् विनाशकामश् च दत्वा आज्ञां विश्वकर्मणाः
ब्रह्मा निर्मापयामास दिव्यनारीं तिलोत्तमां । 136
रूपम् आलोकितुं यस्याश् चतुर्दिक्कं चतुर्मुखः
बभूव किल शर्वो ऽपि कुर्वाणायाः प्रदक्षिणां । 137

सा पद्मयोनेर् आदेशात् पार्श्वं सुन्दोपसुन्दयोः
प्रलोभनाय प्रययौ कैलासोद्यानवर्तिनोः । 138
तौ च 'असुरौ जगृहतुस् तां दृष्ट्वा 'एव 'अन्तिकागतां
उभाव् अप्य् उभयोर् बाह्वोः सुन्दरीं काममोहितौ । 139
परस्परविरोधेन हरन्तौ तां च तत्क्षणं
प्रवृत्तसंप्रहारत्वाद् द्वाव् अपि क्षयम् ईयतुः । 140
एवं स्त्रीनामविषयो निदानं कस्य न 'आपदां?
युष्माकं द्रौपदी च 'एका बहूनाम् एव वल्लभा । 141
तत् तन्निमित्तः संघर्षः संरक्ष्यो भवतां किल,
मद्वाक्याद् अयम् एतस्या नियमश् च 'अस्तु वः सदा । 142
ज्येष्ठान्तिकागता माता मन्तव्या 'इयं कनीयसा,
ज्येष्ठेन च स्नुषा ज्ञेया कनिष्ठान्तिकवर्तिनी । 143
इत्य् एतन् मद्वचो राजंस् तव ते प्रपितामहाः
तथा 'इति प्रत्यपद्यन्त कल्याणाकृतबुद्धयः । 144
ते च मे सुहृदो ऽभूवंस्, तत्प्रीत्या च 'अहम् आगतः
त्वां द्रष्टुम् इह वत्सेश, तद् इदं नृप वच्मि ते । 145
यथा 'एतैर् मे कृतं वाक्यं, कुर्यास् त्वं मन्त्रिणां तथा,
अचिरेण च कालेन महतीम् ऋद्धिम् आप्स्यसि । 146
कंचित् कालं च दुःखं ते भविष्यति, न च त्वया
तत्र 'अतिमोहः कर्तव्यः, सुखान्तं भविता हि तत् । 147

सम्यग् एवम् अभिधाय तत्क्षणं
वत्सराजम् उदयस्य भाविनः
भङ्गिसूचनविधौ विशारदो
नारदो मुनिर् अदर्शनं ययौ । 148
सर्वे च तस्य वचसा मुनिपुङ्गवस्य
यौगन्धरायणमुखाः सचिवास् ततस् ते
संभाव्य सिद्ध्युदयम् आत्मचिकीर्षितस्य
संपादनाय सुतरां जगृहुः प्रयत्नं । 149

। इति ।
॥ पञ्चदशस् तरङ्गः ॥

TARANGA 16.

ततः पूर्वोक्तया युक्त्या वत्सराजं सवल्लभं
यौगन्धरायणाद्यास् ते निन्युर् लावाणकं प्रति । 1
स राजा प्राप तं देशं सैन्यघोषेण मूर्छता
अभिवाञ्छितसंसिद्धिं वदन्तम् इव मन्त्रिणां । 2
तत्र प्राप्तं विदित्वा च वत्सेशं सपरिछदं
अवस्कन्दभयाशङ्की चकम्पे मगधेश्वरः । 3
यौगन्धरायणोपान्तं सद्बुद्धिर् विससर्ज च
स दूतं, सो ऽपि सन्मन्त्री कार्यज्ञो ऽभिननन्द तं । 4
वत्सेश्वरो ऽपि निवसंस् तस्मिन् देशे दवीयसीं
आखेटकार्थम् अटवीम् अटति स्म दिने दिने । 5
एकस्मिन् दिवसे तस्मिन् राजन्य् आखेटकं गते
कर्तव्यसंविदं कृत्वा गोपालकसमन्वितः । 6
यौगन्धरायणो धीमान् सरुमण्वद्वसन्तकः
देव्या वासवदत्ताया विजने निकटं ययौ । 7
तत्र तां राजकार्ये ऽत्र साहाय्ये तत्तदुक्तिभिः
प्रह्वाम् अभ्यर्थयामास भ्रात्रा पूर्वप्रबोधितां । 8

सा ऽनुमेने च विरहक्लेशदायि तद् आत्मनः
किं नाम न सहन्ते हि भर्तृभक्ताः कुलाङ्गनाः । 9
ततस् तां ब्राह्मणीरूपां देवीं यौगन्धरायणः
स चकार कृती दत्त्वा योगं रूपविवर्तनं । 10
वसन्तकं तु कृतवान् काणं बटुकरूपिणं,
आत्मना च तथा ऽएव ऽभूत् स्थविरब्राह्मणाकृतिः । 11
तथारूपां गृहीत्वा ऽथ तां देवीं स महामतिः
वसन्तकसखः स्वैरं प्रतस्थे मगधान् प्रति । 12
तथा वासवदत्ता सा स्वगृहान् निर्गता सती
अगाच् चित्तेन भर्तारं पन्थानं वपुषा पुनः । 13
तन्मन्दिरम् अथ ऽआदीप्य दहनेन रुमण्वता,
हा हा वसन्तकयुता देवी दग्धा ऽइत्य् अघोष्यत । 14
तथा च दहनाक्रन्दौ समं तत्र ऽउदतिष्ठतां,
शनैः शशाम दहनो, न पुनः क्रन्दितध्वनिः । 15
यौगन्धरायणः सो ऽथ सह वासवदत्तया
वसन्तकेन च प्राप मगधाधिपतेः पुरं । 16
तत्र ऽउद्यानगतां दृष्ट्वा समं ताभ्याम् उपाययौ
पद्मावतीं राजसुतां वार्यमाणो ऽपि रक्षिभिः । 17
पद्मावत्यास् च दृष्ट्वा ऽएव ब्राह्मणीरूपधारिणीं
देवीं वासवदत्तां तां दृशोः प्रीतिर् अजायत । 18

सा रक्षिणो निषिध्य एव ततो यौगन्धरायणं
आनाययद् राजकन्या ब्राह्मणाकृतिम् अन्तिकं । 19
पप्रछ च, महाब्रह्मन् का ते बाला भवत्य् असौ,
किमर्थम् आगतो ऽसि इति, सो ऽप्य् एनां प्रत्यभाषत । 20
इयम् आवन्तिका नाम राजपुत्रि सुता मम,
अस्यास् च भर्ता व्यसनी त्यक्ता इमां कुत्रचिद् गतः । 21
तद् एतां स्थापयाम्य् अद्य तव हस्ते यशस्विनि,
यावत् तम् आनयाम्य् अस्या गत्वा अन्विष्य अचिरात् पतिं । 22
भ्राता काणबटुस् च अयम् इह एव अस्याः समीपगः
तिष्ठत्य्, एकाकिनीभावदुःखं येन न यात्य् असौ । 23
इत्य् उक्ता राजतनयाम् अङ्गीकृतवचास् तया
ताम् आमन्त्य स सन्मन्त्री द्रुतं लावाणकं ययौ । 24
ततो वासवदत्तां तां स्थिताम् आवन्तिकाख्यया
वसन्तकं च अनुगतं तं काणबटुरूपिणं । 25
सह आदाय कृतोदारसत्कारस्नेहशालिनी
पद्मावती स्वभवनं विवेश बहुकौतुकं । 26
तत्र वासवदत्ता च प्रविष्टा चित्रभित्तिषु
पश्यन्ती रामचरिते सीतां सेहे निजव्यथां । 27
आकृत्या सौकुमार्येण शयनाशनसौष्ठवैः
शरीरसौरभेण अपि नीलोत्पलसुगन्धिना । 28

ताम् उत्तमां विनिश्चित्य महार्हैर् आत्मनः समैः
पद्मावती यथाकामम् उपचारैर् उपाचरत् । 29
अचिन्तयच् च, काप्य् एषा छन्ना नूनम् इह स्थिता,
गूढा किं द्रौपदी न ऽआसीद् विराटवसताव् इति । 30
अथ वासवदत्ता ऽअस्याश् चक्रे देव्याः प्रसङ्गतः
अम्लानमालातिलकौ वत्सेशात् पूर्वशिक्षितौ । 31
तद्भूषितां च दृष्ट्वा तां माता पद्मावतीं रहः
पप्रच्छ, मालातिलकौ केन ऽइमौ निर्मिताव् इति । 32
ऊचे पद्मावती च ऽएनाम्, अत्र मन्मन्दिरे स्थिता
काचिद् आवन्तिका नाम, तया कृतम् इदं मम । 33
तच् छ्रुत्वा सा बभाषे तां माता, पुत्रि न तर्हि सा
मानुषी, कापि देवी सा यस्या विज्ञानम् ईदृशं । 34
देवता मुनयश् च ऽअपि वञ्चनार्थं सतां गृहे
तिष्ठन्त्य् एव, तथा च ऽएताम् अत्र पुत्रि कथां शृणु । 35
बभूव कुन्तिभोजाख्यो राजा, तस्य ऽअपि वेश्मनि
आगत्य तस्थौ दुर्वासा वञ्चनैकरसो मुनिः । 36
स तस्य परिचर्यायां राजा कुन्तीं निजां सुतां
आदिदेश, मुनिं सा ऽअपि यत्नेन ऽउपचचार तं । 37
एकदा स मुनिः कुन्तीं जिज्ञासुः सन् अभाषत,
परमान्नं पचेः शीघ्रं स्नात्वा यावद् उपैम्य् अहं । 38

इत्य् उक्त्वा त्वरितं स्नात्वा स च ऽअपिर् भोक्तुम् आययौ,
कुन्ती तदन्नपूर्णां च तस्मै पात्रीम् अढौकयत् । 39
अतितप्तेन च ऽअन्नेन ज्वलन्तीम् इव तां मुनिः
मत्वा ऽआहस्तग्रहायोग्यां कुन्त्याः पृष्ठे दृशं ददौ । 40
सा ऽअपि पृष्ठेन तां पात्रीं दधौ लब्धाशया मुनेः,
ततः स बुभुजे स्वैरं, कुन्ती पृष्ठं त्व् अदह्यत । 41
दह्यमाना ऽअपि गाढं सा यत् तस्थाव् अविकारिणी,
तेन तुष्टो मुनिर् भुक्त्वा ददौ तस्यै ततो वरं । 42
इत्य् आसीत् स मुनिस् तत्र, तद् एषा आवन्तिका ऽअपि ते
तद्वद् एव स्थिता कापि, तत् त्वम् आराधयेर् इमां । 43
इति मातुर् मुखाच् छ्रुत्वा पद्मावत्य् अन्यरूपिणीं
तत्र वासवदत्तां तां सुतरां बह्वमन्यत । 44
सा ऽअपि वासवदत्ता ऽअत्र निजनाथविनाकृता
तस्थौ विधुरविच्छाया निशीथस्था ऽइव पद्मिनी । 45
वसन्तकविकाराश् च ते ते बालोचिता मुहुः
मुखे तस्या वियोगिन्याः स्मितस्य ऽअवसरं दधुः । 46
अत्र ऽअन्तरे ऽतिदूरासु भ्रान्त्वा ऽआखेटकभूमिषु
वत्सराजश् चिराद् आगात् सायं लावाणकं पुनः । 47
भस्मीकृतम् अपश्यच् च तत्र ऽअन्तःपुरम् अग्निना,
देवीं च दग्धां शुश्राव मन्त्रिभ्यः सवसन्तकां । 48

श्रुत्वा ऽएव च ऽअपतद् भूमौ मोहेन हृतचेतनः
तद्दुःखानुभवक्लेशम् अपाकर्तुम् इव ऽइच्छता । 49
क्षणाच् च लब्धसंज्ञः सन् जज्वाल हृदये शुचा
आविष्ट इव तत्रस्थदेवीदाहैषिणा ऽअग्निना । 50
विलपन् अथ दुःखार्तो देहत्यागैकसंमुखः
क्षणान्तरे स नृपतिः संस्मृत्य ऽएतद् व्यचिन्तयत् । 51
विद्याधराधिपः पुत्रो देव्यास् तस्या भविष्यति,
एतन् मे नारदमुनिर् वक्ति स्म, न च तन् मृषा । 52
कंचित् कालं च दुःखं मे तेन ऽएव मुनिना ऽउदितं,
गोपालकस्य च ऽएतस्य शोकः स्वल्प इव ऽईक्ष्यते । 53
यौगन्धरायणादीनां न च ऽएषाम् अतिदुःखिता
दृश्यते, तेन जाने सा देवी जीवेत् कथंचन । 54
इयं किमपि नीतिस् तु प्रयुक्ता मन्त्रिभिर् भवेत्,
अतो मम भवेन् जातु तया देव्या समागमः । 55
तत् पश्याम्य् अत्र पर्यन्तम् इत्य् आलोच्य स भूपतिः
निदधे हृदये धैर्यं बोध्यमानश् च मन्त्रिभिः । 56
गोपालकश् च संदिश्य तद् यथावस्तु तत्क्षणं
प्रणिधाय ततश् चारं धृतिहेतोर् अलक्षितं । 57
एवं गते स्ववृत्तान्ते लावाणकगतैस् तदा
गत्वा मगधराजाय चारैः सर्वं निवेदितं । 58

स तद् बुद्धा 'एव कालज्ञो वत्सराजाय तां सुतां
दातुं पद्मावतीम् ऐच्छत् पूर्वं तन्मन्त्रिमार्गितां । 59
ततो दूतमुखेन 'एनम् अर्थं वत्सेश्वराय सः
यौगन्धरायणाय 'अपि संदिदेश यथेप्सितं । 60
यौगन्धरायणोक्त्या च वत्सेशो ऽङ्गीचकार तत्,
प्रह्लादिता 'एतदर्थं स्याद् देवी ज्ञात्वा इति चिन्तयन् । 61
ततो लग्नं विनिश्चित्य तूर्णं यौगन्धरायणः
तस्मै मगधराजाय प्रतिदूतं व्यसर्जयत् । 62
त्वदिच्छा 'अङ्गीकृता 'अस्माभिस्, तद् इतः सप्तमे दिने
पद्मावतीविवाहाय वत्सेशो ऽत्र 'आगमिष्यति । 63
शीघ्रं वासवदत्तां च येन 'असौ विस्मरिष्यति,
इति च 'अस्मै महामन्त्री संदिदेश स भूभृते । 64
प्रतिदूतः स गत्वा च यथासंदिष्टम् अभ्यधात्
ततो मगधराजाय, स च 'अप्य् अभिननन्द तं । 65
ततः स दुहितृस्नेहनिरीहाविभवोचितं
विवाहोत्सवसंभारं चकार मगधेश्वरः । 66
सा च 'अभीष्टवरश्रुत्या मुदं पद्मावती ययौ,
प्राप वासवदत्ता च तद्वार्ताकर्णनात् शुचं । 67
सा वार्ता कर्णम् आगत्य तस्या वैवर्ण्यदायिनी
प्रछन्नवासवैरूप्यसाहायकम् इव 'अकरोत् । 68

इत्थं मित्रीकृतः शत्रुर्, न च भर्ता ऽन्यथा त्वयि,
वसन्तकोकिलर् इत्य् अस्याः सखी ऽइव विदधे धृतिं । 69
अथ ऽआसन्नविवाहायाः पद्मावत्या मनस्विनी
अम्लानमालातिलकौ दिव्यौ भूयश् चकार सा । 70
ततो वत्सेश्वरस् तत्र संप्राप्ते सप्तमे ऽहनि
ससैन्यो मन्त्रिभिः सार्धं परिणेतुं किल ऽआययौ । 71
मनसा ऽअपि तदुद्योगं विरही स कथं स्पृशेत्,
देवीं लभेयं ताम् एवम् इत्य् आशा न भवेद् यदि । 72
प्रत्युद्ययौ च तं सद्यः सानन्दो मगधेश्वरः
प्रजानेत्रोत्सवं चन्द्रम् उदयस्थम् इव ऽअम्बुधिः । 73
विवेश ऽअथ स वत्सेशो मगधाधिपतेः पुरं
समन्तात् पौरलोकस्य मानसं च महोत्सवः । 74
विरहक्षामवपुषं मनःसंमोहदायिनं
ददृशुस् तत्र नार्यस् तं रतिहीनम् इव स्मरं । 75
प्रविश्य मगधेशस्य वत्सेशो ऽप्य् अथ मन्दिरं
सनाथं पतिवत्नीभिः कौतुकागारम् आययौ । 76
तत्र पद्मावतीम् अन्तर् ददर्श कृतकौतुकां
स राजा पूर्णवक्त्रेन्दुजितपूर्णेन्दुमण्डलां । 77
तस्याश् च मालातिलकौ दिव्याव् आलोक्य तौ निजौ,
एतौ कुतो ऽस्या इत्य् एवं विममर्श स भूपतिः । 78

ततः स वेदीम् आरुह्य तस्या जग्राह यत् करं,
तद् एव आरम्भतां प्राप तस्य पृथ्व्याः करग्रहे । 79
प्रियवासवदत्तो ऽयम् इदं शक्नोति न ईक्षितुं,
इति इव वेदीधूमो ऽस्य वाष्पेण पिदधे दृशौ । 80
अग्निप्रदक्षिणे ताम्रं तदा पद्मावतीमुखं
विज्ञातभर्त्रभिप्रायकोपाकुलम् इव आबभौ । 81
मुमोच स कृतोद्वाहः करात् वत्सेश्वरो बधूं,
न तु वासवदत्तां तां तत्याज हृदयात् क्षणं । 82
ततस् तथा ददौ तस्मै रत्नानि मगधाधिपः,
निर्दुग्धरत्नरिक्ता इव पृथिवी बुबुधे यथा । 83
साक्षीकृत्य च तत्कालम् अग्निं यौगन्धरायणः
अद्रोहप्रत्ययं राज्ञो मगधेशम् अकारयत् । 84
प्रदत्तवस्त्राभरणः प्रगीतवरचारणः
प्रनृत्तवारनारीकः प्रससार स च उत्सवः । 85
उदयापेक्षिणी पत्युः सुप्ता एव अलक्षितस्थिता
तदा वासवदत्ता अभूद् दिवा कान्तिर् इव ऐन्दवी । 86
अन्तःपुरम् उपायाते राज्ञि वत्सेश्वरे ततः
देवीसंदर्शनाशङ्की कृती यौगन्धरायणः । 87
मन्त्रभेदभयाद् एवं मगधेश्वरम् अभ्यधात्,
अद्य एव नाथ वत्सेशः प्रयाति त्वद्गृहाद् इति । 88

तथा ऽइत्य् अङ्गीकृतं तेन तम् एव ऽअर्थं तदा ऽएव सः
व्यजिज्ञपद् वत्सराजं, सो ऽपि तच् छ्रद्दधे तथा । 89
अथ ऽउच्चचाल वत्सेशो भुक्तपीतपरिच्छदः
मन्त्रिभिः समम् आदाय बधूं पद्मावतीं ततः । 90
पद्मावत्या विसृष्टं च सुखम् आरुह्य वाहनं
तया ऽएव च समादिष्टैस् तन्महातुरगैः सह । 91
आगाद् वासवदत्ता ऽअपि गुप्तं सैन्यस्य पृष्ठतः
कृतद्रूपविवर्तं तं पुरस्कृत्य वसन्तकं । 92
क्रमाल् लावाणकं प्राप्य वत्सेशो वसतिं निजां
प्रविवेश समं बध्वा देवीचित्तं तु केवलं । 93
एत्य वासवदत्ता ऽअपि सा गोपालकमन्दिरं
विवेश ऽअथ निशीथे च परिस्थाप्य महत्तरान् । 94
तत्र गोपालकं दृष्ट्वा भ्रातरं दर्शितादरं
कण्ठे जग्राह रुदती सा वाष्पाकुललोचनं । 95
तत्क्षणे स्थितसंविच् च तत्र यौगन्धरायणः
आययौ सरुमण्वत्कस् तया देव्या कृतादरः । 96
सो ऽस्याः प्रोत्साहविश्लेषदुःखं यावद् व्यपोहति,
तावत् पद्मावतीपार्श्वं प्रययुस् ते महत्तराः । 97
आगता ऽआवन्तिका देवि, किमप्य् अस्मान् विधूय तु
प्रविष्टा राजपुत्रस्य गृहं गोपालकस्य सा । 98

इति पद्मावती सा तैर् विज्ञप्ता स्वमहत्तरैः
वत्सेश्वराग्रे साशङ्का तान् एवं प्रत्यभाषत । 99
गच्छत ऽऽवन्तिकां ब्रूथ, निक्षेपस् त्वं हि मे स्थिता,
तद् अत्र किं ते, यत्र ऽहं तत्र ऽएव ऽऽगम्यताम् इति । 100
तच् छ्रुत्वा तेषु यातेषु राजा पद्मावतीं रहः
पप्रच्छ मालातिलकौ केन ऽइमौ ते कृताव् इति । 101
सा ऽवोचद् अथ, मद्गेहे न्यस्ता विप्रेण केनचित्
आवन्तिकाभिधा या ऽएषा, तस्याः शिल्पम् इदं महत् । 102
तच् छ्रुत्वा ऽएव च वत्सेशो गोपालगृहम् आययौ,
नूनं वासवदत्ता सा भवेद् अत्र ऽइति चिन्तयन् । 103
प्रविवेश च गत्वा तद्द्वारस्थितं महत्तरं
अन्तःस्थदेवीगोपालमन्त्रिद्वयवसन्तकं । 104
तत्र वासवदत्तां तां ददर्श प्रोषितागतां
उपप्लवविनिर्मुक्तां मूर्तिं चान्द्रमसीम् इव । 105
पपात ऽथ महीपृष्ठे स शोकविषविह्वलः,
कम्पो वासवदत्ताया हृदये तु ऽउदपद्यत । 106
ततः सा ऽप्य् अपतद् भूमौ गात्रैर् विरहपाण्डुरैः,
विललाप च निन्दन्ती तदा चरितम् आत्मनः । 107
अथ तौ दम्पती शोकदीनौ रुरुदतुस् तथा,
यौगन्धरायणो ऽप्य् आसीद् बाष्पधौतमुखो यथा । 108

तथाविधं च तच् छ्रुत्वा ऽकाले कोलाहलं तदा
पद्मावत्य् अपि तत्र ऽएव सा ऽऽकुला तम् उपाययौ । 109
क्रमाद् अवगतार्था च राजवासवदत्तयोः
तुल्यावस्था ऽएव सा ऽप्य् आसीत् स्निग्धमुग्धा हि सत्स्त्रियः । 110
किं जीवितेन मे कार्यं भर्तृदुःखप्रदायिना,
इति वासवदत्ता च जगाद् रुदती मुहुः । 111
मगधेशसुतालाभात् तव साम्राज्यकाङ्क्षिणा
कृतम् एतन् मया देव, देव्या दोषो न कश्चन । 112
इयं त्व् अस्याः सपत्न्य् एव प्रवासे शीलसाक्षिणी,
इत्य् उवाच ऽथ वत्सेशं धीरो यौगन्धरायणः । 113
अहम् अत्र विशाम्य् अग्नाव् अस्याः शुद्धिप्रकाशने,
इति पद्मावती तत्र जगाद ऽमत्सराशया । 114
अहम् एव ऽपराध्यो ऽस्मि यत्कृते सुमहान् अयं
सोढो देव्या ऽपि हि क्लेश इति राजा ऽप्य् अभाषत । 115
अग्निप्रवेशः कार्यो मे राज्ञो हृदयशुद्धये,
इति वासवदत्ता च बभाषे बद्धनिश्चया । 116
ततः सुकृतिनां धुर्यो धीमान् यौगन्धरायणः
आचम्य प्राङ्मुखः शुद्धाम् इति वाचम् उदेरयत् । 117
अस्य ऽहं हितकृद् राज्ञो देवी शुद्धिमती यदि,
ब्रूत भो लोकपालास्, तन् न चेद्, देहं त्यजाम्य् अहं । 118

इत्य् उक्त्वा विरते तस्मिन् दिव्या वाग् उदभूद् इयं,
धन्यस् त्वं नृपते यस्य मन्त्री यौगन्धरायणः । 119
यस्य वासवदत्ता च भार्या प्राग्जन्मदेवता,
न दोषः कश्चिद् एतस्या इत्य् उक्त्वा वाग् उपारमत् । 120

आकर्ण्य तन् मुखरिताखिलदिग्विभागम्
आमन्द्रनूतनघनागमगर्जितश्रि
उच्चत्कराश् च सुचिरं विहिताभितापाः
सर्वे ऽपि ते स्फुटविडम्बितनीलकण्ठाः । 121

गोपालकसहितो ऽपि तद्
राजा यौगन्धरायणाचरितं
स्तौति स्म वत्सराजो,
मेने पृथ्वीं च हस्तगतां । 122

दधद् अथ नृपतिः स मूर्तिमत्यौ
निकटगते रतिनिर्वृती इव 'उभे
अनुदिनसहवाससानुरागे
निजदयिते परम् उत्सवं बभार । 123

। इति ।

॥ षोडशस् तरङ्गः ॥

TARANGA. 17.

ततो वत्सेश्वरो ऽन्येद्युः सह वासवदत्तया
पद्मावत्या च संसक्तपानलीलो विविक्तगः । 1
सगोपालकम् आनीय सरुमण्वद्वसन्तकं
यौगन्धरायणं ताभ्य् च चक्रे विश्रम्भिणीः कथाः । 2
तत्र स्वविरहोद्घातप्रसङ्गे च महीपतिः
सर्वेषु तेषु शृण्वत्सु कथाम् एताम् अवर्णयत् । 3

आसीत् पुरूरवा नाम राजा परमवैष्णवः,
अभूद् भुवि इव नाके ऽपि यस्य अप्रतिहता गतिः । 4
भ्रमन्तं नन्दने जातु तं ददर्श किल अप्सराः
उर्वशी नाम कामस्य मोहनास्त्रम् इव अपरं । 5
दृष्टमात्रेण तेन अभूत् सा तथा हृतचेतना,
यथा सभयरम्भादिसखीचेतांस्य् अकम्पयत् । 6
सो ऽपि तां वीक्ष्य लावण्यरसनिर्झरिणीं नृपः
यन् न प्राप परिष्वङ्गं, तृषाक्रान्तो मुमूर्छ तत् । 7

अथ 'आदिदेश सर्वज्ञो हरिः क्षीराम्बुधिस्थितः
नारदाख्यं मुनिवरं दर्शनार्थम् उपागतं । 8
देवर्षे नन्दनोद्यानवर्ती राजा पुरूरवाः
उर्वशीहृतचित्तः सन् स्थितो विरहनिःसहः । 9
तद् गत्वा मम वाक्येन बोधयित्वा शतक्रतुं
दापय त्वरितं तस्मै राज्ञे ताम् उर्वशीं मुने । 10
इत्य् आदिष्टः स हरिणा तथा 'इत्य् आगत्य नारदः
प्रबोध्य तं तथाभूतं पुरूरवसम् अब्रवीत् । 11
उत्तिष्ठ त्वत्कृते राजन् प्रहितो ऽस्मि 'इह विष्णुना,
स हि निर्व्याजभक्तानां न 'एव 'आपदम् अपेक्षते । 12
इत्य् उक्त्वा 'आश्वासितेन 'अथ स पुरूरवसा सह
जगाम देवराजस्य निकटं नारदो मुनिः । 13
हरेर् निदेशम् इन्द्राय निवेद्य प्रणतात्मने
उर्वशीं दापयामास स पुरूरवसे ततः । 14
तद् अभूद् उर्वशीदानं निर्जीविकारणं दिवः,
उर्वश्यास् तु तद् एव 'आसीन् मृतसंजीवनौषधं । 15
अथ 'आजगाम भूलोकं ताम् आदाय पुरूरवाः
स्वर्बधूदर्शनाश्चर्यम् अर्पयन् मर्त्यचक्षुषां । 16
ततो ऽनपायिनौ तौ द्वाव् उर्वशी च नृपश् च सः
अन्योन्यदृष्टिपाशेन निबद्धाव् इव तस्थतुः । 17

एकदा दानवैः साकं प्राप्तयुद्धेन वज्रिणा
साहाय्यकार्थम् आहूतो ययौ नाकं पुरूरवाः । 18
तत्र तस्मिन् हते मायाधरनाम्न्य् असुराधिपे
प्रवृत्तस्वर्बधूसार्थः शक्रस्य ऽअभवद् उत्सवः । 19
ततश् च रम्भां नृत्यन्तीम् आचार्ये तुम्बुरौ स्थिते
चलिताभिनयां दृष्ट्वा जहास स पुरूरवाः । 20
जाने दिव्यम् इदं नृत्तं किं त्वं जानासि मानुष,
इति रम्भा ऽअपि तत्कालं सासूया तम् अभाषत । 21
जाने ऽहम् उर्वशीसङ्गात् तद्, यद् वेत्ति न तुम्बुरुः
युष्मद्गुरुर् अपि ऽइत्य् एनाम् उवाच ऽअथ पुरूरवाः । 22
तच् छ्रुत्वा तुम्बुरुः क्रोधात् तस्मै शापम् अथ ऽआदिशत्,
उर्वश्या ते वियोगः स्याद् आकृष्णाराधनाद् इति । 23
श्रुतशापश् च गत्वा ऽएव तम् उर्वश्यै पुरूरवाः
अकालाशनिपातोग्रं स्ववृत्तान्तं न्यवेदयत् । 24
ततो ऽकस्मान् निपत्य ऽएव निन्ये क्वाप्य् अपहृत्य सा
अदृष्टैस् तेन भूपेन गन्धर्वैर् उर्वशी किल । 25
अवेत्य शापदोषं तं सो ऽथ गत्वा पुरूरवाः
हरेर् आराधनं चक्रे तपो बदरिकाश्रमे । 26
उर्वशी तु वियोगार्ता गन्धर्वविषयस्थिता
आसीन् मृता ऽइव सुप्ता ऽइव लिखिता ऽइव विचेतना । 27

आश्चर्यं यन् न सा प्राणैः शापान्ताशावलम्बिनी
मुक्ता विरहदीर्घासु चक्रवाकी इव रात्रिषु । 28
पुरूरवास् च तपसा तेन अच्युतम् अतोषयत्,
तत्प्रसादेन गन्धर्वा मुमुचुस् तस्य च उर्वशीं । 29
शापान्तलब्धया युक्तः पुनर् अप्सरसा तया
दिव्यान् स राजा बुभुजे भोगान् भूतलवर्त्य् अपि । 30

इत्य् उक्त्वा विरते राज्ञि श्रुतोर्वश्यनुरागया
प्रापि सोढवियोगत्वाद् व्रीडा वासवदत्तया । 31
तां दृष्ट्वा युक्त्युपालब्धां राज्ञा देवीं विलक्षितां
तथा अप्य् आपयितुं भूपम् आह यौगन्धरायणः । 32
न श्रुता यदि, तद् राजन् कथा इयं श्रूयतां त्वया.

अस्ति इह तिमिरा नाम नगरी मन्दिरं श्रियः । 33
तस्यां विहितसेनाख्यः ख्यातिमान् अभवन् नृपः,
तस्य तेजोवती इत्य् आसीद् भार्या क्षितितलाप्सराः । 34
तस्याः कण्ठग्रहैकाग्रः स राजा स्पर्शलोलुभः
न सेहे कञ्चुकेन अपि क्षिप्रम् आछुरितं वपुः । 35

कदाचित् तस्य राज्ञश् च जज्ञे जीर्णामयज्वरः,
वैद्या निवारयामासुस् तया देव्या ऽस्य संगमं । 36
देवीसंपर्कहीनस्य हृदये तस्य भूभृतः
औषधोपक्रमासाध्यो व्याधिः समुदपद्यत । 37
भयाच् छोकाभिघाताद् वा रोगो राज्ञः कदाचन
स्फुटेद् अयम् इति स्म ऽआहुर् भिषजो मन्त्रिणां रहः । 38
यः पुरा पृष्ठपतिते न त्रास महोरगे,
न ऽअन्तःपुरप्रविष्टे ऽपि परानीके च चुक्षुभे । 39
तस्य ऽअस्य राज्ञो जायेत भयं सत्ववतः कथं,
न ऽअस्त्य् अत्र ऽउपायबुद्धिर् नः, किं कुर्मस् तेन मन्त्रिणः । 40
इति संचिन्त्य संमन्त्र्य ते देव्या सह मन्त्रिणः
तां प्रच्छाद्य तम् ऊचुश् च मृता देवी ऽइति भूपतिं । 41
तेन शोकातिभारेण मथ्यमानस्य तस्य सः
पुस्फोट हृदयव्याधिर् विह्वलस्य महीभृतः । 42
उत्तीर्णरोगविपदे तस्मै राज्ञे ऽथ मन्त्रिभिः
अर्पिता सा महादेवी सुखसंपद् इव ऽअपरा । 43
बहुमेने च सो ऽप्य् एनां राजा प्राणप्रदायिनीं,
न पुनर् मतिमान् अस्यै चुक्रोध छादितात्मने । 44

हितैषिता हि या पत्युः सा देवीत्वस्य कारणं,'
प्रियकारित्वमात्रेण देवीशब्दो न लभ्यते । 45
सा मन्त्रिता च यद् राजकार्यभारैकचिन्तनं,
चित्तानुवर्तनं यत् तद् उपजीवकलक्षणं । 46
अतो मगधराजेन संधातुं परिपन्थिना
पृथ्वीविजयहेतोस् ते यत्नो ऽस्माभिर् अयं कृतः । 47
तेन देव भवद्भक्तिसोढासह्यवियोगया
देव्या न एव अपराद्धं ते, पूर्णा तु उपकृतिः कृता । 48
एतच् छ्रुत्वा वचस् तस्य यथार्थं मुख्यमन्त्रिणः
मेने ऽपराद्धम् आत्मानं वत्सराजस् तुतोष च । 49
उवाच च, 'एतज् जाने ऽहं देव्या युष्मत्प्रयुक्तया
आकारवत्या नीत्या इव मम दत्ता एव मेदिनी । 50
किंत्व् अतिप्रणयाद् एतन् मया उक्तम् असमञ्जसं,
अनुरागान्धमनसां विचारसहता कुतः । 51
इत्यादिभिः समालापैर् वत्सराजः स तद्दिनं
लज्जोपरागं देव्याश् च समम् एव अपनीतवान् । 52
अन्येद्युर् मगधेशेन प्रेषितो ज्ञातवस्तुना
दूतो वत्सेशम् अभ्येत्य तद्वाक्येन व्यजिज्ञपत् । 53
मन्त्रिभिस् ते वयं तावद् वञ्चितास्, तत् तथा अधुना
कुर्याः, शोकमयो येन जीवलोको भवेन् न नः । 54

एतच् छ्रुत्वा ऽथ संमान्य वत्सेशः प्रजिघाय तं
दूतं पद्मावतीपार्श्वं प्रतिसंदेशलब्धये । 55
सा ऽपि वासवदत्तैकनम्रा तत्संनिधौ ददौ
दूतस्य दर्शनं तस्य· विनयो हि सतीव्रतं । 56
व्याजेन पुत्रि नीता त्वम् अन्यासक्तश् च ते पतिः,
इति शोकान् मया लब्धं कन्याजनकताफलं । 57
इत्य् उक्तपितृसंदेशं दूतं पद्मावती तथा
जगाद, भद्र विज्ञप्यस् तातो ऽस्याश् च गिरा मम । 58
किं शोकेन, ऽआर्यपुत्रो हि परमं सदयो मयि,
देवी वासवदत्ता ऽपि सस्नेहा भगिनी च मे । 59
तत् तातेन ऽआर्यपुत्रस्य भाव्यं न ऽएव विकारिणा,
निजसत्यम् इव ऽअत्याज्यं मदीयं जीवितं यदि । 60
इत्य् उक्ते प्रतिसंदेशे पद्मावत्या यथोचिते
दूतं वासवदत्ता तं सत्कृत्य प्राहिणोत् ततः । 61
दूते प्रतिगते तस्मिन् स्मरन्ती पितृवेश्मनः
किंचित् पद्मावती तस्थाव् उत्कण्ठाविमना इव । 62
ततस् तस्या विनोदार्थम् उक्तो वासवदत्तया
वसन्तको ऽन्तिकप्राप्तः कथाम् इत्थम् अवर्णयत् । 63

अस्ति पाटलिपुत्राख्यं पुरं पृथ्वीविभूषणं,
तस्मिंश् च धर्मगुप्ताख्यो बभूव ऽएको महाबणिक् । 64
तस्य चन्द्रप्रभा ऽइत्य् आसीद् भार्या, सा च कदाचन
सगर्भा ऽअभूत्, प्रासूत ऽअथ कन्यां सर्वाङ्गसुन्दरीं । 65
सा कन्या जातमात्रा ऽएव कान्तिद्योतितवासका
चक्रे सुव्यक्तम् आलापम् उत्थाय ऽउपविवेश च । 66
ततो विस्मितवित्रस्तं स्त्रीजनं जातवेश्मनि
दृष्ट्वा स धर्मगुप्तो ऽत्र सभयः स्वयम् आययौ । 67
पप्रछ् कन्यकां तां च प्रणातस् तत्क्षणं रहः,
भगवत्य् अवतीर्णा ऽअसि का त्वं मम गृहेष्व् इति । 68
सा ऽअप्य् अवादीत्, त्वया न ऽएव देया कस्मैचिद् अप्य् अहं,
गृहस्थिता शुभा ऽअहं ते, पृष्टेन ऽअन्येन तात किं । 69
इत्य् उक्तः स तया भीतो धर्मगुप्तः स्वमन्दिरे
गुप्तं तां स्थापयामास मृता ऽइति ख्यापितं वहिः । 70
ततः सोमप्रभानाम्ना सा कन्या ववृधे क्रमात्
मानुषेण शरीरेण रूपकान्त्या तु दिव्यया । 71
एकदा च प्रमोदेन मधूत्सवविलोकिनीं
हर्म्यस्थां गुहचन्द्राख्यो बणिक्पुत्रो ददर्श तां । 72
स मनोभववल्ल्या ऽइव सद्यो हृदयलग्नया
तया मुमूर्छ ऽइव, तदा कृछ्राच् च स्वगृहं ययौ । 73

स्मरार्तिविधुरस् तत्र पित्रोर् अस्वास्थ्यकारणं
निर्बन्धपृष्टो वक्ति स्म स्ववयस्यमुखेन सः । 74
ततो ऽस्य गुहसेनाख्यः पिता स्नेहेन याचितुं
तां कन्यां धर्मगुप्तस्य बणिजो भवनं ययौ । 75
तत्र तं कृतयाच्ञं स गुहसेनं स्नुषार्थिनं,
कन्या 'अर्थतो मे मूढा' इति धर्मगुप्तो निराकरोत् । 76
निह्नुतां तेन कन्यां तां मत्वा गत्वा गृहे सुतं
दृष्ट्वा स्मरज्वराक्रान्तं गुहसेनो व्यचिन्तयत् । 77
राजानं प्रेरयाम्य् अत्र, स हि मे पूर्वसेवितः
दापयिष्यति पुत्राय कन्यकां तां मुमूर्षवे । 78
इति निश्चित्य गत्वा च दत्वा 'अस्मै रत्नम् उत्तमं
नृपं विज्ञापयामास स बणिक् स्वाभिकाङ्क्षितं । 79
नृपो ऽपि प्रीतिमान् अस्य साहाय्येन नगराधिपं
ददौ, तेन समं च 'असौ धर्मगुप्तगृहं ययौ । 80
रुरोध च गृहं तस्य धर्मगुप्तस्य तद्बलैः
अश्रुभिः कण्ठदेशं च सर्वनाशविशङ्किनः । 81
ततः सोमप्रभा सा तं धर्मगुप्तम् अभाषत,
देहि मां तात मा भूत् ते मन्निमित्तम् उपद्रवः । 82
आरोपणीया शय्यायां न 'अहं भर्त्रा कदाचन,
ईदृक् तु वाचा नियमो ग्राह्यः संबन्धिना त्वया । 83

इत्य् उक्तः स तया पुत्र्या दातुं तां प्रत्यपद्यत
धर्मगुप्तस् तद् आभाष्य शय्यारोपणवर्जनं । 84
गुहसेनो ऽनुमेने च सान्तर्हासस् तथा एव तत्,
विवाहो मम पुत्रस्य तावद् अस्त्व् इति चिन्तयन् । 85
अथ आदाय कृतोद्वाहां तां स सोमप्रभां बधूं
गुहसेनसुतः प्रायाद् गुहचन्द्रो निजं गृहं । 86
सायं च एनं पिता अवादीत्, पुत्र शय्याम् इमां बधूं
आरोपय, स्वभार्या हि कस्य अशय्या भविष्यति । 87
तच् छ्रुत्वा श्वशुरं तं सा बधूः सोमप्रभा क्रुधा
विलोक्य भ्रामयामास यमाज्ञाम् इव तर्जनीं । 88
तां दृष्ट्वा एव अङ्गुलिं तस्याः स्नुषायास् तस्य तत्क्षणं
बणिजः प्रययुः प्राणा, अन्येषां च आययौ भयं । 89
गुहचन्द्रो ऽपि संप्राप्ते तस्मिन् पितरि पञ्चतां,
मारी मम गृहे भार्या प्रविष्टा इति व्यचिन्तयत् । 90
ततश् च अनुपभुञ्जानो भार्यां तां गृहवर्तिनीं
सिषेवे गुहचन्द्रो ऽसाव् असिधारम् इव व्रतं । 91
तद्दुःखदह्यमानो ऽन्तर् विरक्तो भोगसंपदि
ब्राह्मणान् भोजयामास प्रत्यहं स कृतव्रतः । 92
तद्भार्या अपि च सा तेभ्यो द्विजेभ्यो मौनधारिणी
भुक्तवद्भ्यो ददौ नित्यं दक्षिणां दिव्यरूपभृत् । 93

एकदा ब्राह्मणो वृद्धस् ताम् एको भोजनागतः
ददर्श जगदाश्चर्यजननीं रूपसंपदा । 94
सकौतुको द्विजो ऽप्राक्षीद् गुहचन्द्रं रहस् तदा,
का ते भवति बाला ऽइयं, त्वया मे कथ्यताम् इति । 95
निर्बन्धपृष्टः सो ऽप्य् अस्मै गुहचन्द्रो द्विजन्मने
शशंस तद्गतं सर्वं वृत्तान्तं खिन्नमानसः । 96
तद् बुद्ध्वा स ततस् तस्मै सानुकम्पो द्विजोत्तमः
अग्नेर् आराधनं मन्त्रं ददाव् ईप्सितसिद्धये । 97
तेन मन्त्रेण तस्य ऽअथ जपं रहसि कुर्वतः
उदभूद् गुहचन्द्रस्य ब्राह्मणो वह्निमध्यतः । 98
स च ऽअग्निर् द्विजरूपी तं जगाद चरणानतं,
अद्य ऽअहं त्वद्गृहे भोक्ष्ये, रात्रौ स्थास्यामि तत्र च । 99
दर्शयित्वा च तत्त्वं ते साधयिष्यामि वाञ्छितं,
इत्य् उक्त्वा गुहचन्द्रं स ब्राह्मणस् तद्गृहं ययौ । 100
तत्र ऽअन्यविप्रवद् भुक्त्वा गुहचन्द्रान्तिके च सः
सिषेवे शयनं रात्रौ याममात्रम् अतन्द्रितः । 101
तावच् च संसुप्तजनात् सा तस्मात् तस्य मन्दिरात्
निर्ययौ गुहचन्द्रस्य भार्या सोमप्रभा निशि । 102
तत्कालं ब्राह्मणः सो ऽत्र गुहचन्द्रम् अबोधयत्,
एहि स्वभार्यावृत्तान्तं पश्य ऽइत्य् एनम् उवाच च । 103

योगेन भृङ्गरूपं च कृत्वा तस्य आत्मनस् तथा
निर्गत्य अदर्शयत् तस्य भार्यां तां गृहनिर्गतां । 104
सा जगाम सुदूरं च सुन्दरी नगराद् बहिः,
गुहचन्द्रेण साकं च द्विजो ऽप्य् अनुजगाम तां । 105
ततस् तत्र महाभोगं सच्छायस्कन्धसुन्दरं
गुहचन्द्रो ददर्श असाव् एकं न्यग्रोधपादपं । 106
तस्य अधस्ताच् च शुश्राव वीणावेणुरवान्वितं
उल्लसद्गीतमधुरं दिव्यं संगीतकध्वनिं । 107
स्कन्धदेशे च तस्य एकां स्वभार्यासदृशाकृतिं
अपश्यत् कन्यकां दिव्याम् उपविष्टां महासने । 108
निजकान्तिजितज्योत्स्नां शुक्लचामरवीजितां
इन्दोर् लावण्यसर्वस्वकोशस्य इव अधिदेवतां । 109
अत्र एव आरुह्य वृक्षे च तस्या अर्धासने तदा
उपविष्टां स्वभार्यां तां गुहचन्द्रो ददर्श सः । 110
तत्कालं तुल्यकान्ती ते संगते दिव्यकन्यके
पश्यतस् तस्य भाति स्म सा त्रिचन्द्रा इव यामिनी । 111
ततः स कौतुकाविष्टः क्षणम् एवम् अचिन्तयत्,
किं स्वप्नो ऽयम् उत भ्रान्तिर् धिग् एतद् अथवा द्वयं । 112
या सन्मार्गतरोर् एषा विद्वत्संगतिमञ्जरी
असौ पुष्पोद्गतिस् तस्या मम उचितफलोन्मुखी । 113

इति चिन्तयति स्वैरं तस्मिंस् ते दिव्यकन्यके
भुक्त्वा निजोचितं भोज्यं दिव्यं पपतुर् आसवं । 114
अद्य 'आगतो महातेजा द्विजः कोऽपि गृहेषु नः,
तस्माद् भगिनि चेतो मे शङ्कितं, तद् व्रजाम्य् अहं । 115
इत्य् उक्त्वा ताम् अथ 'आमन्त्र्य द्वितीयां दिव्यकन्यकां
गुहचन्द्रस्य गृहिणी तरोर् अवरुरोह सा । 116
तद् दृष्ट्वा भृङ्गरूपौ तौ गुहचन्द्रो द्विजश् च सः
प्रत्यागत्य 'अग्रतो गेहे पूर्वम् उत्तस्थतुर् निशि । 117
ततः सा दिव्यकन्या 'अपि गुहचन्द्रस्य गेहिनी
आगत्य 'अलक्षिता 'अत्र 'एव प्रविवेश स्वमन्दिरं । 118
ततः स ब्राह्मणः स्वैरं गुहचन्द्रम् अभाषत,
दृष्टं त्वया यद् एषा ते भार्या दिव्या न मानुषी । 119
द्वितीया सा 'अपि च 'एतस्या दृष्टा 'अद्य भगिनी त्वया,
दिव्या स्त्री तु मनुष्येण कथम् इच्छति संगमं । 120
तद् एतत्सिद्धये मन्त्रं द्वारोल्लेख्यं ददामि ते
तस्य 'उपबृंहिणीं वाह्यां युक्तिं च 'उपदिशाम्य् अहं । 121
असुद्धो ऽपि ज्वलत्य् अग्निर् वात्यायोगे तु का कथा,
एवं मन्त्रो ऽर्थदो ऽप्य् एकः किं पुनर् युक्तिसंयुतः । 122
इत्य् उक्त्वा गुहचन्द्राय दत्त्वा मन्त्रं द्विजोत्तमः
उपदिश्य च तां युक्तिं प्रभाते स तिरोदधे । 123

गुरुचन्द्रो ऽपि भार्याया गृहद्वारे ऽभिलिख्य तं
मन्त्रं पुनश् चकार 'एवं सायं युक्तिं प्ररोचनीं । 124
गत्वा स तस्याः पश्यन्त्याः कयापि वरयोषिता
सह चक्रे समालापं रचितोदारमण्डनः । 125
तद् दृष्ट्वा 'एव तम् आहूय मन्त्रोन्मुद्रितया गिरा,
एषा का स्त्री 'इति पप्रच्छ सा सेर्ष्या दिव्यकन्यका । 126
असौ वराङ्गना बद्धभावा मय्य्, अहम् अद्य च
एतद्गृहं व्रजामि 'इति प्रत्यवोचत् स तां मृषा । 127
ततः साचीकृतदृशा मुखेन वलितभ्रुणा
दृष्ट्वा विदार्य वामेन करेण तम् उवाच सा । 128
हुं ज्ञातम् एतद्, अर्थी ऽयं वेशस्, तत्र च मा स्म गाः,
किं तया, माम् उपेहि त्वम्, अहं हि तव गेहिनी । 129
इत्य् उक्तः पुलकोत्कम्पः संक्षोभाकुलया तया
आविष्टया 'इव तन्मन्त्रधूतदुर्ग्रहया 'अपि सः । 130
प्रविश्य वासके सद्यस् तया 'एव समम् अन्वभूत्
मर्त्यो ऽपि दिव्यसंभोगम् असंस्पृष्टं मनोरथैः । 131
इत्थं तां प्राप्य सप्रेमां मन्त्रसिद्धिप्रसाधितां
त्यक्तदिव्यस्थितिं तस्थौ गुरुचन्द्रो यथासुखं । 132

एवं योगप्रदानादिसुकृतैः शुभकर्मणां
दिव्याः शापच्युता नार्यस् तिष्ठन्ति गृहिणीपदे । 133
देवद्विजसपर्या हि कामधेनुर् मता सतां,
किं हि न प्राप्यते तस्याः शेषाः सामादिवर्णनाः । 134
दुष्कृतं त्व् अपि दिव्यानाम् अत्युच्चपदजन्मनां
प्रवातम् इव पुष्पाणाम् अधःपातैककारणं । 135
इत्य् उक्त्वा राजपुत्र्याः स पुनर् आह वसन्तकः,
किंच ऽत्र यद् अहल्याया वृत्तं तच् छ्रूयताम् इदं । 136

पुरा ऽभूद् गौतमो नाम त्रिकालज्ञो महामुनिः,
अहल्या ऽइति च तस्य ऽआसीद् भार्या रूपजिताप्सराः । 137
एकदा रूपलुब्धस् ताम् इन्द्रः प्रार्थितवान् रहः,
प्रभूणां हि विभूत्यन्धा धावत्य् अविषये मतिः । 138
सा ऽनुमेने च तं मूढा वृषस्यन्ती शचीपतिं,
तच् च प्रभावतो बुद्ध्वा तत्र ऽआगाद् गौतमो मुनिः । 139
मार्जाररूपं चक्रे च भयाद् इन्द्रो ऽपि तत्क्षणं,
कः स्थितो ऽत्र ऽइति सो ऽपृच्छद् अहल्याम् अथ गौतमः । 140
एसो ठिओ खु मज्जाओ इत्य् अपभ्रष्टवक्रया
गिरा सत्यानुरोधिन्या सा तं प्रत्यब्रवीत् पतिं । 141

सत्यं त्वज्जार इत्य् उक्त्वा विहसन् स ततो मुनिः
सत्यानुरोधकृत्यान्तं शापं तस्याम् अपातयत् । 142
पापशीले शिलाभावं भूरिकालम् अवाप्नुहि
आवनान्तरसंचारिराघवालोकनाद् इति । 143
वराङ्गलुब्धस्य अङ्गे ते तत्सहस्रं भविष्यति,
दिव्यस्त्रीं विश्वकर्मा यां निर्मास्यति तिलोत्तमां । 144
तां विलोक्य तदा एव अक्ष्णां सहस्रं भविता च ते,
इति इन्द्रम् अपि तत्कालं शपति स्म स गौतमः । 145
दत्तशापो यथाकामं तपसे स मुनिर् ययौ,
अहल्या अपि शिलाभावं दारुणं प्रत्यपद्यत । 146
इन्द्रो ऽप्य् आवृतसर्वाङ्गो वराङ्गैर् अभवत् ततः,
अशीलं कस्य नाम स्यान् न खलीकारकारणं । 147

एवं कुकर्म सर्वस्य फलत्य् आत्मनि सर्वदा,
यो यद् वपति वीजं हि लभते सो ऽपि तत्फलं । 148
तस्मात् परविरुद्धेषु न उत्सहन्ते महाशयाः,
एतद् उत्तमसत्त्वानां विधिसिद्धं हि सद्व्रतं । 149
युवां पूर्वभगिन्यौ च देव्यौ शापच्युते उभे,
तद्वद् अन्योन्यद्विषितकृन् निर्द्वन्द्वं हृदयं हि वां । 150

एतद् वसन्तकाच् छ्रुत्वा मिथो वासवदत्तया
पद्मावत्या च सुतराम् ईर्ष्यास्पर्शो ऽप्य् अमुच्यत । 151
देवी वासवदत्ता च कृत्वा साधारणं पतिं
आत्मनि 'इव प्रियं चक्रे पद्मावत्यां हितोन्मुखी । 152
तस्या महानुभावत्वं तत् तादृङ् मगधेश्वरः
बुद्ध्वा पद्मावतीसृष्टदूतेभ्यो ऽपि तुतोष सः । 153
अन्येद्युर् अथ वत्सेशं मन्त्री यौगन्धरायणः
उपेत्य संनिधौ देव्याः स्थितेष्व् अन्येष्व् अभाषत । 154
उद्योगाय 'अधुना देव कौशाम्बीं किं न गम्यते,
न 'आशङ्का मगधेशाच् च विद्यते वञ्चिताद् अपि । 155
कन्यासंबन्धनाम्ना हि साम्ना सम्यक् समाधितः
विगृह्य च कथं जह्यात् जीविताद् अधिकां सुतां । 156
सत्यं तस्य 'अनुपाल्यं च, त्वया च स न वञ्चितः,
मया स्वयं कृतं ह्य् एतन्, न च तस्य 'असुखावहं । 157
चारेभ्यश् च मया ज्ञातं यथा विकुरुते न सः,
तदर्थम् एव च 'अस्माभिः स्थितं हि दिवसान् अमून् । 158
एवं वदति निर्व्यूढकार्ये यौगन्धरायणे
मगधेश्वरसंबन्धी दूतो ऽत्र समुपाययौ । 159
तत्क्षणं स प्रविष्टो ऽत्र प्रतीहारनिवेदितः
प्रणामानन्तरासीनो वत्सराजं व्यजिज्ञपत् । 160

16

देवीपद्मावतीदत्तसंदेशपरितोषिणा
मगधेशेन निर्दिष्टम् इदं देवस्य साम्प्रतं । 161
बहुना किं, मया सर्वं ज्ञातं, प्रीतो ऽस्मि च त्वयि,
तद् यदर्थो ऽयम् आरम्भस् तत् कुरु, प्रणता वयं । 162
एतद् दूतवचः स्वच्छं वत्सेशो ऽभिननन्द सः
यौगन्धरायणीयस्य पुष्पं नयतरोर् इव । 163
ततः पद्मावतीं राज्ञ्या तत्र आनाय्य समं तया
तं दत्तप्राभृतं दूतं स संमान्य व्यसर्जयत् । 164
अथ चण्डमहासेनदूतो ऽप्य् अत्र समाययौ
प्रविश्य स यथावच् च राजानं प्रणतो ऽब्रवीत् । 165
देव चण्डमहासेनभूपतिः कार्यतत्त्ववित्
तव विज्ञातवृत्तान्तो हृष्टः संदिष्टवान् इदं । 166
प्राशस्त्यं भवतस् तावद् इयता एव उपवर्णितं
यौगन्धरायणो यत् ते मन्त्री किम् अधिकोक्तिभिः । 167
धन्या वासवदत्ता तु त्वद्भक्त्या तत् कृतं यया
येन अस्माभिः सतां मध्ये चिरम् उन्नमितं शिरः । 168
न च वासवदत्तातो भिन्ना पद्मावती मम,
तयोर् एकं हि हृदयं, तच् छीघ्रं कुरुत उद्यमं । 169
एतन् निजश्वशुरदूतवचो निशम्य
वत्सेश्वरस्य हृदये सपदि प्रमोदः

देव्यां च कोऽपि ववृधे प्रणयप्रकर्षो
भूयांस् च मन्त्रिवृषभे बहुमानबन्धः । 170

ततस् तं देवीभ्यां समम् उचितसत्कारविधिना
कृतातिथ्यं दूतं सरभसमनाः प्रेष्य मुदितं
विधास्यन्न् उद्योगं त्वरितम् अथ संमन्त्र्य सचिवैः
स चक्रे कौशाम्बीं प्रति गमनबुद्धिं नरपतिः । 171

। इति ।

॥ सप्तदशस् तरङ्गः ॥

TARANGA. 18.

ततो लावाणकात् तस्माद् अन्येद्युः सचिवैः सह
वत्सराजः स कौशाम्बीं प्रतस्थे दयितान्वितः । 1
प्रसस्रे च लसन्नादैस् तस्य आपूरितभूतलैः
बलैर् असमयोद्वेलजलराशिजलैर् इव । 2
उपमा नृपतेस् तस्य गजेन्द्रस्थस्य गच्छतः
भवेद् यदि रविर् यायाद् गगणे सोदयाचलः । 3
स सितेनातपत्रेण कृतच्छायो बभौ नृपः
जितार्कतेजःप्रीतेन सेव्यमान इव इन्दुना । 4
तेजस्विनं स्वकक्ष्याभिस् तं सर्वोपरिवर्तिनं
सामन्ताः परितो भेमुर् ध्रुवं ग्रहगणा इव । 5
पश्चात् करेणुकारूढे देव्यौ ते च विरेजतुः
श्रीभुवाव् अनुरागेण साक्षाद् अनुगते इव । 6
वल्गत्तुरङ्गसंघातखुराग्राङ्कनखञ्जता
पथि तस्य अभवद् भूमिर् उपभुक्ता इव भूपतेः । 7

एवं वत्सेश्वरो गच्छन् स्तूयमानः स वन्दिभिः
दिनैः कतिपयैः प्राप कौशाम्बीं विततोत्सवां । 8
ध्वजरक्तांशुकच्छन्ना गवाक्षोत्फुल्ललोचना
प्रद्वारदर्शितोत्तुङ्गपूर्णकुम्भकुचद्वया । 9
जनकोलाहलानन्दसंलापा सौधहासिनी
सा प्रवासागते पत्यौ तत्कालं शुशुभे पुरी । 10
देवीद्वयानुयातश् च स राजा प्रविवेश तां,
पौरस्त्रीणां च कोऽप्य् आसीत् तत्र तद्दर्शनोत्सवः । 11
अपूरि हारिहर्म्यस्थरामाननशतैर् नभः
देवीमुखजितस्य इन्दोः सैन्यैः सेवागतैर् इव । 12
वातायनगताश् च अन्याः पश्यन्त्यो निमिषेक्षणाः
चक्रुः सकौतुकायातविमानस्थाप्सरोभ्रमं । 13
काश्चिद् गवाक्षजालाग्रलग्नपक्ष्मललोचनाः
असृजन् इव नाराचपञ्जराणि मनोभुवः । 14
एकस्याः सोत्सुका दृष्टिर् नृपालोकविकस्वरा
श्रुतेः पार्श्वम् अपश्यन्त्यास् तदाख्यातिम् इव आययौ । 15
द्रुतागतायाः कस्याश्चिन् मुहुर् उच्छ्वसितौ स्तनौ
कञ्चुकाद् इव निर्गन्तुम् ईषतुस् तद्दिदृक्षया । 16
अन्यस्याः संभ्रमाच्छिन्नहारमुक्ताकणा बभुः
गलन्तो हृदयस्य इव हर्षबाष्पाम्बुशीकराः । 17

यद्य् अस्याम् आचरेत् पापम् अग्निर् लावाणके, ततः
प्रकाशको ऽप्य् असंबन्धं तमो जगति पातयेत् । 18
इति वासवदत्तां च दृष्ट्वा स्मृत्वा च तं तथा
दाहप्रवादं सोत्कण्ठा इव काश्चिद् बभाषिरे । 19
दिष्ट्या न लज्जिता देवी सपत्न्या सखितुल्यया,
इति पद्मावतीं वीक्ष्य वयस्या जगदे ऽन्यया । 20
नूनं हरमुरारिभ्यां न दृष्टं रूपम् एतयोः,
किम् अन्यथा भजेतां तौ बहुमानम् उमाश्रियौ । 21
इत्य् ऊचुर् अपरास् ते द्वे दृष्ट्वा देव्यौ परस्परं
क्षितिपत्न्यः प्रमदोत्फुल्ललोचनेन्दीवरस्रजः । 22
एवं वत्सेश्वरः कुर्वन् जननानयनोत्सवं
स्वमन्दिरं सदेवीकः प्राविशत् कृतमङ्गलः । 23
प्रवाति या ऽब्जसरसो या ऽब्धेर् इन्दूदये यथा
तत्कालं तस्य सा कापि शोभा ऽभूद् राजवेश्मनः । 24
क्षणाद् अपूरि सामन्तमङ्गलोपायनैश् च तत्
सूचयद्भिर् इव ऽशेषभूपालोपायनागमं । 25
संमान्य राजलोकं च वत्सराजः कृतोत्सवः
चित्तं सर्वजनस्य ऽइव विवेश ऽन्तःपुरं ततः । 26
देव्योर् मध्यस्थितस् तत्र रतिप्रीत्योर् इव स्मरः
पानादिलीलया राजा दिनशेषं निनाय सः । 27

अपरेद्युश् च तस्य ऽत्य नृपस्य ऽस्थानवर्तिनः
मन्त्रिणां संनिधौ विप्रो द्वारि चक्रन्द कश्चन । 28
अब्रह्मण्यम् अटव्यां मे पापैर् गोपालकैः प्रभो
पुत्रस्य चरणोच्छेदो विहितः कारणं विना । 29
तच् छ्रुत्वा तत्क्षणं द्वित्रान् वष्टभ्य ऽनाय्य भूपतिः
गोपालकान् स पप्रच्छ, ततस् ते ऽप्य् एवम् अब्रुवन् । 30
देव गोपालका भूत्वा क्रीडामो विजने वयं,
तत्र ऽको देवसेनाख्यो मध्ये गोपालको ऽस्ति नः । 31
एकदेशे च सो ऽटव्याम् उपविष्टः शिलासने,
राजा युष्माकम् अस्मि ऽति वक्त्य् अस्मान् अनुशास्ति च । 32
अस्मन्मध्ये च केनापि तस्य ऽज्ञा न विलंघ्यते,
एवं गोपालको ऽरण्ये राज्यं स कुरुते प्रभो । 33
अद्य च ऽतस्य विप्रस्य तनयस् तेन वर्त्मना
गच्छन् गोपालराजस्य प्रणामं तस्य न ऽकरोत् । 34
मा गास् त्वम् अप्रणम्य ऽति राजादेशेन जल्पतः
अस्मान् विधूय सो ऽयासीच् छासितो ऽपि हसन् बटुः । 35
ततस् तस्य ऽविनीतस्य पादच्छेदेन निग्रहं
कर्तुं गोपालराजेन वयम् आज्ञापिता बटोः । 36
धावित्वा च ततो ऽस्माभिश् छिन्नो ऽस्य चरणः प्रभो,
अस्मादृशः प्रभोर् आज्ञां को ऽतिलङ्घयितुं क्षमः । 37

एवं गोपालके राज्ञि विज्ञप्ते संप्रधार्य तत्
यौगन्धरायणो धीमान् राजानं विजने ऽब्रवीत् । 38
नूनं निधानादियुतं तत् स्थानं यत्प्रभावतः
गोपालको ऽपि प्रभवत्य् एवं, तत् तत्र गम्यतां । 39
इत्य् उक्तो मन्त्रिणा राजा कृत्वा गोपालकान् पुरः
ययौ तद् अटवीस्थानं ससैन्यः सपरिच्छदः । 40
परीक्ष्य भूमिं यावच् च खन्यते तत्र कर्षिभिः,
अधस्तात् तावद् उत्तस्थौ यक्षः शैलमयाकृतिः । 41
सो ऽब्रवीच् च, मया राजन् इदं यद् रक्षितं चिरं
पितामहनिखातं ते निधानं, स्वीकुरुष्व तत् । 42
इति वत्सेशम् उक्त्वा च तत्पूजां प्रतिगृह्य च
यक्षस् तिरोऽभूत्, खाते च महान् आविरभून् निधिः । 43
अलभ्यत महार्हं च रत्नसिंहासनं ततः,
भवन्त्य् उदयकाले हि सत्कल्याणपरम्पराः । 44
ततः कृत्स्नं समादाय निधानं स कृतोत्सवः
तान् प्रशास्य च गोपालान् वत्सेशः स्वपुरीं ययौ । 45
तत्र अरुणमणिग्रामकिरणप्रसरैः प्रभोः
प्रतापाक्रमणं दिक्षु भविष्यद् इव दर्शयन् । 46
रौप्याङ्कुरमुखप्रोतमुक्तासंततिदन्तुरं
मुहुर् हासम् इव आलोच्य तन्मन्त्रिसतिविस्मयं । 47

ददृशुस् तन् नृपानीतं हेमसिंहासनं जनाः
ननन्दुश् च कृतानन्ददुन्दुभिध्वानसुन्दरं । 48
मन्त्रिणो ऽप्य् उत्सवं चक्रुर् जयं निश्चित्य भूपतेः,
आमुखापातिकल्याणं कार्यसिद्धिं हि शंसति । 49
ततः पताकाविद्युद्भिर् आकीर्णे गगणान्तरे
ववर्ष राजजलदः कनकं सो ऽनुजीविषु । 50
उत्सवेन च नीते ऽस्मिन् दिने यौगन्धरायणः
चित्तं जिज्ञासुर् अन्येद्युर् वत्सेश्वरम् अभाषत । 51
एतत् कुलक्रमायातं महासिंहासनं त्वया
यत् प्राप्तं, तत् समारुह्य देव ऽलंक्रियताम् इति । 52
विजित्य पृथ्वीम् आरूढा यत्र ते प्रपितामहाः,
तत्र जित्वा दिशः सर्वाः कामम् आरोहतः प्रथाः । 53
जित्वा ऽएव ऽइमां समुद्रान्तां पृथ्वीं पृथुविभूषणां
अलंकरोमि पूर्वेषां रत्नसिंहासनं महत् । 54
इत्य् ऊचिवान् नरपतिर् न ऽआरुरोह स सम्प्रतिं,
संभवत्य् अभिजातानाम् अभिमानो ह्य् अकृत्रिमः । 55
ततः प्रीतस् तम् आह स्म गुप्तं यौगन्धरायणः,
साधु देव, कुरु प्राच्यां तर्हि पूर्वं जयोद्यमं । 56
तच् छ्रुत्वा ऽएव प्रसङ्गात् तं राजा पप्रछ मन्त्रिणं,
स्थितास्व् अप्य् उत्तराद्यासु प्राक् प्राचीं यान्ति किं नृपाः । 57

एतच् छ्रुत्वा जगाद 'एवं पुनर् यौगन्धरायणः,
स्फीता 'अपि राजन् कौबेरी म्लेच्छसंसर्गगर्हिता । 58
अर्काद्यस्तमये हेतुः पश्चिमा 'अपि न पूज्यते,
आसन्नराक्षसा दुष्टा दक्षिणा 'अप्य् अन्तकाश्रिता । 59
प्राच्याम् उदेति सूर्यस् तु, प्राचीम् इन्द्रो ऽधितिष्ठति,
जाह्नवी याति च प्राचीं, तेन प्राची प्रशस्यते । 60
देशेष्व् अपि च विन्ध्याद्रिहिमवन्मध्यवर्तिषु
जाह्नवीजलपूतो यः स प्रशस्यतमो मतः । 61
तस्मात् प्राचीं प्रयान्त्य् आदौ राजानो मङ्गलैषिणः,
निवसन्ति च देशे ऽपि सुरसिन्धुसमाश्रिते । 62
पूर्वजैर् अपि हि प्राचीप्रक्रमेण जिता दिशः,
गङ्गोपकण्ठे वासश् च विहितो हस्तिनापुरे । 63
शतानीकस् तु कौशाम्बीं रम्यभावेन शिश्रिये
साम्राज्ये पौरुषाधीने पश्यन् देशम् अकारणं । 64
इत्य् उक्त्वा विरते तत्र तस्मिन् यौगन्धरायणे
राजा पुरुषकारैकबहुमानाद् अभाषत । 65
सत्यं न देशनियमः साम्राज्यस्य 'इह कारणं,
संपत्सु हि सुसत्त्वानाम् एकहेतुः स्वपौरुषं । 66
एको ऽप्य् आश्रयहीनो हि लक्ष्मीं प्राप्नोति सत्त्ववान्,
श्रुता किं न 'अत्र युष्माभिः पुंसः सत्त्ववतः कथा । 67

एवम् उक्त्वा स वत्सेशः सचिवाभ्यर्थितः पुनः
विचित्रां संनिधौ देव्योर् इमाम् अकथयत् कथां । 68

अस्ति भूतलविख्याता या ऽइयम् उज्जयिनी पुरी,
तस्याम् आदित्यसेनाख्यः पूर्वम् आसीन् महीपतिः । 69
आदित्यस्य ऽइव यस्य ऽइह न चस्खाल किल क्वचित्
प्रतापनिलयस्य ऽएकचक्रवर्तितया रथः । 70
भासयत्य् उच्छ्रिते व्योम यच्छत्रे तुहिनत्विषि
न्यवर्तन्त ऽआतपत्राणि राज्ञाम् अपगतोष्मणां । 71
समस्तभूतलाभोगसंभवानां बभूव सः
भाजनं सर्वरत्नानाम्, अम्बुराशिर् इव ऽअम्भसां । 72
स कदाचन कस्यापि हेतोर् यत्र ऽआगतो नृपः
ससैन्यो जाह्नवीकूलम् आसाद्य ऽअवस्थितो ऽभवत् । 73
तत्र तं गुणवर्माख्यः कोऽप्य् आढ्यस् तत्प्रदेशजः
अभ्यगान् नृपम् आदाय कन्यारत्नम् उपायनं । 74
रत्नं त्रिभुवने ऽप्य् एषा कन्या ऽउत्पन्ना गृहे मम,
न ऽअन्यत्र दातुं शक्या च, देवो हि प्रभुर् ईदृशः । 75
इत्य् आवेद्य प्रतीहारमुखेन ऽअत्र प्रविश्य सः
गुणवर्मा निजां तस्मै राज्ञे कन्याम् अदर्शयत् । 76

स तां तेजस्वतीं नाम दीप्तिद्योतितदिङ्मुखां
अनङ्गमङ्गलावासरत्नदीपशिखाम् इव । 77
पश्यन् स्नेहमयो राजा 'आश्लिष्टस् तत्कान्तितेजसा
कामाग्निना 'इव संतप्तः स्विन्नो विगलितः स च । 78
स्वीकृत्य 'एतां च तत्कालं महादेवीपदोचितां
चकार गुणवर्माणं परितुष्य 'आत्मनः समं । 79
ततस् तां परिणीय 'एव प्रियां तेजस्वतीं नृपः
कृतार्थमानी स तया साकम् उज्जयिनीं ययौ । 80
तत्र तन्मुखसंसक्तैकदृष्टी राजा स्य् अभूत् तथा,
ददर्श राजकार्याणि न यथा सुमहान्त्य् अपि । 81
तेजस्वतीकलालापकीलिता 'इव किल श्रुतिः
न 'अवसन्नप्रजाक्रन्दैस् तस्य 'आक्रष्टुम् अशक्यत । 82
चिरप्रविष्टो निरगान् न 'एव सो ऽन्तःपुरान् नृपः,
निरगाद् अरिवर्गस्य हृदयात् तु रुजाज्वरः । 83
कालेन तस्य जज्ञे च राज्ञः सर्वाभिनन्दिता
कन्या तेजस्वतीदेव्यां, बुद्धौ च विजिगीषुता । 84
परमाद्भुतरूपा सा तृणीकृत्य जगत्त्रयं
हर्षं तस्य 'अकरोत् कन्या प्रतापं च जिगीषुता । 85
अथ 'अभियोक्तुम् उत्सिक्तं सामन्तं कंचिद् एकदा
आदित्यसेनः प्रययाव् उज्जयिन्याः स भूपतिः । 86

तां च तेजस्वतीं राज्ञीं समारूढकरेणुकां
सहप्रयायिनीं चक्रे सैन्यस्य इव अधिदेवतां । 87
आरुरोह वराश्वं च दर्पोद्धटननिर्भरं
जङ्गमाद्रिनिभं तुङ्गं सश्रीवृक्षं समेखलं । 88
आसृक्कोत्थितपादाभ्याम् अभ्यस्यन्तम् इव अम्बरे
गतिं गरुत्मतो दृष्ट्वा वेगसब्रह्मचारिणीं । 89
जवस्य मम पर्यन्ता किं नु स्याद् इति मेदिनीं
कलयन्तम् इव उन्नम्य कन्धरां धीरया दृशा । 90
किंचिद् गत्वा च संप्राप्य समां भूमिं स भूपतिः
अश्वम् उत्तेजयामास तेजस्वत्याः प्रदर्शयन् । 91
सो ऽश्वस् तत्पार्ष्णिघातेन यन्त्रेण इव ईरितः शरः
जगाम क्वाप्य् अतिजवाद् अलक्ष्यो लोकलोचनैः । 92
तद् दृष्ट्वा विह्वले सैन्ये हयारोहाः सहस्रधा
अन्वधावन् न च प्रापुस् तम् अश्वापहृतं नृपं । 93
ततस् च अनिष्टम् आशंक्य ससैन्या मन्त्रिणो भयात्
आदाय देवीं क्रन्दन्तीं निवृत्य उज्जयिनीं ययुः । 94
तत्र ते पिहितद्वारकृतप्राकारगुप्तयः
राज्ञः प्रवृत्तिं चिन्वन्तस् तस्थुर् आश्वासितप्रजाः । 95
अत्र अन्तरे स राजा अपि नीतो ऽभूत् तेन वाजिना
सरौद्रसिंहसंचारां दुर्गां विन्ध्याटवीं क्षणात् । 96

तत्र दैवात् स्थिते तस्मिन् अश्वे स सहसा नृपः
आसीन् महाटवीदत्तदिग्मोहो विह्वलाकुलः । 97
गतिम् अन्याम् अपश्यंश् च सो ऽवतीर्य प्रणम्य च
तं जगाद् अश्वजातिज्ञो राजा वरतुरङ्गमं । 98
देवस् त्वं, न प्रभुर्ह्नोहं त्वादृशः कर्तुम् अर्हति,
तन् मे त्वम् एव शरणं, शिविरं नय मां पथा । 99
तच् छ्रुत्वा सानुतापः सन् सो ऽश्वो जातिस्मरस् तदा
तत् तथा इत्य् अग्रहीद् बुद्ध्या, दैवतं हि हयोत्तमाः । 100
ततो राज्ञि समारूढे स प्रतस्थे तुरङ्गमः
स्वच्छशीताम्बुसरसा मार्गेन अध्वक्लमच्छिदा । 101
सायं च प्रापयामास स योजनशतान्तरं
उज्जयिन्याः समीपं तं राजानं वाजिसत्तमः । 102
तद्वेगविजितान् वीक्ष्य सप्त अपि निजवाजिनः
अस्ताद्रिकन्दरालीने लज्जया इव अंशुमालिनि । 103
तमसि प्रसृते द्वाराण्य् उज्जयिन्यां विलोक्य सः
पिहितानि श्मशानं च बहिस् तत्कालभीषणं । 104
निनाय एनं निवासाय भूपतिं बुद्धिमान् हयः
बाह्योकान्तस्थितं तत्र गुप्तं विप्रमठं निशि । 105
निशातिवाह्ययोग्यं च तं स दृष्ट्वा मठं नृपः
आदित्यसेनः प्रारेभे प्रवेष्टुं श्रान्तवाहनः । 106

रुरुधुस् तस्य विप्रास् च प्रवेशं तन्निवासिनः,
श्मशानपालस् चौरो वा कोऽप्य् असाव् इति वादिनः । 107
निर्ययुस् ते च संसक्तकलकोलाहलनिष्ठुराः,
भयकार्कश्यकोपानां गृहं हि छान्दसा द्विजाः । 108
एटत्सु तेषु तत्र एको निर्जगाम ततो मठात्
विदूषकाख्यो गुणवान् धुर्यः सत्त्ववतां द्विजः । 109
यो युवा बाहुशाली च तपसा आराध्य पावकं
प्राप खड्गोत्तमं तस्माद् ध्यातमात्रोपगामिनं । 110
स दृष्ट्वा तं निशि प्राप्तं धीरो भव्याकृतिं नृपं,
प्रच्छन्नः कोऽपि देवो ऽयम् इति दध्यौ विदूषकः । 111
विधूय विप्रांस् च अन्यांस् तान् स सर्वान् उचिताशयः
नृपं प्रवेशयामास मठान्तः प्रश्रयानतः । 112
विश्रान्तस्य च दासीभिर् धूताधरजसः क्षणात्
आहारं कल्पयामास राज्ञस् तस्य निजोचितं । 113
तं च अपनीतपर्याणं तदीयं तुरगोत्तमं
यवसादिप्रदानेन चकार विगतश्रमं । 114
रक्षाम्य् अहं शरीरं ते, तत् सुखं स्वपिहि प्रभो,
इत्य् उवाच च तं श्रान्तम् आस्तीर्णशयनं नृपं । 115
सुप्ते च तस्मिन् द्वारस्थो जागरामास स द्विजः
चिन्तितोपस्थिताग्नेयखड्गहस्तो ऽखिलां निशां । 116

प्रातश् च तस्य नृपतेः प्रबुद्धस्य 'एव स स्वयं
अनुक्त एव तुरगं सज्जीचक्रे विदूषकः । 117
राजा 'अपि स तम् आमन्त्र्य समारुह्य च वाजिनं
विवेश 'उज्जयिनीं दूराद् दृष्टो हर्षाकुलैर् जनैः । 118
प्रविष्टम् अभिजग्मुस् तं सर्वाः प्रकृतयः क्षणात्
तदागमनजानन्दलसत्कलकलारवाः । 119
आययौ राजभवनं स राजा सचिवान्वितः,
ययौ तेजस्वतीदिव्या मनसश् च महाज्वरः । 120
वाताहतोत्सवाक्षिप्तपताकांशुकपंक्तिभिः
उत्सारिता इव 'अभूवन् नगर्यास् तत्क्षणं शुचः । 121
अकरोद् आदिनान्तं च देवी तावन् महोत्सवं,
यावन् नगरलोको ऽभूत् सार्कः सिन्दूरपिङ्गलः । 122
अन्येद्युः स तम् आदित्यसेनो राजा विदूषकं
मठाद् आनाययामास तस्मात् सर्वैर् द्विजैः सह । 123
प्रख्याप्य रात्रिवृत्तान्तं ददौ तस्मै स तत्क्षणं
विदूषकाय ग्रामाणां सहस्रम् उपकारिणे । 124
पौरोहित्ये च चक्रे तं प्रदत्तछत्रवाहनं
विप्रं कृतज्ञो नृपतिः कौतुकालोकितं जनैः । 125
एवं तदा 'एव सामन्ततुल्यः सो ऽभूद् विदूषकः,
मोघा हि नाम जायेत महत्सु 'उपकृतिः कुतः । 126

यांश् च प्राप नृपाद् ग्रामांस् तान् स सर्वान् महाशयः
तन्मठाश्रयिभिर् विप्रैः समं साधारणं व्यधात् । 127
तस्थौ च सेवमानस् तं राजानं स तदाश्रितः
भुञ्जानश् च सह ऽन्यैस् तैर् ब्राह्मणैर् ग्रामसंचयं । 128
काले गच्छति च ऽन्ये ते सर्वे प्राधान्यम् इच्छवः
न ऽएव तं गणयामासुर् द्विजा धनमदोद्धताः । 129
विभिन्नैः सप्तसंख्याकैर् एकस्थानाश्रयैर् मिथः
संघर्षात् तैर् अबाध्यन्त ग्रामा दुष्टैर् ग्रहैर् इव । 130
उच्छृङ्खलेषु तेषु आसीद् उदासीनो विदूषकः,
अल्पसत्त्वेषु धीराणाम् अवज्ञा ऽएव हि शोभते । 131
एकदा कलहासक्तान् दृष्ट्वा तान् अभ्युपाययौ
कश्चिच् चक्रधरो नाम विप्रः प्रकृतिनिष्ठुरः । 132
परार्थन्यायवादेषु काणो ऽप्य् अम्लानदर्शनः
कुब्जो ऽपि वाचि सुस्पष्टो विप्रस् तान् इत्य् अभाषत । 133
प्राप्ता भिक्षाचरैर् भूत्वा भवद्भिः श्रीर् इयं शठाः,
तन् नाशयथ किं ग्रामान् अन्योन्यम् असहिष्णवः । 134
विदूषकस्य दोषो ऽयं, येन यूयम् उपेक्षिताः,
तद् असंदिग्धम् अचिरात् पुनर् भिक्षां भ्रमिष्यथ । 135
वरं हि दैवायत्तैकबुद्धि स्थानम् अनायकं,
न तु विप्लुतसर्वार्थं विभिन्नं बहुनायकं । 136

तद् एकं नायकं धीरं कुरुध्वं वचसा मम,
स्थिरया यदि कृत्यं वो धुर्यरक्षितया श्रिया । 137
तच् छ्रुत्वा नायकत्वं ते सर्वे ऽप्य् ऐहन् यदा ऽऽत्मनः,
तदा विचिन्त्य मूढांस् तान् पुनश् चक्रधरो ऽब्रवीत् । 138
संघर्षशालिनां तर्हि समयं वो ददाम्य् अहं,
इतः श्मशाने शूलायां त्रयश् चौरा निसूदिताः । 139
नासास् तेषां निशि छित्वा यः सुसत्त्व इहा ऽऽनयेत्,
स युष्माकं प्रधानं स्याद्, वीरो हि स्वाम्यम् अर्हति । 140
इति चक्रधरेणा ऽऽक्तान् विप्रांस् तान् अन्तिकस्थितः,
कुरुधम् एतत् को दोष इत्य् उवाच विदूषकः । 141
ततस् ते ऽस्य ऽवदन् विप्रा, न ऽएतत् कर्तुं क्षमा वयं,
यो वा शक्तः स कुरुतां, समये च वयं स्थिताः । 142
ततो विदूषको ऽवादीद्, अहम् एतत् करोमि भोः,
आनयामि निशि छित्वा नासास् तेषां श्मशानतः । 143
ततस् तद् दुष्करं मत्वा ते ऽपि मूढास् तम् अब्रुवन्,
एवं कृते त्वम् अस्माकं स्वामी, नियम एष नः । 144
इत्य् एवं व्याप्य नियमं प्राप्तायां रजनौ च तान्
आमन्त्र्य विप्रान् प्रययौ श्मशानं स विदूषकः । 145
प्रविवेश च तद् वीरो निजं कर्म ऽइव भीषणं
चिन्तितोपस्थिताग्नेयकृपाणैकपरिग्रहः । 146

डाकिनीनादसंवृद्धगृध्रवायसवाशिते
उल्कामुखमुखोल्काग्निविस्तारितचितानले । 147
ददर्श तत्र मध्ये च स तान् शूलाधिरोपितान्
पुरुषान् नासिकाछिद्भिया इव ऊर्ध्वकृताननान् । 148
यावच् च निकटं तेषां प्राप, तावत् त्रयो ऽपि ते
वेतालाधिष्ठितास् तस्मिन् प्रहरन्ति स्म मुष्टिभिः । 149
निष्कम्प एव खड्गेन सो ऽपि प्रतिजघान तान्,
न शिथिलितः प्रयत्नो हि धीराणां हृदये भिया । 150
तेन अपगतवेतालविकाराणां स नासिकाः
तेषां चकर्त बद्ध्वा च कृती जग्राह वाससि । 151
आगछंश् च ददर्श एकं शवस्य उपरि संस्थितं
प्रव्राजकं श्मशाने ऽत्र जपन्तं स विदूषकः । 152
तच्चेष्टनालोकनक्रीडाकौतुकाद् उपगम्य च
प्रछन्नः पृष्ठतस् तस्य तस्थौ प्रव्राजकस्य सः । 153
क्षणात् प्रव्राजकस्य अधः फूत्कारं मुक्तवान् शवः,
निरगाच् च मुखात् तस्य ज्वाला नाभिश् च सर्षपाः । 154
गृहीत्वा सर्षपांस् तांश् च स परिव्राजकस् ततः
उत्थाय ताडयामास शवं पाणितलेन तं । 155
उदतिष्ठत् स च उत्तालवेतालाधिष्ठितः शवः,
आरुरोह च तस्य एव स्कन्धे प्रव्राजको ऽथ सः । 156

तदारूढस् च सहसा गन्तुं प्रववृते ततः,
विदूषको ऽपि तं तूष्णीम् अन्वगच्छद् अलक्षितः । 157
नातिदूरम् अतिक्रम्य स ददर्श विदूषकः
शून्यं कात्यायनीमूर्तिसनाथं देवतागृहं । 158
तत्र ऽवतीर्य वेतालस्कन्धात् प्रव्राजकस् ततः
विवेश गर्भभवनं, वेतालो ऽप्य् अपतद् भुवि । 159
विदूषकस् च तत्र ऽासीद् युक्त्या पश्यन् अलक्षितः,
प्रव्राजको ऽपि संपूज्य तत्र देवीं व्यजिज्ञपत् । 160
तुष्टा ऽसि यदि, तद् देवि देहि मे वरम् ईप्सितं,
अन्यथा ऽात्मोपहारेण प्रीणामि भवतीम् अहं । 161
इत्य् उक्तवन्तं तं तीव्रमन्त्रसाधनगर्वितं
प्रव्राजकं जगाद ऽेवं बाणी गर्भगृहोद्गता । 162
आदित्यसेननृपतेः सुताम् आनीय कन्यकां
उपहारीकुरुष्व ऽिह, ततः प्राप्स्यसि वाञ्छितं । 163
एतच् छ्रुत्वा स निर्गत्य करेण ऽाहत्य तं पुनः
प्रव्राड् उत्थापयामास वेतालं मुक्तफूत्कृतिं । 164
तस्य च स्कन्धम् आरुह्य निर्यद्वक्त्रानलार्चिषः
आनेतुं राजपुत्रीं ताम् उत्पत्य नभसा ययौ । 165
विदूषको ऽपि तत् सर्वं दृष्ट्वा तत्र व्यचिन्तयत्,
कथं राज्ञः सुता ऽनेन हन्यते मयि जीवति । 166

इह 'एव तावत् तिष्ठामि, यावद् आयात्य् असौ शठः,
इत्य् आलोच्य स तत्र 'एव तस्थौ छन्नो विदूषकः । 167
प्रव्राजकश् च गत्वा 'एव वातायनपथेन सः
प्रविश्य 'अन्तःपुरं प्राप सुप्तां निशि नृपात्मजां । 168
आययौ च गृहीत्वा तां गगणेन तमोमयः
कान्तिप्रकाशितदिशं राहुः शशिकलाम् इव । 169
हा तात हा 'अम्ब 'इति च तां क्रन्दन्तीं कन्यकां वहन्
तत्र 'एव देवीभवने सो ऽन्तरिक्षाद् अवातरत् । 170
प्रविवेश च तत्कालं वेतालं प्रविमुच्य सः
कन्यारत्नं तद् आदाय देवीगर्भगृहान्तरं । 171
तत्र यावन् निहन्तुं तां राजपुत्रीम् इयेष सः,
तावद् आकृष्टखड्गो ऽत्र प्रविवेश विदूषकः । 172
आः पाप मालतीपुष्पम् अश्मना हन्तुम् ईहसे,
यद् अस्याम् आकृतौ शस्त्रं व्यापारयितुम् इच्छसि । 173
इत्य् उक्त्वा 'आकृष्य केशेषु शिरस् तस्य विविह्वलतः
प्रव्राजकस्य चिच्छेद खड्गेन स विदूषकः । 174
आश्वासयामास च तां राजपुत्रीं भयाकुलां
प्रविशन्तीम् इव 'अङ्गानि किंचित् प्रत्यभिजानतीं । 175
कथम् अन्तःपुरं रात्रौ राजपुत्रीम् इमाम् इतः
नयेयम् इति तत्कालं स चे वीरो व्यचिन्तयत् । 176

भो विदूषक शृणव् एतद्, यो ऽयं प्रव्राड् त्वया हृतः,
मन्त्रान् एतस्य वेतालः सिद्धो ऽभूत् सर्षपास् तथा । 177
ततो ऽस्य पृथ्वीराज्ये च वाञ्छा राजात्मजासु च
उदपद्यत, तेन अयम् एवं मूढो ऽद्य वञ्चितः । 178
तद् गृहाण एतदीयांस् त्वं सर्षपान् वीर, येन ते
इमाम् एकां निशाम् अद्य भविष्यत्य् अम्बरे गतिः । 179
इत्य् आकाशगता वाणी जातहर्षं जगाद तं,
अनुगृह्णन्ति हि प्रायो देवता अपि तादृशं । 180
ततो वस्त्राञ्चलात् तस्य स परिव्राजकस्य तान्
जग्राह सर्षपान् हस्ते ताम् अङ्के च नृपात्मजां । 181
यावच् च देवीभवनात् स तस्मान् निर्ययौ बहिः
उच्चचार पुनस् तावद् अन्या नभसि भारती । 182
इह एव देवीभवने मासस्य अन्ते पुनस् त्वया
आगन्तव्यं महावीर, विस्मर्तव्यम् इदं न ते । 183
तच् छ्रुत्वा स तथा इत्य् उक्त्वा सद्यो देवीप्रसादतः
उत्पपात नभो बिभ्रद् राजपुत्रीं विदूषकः । 184
गत्वा च गगणेन आशु स ताम् अन्तःपुरान्तरं
प्रावेशयद् राजसुतां समाश्वस्ताम् उवाच च । 185
न मे भविष्यति प्रातर् गतिर् व्योम्नि, ततश् च मां
सर्वे द्रक्ष्यन्ति निर्यान्तं, तत् संप्रत्य् एव याम्य् अहं । 186

इति तेन 'उदिता बाला बिभ्यती सा जगाद् तं,
गते त्वयि मम प्राणास् त्रासाक्रान्ताः प्रयान्त्य् अमी । 187
तन् महाभाग मा गास् त्वं, देहि मे जीवितं पुनः,
प्रतिपन्नार्थनिर्वाहः सहजं हि सतां व्रतं । 188
तच् छ्रुत्वा चिन्तयामास स सुसत्त्वो विदूषकः,
त्यक्त्वा 'इमां यदि गच्छामि मुञ्चेत् प्राणान् भयाद् इयं । 189
ततश् च नृपतेर् भक्तिः का मया विहिता भवेत्?
इत्य् आलोच्य स तत्र 'एव तस्थाव् अन्तःपुरे निशि । 190
व्यायामजागरश्रान्तो ययौ निद्रां शनैश् च सः,
राजपुत्री त्व् अनिद्रा 'एव भीता ताम् अनयन् निशां । 191
विश्राम्यतु क्षणं तावद् इति प्रेमार्द्रमानसा
सुप्तं प्रबोधयामास सा प्रभाते ऽपि न 'एव तं । 192
ततः प्रविष्टा ददृशुस् तम् अन्तःपुरचारिकाः,
ससंभ्रमाश् च गत्वा 'एव राजानं तं व्यजिज्ञपन् । 193
राजा 'अप्य् अवेक्षितुं तत्त्वं प्रतीहारं व्यसर्जयत्,
प्रतीहारश् च गत्वा 'अन्तस् तत्र 'अपश्यद् विदूषकं । 194
शुश्राव च यथावृत्तं स तद् राजसुतामुखात्,
तथा 'एव गत्वा राज्ञे च स समग्रं न्यवेदयत् । 195
विदूषकस्य सत्त्वज्ञस् तच् छ्रुत्वा स महीपतिः,
किम् एतत् स्याद् इति क्षिप्रं समुद्भ्रान्त इव 'अभवत् । 196

आनाययच् च दुहितुर् मन्दिरात् तं विदूषकं
दत्तानुयात्रं मनसा तस्याः स्नेहानुपातिना । 197
पप्रछ च यथावृत्तं स राजा तम् उपागतं,
आमूलतश् च सो ऽप्य् अस्मै विप्रो वृत्तान्तम् अब्रवीत् । 198
अदर्शयच् च वस्त्रान्ते निबद्धाश् चौरनासिकाः
प्रव्राट्संबन्धिनस् तांश् च सर्षपान् भूमिभेदिनः । 199
ततः संभाव्य सत्यं तत्, तांश् च आनाय्य मठद्विजान्
सर्वांश् चक्रधरोपेतान्, पृष्ट्वा तन्मूलकारणं । 200
स्वयं श्मशाने गत्वा च दृष्ट्वा तांश् छिन्ननासिकान्
पुरुषांस्, तं च निर्लूनकण्ठं प्रव्राजकाधमं । 201
उत्पन्नप्रत्ययो राजा स तुतोष महाशयः
विदूषकाय कृतिने सुताप्राणप्रदायिने । 202
ददौ तस्मै च ताम् एव तदा एव तनयां निजां.
किम् अदेयम् उदाराणाम् उपकारिषु तुष्यतां । 203
श्रीर् उवास अम्बुजप्रीत्या नूनं राजसुताकरे,
गृहीतपाणिर् येन अस्या लेभे लक्ष्मीं विदूषकः । 204
ततो राजोपचारेण स तया कान्तया सह
आदित्यसेननृपतेस् तस्थौ श्लाघ्ययशा गृहे । 205
अथ यातेषु दिवसेष्व् एकदा दैवचोदिता
तम् उवाच निशायां सा राजपुत्री विदूषकं । 206

नाथ स्मरसि यत् तत्र तव देवीगृहे निशि
मासान्ते त्वम् इह ऽआगच्छेर् इत्य् उक्तं दिव्यया गिरा । 207
तत्र च ऽअद्य गतो मासो, भवतस् तच् च विस्मृतं,
इत्य् उक्तः प्रियया स्मृत्वा स जहर्ष विदूषकः । 208
साधु स्मृतं त्वया तन्वि, विस्मृतं तन् मया पुनः,
इत्य् उक्त्वा ऽआलिङ्गनं च ऽअस्यै स ददौ पारितोषिकं । 209
सुप्तायां च ततस् तस्यां निर्गत्य ऽअन्तःपुरान् निशि
आदाय खड्गं स्वस्थः संस् तद् देवीभवनं ययौ । 210
प्राप्तो विदूषको ऽहं भोर् इति तत्र वदन् बहिः,
प्रविश ऽइत्य् अशृणोद् वाचम् अन्तः केनाप्य् उदीरितां । 211
प्रविश्य च ऽअन्तरे सो ऽत्र दिव्यम् आवासम् ऐक्षत,
तदन्तर् दिव्यरूपां च कन्यां दिव्यपरिच्छदां । 212
स्वप्रभाभिन्नतिमिरां रजनीं ज्वलिताम् इव
हरकोपाग्निनिर्दग्धस्मरसंजीवनौषधिं । 213
किम् एतद् इति साश्चर्यः स तया हृष्टया स्वयं
सस्नेहबहुमानेन स्वागतेन ऽअभ्यनन्द्यत । 214
उपविष्टं च संजातविश्रम्भं प्रेमदर्शनात्
तत्स्वरूपपरिज्ञानसोत्सुकं सा तम् अब्रवीत् । 215
अहं विद्याधरीकन्या भद्रा नाम महान्वया,
इह कामचरत्वाच् च त्वाम् अपश्यम् अहं तदा । 216

त्वद्गुणाकृष्टचित्ता च तत्कालम् अहम् एव तां
अदृश्यां बाणीम् असृजं पुनरागमनाय ते । 217
अद्य विद्याप्रयोगाच् च संमोह्य प्रेरिता मया
सा ते राजसुता एव अस्मिन् कार्ये स्मृतिम् अत्रीजनत् । 218
त्वदर्थं च स्थिता अस्मि इह, तत् तुभ्यम् इदम् अर्पितं
शरीरं सुन्दर मया, कुरु पाणिग्रहं मम । 219
इत्य् उक्तो भद्रया भव्यो विद्याधर्या विदूषकः
तथा इति परिणिन्ये तां गान्धर्वविधिना तदा । 220
अतिष्ठद् अथ तत्र एव दिव्यं भोगम् अवाप्य सः
स्वपौरुषफलान्य् एव प्रियया संगतस् तया । 221

अत्र अन्तरे प्रबुद्धा सा राजपुत्री निशात्यये
भर्तारं तम् अपश्यन्ती विषादं सहसा अगमत् । 222
उत्थाय च अन्तिकं मातुः प्रस्खलद्भिः पदैर् ययौ
विह्वला सा गलद्बाष्पतरङ्गितविलोचना । 223
स पतिर् मे गतः क्वापि रात्राव् इति च मातरं
आत्मापराधसभया सानुतापा च सा अभ्यधात् । 224
ततस् तन्मातरि स्नेहात् संभ्रान्तायां क्रमेण तत्
बुद्ध्वा राजा अपि तत्र एत्य परमाकुलताम् अगात् । 225
जाने श्मशानवाक्यं तद् गतो ऽसौ देवतागृहं,
इत्य् उक्तो राजसुतया राजा तत्र स्वयं ययौ । 226

तत्र विद्याधरीविद्याप्रभावेण तिरोहितं
विचित्य ऽपि न लेभे तं स क्षितीशो विदूषकं । 227
ततो राज्ञि परावृत्ते निराशां तां नृपात्मजां
देहत्यागोन्मुखीम् एत्य ज्ञानी कोऽप्य् अब्रवीद् इदं । 228
न ऽरिष्टशङ्का कर्तव्या, स हि ते वर्तते पतिः
युक्तो दिव्येन भोगेन, त्वाम् उपेष्यति च ऽचिरात् । 229
तच् छ्रुत्वा राजपुत्री सा धारयामास जीवितं
हृदि प्रविष्टया रुद्धं तत्प्रत्यागमवाञ्छया । 230

विदूषकस्य ऽपि ततस् तिष्ठतस् तत्र तां प्रियां
भद्रां योगेश्वरी नाम सखी काचिद् उपाययौ । 231
उपेत्य सा रहस्य् एनाम् इदं भद्राम् अथ ऽब्रवीत्,
सखि मानुषसंसर्गात् क्रुद्धा विद्याधरास् त्वयि । 232
पापं च ते चिकीर्षन्ति, तद् इतो गम्यतां त्वया,
अस्ति पूर्वाम्बुधेः पारे पुरं कार्कोटकाभिधं । 233
तद् अतिक्रम्य च नदी शीतोदा नाम पावनी,
तीर्त्वा ताम् उदयाख्यश् च सिद्धक्षेत्रं महागिरिः । 234
विद्याधरैर् अनाक्रम्यस्, तत्र त्वं गच्छ साम्प्रतं,
प्रियस्य मानुषस्य ऽस्य कृते चिन्तां च मा कृथाः । 235
एतद् धि सर्वम् एतस्य कथयित्वा गमिष्यसि,
येन ऽएष पश्चात् तत्र ऽएव सत्वरो ह्य् आगमिष्यति । 236

इत्य् उक्ता सा तया साध्व्या भद्रा भयवशीकृता
विदूषकानुरक्ता ऽपि प्रतिपेदे तथा ऽइति तत् । 237
उक्ता च तस्य तद् युक्त्या दत्वा च स्वाङ्गुलीयकं
विदूषकस्य रात्र्यन्तसमये सा तिरोदधे । 238
विदूषकश् च पूर्वस्मिन् शून्ये देवगृहे स्थितं
क्षणाद् अपश्यद् आत्मानं न भद्रां न च मन्दिरं । 239
स्मरन् विद्याप्रपञ्चं च पश्यंश् च ऽएव ऽअङ्गुलीयकं
विषादविस्मयावेशवशः सो ऽभूद् विदूषकः । 240
अचिन्तयच् च तस्याः स वचः स्वप्नम् इव स्मरन्,
गता तावन् निवेद्य ऽएव मम सा ऽउदयपर्वतं । 241
तन् मया ऽप्य् आशु तत्र ऽएव गन्तव्यं तदवाप्तये,
न च ऽएवं लोकदृष्टं मां लब्ध्वा राजा परित्यजेत् । 242
तस्माद् युक्तिं करोमि ऽइह, कार्यं सिध्यति मे यथा,
इति संचिन्त्य मतिमान् रूपम् अन्यत् स शिश्रिये । 243
जीर्णवासा रजोलिप्तो भूत्वा देवीगृहात् ततः
निरगाद् अथ हा भद्रे हा भद्र इति स ब्रुवन् । 244
तत्क्षणं च विलोक्य ऽएनं जनास् तद्देशवर्तिनः,
सो ऽयं विदूषकः प्राप्त इति कोलाहलं व्यधुः । 245
बुद्ध्वा च राज्ञा निर्गत्य स्वयं दृष्ट्वा तथाविधः
उन्मत्तचेष्टो ऽवष्टभ्य स नीतो ऽभूत् स्वमन्दिरं । 246

तत्र स्नेहाकुलैर् यद् यद् उक्तो ऽभूद् भृत्यबान्धवैः,
तत्र तत्र स हा भद्र इति प्रत्युत्तरं ददौ । 247
वैद्योपदिष्टैर् अभ्यङ्गैर् अभ्यक्तो ऽपि स तत्क्षणं
अङ्गम् उद्धूलयामास भूरिणा भस्मरेणुना । 248
स्नेहेन राजपुत्र्या च स्वहस्ताभ्याम् उपाहृतः
आहारस् तेन सहसा पादेन आहत्य चिक्षिपे । 249
एवं स तस्थौ कतिचिद् दिवसांस् तत्र निःस्पृहः
पाटयन् निजवस्त्राणि कृतोन्मादो विदूषकः । 250
अशक्यप्रतिकारो ऽयं, तत् किमर्थं कदर्थ्यते,
त्यजेत् कदाचन प्राणान्, ब्रह्महत्या भवेत् ततः । 251
स्वच्छन्दचारिणस् त्व् अस्य कालेन कुशलं भवेत्,
इत्य् आलोच्य स च आदित्यसेनो राजा मुमोच तं । 252
ततः स्वच्छन्दचारी सन्न् अन्येद्युः साङ्गुलीयकः
वीरो भद्रां प्रति स्वैरं स प्रतस्थे विदूषकः । 253
गच्छन्न् अहर् अहः प्राच्यां दिशि प्राप स च क्रमात्
मध्ये मार्गवशायातं नगरं पौण्ड्रवर्धनं । 254
मातर् अत्र वसाम्य् एकां रात्रिम् इत्य् अभिधाय सः
ब्राह्मण्यास् तत्र कस्याश्चिद् वृद्धायाः प्राविशद् गृहं । 255
प्रतिपन्नाश्रया सा च कृतातिथ्या क्षणान्तरे
ब्राह्मणी समुपेत्य एवं सा अन्तर्दुःखा जगाद तं । 256

तुभ्यम् एव मया दत्तं पुत्र सर्वम् इदं गृहं,
तद् गृहाण, यतो न 'अस्ति जीवितं मम साम्प्रतं । 257
कस्माद् एवं ब्रवीषि 'इति तेन 'उक्ता विस्मितेन सा,
श्रूयतां कथयाम्य् एतद् इत्य् उक्त्वा पुनर् अब्रवीत् । 258
अस्ति 'इह देवसेनाख्यो नगरे पुत्र भूपतिः,
तस्य च 'एका समुत्पन्ना कन्या भूतलभूषणं । 259
मया दुःखेन लब्धा 'इयम् इति दुःखलब्धिकां
नाम्ना चकार 'एष नृपस् तनयाम् अतिवत्सलः । 260
कालेन यौवनारूढाम् आनीताय स्ववेश्मनि
राज्ञि कच्छपनाथाय तां प्रादाच् च 'एव भूपतिः । 261
स कच्छपेश्वरस् तस्या बधा वासगृहं निशि
प्रविष्ट एव प्रथमं तत्कालं पञ्चतां ययौ । 262
ततो विमनसा राज्ञा भूयो ऽप्य् एतेन सा सुता
दत्ता 'अन्यस्मै नृपाय 'अभूत्, सो ऽपि तद्वद् व्यपद्यत । 263
तद्भयाच् च यदा 'अन्ये ऽपि नृपा वाञ्छन्ति न 'एव तां,
तदा सेनापतिं राजा निजम् एवं समादिशत् । 264
इतो देशात् त्वया 'एकैकः क्रमाद् एकैकतो गृहात्
पुमान् प्रत्यहम् आनेयो ब्राह्मणः क्षत्रियो ऽपि वा । 265
आनीय च प्रवेश्यो ऽत्र रात्रौ मत्पुत्रिकागृहे,
पश्यामो हि कियन्तो ऽत्र विपत्स्यन्ते कियच् चिरं । 266

यस् तरिष्यति, पश्चाच् च सो ऽस्या भर्ता भविष्यति,
गतिः शक्या परिच्छेत्तुं न ह्य् अद्भुतविधेर् विधेः। 267
इति सेनापती राज्ञा समादिष्टो दिने दिने
वारक्रमेण गेहेभ्यो नयत्य् एव नरान् इह। 268
एवं च तत्र यातानि क्षयं नरशतान्य् अपि,
मम च ऽकृतपुण्याया एकः पुत्रो ऽत्र वर्तते। 269
तस्य वारो ऽद्य संप्राप्तस् तत्र गन्तुं विपत्तये,
तदभावे मया कार्यं प्रातर् अग्निप्रवेशनं। 270
तत् जीवन्ती स्वहस्तेन तुभ्यं गुणवते गृहं
ददामि सर्वं, येन स्यां न पुनर् दुःखभागिनी। 271
एवम् उक्तवतीं धीरस् ताम् अवादीद् विदूषकः,
यद्य् एवम् अम्ब, तर्हि त्वं मा स्म विक्लवतां कृथाः। 272
अहं तत्र ऽद्य गच्छामि, जीवत्व् एकसुतस् तव,
किम् एनं घातयामि ऽइति कृपा ते मयि मा च भूत्। 273
सिद्धियोगाद् धि न ऽस्त्य् एव भयं तत्र गतस्य मे,
एवं विदूषकेन ऽउक्ता ब्राह्मणी सा जगाद तं। 274
तर्हि पुण्यैर् मम ऽआयातः कोऽपि देवो भवान् इह,
तत् प्राणान् देहि नः पुत्र, कुशलं च तव ऽआत्मनि। 275
एवं तया सो ऽनुमतः सायं राजसुतागृहं
सेनापतिनियुक्तेन किङ्करेण समं ययौ। 276

तत्र 'अपश्यन् नृपसुतां तां यौवनमदोद्धतां
लताम् अनुच्चितस्फीतपुष्पभारानताम् इव । 277
ततो निशायां शयने राजपुत्र्या तया 'आश्रिते
ध्यातोपनतम् अग्नियं बिभ्रद् खड्गं करेण सः । 278
वासवेश्मनि तत्र 'आसीज् जाग्रन् एव विदूषकः,
पश्यामि तावत् को हन्ति नरान् अत्र 'इति चिन्तयन् । 279
प्रसुप्ते च जने क्षिप्राद् अपावृत्तकवाटकं
स द्वारदेशाद् आयान्तं घोरं राक्षसम् ऐक्षत । 280
स च द्वारि स्थितस् तत्र राक्षसो वासकान्तरे
भुजं नरशताकाण्डयमदण्डं न्यवेशयत् । 281
विदूषकश् च चिच्छेद धावित्वा तस्य तं क्रुधा
एकखड्गप्रहारेण बाहुं सपदि रक्षसः । 282
छिन्नबाहुः पलाय्य 'आशु जगाम स निशाचरः
भूयो नागमनाय 'एव तत्सत्त्वोत्कर्षभीतितः । 283
प्रबुद्धा वीक्ष्य पतितं रक्षोबाहुं नृपात्मजा
भीता च जातहर्षा च विस्मिता च बभूव सा । 284
प्रातश् च ददृशे राज्ञा देवसेनेन तत्र सः
स्वसुतान्तःपुरद्वारि स्थितश् छिन्नच्युतो भुजः । 285
इतःप्रभृति न 'इह 'अन्यैः प्रवेष्टव्यं नरैर् इति
दत्तो विदूषकेण 'एव सुदीर्घः परिघार्गलः । 286

ततो दिव्यप्रभावाय तस्मै प्रीतः स पार्थिवः
विदूषकाय तनयां तां ददौ विभवोत्तरां । 287
ततस् तया समं तत्र कान्तया स विदूषकः
तस्थौ दिनानि कतिचिद् रूपवत्या ऽइव संपदा । 288
एकस्मिंश् च दिने सुप्तां राजपुत्रीं विहाय तां
स ततः प्रययौ रात्रौ तां भद्रां प्रति सत्वरः । 289
राजपुत्री च सा प्रातस् तं ददर्श न दुःखिता,
आसीद् आश्वासिता पित्रा तत्प्रत्यावर्तनाशया । 290
सो ऽपि गछन् अहर् अहः क्रमात् प्राप विदूषकः
पूर्वाम्बुधेर् अदूरस्थां नगरीं ताम्रलिप्तिकां । 291
तत्र चक्रे स केनापि बणिजा सह संगतिं
स्कन्ददासाभिधानेन पारम् अब्धेर् यियासता । 292
तेन ऽएव सह सो ऽनल्पतदीयधनसंभृतं
यानपात्रं समारुह्य प्रतस्थे ऽम्बुधिवर्त्मना । 293
ततः समुद्रमध्ये तद् यानपात्रम् उपागतं
अकस्माद् अभवद् रुद्धं व्यासक्तम् इव केनचित् । 294
अर्चिते ऽप्य् अर्णवे रत्नैर् यदा न विचचाल तत्,
तदा स बणिग् आर्तः सन् स्कन्ददासो ऽब्रवीद् इदं । 295
यो मोचयति संरुद्धम् इदं प्रवहणं मम,
तस्मै निजधनार्धं च स्वसुतां च ददाम्य् अहं । 296

तच् छ्रुत्वा 'एव जगाद् 'एवं धीरचेता विदूषकः,
अहम् अत्र 'अवतीर्य 'अन्तर् विचिनोम्य् अम्बुधेर् जलं । 297
तस्माच् च मोचयाम्य् एतद् रुद्धं प्रवहणं तव,
यूयं च 'अप्य् अवलम्बध्वं बद्ध्वा मां पाशरज्जुभिः । 298
विमुक्ते च प्रवहणे तत्क्षणं वारिमध्यतः
उद्धर्तव्यो ऽस्मि युष्माभिर् अवलम्बनरज्जुभिः । 299
तथा 'इति तेन वणिजा तद्वचस्य् अभिनन्दिते
बबन्धुः कर्णधारास् तं रज्जुबन्धेन कक्ष्ययोः । 300
तद्बद्धो ऽवततार 'एव वारिधौ स विदूषकः.
न जात्व् अवसरे प्राप्ते सत्त्ववान् अवसीदति । 301
ध्यातोपस्थितम् आग्नेयं खड्गं कृत्वा च तं करे
वीरः प्रवहणस्य 'अधो मध्ये वारि विवेश सः । 302
तत्र च 'एकं महाकायं सुप्तं पुरुषम् ऐक्षत,
जङ्घायां तस्य रुद्धं च यानपात्रं व्यलोकयत् । 303
चिच्छेद तां स जङ्घां च तस्य खड्गेन तत्क्षणं,
चचाल च प्रवहणं रोधमुक्तं तदा 'एव तत् । 304
तद् दृष्ट्वा 'एव वणिक् पापश् छेदयामास तस्य सः
विदूषकस्य रज्जूस् ताः प्रतिपन्नार्थलोभतः । 305
वृत्तेन च 'एव मुक्तेन द्रुतं प्रवहणेन सः
स्वलोभस्य 'इव महतः पारम् अम्बुनिधेर् ययौ । 306

विदूषको ऽपि संछिन्नरज्ज्वालम्बो ऽम्बुमध्यगः

उन्मज्ज्य तत् तथा दृष्ट्वा धीरः क्षणम् अचिन्तयत् । 307

किम् इदं वणिजा तेन कृतं, किम् अथ च उच्यते,

कृतघ्ना धनलोभान्धा न उपकारेक्षणक्षमाः । 308

तद् एष कालः सुतराम् अवैक्लव्यस्य साम्प्रतं,

न हि सत्त्वावसादेन स्वल्पा अप्य् आपद् विलंघ्यते । 309

इति संचिन्त्य तत्कालं जङ्घाम् ताम् आरुरोह सः,

याम् अन्तर्जलसुप्तस्य पुंसस् तस्य न्यकृन्तत । 310

तया ततार नावा इव हस्तन्यस्ताम्बुर् अम्बुधिं,

दैवम् एव हि साह्याय्यं कुरुते सत्त्वशालिनां । 311

तं मारुतिम् इव अम्भोधिपारं रामार्थम् आगतं

बलवत्तम् उवाच एवम् अन्तरिक्षात् सरस्वती । 312

साधु साधु सुसत्त्वो ऽस्ति को ऽन्यस् त्वत्तो विदूषक,

अनेन तव धैर्येण तुष्टो ऽस्मि, तद् इदं शृणु । 313

प्राप्तो ऽसि नग्नविषयम् इमं सम्प्रत्य् अतो ऽपि च

कार्कोटकाख्यं नगरं दिनैः प्राप्स्यसि सप्तभिः । 314

ततो लब्धधृतिर् गत्वा शीघ्रं प्राप्स्यसि च ईप्सितं,

अहं च आराधितः पूर्वं भवता कव्यहव्यभुक् । 315

मद्वराच् च तव इदानीं क्षुत् तृष्णा च न वर्त्स्यति,

तद् गच्छ सिद्ध्या एव विश्रब्धम् इत्य् उक्त्वा विरराम वाक् । 316

विदूषकश् च तच् छ्रुत्वा प्रणम्य ऽग्निं प्रहर्षितः
प्रतस्थे, सप्तमे च ऽह्नि प्राप कार्कोटकं पुरं । 317
तत्र च प्रविवेश ऽएकं मठम् आर्यैर् अधिष्ठितं
नानादिशोद्भवैस् तैस् तैर् द्विजैर् अभ्यागतप्रियैः । 318
श्रीमता निर्मितं राज्ञा तत्रत्येन ऽआर्यवर्मणा
अद्धं समग्रसौवर्णाढ्यदेवकुलान्वितं । 319
तत्र सर्वैः कृतातिथ्यम् एकस् ब्राह्मणो ऽतिथिं
स्नानेन भोजनैर् वस्त्रैर् नीत्वा गृहम् उपाचरत् । 320
सायं च तन्मठस्थः सन् पुरे शुश्राव तत्र सः
विदूषकः सपटहं घोष्यमाणम् इदं वचः । 321
ब्राह्मणः क्षत्रियो वा ऽअपि परिणेतुं नृपात्मजां
प्रातर् इच्छति यः, सो ऽद्य रात्रौ वसतु तद्गृहे । 322
तच् छ्रुत्वा स निमित्तं च तद् आशंक्य तत्क्षणं
गन्तुं राजसुतावासम् इयेष प्रियसाहसः । 323
ऊचुस् तं मठविप्रास् ते, ब्रह्मन् मा साहसं कृथाः,
तत्र राजसुतासद्म तन् मृत्योर् विवृतं मुखं । 324
यो हि तत्र प्रविशति क्षपायां न स जीवति,
गताः सुबहवश् च ऽएवम् अत्र साहसिकाः क्षयं । 325
इत्य् उक्तो ऽपि स तैर् विप्रैर् अनङ्गीकृततद्वचाः
विदूषको राजगृहं ययौ तत्किंकरैः सह । 326

तत्र ऽआर्यवर्मणा राज्ञा स्वयं दृष्ट्वा ऽअभिनन्दितः
विवेश तत्सुतावासं नक्तम् अर्क इव ऽअनलं । 327
ददर्श राजकन्यां च ताम् आकृत्या ऽअनुरागिणीं
नैराश्यदुःखविधुरं पश्यन्तीं साश्रया दृशा । 328
आसीच् च जाग्रद् एव ऽअत्र स रात्राव् अवलोकयन्,
करे कृपाणम् आग्नेयं चिन्तितोपनतं दधत् । 329
अकस्माच् च महाघोरं ददर्श द्वारि राक्षसं
छिन्नदक्षिणबाहुत्वात् प्रसारितभुजान्तरं । 330
दृष्ट्वा व्यचिन्तयच् च ऽअसौ, हन्त सो ऽयं निशाचरः,
यस्य बाहुर् मया छिन्नो नगरे पौण्ड्रवर्धने । 331
तद् अस्य न पुनर् बाहौ प्रहरिष्याम्य्, असौ हि मे
पलाय्य पूर्ववद् गच्छेत्, तस्मात् साधु निहन्म्य् अमुं । 332
इत्य् आलोच्य प्रधाव्य ऽएव केशेषु आकृष्य तस्य सः
राक्षसस्य शिरश् छेत्तुं प्रारेभे स विदूषकः । 333
तत्क्षणं भीतभीतश् च तम् उवाच स राक्षसः,
मा मां बधीः, सुसत्त्वस् त्वं, तत् कुरुष्व कृपाम् इति । 334
किंनामा त्वं च, का ऽइयं च तव चेष्टा ऽइति तेन सः
मुक्तः पृष्टश् च वीरेण पुनर् आह स्म राक्षसः । 335
यमदंष्ट्राभिधानस्य मम ऽअभूतां सुते इमे,
इयम् एका, तथा सा च पौण्ड्रवर्धनवर्तिनी । 336

अवीरपुरुषासङ्गाद् रक्षणीयि नृपात्मजे,
शङ्कराज्ञाप्रसादो हि मम अभूद् अयम् ईदृशः । 337
तत्र आदौ बाहुर् एकेन छिन्नो मे पौण्ड्रवर्धने,
त्वया च अद्य जितो ऽस्मि इह, तत् समाप्तम् इदं मम । 33
तच् छ्रुत्वा स विहस्य एनं प्रत्युवाच विदूषकः,
मया एव स भुजस् तत्र लूनस् ते पौण्ड्रवर्धने । 339
राक्षसो ऽप्य् अवदत्, तर्हि देवांशस् त्वं न मानुषः,
मन्ये त्वदर्थ एव अभूच् छर्वाज्ञानुग्रहः स मे । 340
तद् इदानीं सुहृन् मे त्वं, यदा मां च स्मरिष्यसि,
तदा अहं संनिधास्ये ते सिद्धये संकटेषु अपि । 341
एवं स राक्षसो मैत्र्याद् वरयित्वा विदूषकं
तेन अभिनन्दितवचा यमदंष्ट्रस् तिरोदधे । 342
विदूषको ऽपि सानन्दम् अभिनन्दितविक्रमः
राजपुत्र्या तया तत्र हृष्टस् ताम् अनयन् निशां । 343
प्रातस् च ज्ञातवृत्तान्तस् तुष्टस् तस्मै ददौ नृपः
विभवैः सह शौर्यैकपताकाम् इव तां सुतां । 344
स तया समं तत्र आसीद् रात्रीः काश्चिद् विदूषकः
पदात् पदम् अमुञ्चन्त्या लक्ष्म्या इव गुणाबद्धया । 345
एकदा च निशि स्वैरं ततः प्रायात् प्रियोत्सुकः,
लब्धदिव्यरसास्वादः को हि रज्येद् रसान्तरे । 346

नगराच् च विनिर्गत्य स तं सस्मार राक्षसं,
स्मृतमात्रागतं तं च जगाद रचितानतिं । 347
सिद्धक्षेत्रे प्रयातव्यम् उदयाद्रौ मया सखे
भद्राविद्याधरीहेतोर्, अतस् त्वं तत्र मां नय । 348
तथा ऽइत्य् उक्तवतस् तस्य स्कन्धम् आरुह्य रक्षसः
ययौ च स तया रात्र्या दुर्गमां षष्टियोजनीं । 349
प्रातश् च तीर्त्वा शितोदाम् अलंघ्यां मानुषैर् नदीं
उदयाद्रेर् अथ प्रापत् संनिकर्षम् अयत्नतः । 350
अयं स पर्वतः श्रीमान् उदयाख्यः पुरस् तव,
अत्र ऽउपरि च न ऽअस्त्य् एव सिद्धधाम्नि गतिर् मम । 351
इत्य् उक्त्वा रक्षसे तस्मिन् प्राप्तानुज्ञे तिरोहिते
दीर्घिकां स ददर्श ऽएकां रम्यां तत्र विदूषकः । 352
वदन्त्याः स्वागतम् इव भ्रमद्भ्रमरगुञ्जितैः
तस्यास् तीरे न्यषीदच् च फुल्लपद्माननश्रियः । 353
स्त्रीणाम् इव ऽअत्र च ऽअपश्यत् पदपंक्तिं सुविस्तरां,
अयं प्रियागृहे मार्गस् तव ऽइति ब्रुवतीम् इव । 354
अलंघ्यो ऽयं गिरिर् मर्त्यैस्, तद् इह ऽएव वरं क्षणं
स्थितो भवामि, पश्यामि कस्य ऽइयं पदपद्धतिः । 355
इति चिन्तयतस् तस्य तत्र तोयार्थम् आययुः
गृहीतकाञ्चनघटा भव्याः सुबह्वः स्त्रियः । 356

वारिपूरितकुम्भाश् च ताः स पप्रछ योषितः,
कस्य ऽइदं नीयते तोयम् इति प्रणयपेशलं । 357
ग्रास्ते विद्याधरी भद्र भद्रा नाम ऽग्रत्र पर्वते,
इदं स्नानोदकं तस्या इति ताश् च तम् ग्रब्रुवन् । 358
चित्रं धाता ऽएव धीराणाम् ग्रारब्धोद्दामकर्मणां
परितुष्य ऽइव सामग्रीं घटयत्य् उपयोगिनीं । 359
यद् एका सहसा ऽएव स्त्री तासां मध्याद् उवाच तं,
महाभाग मम स्कन्धे कुम्भ उत्क्षिप्यताम् इति । 360
तथा ऽइति च घटे तस्याः स्कन्धोत्क्षिप्ते स बुद्धिमान्
निदधे भद्रया पूर्वं दत्तं रत्नाङ्गुलीयकं । 361
उपाविशच् च तत्र ऽएव स पुनर् दीर्घिकातटे,
ताश् च तज् जलम् ग्रादाय ययुर् भद्रागृहं स्त्रियः । 362
तत्र ताभिश् च भद्राया यावत् स्नानाम्बु दीयते,
तावत् तस्यास् तदुत्सङ्गे निपपात ऽग्रङ्गुलीयकं । 363
तद् दृष्ट्वा प्रत्यभिज्ञाय भद्रा पप्रछ ताः सखीः,
दृष्टः किं कोऽपि युष्माभिर् इह ऽग्रपूर्वः पुमान् इति । 364
दृष्ट एको युवा ऽग्रस्माभिर् मानुषो वापिकातटे,
तेन ऽउत्क्षिप्तो घटश् च ऽग्रयम् इति प्रत्यब्रुवंश् च ताः । 36
ततो भद्रा ऽग्रब्रवीच्, शीघ्रं प्रक्लृप्तस्नानमण्डनं
इह ऽग्रानयत गत्वा तं, स हि भर्ता मम ऽग्रागतः । 366

इत्य् उक्तो भद्रया गत्वा यथावस्तु निवेद्य च
स्नातस् च तद्वयस्याभिस् तत्र ऽऽनिन्ये विदूषकः । 367
प्राप्तस् च स ददर्श ऽत्र भद्रां मार्गोन्मुखीं चिरात्
निजसत्त्वतरोः साक्षात् पक्वाम् इव फलश्रियं । 368
सा ऽपि दृष्ट्वा तम् उत्थाय हर्षवष्पाम्बुशीकरैः
दत्तार्घा इव बबन्ध ऽस्य कण्ठे भुजलतास्रजं । 369
परस्परालिङ्गितयोस् तयोः स्वेदछलाद् इव
अतिपीडनतः स्नेहः सस्यन्दे चिरसंभृतः । 370
अथ ऽपविष्टाव् अन्योन्यम् अवितृप्तौ विलोकने
उभौ शतगुणीभूताम् इव ऽत्कण्ठाम् उदूहतुः । 371
आगतो ऽसि कथं भूमिम् इमाम् इति च भद्रया
परिपृष्टः स तत्कालम् उवाच इदं विदूषकः । 372
समालम्ब्य भवत्स्नेहम् आरुह्य प्राणसंशयान्
सुबहून् आगतो ऽस्मि इह, किम् अन्यद् वच्मि सुन्दरि । 373
तच् छ्रुत्वा तस्य दृष्ट्वा ताम् अनपेक्षितजीवितां
प्रीतिं काष्टागतं स्नेहात् सा भद्रा तम् अभाषत । 374
आर्यपुत्र न मे कार्यं सखीभिर् न च सिद्धिभिः,
त्वं मे प्राणो, गुणैः क्रीता दासी च ऽहं तव प्रभो । 375
विदूषकस् ततो ऽवादीत्, तर्ह्य् आगछ मया सह
मुक्त्वा दिव्यम् इमं भोगं वस्तुम् उज्जयिनीं प्रिये । 376

तथा ’इति प्रतिपेदे सा भद्रा सपदि तद्वचः,
तत्संकल्पपरिभ्रष्टा विद्याश् च तृणवज् जहौ । 377
ततस् तया समं तत्र स विशश्राम तां निशां
क्लृप्तोपचारस् तत्साख्या योगेश्वर्या विदूषकः । 378
प्रातश् च भद्रया साकम् अवतीर्य ’उदयाद्रितः
सस्मार यमदंष्ट्रं तं राक्षसं स पुनः कृती । 379
स्मृतमात्रागतस्य ’उक्त्वा गन्तव्याधक्रमं निजं
तस्य आरुरोह स स्कन्धे भद्राम् आरोप्य तां पुरः । 380
सा ’अपि सेहे तद् अत्युग्रराक्षसांसाधिरोपणं,
अनुरागपरायत्ताः कुर्वते किं न योषितः । 381
रक्षोऽधिरूढश् च ततः स प्रतस्थे प्रियासखः
विदूषकः, पुनः प्राप तच् च कार्कोटकं पुरं । 382
रक्षोदर्शनसत्रासं तत्र च ’आलोकितो जनैः
दृष्ट्वा ’आर्यवर्मनृपतिं स्वां भार्यां मार्गति स्म सः । 383
दत्तां तेन गृहीत्वा च तत्सुतां तां भुजार्जितां
तथा ’एव राक्षसारूढः स प्रतस्थे पुरात् ततः । 384
गत्वा ’अम्बुधेस् तटे प्राप पापं तं बणिजं च सः,
येन ’अस्य वारिधौ पूर्वं छिन्नाः क्षिप्तस्य रज्जवः । 385
जहार तस्य च सुतां बणिजः स धनैः सह
प्राग् अम्बुधिप्रवहणप्रमोचनपणार्जितां । 386

धनापहारम् एव ऽस्य बधं मेने च पाप्मनः,
कदर्याणां परे प्राणाः प्रायेण ह्य् अर्थसंचयाः । 387
ततो रक्षोरथारूढस् ताम् आदाय बणिक्सुतां
स भद्राराजपुत्रीभ्यां सह एव उदपतन् नभः । 388
दर्शयन् निजकान्तानां द्युमार्गेण ततार च
विलसत्सत्वसंरम्भं स्वपौरुषम् इव ऽम्बुधिं । 389
प्राप तच् च स भूयो ऽपि नगरं पौण्ड्रवर्धनं
दृष्टः सविस्मयं सर्वैर् वाहनीकृतराक्षसः । 390
तत्र तां देवसेनस्य सुतां राज्ञश् चिरोत्सुकां
भार्यां संभावयामास राक्षसावजयार्जितां । 391
रुध्यमानो ऽपि तत्पित्रा स स्वदेशसमुत्सुकः
गृहीत्वा ताम् अपि ततः प्रायाद् उज्जयिनीं प्रति । 392
अचिरेण च तां प्राप पुरीं राक्षसवेगतः
वह्निर्गताम् इव ऽआत्मीयदेशदर्शननिर्वृतिं । 393
अथ उपरिस्थितस् तस्य महाकायस्य रक्षसः
अंसस्थतद्वधूचक्रकान्तिप्रकटितात्मनः । 394
स जनैर् ददृशे तत्र शिखरज्वलितौषधेः
शशाङ्क इव पूर्वाद्रेर् उदयस्थो विदूषकः । 395
ततो विस्मितवित्रस्ते जने बुद्ध्वा ऽत्र भूपतिः
आदित्यसेनो निरगाच् छ्वसुरो ऽस्य तदा पुरः । 396

विदूषकस् तु दृष्ट्वा तम् अवतीर्य 'आशु राक्षसात्
प्रणम्य नृपम् अभ्यागान्, नृपो ऽप्य् अभिननन्द तं । 397
अवतार्य 'एव तत्स्कन्धात् ताः स्वभार्यास् ततो ऽखिलाः
मुमोच कामचाराय राक्षसं स विदूषकः । 398
गते च राक्षसे तस्मिन् स तेन सह भूभृता
श्वशुरेण सभार्यः सन् प्राविशद् राजमन्दिरं । 399
तत्र तां प्रथमां भार्यां तनयां तस्य भूपतेः
आनन्दयद् उपागत्य चिरोत्कण्ठावशीकृतां । 400
कथम् एतास् त्वया भार्याः प्राप्ताः, कश् च 'एष राक्षसः?
इति पृष्टः स राज्ञा 'अत्र सर्वम् अस्मै शशंस तत् । 401
ततः प्रभावतुष्टेन तेन तस्य महीक्षिता
जामातुर् निजराज्यार्धं प्रदत्तं कार्यवेदिना । 402
तत्क्षणाच् च स राजा 'अभूद् विप्रो भूत्वा विदूषकः
समुच्छ्रितसितछत्रो विधूतोभयचामरः । 403
तदा च मङ्गलातोद्यवाद्यनिर्ह्रादनिर्भरा
प्रहर्षमुक्तनादा 'इव रराज 'उज्जयिनी पुरी । 404

इत्याप्तराज्यविभवः क्रमशः स कृत्स्नां
जित्वा महीम् अखिलराजकपूजितांघ्रिः
ताभिः समं विगतमत्सरनिर्वृताभिर्
भद्रासखम् चिरम् अरंस्त निजप्रियाभिः । 405

इत्य् अनुकूले दैवे
भजति निजं सत्त्वम् एव धीराणां
लक्ष्मीरभसाकर्षण-
सिद्धमहामोहमन्त्रत्वं । 406

इत्थं श्रुत्वा वत्सराजस्य वक्त्राच्
चित्राम् एतां साद्भुतार्थां कथां ते
पार्श्वासन्ना मन्त्रिणश् च ऽस्य सर्वे
देव्यौ च ऽपि प्रीतिम् अग्र्याम् ऽवापुः । 407

। इति ।

॥ अष्टादशस् तरङ्गः ॥

TARANGA. 19.

ततो वत्सेश्वरं प्राह तत्र यौगन्धरायणः,
राजन् दैवानुकूल्यं च विद्यते पौरुषं तव । 1
नीतिमार्गे च वयम् अप्य् अत्र किंचित्कृतश्रमाः,
तद् यथाचिन्तितं शीघ्रं कुरुष्व विजयं दिशां । 2
इत्य् उक्तो मन्त्रिमुख्येन राजा वत्सेश्वरो ऽब्रवीत्,
अस्त्व् एतद्, बहुविघ्नास् तु सदा कल्याणसिद्धयः । 3
अतस् तदर्थं तपसा शम्भुम् आराधयाम्य् अहं,
विना हि तत्प्रसादेन कुतो वाञ्छितसिद्धयः । 4
तच् छ्रुत्वा च तपस् तस्य मन्त्रिणो ऽप्य् अनुमेनिरे,
सेतुबन्धोद्यतस्य अब्धौ रामस्य इव कपीश्वराः । 5
ततस् तं सह देवीभ्यां सचिवैश् च तपःस्थितं
त्रिरात्रोपोषितं भूपं शिवः स्वप्ने समादिशत् । 6
तुष्टो ऽस्मि ते, तद् उत्तिष्ठ निर्विघ्नं जयम् आप्स्यसि,
सर्वविद्याधराधीशं पुत्रं च एव अचिराद् इति । 7
ततः स बुबुधे राजा तत्प्रसादहृतक्लमः
अर्कांशुरचिताप्यायः प्रतिपच्चन्द्रमा इव । 8

आनन्दयच् च सचिवान् प्रातः स्वप्नेन तेन सः
व्रतोपवासक्लान्ते च देव्यौ द्वे पुष्पकोमले । 9
तत्स्वप्नवर्णनेन 'एव श्रोत्रपेयेन तृप्तयोः
तयोस् च विभवाय 'एव जातः स्वादौषधक्रमः । 10
लेभे स राजा तपसा प्रभावं पूर्वजैः समं,
पुण्यां पतिव्रतानां च तत्पत्न्यौ कीर्तिम् आपतुः । 11
उत्सवव्यग्रपौरे च विहिते व्रतपारणे
यौगन्धरायणो ऽन्येद्युर् इति राजानम् अब्रवीत् । 12
धन्यस् त्वं देव यस्य 'इत्थं प्रसन्नो भगवान् हरः,
तद् इदानीं रिपून् जित्वा भज लक्ष्मीं भुजार्जितां । 13
सा हि स्वधर्मसंभूता भुभृताम् अन्वये स्थिरा,
निजधर्मार्जितानां हि विनाशो न 'अस्ति संपदां । 14
तथा च चिरभूमिष्ठो निधिः पूर्वजसंभृतः
प्रनष्टो भवता प्राप्तः, किंच 'अत्र 'एतां कथां शृणु । 15

बभूव देवदासाख्यः पुरे पाटलिपुत्रके
पुरा को ऽपि बणिक्पुत्रो महाधनकुलोद्गतः । 16
अभवत् तस्य भार्या च नगरात् पौण्ड्रवर्धनात्
परिणीता समृद्धस्य कस्यापि बणिजः सुता । 17

गते पितरि पञ्चत्वं क्रमेण व्यसनान्वितः
स देवदासो द्यूतेन धनं सर्वम् अहारयत् । 18
ततश् च तस्य सा भार्या दुःखदारिद्र्यदुःखिता
एत्य नीता निजं गेहं स्वपित्रा पौण्ड्रवर्धनं । 19
शनैः सो ऽपि विपत्खिन्नः स्थातुम् इच्छन् स्वकर्मणि
मूल्यार्थी देवदासस् तं श्वशुरं याचितुं ययौ । 20
प्राप्तश् च सन्ध्यासमये तत् पुरं पौण्ड्रवर्धनं
रजोध्वस्तं विवस्त्रं च वीक्ष्य आत्मानम् अचिन्तयत् । 21
ईदृशः प्रविशामि इह कथं श्वशुरवेश्मनि,
वरं हि मानिनो मृत्युर् न दैन्यं स्वजनाग्रतः । 22
इत्य् आलोच्य आपणे गत्वा स क्वापि विपिणेर् बहिः
नक्तं संकुचितस् तस्थौ तत्कालं कमलोपमः । 23
क्षणाच् च तस्यां विपणौ प्रविशन्तं व्यलोकयत्
युवानं बणिजं कंचिद् उद्घाटितकवाटकं । 24
क्षणान्तरे च तत्र एव निःशब्दपदम् आगतां
द्रुतम् अन्तः प्रविष्टां च स्त्रियम् एकां ददर्श सः । 25
ज्वलत्प्रदीपे यावच् च ददौ दृष्टिं तदन्तरे
प्रत्यभिज्ञातवांस् तावत् तां निजाम् एव गेहिनीं । 26
ततः सो ऽर्गलितद्वारां भार्यां ताम् अन्यगामिनीं
दृष्ट्वा दुःखाशनिहतो देवदासो व्यचिन्तयत् । 27

धनहीनेन देहो ऽपि ह्रार्यते, स्त्रीषु का कथा,
निसर्गनियतं यासां विद्युताम् इव चापलं । 28
तद् इयं सा विपत् पुंसां व्यसनार्णवपातिनां,
गतिः सा इयं स्वतन्त्रायाः स्त्रियः पितृगृहस्थितिः । 29
इति संचिन्तयंस् तस्या भार्यायाः स बहिःस्थितः
रहोन्तविस्रम्भजुषः कथालापम् इव अशृणोत् । 30
उपेत्य च ददौ द्वारि स कर्णं, सा अपि तत्क्षणं
इत्य् अब्रवीद् उपपतिं पापा तं बणिजं रहः । 31
शृणव् इदं कथयाम्य् अद्य रहस्यं ते ऽनुरागिणी,
मद्भर्तुर् वीरवर्माख्यः पुरा अभूत् प्रपितामहः । 32
स्वगृहस्य अङ्गणे तेन चत्वारः स्वर्णपूरिताः
कुम्भाश् चतुर्षु कोणेषु निगूढाः स्थापिता भुवि । 33
तच् च एकस्याः स्वभार्यायाः स चक्रे विदितं तदा,
तद्भार्या च अन्तकाले सा स्नुषायै तद् अवोचत । 34
सा अपि स्नुषायै मच्छ्वश्र्वै, मच्छ्वश्रूर् अब्रवीच् च मे,
इत्य् अयं मत्पतिकुले श्वश्रूक्रममुखागमः । 35
स्वभर्तुस् तच् च न मया दरिद्रस्य अपि वर्णितं,
स हि द्यूतरतो द्वेष्यस्, त्वं तु मे परमः प्रियः । 36
तत् तत्र गत्वा मद्भर्तुः सकाशात् तद् गृहं धनैः
क्रीत्वा, तत् प्राप्य च स्वर्णम् इह एत्य भज मां सुखं । 37

एवम् उक्तः कुटिलया स तया ऽपपतिर् बणिक्
तुतोष तस्यै मन्वानो निधिं लब्धम् अयत्नतः । 38
देवदासो ऽपि कुवधूवाक्शल्यैस् तैर् बहिर् गतः
कीलिताम् इव तत्कालं धनाशां हृदये दधौ । 39
जगाम च ततः सद्यः पुरं पाटलिपुत्रकं
प्राप्य च स्वगृहं लब्ध्वा निधानं स्वीचकार तत् । 40
अथ आजगाम स बणिक् तद्भार्याछन्नकामुकः
तम् एव देशं बाणिज्यव्याजेन निधिलोलुपः । 41
देवदाससकाशाच् च क्रीणाति स्म स तद् गृहं
देवदासो ऽपि मूल्येन भूयसा तस्य तद् ददौ । 42
ततो गृहस्थितिं कृत्वा युक्त्या श्वशुरवेश्मनः
स देवदासः शीघ्रं ताम् आनिनाय स्वगेहिनीं । 43
एवं कृते च तद्भार्याकामुकः स बणिक् शठः
अलब्धनिधिर् अभ्येत्य देवदासम् उवाच तं । 44
एतद् भवद्गृहं जीर्णं मह्यं न खलु रोचते
तद् देहि मे निजं मूल्यं स्वगृहं स्वीकुरुष्व च । 45
इति जल्पंश् च स बणिग् देवदासश् च विब्रुवन्
उभौ विवादसक्तौ तौ राजाग्रम् उपजग्मतुः । 46
तत्र स्वभार्यावृत्तान्तं वक्षःस्थविषदुःसहं
देवदासो नरेन्द्राय कृत्स्नम् उद्गिरति स्म तं । 47

ततश् च ऽआनाय्य तद्भार्यां तत्त्वं च ऽअन्विष्य भूपतिः
अदण्डयत् तं सर्वस्वं वणिजं पारदारिकं । 48
देवदासो ऽपि कुबधूं कृत्वा तां छिन्ननासिकां
अन्यां च परिणीय ऽअत्र तस्थौ लब्धनिधिः सुखं । 49

इत्थं धर्मार्जिता लक्ष्मीर् आसन्तत्यनपायिनी,
इतरा तु जलापाततुषारकणनश्वरी । 50
अतो यतेत धर्मेण धनम् अर्जयितुं पुमान्,
राजा तु सुतरां येन मूलं राज्यतरोर् धनं । 51
तस्माद् यथावत् संमान्य सिद्ध्यै मन्त्रिमण्डलं
कुरु दिग्विजयं देव लब्धुं धर्मोत्तरां श्रियं । 52
श्वशुरद्वयबान्धव्यप्रसक्तानुप्रसक्तितः
विकुर्वते न बहवो राजानस् ते मिलन्ति च । 53
यस् त्व् एष ब्रह्मदत्ताख्यो वाराणस्यां महीपतिः
नित्यं वैरी स ते, तस्माद् विजयस्व तम् अग्रतः । 54
तस्मिन् जिते जय प्राचीं प्रक्रमेण ऽअखिला दिशः,
उच्चैः कुरुष्व वै पाण्डोर् यशश् च कुमुदोज्ज्वलं । 55
इत्य् उक्तो मन्त्रिमुख्येन तथा ऽइति विजयोद्यतः
वत्सराजः प्रकृतिषु प्रयाणारम्भम् आदिशत् । 56

ददौ वैदेहदेशे च राज्यं गोपालकाय सः
सत्कारहेतोर् नृपतिः अभ्युर्याय सुनीतिवित् । 57
किंच पद्मावतीभ्रात्रे प्रायच्छत् सिंहवर्मणे
संमान्य चेदिविषयं सैन्यैः समम् उपेयुषे । 58
आनाययच् च स विभुर् भिल्लराजं पुलिन्दकं
मित्रं बलैर् व्याप्तदिशं प्रावृट्कालम् इव ऽम्बुदैः । 59
अभूच् च यात्रासंरम्भो राष्ट्रे तस्य महाप्रभोः
आकुलत्वं च शत्रूणां हृदि चित्रम् अजायत । 60
यौगन्धरायणश् च ऽग्रे चारान् वाराणसीं प्रति
प्राहिणोद् ब्रह्मदत्तस्य राज्ञो ज्ञातुं विचेष्टितं । 61
ततः शुभे ऽहनि प्रीतो निमित्तैर् जयशंसिभिः
ब्रह्मदत्तं प्रति प्राच्यां पूर्वं वत्सेश्वरो ययौ । 62
आरूढप्रोच्छ्रितछत्रं प्रोत्तुङ्गं जयकुञ्जरं
गिरिं प्रफुल्लैकतरुं मृगेन्द्र इव दुर्मदः । 63
प्राप्तया सिद्धिदूत्या ऽइव शरदा दत्तसंपदः
दर्शयन्त्या ऽतिसुगमं मार्गं स्वल्पाम्बुनिम्नगं । 64
पूरयन् बहुनादाभिर् वाहिनीभिर् भुवस् तलं,
कुर्वन्न् अखाण्डनिर्मेघवर्षासमयविभ्रमं । 65
तदा च सैन्यनिर्घोषप्रतिशब्दाकुलीकृताः
परस्परम् इव ऽआचख्युस् तदागमभयं दिशः । 66

चेलुश् च हेमसंनाहसंभृतार्कप्रभा हयाः
तस्य नीराजनप्रीतपावकानुगता इव । 67
विरेजुर् वारणाश् च ऽस्य सितश्रवणचामराः
विगलद्गण्डसिन्दूरशोणदानजलाः पथि । 68
शरत्पाण्डुपयोदाङ्काः सधातुरसनिर्झराः
यात्रानुप्रेषिता भीतैर् आत्मजा इव भूधरैः । 69
न ऽएव ऽएष राजा सहते परेषां प्रसृतं महः,
इति ऽइव तच् च भूरेणुर् अर्कतेजस् तिरोदधे । 70
पदात् पदं च देव्यौ द्वे मार्गे तम् अनुजग्मतुः
नृपं नयगुणाकृष्टे इव कीर्तिजयश्रियौ । 71
नमत ऽअथ पलायध्वम् इत्य् ऊचे विद्विषाम् इव
पवनाक्षिप्तविक्षिप्तैस् तस्य सेनाध्वजांशुकैः । 72
एवं ययौ स दिग्भागान् पश्यन् फुल्लसिताम्बुजान्
महीमन्दभयोद्भ्रान्तशेषोत्क्षिप्तफणान् इव । 73
अत्र ऽअन्तरे च ते चारा धृतकापालिकव्रताः
यौगन्धरायणादिष्टाः प्रापुर् वाराणसीं पुरीं । 74
तेषां च कुहकाभिज्ञो ज्ञानित्वम् उपदर्शयन्
शिश्रिये गुरुताम् एकः, शेषास् तच्छिष्यतां व्यधुः । 75
आचार्यो ऽयं त्रिकालज्ञ इति व्याजगुरुं च तं
शिष्यास् ते ख्यापयामासुर् भिक्षाशनम् इतस् ततः । 76

यद् उवाच 'अग्निदाहादि स ज्ञानी भावि पृच्छतां,
तच्छिष्यास् तत् तथा गुप्तं चक्रुस्, तेन स पप्रथे । 77
रञ्जितं क्षुद्रसिद्ध्या च तत्रत्यं नृपवल्लभं
स्वीचक्रे स, कमप्य् एकं राजपुत्रम् उपासकं । 78
तन्मुखेन 'एव राज्ञश् च ब्रह्मदत्तस्य पृच्छतः
सो ऽभूत् तत्र रहस्यज्ञः प्राप्ते वत्सेशविग्रहे । 79
अथ 'अस्य ब्रह्मदत्तस्य मन्त्री योगकरण्डकः
चकार वत्सराजस्य व्याजान्य् आगच्छतः पथि । 80
अदूषयत् प्रतिपथं विषादिद्रव्ययुक्तिभिः
वृक्षान् कुसुमवल्लीश् च तोयानि च तृणानि च । 81
विदधे विषकन्याश् च सैन्ये पण्यविलासिनीः,
प्राहिणोत् पुरुषांश् च 'एव निशासु छद्मघातिनः । 82
तच् च विज्ञाय स ज्ञानिलिङ्गी चारो न्यवेदयत्
यौगन्धरायणाय 'आशु स्वसहायमुखैस् तदा । 83
यौगन्धरायणो ऽप्य् एतद् बुद्ध्वा प्रतिपदं पथि
दूषितं तृणतोयादि प्रतियोगैर् अशोचयत् । 84
अपूर्वस्त्रीसमायोगं कटके निषिषेध च,
अबधीद् बधकांस् तांश् च लब्ध्वा सह रुमण्वता । 85
तद् बुद्ध्वा ध्वस्तमायः सन् सैन्यपूरितदिङ्मुखं
वत्सेश्वरं ब्रह्मदत्तो मेने दुर्जयम् एव तं । 86

संमन्त्र्य दत्वा दूतं च शिरोविरचिताञ्जलिः
ततः स निकटीभूतं वत्सेशं स्वयम् अभ्यगात् । 87
वत्सराजो ऽपि तं प्राप्तं प्रदत्तोपायनं नृपं
प्रीत्या संमानयामास, शूरा हि प्रणतिप्रियाः । 88
इत्थं तस्मिन् जिते प्राचीं शमयन्, नमयन् मृदून्,
उन्मूलयंश् च कठिनान् नृपान् वायुर् इव द्रुमान् । 89
प्राप च प्रबलः प्राच्यं चलद्वीचिविघूर्णितं
गङ्गावज्जयवित्रासवेपमानम् इव ऽम्बुधिं । 90
तस्य वेलातटान्ते च जयस्तम्भं चकार सः
पातालाभययाञ्चार्थं नागराजम् इव ऽद्गतं । 91
अवनम्य करे दत्ते कलिङ्गैर् अयगैस् ततः
आरुरोह महेन्द्रादिं यशस् तस्य यशस्विनः । 92
महेन्द्राभिभवाद् भीतैर् विन्ध्यकूटैर् इव ऽगतैः
गजैर् जित्वा ऽटवीं राज्ञां स ययौ दक्षिणां दिशं । 93
तत्र चक्रे स निःसारपाण्डुरानपगर्जितान्
पर्वताश्रयिणः शत्रून् शरत्काल इव ऽम्बुदान् । 94
उल्लंघ्यमाना कावेरी तेन संमर्दकारिणा
चोलकेश्वरकीर्तिश् च कालुष्यं ययतुः समं । 95
न परं मुरलानां स सेहे मूर्धसु च ऽन्नतिं
करैर् आक्रन्यमानेषु यावत् कान्ता कुचेष्व् अपि । 96

यत् तस्य सप्तधा भिन्नं पपुर् गोदावरीपयः
मातङ्गास् तन् मदव्याजात् सप्तधा 'एव 'अमुचन् इव । 97
अथ 'उत्तीर्य स वत्सेशो रेवाम् उज्जयिनीम् अगात्,
प्रविवेश च तां चण्डमहासेनपुरस्कृतः । 98
स माल्यश्लथधम्मिल्लशोभाद्विगुण्यशालिनां
मालवस्त्रीकटाक्षाणां ययौ च 'अत्र 'एव लक्ष्यतां । 99
तस्थौ च निर्वृतस् तत्र तथा श्वशुरसत्कृतः,
विसस्मार यथा 'अभीष्टान् अपि भोगान् स्वदेशजान् । 100
आसीद् वासवदत्ता च पित्रोः पार्श्वविवर्तिनी
स्मरन्ती बालभावस्य सौख्ये ऽपि विमना इव । 101
राजा चण्डमहासेनस् तया तनयया यथा,
तथा 'एव पद्मावत्या 'अपि नन्दति स्म समागतः । 102
विश्रम्य च निशाः काश्चित् प्रीतो वत्सेश्वरस् ततः
अन्वितः श्वाशुरैः सैन्यैः प्रययौ पश्चिमां दिशं । 103
तस्य खड्गलता नूनं प्रतापानलधूमिका,
यच् चक्रे लाटनारीणाम् उदश्रुकलुषा दृशः । 104
असौ मथितुम् अम्भोधिं मा माम् उन्मूलयिष्यति,
इति 'इव तद्गजाधूतवनो ऽवेपत मन्दरः । 105
सत्यं स को ऽपि तेजस्वी भास्वदादिविलक्षणः,
प्रतीच्याम् उदयं प्राप प्रकृष्टम् अपि यन् जयी । 106

ततः कुवेरतिलकाम् अलकाम् अङ्गशंसिनीं
कैलासहाससुभगाम् आशाम् अभिससार सः । 107
सिन्धुराजं वशीकृत्य हरिसैन्यैर् अनुद्रुतः
चपयामास च म्लेच्छान् राक्षसान् इव राघवः । 108
तुरुष्कतुरगव्राताः चुब्धस्य अब्धेर् इव ऊर्मयः
तद्गजेन्द्रघटावेला वनेषु दलशो ययुः । 109
गृहीतारिकरः श्रीमान् पापस्य पुरुषोत्तमः
राहोर् इव स चिच्छेद पारसीकपतेः शिरः । 110
हूणाहानिकृतस् तस्य मुखरीकृतदिङ्मुखा
कीर्त्तिर् द्वितीया गङ्गा इव विचचार हिमाचले । 111
नदल्लीषु अस्य सेनासु भयस्तिमितविद्विषः
प्रतीपः शुश्रुवे नादः शैलरन्ध्रेषु केवलं । 112
अपछत्रेण शिरसा कामरूपेश्वरो ऽपि तं
नमन् विछायतां भेजे यत् तदा, न तद् अद्भुतं । 113
तद्दत्तैर् अन्वितो नागैः सम्राड् विववृते ऽथ सः
अद्रिभिर् जङ्गमैः शैलैः करीकृत्यार्पितैर् इव । 114
एवं विजित्य वत्सेशो वसुधां सपरिछ्दः
पद्मावतीपितुः प्राप पुरं मगधभूभृतः । 115
मगधेशश् च देवीभ्यां सहिते ऽस्मिन् उपस्थिते
सोत्सवो ऽभून् निशाज्योत्स्नावति चन्द्र इव स्मरः । 116

अविज्ञातस्थिताम् आदौ पुनश् च व्यक्तिम् आगतां
मेने वासवदत्तां च सो ऽधिकप्रश्रयास्पदं । 117

ततो मगधभूभृता सनगरेण तेन अर्चितः
समग्रजनमानसैर् अनुगतो ऽनुरागागतैः
निगीर्णवसुधातलो बलभरेण लावाणकं
जगाम विषयं निजं स किल वत्सराजो जयी । 118

। इति ।
॥ एकोनविंशस् तरङ्गः ॥

TARANGA. 20.

ततः स सेनाविश्रान्त्यै तत्र लावाणके स्थितः
रहस्य् उवाच वत्सेशो राजा यौगन्धरायणं । 1
त्वद्बुद्ध्या निर्जिताः सर्वे पृथिव्यां भूभृतो मया,
उपायस्वीकृतास् ते च न 'एव व्यभिचरन्ति मे । 2
वाराणसीपतिस् त्व् एष ब्रह्मदत्तो दुराशयः
जाने व्यभिचरत्य् एको, विश्वासः कुटिलेषु कः । 3
इति वत्सेश्वरेण 'उक्त आह यौगन्धरायणः,
न राजन् ब्रह्मदत्तस् ते भूयो व्यभिचरिष्यति । 4
आक्रान्तोपनतस् त्व् एष भृशं संमानितस् त्वया,
शुभाचारस्य कः कुर्याद् अशुभं हि सचेतनः । 5
कुर्वीत वा यस्, तस्य 'एव तदा 'आत्मन्य् अशुभं भवेत्,
तथा च श्रूयताम् अत्र कथां ते वर्णयाम्य् अहं । 6

बभूव पद्मविषये पुरा कोऽपि द्विजोत्तमः
ख्यातिमान् अग्निदत्ताख्यो भूभृद्दत्ताग्रहारभुक् । 7
तस्य एकः सोमदत्ताख्यः पुत्रो ज्यायान् अजायत,
द्वितीयश् च अभवद् वैश्वानरदत्ताख्यया सुतः । 8
आद्यस् तयोर् अभून् मूर्खः स्वाकृतिर् दुर्विनीतकः
अपरश् च अभवद् विद्वान् विनीतो ऽध्ययनप्रियः । 9
कृतदाराव् उभौ तौ च पितर्य् अस्तंगते ततः
तदीयस्य अग्रहारादेर् अर्धम् अर्धं विभेजतुः । 10
तन्मध्यात् स कनीयांश् च राज्ञा संमानितो ऽभवत्,
ज्येष्ठस् तु सोमदत्तो ऽभूच् चपलः क्षेत्रकर्मकृत् । 11
एकदा बद्धगोष्ठीकं शूद्रैः सह विलोक्य तं
सोमदत्तं पितृसुहृद् द्विजः कोऽप्य् एवम् अब्रवीत् । 12
अग्निदत्तसुतो भूत्वा शूद्रवन् मूर्ख चेष्टसे,
निजम् एव अनुजं दृष्ट्वा राजपूज्यं न लज्जसे । 13
तच् छ्रुत्वा कुपितः सो ऽथ सोमदत्तः प्रधाव्य तं
विप्रं पादप्रहारेण जघान उज्झितगौरवः । 14
तत्र विप्रः स कृत्वा अन्यान् साक्षिणस् तत्क्षणं द्विजान्
गत्वा पादाहतिक्रुद्धो राजानं तं व्यजिज्ञपत् । 15
राजा अपि सोमदत्तस्य बन्धाय प्राहिणोद् भटान्,
ते च निर्गत्य तन्मित्रैर् जघ्निरे शस्त्रपाणिभिः । 16

ततो भूयो बलं प्रेष्य ऽवष्टब्धस्य ऽस्य भूपतिः
क्रोधान्धः सोमदत्तस्य शूलारोपणम् आदिशत्। 17
आरोप्यमाणः शूलायाम् अथ ऽकस्मात् स च द्विजः
प्रक्षिप्त इव केनापि निपपात ततः क्षितौ। 18
रक्षन्ति भाविकल्याणं भाग्यान्य् एव यतो ऽस्य ते
अन्धा बभूवुर् बधकाः पुनरारोपणोद्यताः। 19
तत्क्षणं श्रुतवृत्तान्तस् तुष्टो राज्ञा कनीयसा
भ्रात्रा ऽस्य कृतविज्ञप्तिर् बधाद् एनं व्यमोचयत्। 20
ततो मरणनिस्तीर्णः सोमदत्तो गृहैः सह
गन्तुं राजावमानेन देशान्तरम् इयेष सः। 21
यदा च न ऽैहन् गमनं समेतास् तस्य बान्धवाः,
त्यक्तराजाग्रहारार्धां प्रतिपेदे तदा स्थितिं। 22
ततो वृत्त्यन्तराभावात् कर्तुं स चकमे कृषिं,
तद्योग्यां च भुवं द्रष्टुं शुभे ऽह्न्य् अटवीं ययौ। 23
तत्र लेभे शुभां भूमिं संभाव्यफलसंपदं,
तन्मध्ये च महाभोगम् अश्वत्थतरुम् ऐक्षत। 24
तं कल्याणघनछायाछन्नसूर्यांशुशीतलं
प्रावृट्कालम् इव ऽालोक्य कृष्यार्थी तोषम् आप सः। 25
यो ऽधिष्ठात ऽत्र तस्य ऽेव भक्तो ऽस्मि ऽइत्य् अभिधाय च
कृतप्रदक्षिणो ऽश्वत्थवृक्षं तं प्रणनाम सः। 26

संयोज्य ऽथ बलीवर्दयुग्मं रचितमङ्गलः
कृत्वा बलिं तस्य तरोर् आरेभे कृषिम् अत्र सः । 27
तस्थौ तस्य ऽएव च ऽअधस्ताद् द्रुमस्य स दिवानिशं,
भोजनं तस्य च ऽआनिन्ये तत्र ऽएव गृहिणी सदा । 28
काले तत्र च पक्केषु तस्य शष्येषु अशङ्कितं,
सा भूमिः परराष्ट्रेण दैवाद् एत्य व्यलुण्ठ्यत । 29
ततः परबले याते नष्टे शस्ये स सत्ववान्
आश्वास्य रुदतीं भार्यां किंचिच् छेषं तदा ददौ । 30
प्राग्वत् कृतबलिस् तस्थौ तत्र ऽएव ऽअथ तरोर् अधः,
निसर्गः स हि धीराणां यद् आपद्य् अधिकं दृढाः । 31
अथ चिन्ताविनिद्रस्य स्थितस्य ऽएकाकिनो निशि
तस्य ऽअश्वत्थतरोस् तस्माद् उच्चचार सरस्वती । 32
भोः सोमदत्त तुष्टो ऽस्मि तव, तद् गछ भूपतेः
आदित्यप्रभसंज्ञस्य राष्ट्रं श्रीकण्ठदेशगं । 33
तत्र तस्य ऽअनवरतं द्वारदेशे महीपतेः
वदेः पठित्वा सन्ध्याग्निहोत्रमन्त्रान् इदं वचः । 34
फलभूतिर् अहं नाम्ना विप्रः, शृणुत वच्मि यत्,
भद्रकृत् प्राप्नुयाद् भद्रम्, अभद्रं च ऽअप्य् अभद्रकृत् । 35
एवं वदंश् च तत्र त्वं महतीम् ऋद्धिम् आप्स्यसि,
सन्ध्याग्निहोत्रमन्त्रांश् च मत्त एव पठ ऽअधुना । 36

अहं च यक्ष इत्य् उक्त्वा स्वप्रभावेण तत्क्षणं
तम् अध्याप्य च तान् मन्त्रान् वटे बाणी तिरोदधे ॥ 37
प्रातः स सोमदत्तश् च प्रतस्थे भार्यया सह
फलभूतिर् इति प्राप्य नाम यक्षकृतं कृती ॥ 38
अतिक्रम्य ऽटवीस् तास् ता विषमाः परिवर्तिनीः
दुर्दशा इव संप्राप श्रीकण्ठविषयं च सः ॥ 39
तत्र सन्ध्याग्निकार्यादि पठित्वा द्वारि भूपतेः
यथावन् नाम संश्राव्य फलभूतिर् इति स्वकं ॥ 40
सो ऽवादीद्, भद्रकृद् भद्रम् अभद्रं च ऽप्य् अभद्रकृत्
प्राप्नुयाद् इति लोकस्य कौतुकोत्पादकं वचः ॥ 41
मुहुस् तच् च वदन्तं तं तत्र ऽदित्यप्रभो नृपः
बुद्ध्वा प्रवेशयामास फलभूतिं कुतूहली ॥ 42
सो ऽपि प्रविश्य तस्य ऽग्रे तद् एव मुहुर् अब्रवीत्,
जहास तेन स नृपः सर्वैः पार्श्वस्थितैः सह ॥ 43
ससामन्तश् च वस्त्राणि दत्वा च ऽभरणानि सः
ग्रामान् राजा ददौ तस्मै, न तोषो महतां मृषा ॥ 44
एवं च तत्क्षणं प्राप गुह्यकानुग्रहेण सः
फलभूतिः कृशो भूत्वा विभूतिं भूभृदर्पितां ॥ 45
सदा तद् एव च वदन् पूर्वोक्तं प्राप भूपतेः
वाल्लभ्यम्, ईश्वराणां हि विनोदरसिकं मनः ॥ 46

क्रमाद् राजगृहे च ऽअस्मिन् राष्ट्रे च ऽअन्तःपुरेषु च
राज्ञः प्रिय इति प्रीतिं बहुमानम् अवाप सः । 47
कदाचिद् अथ सो ऽटव्याः कृत्वा ऽआखेटकम् आगतः
आदित्यप्रभभूपालः सहसा ऽअन्तःपुरं ययौ । 48
द्वाःस्थसंभ्रमसाशङ्कः प्रविश्य ऽएव ददर्श सः
देवीं देवार्चनव्यग्रां नाम्ना कुवलयावलीं । 49
दिगम्बराम् ऊर्ध्वकेशीम् अर्धमीलितलोचनां
स्थूलसिन्दूरतिलकां जपप्रस्फुरिताधरां । 50
विचित्रवर्णकन्यस्तमहामण्डलमध्यगां
असृक्सुरामहामांसकल्पितोग्रबलिक्रियां । 51
सा ऽअपि प्रविष्टे नृपतौ संभ्रमाकलितांशुका
तेन पृष्टा क्षणाद् एवम् अवोचद् याचिताभया । 52
तव ऽएव ऽउदयलाभार्थं कृतवत्य् अस्मि पूजनं,
अत्र च ऽआगमवृत्तान्तं सिद्धिं च शृणु मे प्रभो । 53
पुरा ऽअहं पितृवेश्मस्था कन्या मधुमहोत्सवे
एवम् उक्ता वयस्याभिः समेत्य ऽउद्यानवर्तिनी । 54
अस्ति ऽइह प्रमदोद्याने तरुमण्डपमध्यगः
दृष्टप्रभावो वरदो देवदेवो विनायकः । 55
तम् उपागत्य भक्त्या त्वं पूजय प्रार्थितप्रदं,
येन निर्विघ्नम् एव ऽआशु स्वोचितं पतिम् आप्स्यसि । 56

तच् छ्रुत्वा पर्यपृच्छन्त सख्यस् ता मौग्ध्यतो मया,
कन्या लभन्ते भर्तारं किं विनायकपूजया । 57
अथ ताः प्रत्यवोचन् मां, किम् एतावत् त्वया उच्यते,
तस्मिन् अपूजिते न अस्ति सिद्धिः कापि इह कस्यचित् । 58
तथा च एतत्प्रभावं ते वर्णयामो वयं शृणु,
इत्य् उक्त्वा च वयस्या मे कथाम् अकथयन् इमां । 59

पुरा पुरारिस् तनयं सेनान्यं प्राप्तुम् इच्छति
तारकोपद्रुते शक्रे दग्धे च कुसुमायुधे । 60
ऊर्ध्वरेतसम् अत्युग्रे सुदीर्घे तपसि स्थितं
गौरी कृततपाः प्रार्थ्य प्राप्य च त्र्यम्बकं पतिं । 61
आचकाङ्क्ष सुतप्राप्तिं मदनस्य च जीवितं,
न च सस्मार सिद्ध्यर्थं सा विघ्नेश्वरपूजनं । 62
अभीष्टाभ्यर्थिनीं तां च कान्ताम् इत्य् अवदच् छिवः,
प्रिये प्रजापतेः पूर्वं मानसाद् अजनि स्मरः । 63
कं दर्पयामि इति मदाज् जातमात्रो जगाद च,
तेन कन्दर्पनामानं तं चकार चतुर्मुखः । 64
अतिदृप्तो ऽसि चेत् पुत्र, तत् त्रिनेत्रस्य लङ्घनं
एकस्य रक्षेः, मा नाम मृत्युं तस्माद् अवाप्स्यसि । 65
इत्थं स वेधसा उक्तो ऽपि संक्षोभाय आगतः शठः
मया दग्धो, न तस्य अस्ति स्वदेहस्य उद्भवः पुनः । 66

भवत्यास् तु स्वशक्त्या 'एव पुत्रम् उत्पादयाम्य् अहं,
न हि मे मदनोत्साहहेतुका लोकवत् प्रजाः । 67
एवं वदत 'एव 'अस्य पार्वतीं वृषलक्ष्मणः
आविर्बभूव पुरतो ब्रह्मा शतमखान्वितः । 68
तेन स्तुत्वा स विज्ञप्तस् तारकासुरशान्तये
अङ्गीचक्रे शिवः स्रष्टुं देव्याम् आत्मजम् औरसं । 69
अनुमेने च कामस्य जन्म चेतसि देहिनां
सर्गविच्छेदरक्षार्थम् अमूर्तस्य 'एव तद्गिरा । 70
ददौ च निजचित्ते ऽपि सो ऽवकाशं मनोभुवः,
तेन तुष्टो ययौ धाता, मुदं प्राप च पार्वती । 71
ततो यातेषु दिवसेष्व् एकदा रहसि स्थितः
सिषेवे सुरतक्रीडाम् उमया सह शङ्करः । 72
यदा न 'अभूद् रतान्तो ऽस्य गतेष्व् अब्दशतेष्व् अपि,
तदा तदुपमर्देन चकम्पे भुवनत्रयं । 73
ततो जगन्नाशभयाद् रतविघ्नाय शूलिनः
वह्निं स्मरन्ति स्म सुराः पितामहनिदेशतः । 74
सो ऽप्य् अग्निः स्मृतमात्रः सन्न् अधृष्यं मदनान्तकं
मत्वा पलाय्य देवेभ्यः प्रविवेश जलान्तरं । 75
तत्तेजोदह्यमानाश् च तत्र भेका दिवौकसां
विचिन्वतां शशंसुस् तम् अग्निम् अन्तर्जलस्थितं । 76

ततस् तान् अनभिव्यक्तवाचः शापेन तत्क्षणं
भेकान् कृत्वा तिरोभूय भूयो ऽग्निर् मन्दिरं ययौ । 77
तत्र तं कोटरान्तःस्थं देवाः शम्बूकरूपिणं
प्रापुर् गजशुकाख्यातं, स च एषां दर्शनं ददौ । 78
कृत्वा जिह्वाविपर्यासं शापेन शुकदन्तिनां
प्रतिपेदे च देवानां स कार्यं तैः कृतस्तुतिः । 79
गत्वा च स्वोष्मणा सो ऽग्निर् निवार्य सुरताच् छिवं
शापभीत्या प्रणम्य अस्मै देवकार्यं न्यवेदयत् । 80
शर्वो ऽप्य् आरूढवेगो ऽग्नौ तस्मिन् वीर्यं स्वम् आदधे,
तद् धि धारयितुं शक्तो वह्निर् वा अप्य् अम्बिका अपि वा । 81
न मया तनयस् त्वत्तः संप्राप्त इति वादिनीं
खिदकोपाकुलां देवीम् इत्य् उवाच ततो हरः । 82
विघ्नो ऽत्र तव जातो ऽयं विना विघ्नेशपूजनात्,
तद् अर्चय एनं, येन आशु वह्नौ नो जनिता सुतः । 83
इत्य् उक्ता शम्भुना देवी चक्रे विघ्नेश्वरार्चनं,
अनलो ऽपि सगर्भो ऽभूत् तेन वीर्येण धूर्जटेः । 84
तत् तेजः शाम्भवं बिभ्रत् स तदा दिवसेष्व् अपि
अन्तःप्रविष्टतिग्मांशुर् इव सप्तार्चिर् आबभौ । 85
उद्ववाम च गङ्गायां तं गर्भं सो ऽथ दुर्धरं,
गङ्गा अप्य् एनं न्यधान् मेराव् अग्निकुण्डे हराज्ञया । 86

तत्र संरक्ष्यमाणः सन् स गर्भः शाम्भवैर् गणैः
निष्पाद्याब्दसहस्रेण कुमारो ऽभूत् षडाननः । 87
ततो गौरीनियुक्तानां कृत्तिकानां पयोधरान्
षण्णां षड्भिर् मुखैः पीत्वा स्वल्पैः स ववृधे दिनैः । 88
अत्र अन्तरे देवराजस् तारकासुरनिर्जितः
शिश्रिये मेरुशृङ्गाणि दुर्गाण्य् उज्झितसंगरः । 89
देवाश् च साकम् ऋषिभिः षण्मुखं शरणं ययुः,
षण्मुखो ऽपि सुरान् रक्षन् आसीत् तैः परिवारितः । 90
तद् बुद्ध्वा हारितं मत्वा राज्यम् इन्द्रो ऽथ चुक्षुभे,
योधयामास गत्वा च कुमारं स समत्सरः । 91
तद्वज्राभिहताच् च अङ्गात् षण्मुखस्य उद्बभूवतुः ·
पुत्रौ शाखविशाखाख्याव् उभाव् अतुलतेजसौ । 92
सपुत्रं च तम् उत्क्रान्तशतक्रतुपराक्रमं
उपेत्य तनयं शर्वः स्वयं युद्धाद् अवारयत् । 93
जातो ऽसि तारकं हन्तुं राज्यं च इन्द्रस्य रक्षितुं,
तत् कुरुष्व निजं कार्यम् इति च एनं शशास सः । 94
ततः प्रणम्य प्रीतेन तत्क्षणं वृत्रवैरिणा
सैनापत्याभिषेको ऽस्य कुमारस्य उपचक्रमे । 95
स्वयम् उत्क्षिप्तकलशः स्तब्धवाहुर् अभूद् यदा,
ततः शक्रः शुचम् अगाद्, अथ एनम् अवदच् छिवः । 96

न पूजितो गजमुखः सेनान्यं वाञ्छता त्वया,
तेन 'एष विघ्नो जातस् ते, तत् कुरुष्व तदर्चनं । 97
तच् छ्रुत्वा तत् तथा कृत्वा मुक्तवाङ्कः शचीपतिः
अभिषेकोत्सवं सम्यक् सेनान्ये निरवर्तयत् । 98
ततो जघान नचिरात् सेनानीस् तारकासुरं,
ननन्दुः सिद्धकार्याश् च देवा गौरी च पुत्रिणी । 99
तद् एवं देवि देवानाम् अपि सन्ति न सिद्धयः
हेरम्बे न 'अर्चिते, तस्मात् पूजय 'एनं वरार्थिनी । 100

इत्य् उक्ता 'अहं वयस्याभिर् उद्यानैकान्तवर्तिनं
आर्यपुत्र पुरो गत्वा विघ्नराजम् अपूजयं । 101
पूजावसाने च 'अपश्यम् अकस्माद् गगणाङ्गने
उत्प्लुत्य विहरन्तीस् ताः स्वसखीर् निजसिद्धितः । 102
तद् दृष्ट्वा कौतुकाद् व्योम्नः समाहूय 'अवतार्य च
मया सिद्धिस्वरूपं ताः पृष्टाः सख्यो ऽब्रुवन् इदं । 103
इमा नृमांसाशनजा डाकिनीमन्त्रसिद्धयः,
कालरात्रिर् इति ख्याता ब्राह्मणी गुरुर् अत्र नः । 104
एवं सखीभिर् उक्ता 'अहं खेचरीसिद्धिलोलुभा
नृमांसाशनभीता च क्षणम् आसं ससंशया । 105
अथ तत्सिद्धिलुब्धत्वाद् अवोचं ताः सखीर् अहं,
उपदेशो मम 'अप्य् एष युष्माभिर् दाप्यताम् इति । 106

ततो मदभ्यर्थनया गत्वा तल्लणाम् एव ताः
आनिन्युः कालरात्रिं तां तथा एव विकटाकृतिं । 107
मिलद्भुवं कातराक्षीं न्यञ्चच्चिपिटनासिकां
स्थूलगण्डीं करालौष्ठीं दन्तुरां दीर्घकन्धरां । 108
लम्बस्तनीम् उदरिणीं विदीर्णोत्फुल्लपादकां,
धात्रा वैरूप्यनिर्माणवैदग्धीं दर्शिताम् इव । 109
सा मां पादानतां स्नातां कृतविघ्नेश्वरार्चनां
विवस्त्रां मण्डले भीमां भैरवार्चाम् अकारयत् । 110
अभिषिच्य च सा मह्यं तांस् तान् मन्त्रान् निजान् ददौ
भक्षणाय नृमांसं च देवार्चनबलीकृतं । 111
आत्तमन्त्रगणा भुक्तमहामांसा च तत्क्षणं
निरम्बरा एव उत्पतिता ससखीका अहम् अम्बरं । 112
कृतक्रीडा अवतीर्य अथ गगणाद् गुर्वनुज्ञया
गता अभूवम् अहं देवकन्यका अन्तःपुरं निजं । 113
एवं बाल्ये ऽपि जाता अहं डाकिनीचक्रवर्तिनी,
भक्षितास् तत्र च अस्माभिः समेत्य बहवो नराः । 114
अस्मिन् कथान्तरे च एतां महाराज कथां शृणु.
विष्णुस्वामी इत्य् अभूत् तस्याः कालरात्र्याः पतिर् द्विजः । 11
स च तस्मिन्न् उपाध्यायो देशे नानादिगागतान्
शिष्यान् अध्यापयामास वेदविद्याविशारदः । 116

शिष्यमध्ये च तस्य 'एको नाम्ना सुन्दरको युवा
बभूव शिष्यः शीलेन विराजितवपुर्गुणाः । 117
तम् उपाध्यायपत्नी सा कालरात्रिः कदाचन
वव्रे रहसि कामार्ता पत्यौ क्वापि बहिर्गते । 118
नूनं विरूपैर् अधिकं व्यसनैः क्रीडति स्मरः,
यत् सा 'अनवेक्ष्य रूपं स्वं चक्रे सुन्दरकस्पृहाम् । 119
स तु सर्वात्मना न 'ऐच्छद् अर्थ्यमानो ऽपि विप्लवं,
स्त्रियो यथा विचेष्टन्तां, निष्कम्पं तु सतां मनः । 120
ततः सा 'अपसृते तस्मिन् कालरात्रिः क्रुधा तदा
स्वम् अङ्गं पाटयामास स्वयं दन्तनखक्षतैः । 121
विकीर्णवस्त्रकेशान्ता रुदती तावद् आस्त च,
गृहं यावद् उपाध्यायो विष्णुस्वामी विवेश सः । 122
प्रविष्टं तम् अवादीच् च, पश्य सुन्दरकेण मे
अवस्था विहिता स्वामिन् बलात्काराभिलाषिणा । 123
तच् छ्रुत्वा स उपाध्यायः क्रुधा जज्वाल तत्क्षणं,
प्रत्ययः स्त्रीषु मुष्णाति विमर्शं विदुषाम् अपि । 124
सायं च तं सुन्दरकं गृहप्राप्तं प्रधाव्य सः
सशिष्यो मुष्टिभिः पादैर् लगुडैश् च 'अप्य् अताडयत् । 125
किंच प्रहारनिश्चेष्टं शिष्यान् आदिश्य तं बहिः
त्याजयामास रथ्यायां निरपेक्षतया निशि । 126

ततः शनैः सुन्दरकः स निशानिलजीवितः
तथा ऽभिभूतम् आत्मानं पश्यन् एवं व्यचिन्तयत् । 127
अहो स्त्रीप्रेरणा नाम रजसा ऽलङ्घितात्मनां
पुंसां वात्या ऽइव सरसाम् आशयक्षोभकारिणी । 128
येन ऽविचार्य वृद्धो ऽपि विद्वान् अपि च तत् तथा
अतिक्रोधाद् उपाध्यायो विरुद्धम् अकरोन् मयि । 129
अथ वा दैवसंसिद्धाव् आसृष्टेर् विदुषाम् अपि
कामक्रोधौ हि विप्राणां मोक्षद्वारार्गलाव् उभौ । 130
तथा हि किं न मुनयः स्वदारभ्रंशशङ्किनः,
देवदारुवने पूर्वम् अपि शर्वाय चुक्रुधुः । 131
न च ऽएनं विविदुर् देवं कृतक्षपणाकाकृतिं
उमाया दर्शयिष्यन्तम् ऋषीणाम् अप्य् अशान्ततां । 132
दत्तशापाश् च ते सद्यस् त्रिजगत्क्षोभकारणं
बुद्ध्वा तं देवम् ईशानं तम् एव शरणं ययुः । 133
तद् एवं कामकोपादिरिपुषड्वर्गवञ्चिताः
मुनयो ऽपि विमुह्यन्ति, श्रोत्रियेषु कथा ऽएव का । 134
इति सुन्दरकस् तत्र ध्यायन् दस्युभयान् निशि
आरुह्य शून्यगोवाटहर्म्ये तस्थौ समीपगे । 135
तत्र ऽएकदेशे यावच् च क्षणं तिष्ठत्य् अलक्षितः,
तावत् तत्र ऽएव हर्म्ये सा कालरात्रिर् उपाययौ । 136

आकृष्टवीरक्षुरिका मुक्तफूत्कारभीषणा
नयनाननवातोल्का डाकिनीचक्रसंगता । 137
तां दृष्ट्वा तादृशीं तत्र कालरात्रिम् उपागतां
सस्मार मन्त्रान् रक्षोघ्नान् भीतः सुन्दरको ऽथ सः । 138
तन्मन्त्रमोहिता च ऽअथ तं ददर्श न सा तदा
भयसंपिण्डितैर् अङ्गैर् एकान्ते निभृतस्थितं । 139
अथ ऽउत्पतनमन्त्रं सा पठित्वा ससखीजना
कालरात्रिः सगोवाटहर्म्या ऽएव ऽउदपतन् नभः । 140
तं च मन्त्रं स जग्राह श्रुत्वा सुन्दरकस् तदा,
सहर्म्या सा ऽअपि नभसा क्षिप्रम् उज्जयिनीं ययौ । 141
तत्र ऽअवतार्य हर्म्यं सा मन्त्रतः शाकवाटके
गत्वा श्मशाने चिक्रीड डाकिनीचक्रमध्यगा । 142
तत्क्षणं च क्षुधाक्रान्तः शाकवाटे ऽवतीर्य सः
तत्र सुन्दरकश् चक्रे वृत्तिम् उत्खातमूलकैः । 143
कृतक्षुत्प्रतिघाते ऽस्मिन् प्राग्वद् गोवाटम् आश्रिते
प्रत्याययौ कालरात्री रात्रिमध्ये निकेतनात् । 144
ततो ऽधिरूढगोवाटा पूर्ववन् मन्त्रसिद्धितः
आकाशेन सशिष्या सा निशि स्वगृहम् आययौ । 145
स्थापयित्वा यथास्थानं तच् च गोवाटवाहनं
विसृज्य ऽअनुचरीस् तास् च शय्यावेश्म विवेश सा । 146

सो ऽपि सुन्दरको नीत्वा तां निशां विघ्नविस्मितः
प्रभाते त्यक्तगोवाटो निकटं सुहृदां ययौ । 147
तत्र 'आख्यातस्ववृत्तान्तो विदेशगमनोन्मुखः
तैः समाश्वासितो मित्रैस् तन्मध्ये स्थितिम् अग्रहीत् । 148
उपाध्यायगृहं त्यक्त्वा भुञ्जानः सत्त्रसद्मनि
उवास तत्र विहरन् स्वच्छन्दः सखिभिः सह । 149
एकदा निर्गता क्रेतुं गृहोपकरणानि सा
ददर्श तं सुन्दरकं कालरात्रिः किल 'आपणे । 150
उपेत्य च जगाद 'एनं पुनर् एव स्मरातुरा,
भज सुन्दरक 'अद्य 'अपि मां त्वदायत्तजीवितां । 151
एवम् उक्तस् तया सो ऽथ साधुः सुन्दरको ऽब्रवीत्,
न 'एवं वादीर्, न धर्मो ऽयं, माता मे गुरुपत्न्य् असि । 152
ततो ऽब्रवीत् कालरात्रिर्, धर्मं चेद् वेत्सि, देहि तत्
प्राणान् मे, प्राणदानाद् धि धर्मः को ऽभ्यधिको भवेत् । 153
अथ सुन्दरको ऽवादीन्, मातर् मा 'एवं कृथा हृदि,
गुरुतल्पाभिगमनं कुत्र धर्मो भविष्यति । 154
एवं निराकृता तेन तर्जयन्ती च तं रुषा
पाटयित्वा स्वहस्तेन स्वोत्तरीयम् अगाद् गृहं । 155
पश्य सुन्दरकेण 'इदं धावित्वा पाटितं मम,
इत्य् उवाच पतिं तत्र दर्शयित्वा 'उत्तरीयकं । 156

स च तस्याः पतिः क्रोधाद् गत्वा बध्यम् उदीर्य च
सत्त्रे सुन्दरकस्य 'आशु वारयामास भोजनं । 157
ततः सुन्दरकः खेदात् तं देशं त्यक्तुम् उद्यतः
जानन् उत्पतने व्योम्नि मन्त्रं गोवाटशिक्षितं । 158
ततो ऽवतारे ऽप्य् अपरं शिक्षितं श्रुतविस्मृतं,
तद् एव शून्यगोवाटहर्म्यं निशि पुनर् ययौ । 159
तत्र तस्मिन् स्थिते प्राग्वत् कालरात्रिर् उपेत्य सा
तथा 'एव 'उत्पत्य हर्म्यस्था व्योम्ना 'एव 'उज्जयिनीं ययौ । 160
तत्र 'अवतार्य मन्त्रेण गोवाटं शाकवाटके
जगाम रात्रिचर्यायै पुनः सा पितृकाननं । 161
तं च सुन्दरको मन्त्रं भूयः श्रुत्वा 'अपि न 'अग्रहीत्,
विना हि गुर्वादेशेन संपूर्णाः सिद्धयः कुतः । 162
ततो ऽत्र भुक्त्वा कतिचिन् मूलकान्य् अपराणि च
नेतुं प्रक्षिप्य गोवाटे तत्र तस्थौ स पूर्ववत् । 163
अथ 'एत्य 'आरूढगोवाटा सा गत्वा नभसा निशि
विवेश कालरात्रिः स्वं सद्म स्थापितवाहना । 164
सो ऽपि सुन्दरकः प्रातर् गोवाटान् निर्गतस् ततः
ययौ भोजनमूल्यार्थी विपणीम् आत्तमूलकः । 165
विक्रीणानस्य तस्य 'अत्र मूलकं राजसेवकाः
मालवीया विना मूल्यं जह्रुर् दृष्ट्वा स्वदेशजं । 166

ततः स कलहं कुर्वन् बद्धा सुहृदनुद्रुतः
पाषाणघातदायी इति राजाग्रं तैर् अनीयत । 167
मालवात् कथम् आनीय कन्याकुब्जे ऽत्र मूलकं
विक्रीणीषे सदा इत्य् एष पृष्टो ऽस्माभिर् न जल्पति । 168
हन्ति प्रत्युत पाषाणैर् इत्य् उक्तस् तैः शठैर् नृपः
तत् तद् अद्भुतम् अप्राक्षीत्, ततस् तत्सुहृदो ऽब्रुवन् । 169
अस्माभिः सह यद्य् एष प्रासादम् अधिरोप्यते,
तद् एतत् कौतुकं देव कृत्स्नं जल्पति, न अन्यथा । 170
तथा इत्य् आरोपितो राज्ञा सप्रासादो ऽस्य पश्यतः
उत्पपात स मन्त्रेण सद्यः सुन्दरको नभः । 171
समित्रस् तेन गत्वा च प्रयागं प्राप्य च क्रमात्
श्रान्तः कमपि राजानं स्नातुं तत्र ददर्श सः । 172
संस्तभ्य च अत्र प्रासादं गङ्गायां खात् निपत्य च
विस्मयोद्वीक्षितः सर्वैस् तं राजानम् अभ्यगात् । 173
कस् त्वं, किं च अवतीर्णो ऽसि गगणाद् इति तेन सः
राज्ञा प्रश्नेण पृष्टः सन् एवं सुन्दरको ऽब्रवीत् । 174
अहं मुरजको नाम गणो देवस्य धूर्जटेः,
प्राप्तो मानुषभोगार्थी त्वत्सकाशं तदाज्ञया । 175
तच् छ्रुत्वा सत्यम् आशंक्य शस्याढ्यं रत्नपूरितं
सस्त्रीकं सोपकरणं ददौ तस्मै पुरं नृपः । 176

प्रविश्य ऽथ पुरे तस्मिन्न् उत्प्लुत्य दिवि सानुगः
चिरं सुन्दरकः स्वैरं निर्दैन्यो विचचार सः । 177
शयानो हेमपर्यङ्के वीज्यमानश् च चामरैः
सेव्यमानो वरस्त्रीभिर् ऐन्द्रं सुखम् अवाप सः । 178
अथ ऽएकदा ददौ तस्मै मन्त्रं व्योमावरोहणे
सिद्धः कोऽपि किल ऽआकाशचारी संजातसंस्तवः । 179
प्राप्तावतारमन्त्रः स गत्वा सुन्दरकस् ततः
कन्याकुब्जे निजे देशे व्योममार्गाद् अवातरत् । 180
सपुरं पूर्णलक्ष्मीकम् अवतीर्णं नभस्तलात्
बुद्ध्वा तत्र स्वयं राजा कौतुकात् तम् उपाययौ । 181
परिज्ञातश् च पृष्टश् च राजाग्रे सो ऽथ कालवित्
कालरात्रिकृतं सर्वं स्ववृत्तान्तं न्यवेदयत् । 182
ततश् च ऽआनाय्य पप्रच्छ कालरात्रिं महीपतिः,
निर्भया सा ऽअप्य् अविनयं स्वं प्रत्यपद्यत । 183
कुपिते च नृपे तस्याः कर्णौ च छेत्तुम् उद्यते
सा गृहीता ऽअपि पश्यत्सु सर्वेष्व् एव तिरोदधे । 184
ततः स्वराष्ट्रे वासो ऽस्यास् तत्र राज्ञा न्यषिध्यत,
तत्पूजितः सुन्दरकः शिश्रिये च नभः पुनः । 185

इत्य् उक्त्वा तत्र भर्तारम् आदित्यप्रभभूपतिं
अभाषत पुनश् च ऽएवं राज्ञी कुवलयावली । 186

भवन्त्य् एवंविधा देव डाकिनीमन्त्रसिद्धयः,
एतच् च मत्पितुर् देशे वृत्तं विश्वत्र विश्रुतं । 187
कालरात्रिश् च शिष्या ऽहम् इत्य् आदौ वर्णितं मया,
पतिव्रतात्वात् सिद्धिस् तु ततो ऽप्य् अभ्यधिका मम । 188
भवता च ऽद्य दृष्टा ऽहं श्रेयोऽर्थं ते कृतार्चना
उपहाराय पुरुषं मन्त्रेण ऽऽक्रष्टुम् उद्यता । 189
तद् अस्मदीये ऽत्र नये त्वम् अपि प्रविश ऽधुना,
सिद्धयोगजितानां च राज्ञां मूर्ध्नि पदं कुरु । 190
तच् छ्रुत्वा, क्व महामांसभोजनं डाकिनीनयः,
क्व च राजत्वम् इत्य् उक्त्वा स राजा निषिषेध तत् । 191
प्राणत्यागोद्यतायां तु राज्ञ्यां तत् प्रत्यपद्यत,
विषयाकृष्यमाणा हि तिष्ठन्ति सुपथे कथं । 192
ततः सा तं प्रवेश्य ऽएव मण्डले पूर्वपूजिते
गृहीतसमयं सन्तं राजानम् इदम् अब्रवीत् । 193
य एष फलभूत्याख्यः स्थितो विप्रस् तव ऽन्तिके,
स मया ऽत्र ऽउपहारार्थम् आक्रष्टुम् उपकल्पितः । 194
आकर्षणं च सायासं, तत् कश्चित् सूपकृद् वरं
नये ऽत्र स्थाप्यतां, यस् तं स्वयं हन्ति पचत्य् अपि । 195
न कार्या च घृणा यस्मात् तन्मांसबलिभक्षणात्
समापिते ऽर्चने पूर्णा सिद्धिः स्याद्, उत्तमो हि सः । 196

इत्य् उक्तः प्रियया राजा पापभीतो ऽपि तत् पुनः
अङ्गीचकार, दिग् अहो कष्टां स्त्रीषु अनुरोधितां । 197
आनाय्य सूपकारं च ततः साहसिकाभिधं
विश्वास्य दीक्षितं कृत्वा दम्पती तौ सह ऊचतुः । 198
राजा देवीद्वितीयो ऽद्य भोक्ष्यते, तत् त्वरां कुरु
आहारस्य इति यो ऽभ्येत्य त्वां ब्रूयात् तं निपातयेः । 199
तन्मांसैश् च रहः कुर्याः प्रातर् नौ स्वादुभोजनं,
इति सूपकृद् आदिष्टस् तथा इत्य् उक्त्वा गृहं ययौ । 200
प्रातश् च फलभूतिं तं प्राप्तं राजा जगाद सः,
गच्छ साहसिकं ब्रूहि सूपकारं महानसे । 201
राजा देवीद्वितीयो ऽद्य भोक्ष्यते स्वादुभोजनं,
अतस् त्वरितम् आहारम् उत्तमं साधयेर् इति । 202
तथा इति निर्गतं तं च फलभूतिं बहिस् तदा
एत्य चन्द्रप्रभो नाम राज्ञः पुत्रो ऽब्रवीद् इदं । 203
अनेन शीघ्रं हेम्ना मे कारय अद्य एव कुण्डले
यादृशी भवता पूर्वम् आर्यतातस्य कारिते । 204
इत्य् उक्तो राजपुत्रेण फलभूतिस् तदा एव सः
कृतानुरोधः प्रहितो ययौ कुण्डलयोः कृते । 205
राजपुत्रो ऽप्य् अगात् स्वैरं कथितं फलभूतिना
राजादेशं गृहीत्वा तम् एकाक्य् एव महानसं । 206

तत्र उक्तराजादेशं तं स्थितसंवित् स सूपकृत्
राजपुत्रं क्षुरिकया सद्यः साहसिको ऽबधीत् । 207
तन्मांसैः साधितं तेन भोजनं च कृतार्चनौ
अभुञ्जाताम् अजानन्तौ तत्त्वं राज्ञी नृपस् तथा । 208
नीत्वा च सानुतापस् तां रात्रिं राजा ददर्श सः
प्रातः कुण्डलहस्तं तं फलभूतिम् उपागतं । 209
विभ्रान्तः कुण्डलोद्देशात् तं च पप्रच्छ तत्क्षणं,
तेन आख्यातस्ववृत्तान्तः पपात च भुवस् तले । 210
हा पुत्र इति च चक्रन्द निन्दन् भार्यां सह आत्मना,
पृष्टश् च सचिवैः सर्वं यथातत्त्वम् अवर्णयत् । 211
उवाच च एतद् उक्तं तत् प्रत्यहं फलभूतिना,
भद्रकृत् प्राप्नुयाद् भद्रम्, अभद्रं च अप्य् अभद्रकृत् । 212
कन्दुको भित्तिनिक्षिप्त इव प्रतिफलन् मुहुः,
आपतत्य् आत्मनः प्रायो दोषो ऽन्यस्य चिकीर्षितः । 213
पापाचारैर् यद् अस्माभिर् ब्रह्महत्यां चिकीर्षुभिः
स्वपुत्रघातनं कृत्वा प्राप्तं तन्मांसभक्षणं । 214
इत्य् उक्त्वा बोधयित्वा च मन्त्रिणः स्वान् अधोमुखान्,
तम् एव फलभूतिं च निजे राज्ये ऽभिषिच्य सः । 215
राजा प्रदत्तदानः सन् अपुत्रः पापशुद्धये
सभार्यः प्रविवेश अग्निं दग्धो ऽप्य् अनुशयाग्निना । 216

फलभूतिश् च तद्राज्यं प्राप्य पृथ्वीं शशास सः,
एवं भद्रम् अभद्रं वा कृतम् आत्मनि कल्पयेत् । 217

इति वत्सेश्वरस्य अग्रे कथयित्वा कथाम् इमां
यौगन्धरायणो भूयो भूपतिं तम् अभाषत । 218
तस्मात् तव स राजेन्द्र जित्वा अप्य् आचरतः शुभं
ब्रह्मदत्तो विकुर्वीत यदि, हन्येत स एव तत् । 219
इत्य् उक्तो मन्त्रिमुख्येन तद्वाक्यम् अभिनन्द्य सः
उत्थाय दिनकर्तव्यं वत्सेशो निरवर्तयत् । 220
अन्येद्युश् च संपन्नसर्वदिग्विजयः कृती
लावाणकाद् उदचलत् कौशाम्बीं स्वपुरीं प्रति । 221
क्रमेण नगरीं प्राप क्षितीशः सपरिच्छदः
उत्पताकाभुजलतां नृत्यन्तीम् उत्सवाद् इव । 222
विवेश च एनां पौरस्त्रीनयनोत्पलकानने
वितान्वानः प्रतिपदं प्रवातारम्भविभ्रमं । 223
चारणोद्गीयमानश् च स्तूयमानश् च वन्दिभिः
नृपैः प्रणाम्यमानश् च राजा मन्दिरम् आविशत् । 224
ततो विनमेषु अधिरोप्य शासनं
स वत्सराजो ऽखिलदेशराजसु

पूर्वं निधानाधिगतं कुलोचितं
प्रसह्य सिंहासनम् आरुरोह तत् । 225
तत्कालमङ्गलसमाहततारधीर-
तूर्यारवप्रतिरवैस् च नभः पुपूरे
तन्मन्त्रिमुख्यपरितोषितलोकपाल-
दत्तैर् इव प्रतिदिशं समसाधुवादैः । 226
विविधम् अथ वितीर्य वीतलोभो
वसु वसुधाविजयार्जितं द्विजेभ्यः,
अकृत कृतमहोत्सवः कृतार्थं
क्षितिपतिमण्डलम् आत्ममन्त्रिणस् च । 227
नेत्रेषु वर्षति तदा ऽनुगुणं नरेन्द्रे
तस्मिन् धनद्घनमृदङ्गनिनादिताग्रां
संभाव्य भाविबहुधान्यफलं जनो ऽपि
तस्यां पुरि प्रतिगृहं विहितोत्सवो ऽभूत् । 228
इत्थं विजित्य जगतीं स कृती रुमण्वद्-
यौगन्धरायणनिवेशितराज्यभारः
तस्थौ यथेच्छम् अथ वासवदत्तया ऽत्र
पद्मावतीसहितया सह वत्सराजः । 229
कीर्तिश्रियोर् इव तयोर् उभयोस् च देव्योर्
मध्यस्थितः स वरचारणगीयमानः

चन्द्रोदयं निजयशोधवलं सिषेवे,
शत्रुप्रतापम् इव शीधु पपौ च शश्वत् । 230

। इति ।
॥ विंशस् तरङ्गः ॥

समाप्तो ऽयं
लावाणको नाम
तृतीयो लम्बकः

पूर्वं निधानाधिगतं कुलोचितं
प्रसह्य सिंहासनम् आरुरोह तत् । 225
तत्कालमङ्गलसमाहततारधीर-
तूर्यारवप्रतिरवैश् च नभः पुपूरे
तन्मन्त्रिमुख्यपरितोषितलोकपाल-
दत्तैर् इव प्रतिदिशं समसाधुवादैः । 226
विविधम् अथ वितीर्य वीतलोभो
वसु वसुधाविजयार्जितं द्विजेभ्यः,
अकृत कृतमहोत्सवः कृतार्थं
क्षितिपतिमण्डलम् आत्ममन्त्रिणश् च । 227
नेत्रेषु वर्षति तदा ऽनुगुणं नरेन्द्रे
तस्मिन् धनघनमृदङ्गनिनादितायां
संभाव्य भाविबहुधान्यफलं जनो ऽपि
तस्यां पुरि प्रतिगृहं विहितोत्सवो ऽभूत् । 228
इत्थं विजित्य जगतीं स कृती रुमण्वद्-
यौगन्धरायणनिवेशितराज्यभारः
तस्थौ यथेष्टम् अथ वासवदत्तया ऽत्र
पद्मावतीसहितया सह वत्सराजः । 229
कीर्तिश्रियोर् इव तयोर् उभयोश् च देव्योर्
मध्यस्थितः स वरचारणगीयमानः

चन्द्रोदयं निजयशोधवलं सिषेवे,
शत्रुप्रतापम् इव शीधु पपौ च शश्वत् । 230

। इति ।
॥ विंशस् तरङ्गः ॥

समाप्तो ऽयं
लावाणको नाम
तृतीयो लम्बकः


अथ

श्री सोमदेव भट्ट विरचिते

कथा सरित् सागरे

नरवाहनदत्तजननं नाम

चतुर्थो लम्बकः



TARANGA. 21.

कर्णतालबलाघातसीमन्तितकुलाचलः
पन्थानम् इव सिद्धीनां दिशन् जयति विघ्नजित् । 1

ततो वत्सेश्वरो राजा स कौशाम्ब्याम् अवस्थितः
एकातपत्रां बुभुजे जिताम् उदयनो महीं । 2
विधाय सरुमण्वत्के भारं यौगन्धरायणे
विहारैकरसश् च अभूद् वसन्तकसखः सुखी । 3
स्वयं संवादयन् वीणां देव्या वासवदत्तया
पद्मावत्या च सहितः संगीतकम् असेवत । 4
देवीकाकलिगीतस्य तद्वीणानिनदस्य च
अभेदे वादनाङ्गुष्ठकम्पो ऽभूद् भेदसूचकः । 5
हर्म्याग्रे निजकीर्त्या इव ज्योत्स्नया धवले च सः
धाराविगलितं शीधु पपौ मदम् इव द्विषां । 6

आनङ्कः स्वर्णकलशैस् तस्य वाराङ्गना रहः
स्मरराज्याभिषेकाम्भ इव रागोज्ज्वलं मधु । 7
आरक्तसरसस्वच्छम् अन्तःस्फुरिततन्मुखं
उपनिन्ये द्वयोर् मध्ये स स्वचित्तम् इव ऽआसवं । 8
ईर्ष्यारुषाम् अभावे ऽपि भङ्गुरभ्रुणि रागिणि
न मुखे तत् तयो राज्ञ्योस् तद्दृष्टिस् तृप्तिम् आययौ । 9
समधुस्फाटिकानेकचषका तस्य पानभूः
बभौ बालातपारक्तसितपद्मा ऽइव पद्मिनी । 10
अन्तरा च मिलद्व्याधः पलाशश्यामकञ्चुकः
स सबाणासनो भेजे स्वोपमं मृगकाननं । 11
जघान पङ्ककलुषान् वराहनिवहान् शरैः
तिमिरौघान् अविरलैः करैर् इव मरीचिमान् । 12
वित्रस्तप्रसृतास् तस्मिन् कृष्णसाराः प्रधाविते
बभुः पूर्वाभिभूतानां कटाक्षाः ककुभाम् इव । 13
रेजे रक्तारुणा च ऽअस्य मही महिषघातिनः
सेवागता ऽइव तच्छृङ्गपातमुक्ता वनाब्जिनी । 14
व्यात्तवक्त्रपतत्प्रासप्रोतेष्व् अपि मृगारिषु
सान्तर्गर्जितनिष्क्रान्तजीवितेषु तुतोष सः । 15
श्वानः श्वभ्रे वने तस्मिंस् तस्य वर्त्मसु वागुराः
सा स्वायुधैकसिद्धे ऽभूत् प्रक्रिया मृगयारसे । 16

एवं सुखोपभोगेषु वर्तमानं तम् एकदा
राजानम् आस्थानगतं नारदो मुनिर् अभ्यगात् । 17
निजदेहप्रभाबद्धमण्डलो मण्डलं दिवः
कृतावतारस् तेजस्विजातिप्रीत्या अंशुमान् इव । 18
स तेन रचितातिथ्यो मुक्तः प्रह्वेण भूभृता
प्रीतः क्षणम् इव स्थित्वा राजानम् तम् अभाषत । 19
शृणु संक्षिप्तम् एतत् ते वत्सेश्वर वदाम्य् अहं.
बभूव पाण्डुर् इति ते राजा पूर्वपितामहः । 20
तव इव तस्य द्वे एव भव्ये भार्ये बभूवतुः
एका कुन्ती द्वितीया च माद्री नाम महौजसः । 21
स पाण्डुः पृथिवीम् एतां जित्वा जलधिमेखलां
सुखी कदाचित् प्रययौ मृगयाव्यसनी वनं । 22
तत्र अरिंदमनामानं स मुनिं मुक्तसायकः
जघान मृगरूपेण सभार्यं सुरतस्थितं । 23
स मुनिर् मृगरूपं तत् त्यक्त्वा कण्ठविवर्तिभिः
प्राणैः शशाप तं पाण्डुं विषण्णं मुक्तकार्मुकं । 24
स्वैरस्थो निर्विमर्षेण हतो ऽयं यत् त्वया, ततः
भार्यासंभोगकाले ते महन् मृत्युर् भविष्यति । 25
इत्य् आप्तशापस् तद्भीत्या त्यक्तभोगस्पृहो ऽथ सः
पत्नीभ्याम् अन्वितः पाण्डुस् तस्थौ शान्ते तपोवने । 26

तत्रस्थो ऽपि स शापेन प्रेरितस् तेन च एकदा
अकस्माच् चकमे माद्रीं प्रियां प्राप च पञ्चतां । 27
तद् एवं मृगया नाम प्रमादो नृप भूभृतां,
क्षपिता ह्य् अनया अन्ये ऽपि नृपास् ते ते मृगा इव । 28
घोरनादा आमिषैकाग्रा धूलिधूम्रा ऊर्ध्वमूर्धजा
कृतदन्ता कथं कुर्याद् राक्षसी इव हि सा शिवं । 29
तस्माद् विफलम् आयासं जहीहि मृगयारसं
वन्यवाहनहन्तॄणां समानः प्राणसंशयः । 30
त्वं च त्वत्पूर्वजप्रीत्या प्रियः कल्याणपात्र मे,
पुत्रस् च तव कामांशो यथा भावी तथा शृणु । 31
पुरा अनङ्गाङ्गसंभूत्यै रत्या स्तुतिभिर् अर्चितः
तुष्टो रहस्यसंक्षेपम् इदं तस्याः शिवो ऽभ्यधात् । 32
अवतीर्य निजांशेन भूमाव् आराध्य मां स्वयं
गौरी पुत्रार्थिनी कामं जनयिष्यत्य् असाव् इति । 33
अतस् चण्डमहासेनसुता देवी नरेन्द्र सा
जाता वासवदत्ता इयं, संपन्ना महिषी च ते । 34
तद् एषा शम्भुम् आराध्य कामांशं सोष्यते सुतं,
सर्वविद्याधराणां यस् चक्रवर्ती भविष्यति । 35
इत्य् उक्तेन आदृतवचा राज्ञि पृथ्वीं तदर्पितां
प्रत्यर्प्य तस्मै स ययौ नारदर्षिर् अदर्शनं । 36

तस्मिन् गते वत्सराजः स तद् वासवदत्तया
ज्ञातपुत्रेछया साकं निन्ये तच्चिन्तया दिनं । 37

अन्येद्युस् तं स वत्सेशम् उपेत्य आस्थानवर्तिनं
नित्योदिताख्यः प्रवरः प्रतीहारो व्यजिज्ञपत् । 38
शिशुकद्वयसंयुक्ता ब्राह्मणी कापि दुर्गता
द्वारि स्थिता महाराज देवदर्शनकाङ्क्षिणी । 39
तच् छ्रुत्वा एव अभ्यनुज्ञाते तत्प्रवेशे महीभृता
ब्राह्मणी सा विवेश अत्र कृशपाण्डुरधूसरा । 40
मानेन इव विशीर्णेन वाससा विधुरीकृता
दुःखदैन्यनिभाव् अङ्के बिभ्रती बालकाव् उभौ । 41
कृतोचितप्रणामा च सा राजानं व्यजिज्ञपत्,
ब्राह्मणी कुलजा च अहम् ईदृशीं दुर्गतिं गता । 42
दैवाद् युगपद् एतौ च जातौ द्वौ तनयौ मम,
तद् देव न अस्ति मे स्तन्यम् एतयोर् भोजनं विना । 43
तेन इह कृपणा अनाथा शरणागतवत्सलं
प्राप्ता अस्मि देवं शरणं, प्रमाणम् अधुना प्रभुः । 44
तच् छ्रुत्वा सदयो राजा स प्रतीहारम् आदिशत्,
इयं वासवदत्तायै देव्यै नीत्वा अर्प्यताम् इति । 45
ततश् च कर्मणा स्वेन शुभेन इव अग्रयायिना
नीता अभूत् निकटं देव्याः पतीहारेण तेन सा । 46

राज्ञा विसृष्टां बुद्ध्वा तां प्रतीहाराद् उपागतां
देवी वासवदत्ता सा ब्राह्मणीं अद्दधेतरां । 47
युग्मापत्यां च पश्यन्ती दीनाम् एतां व्यचिन्तयत्,
अहो वामैकवृत्तित्वं किमप्य् एतत् प्रजापतेः । 48
अहो वस्तुनि मात्सर्यम्, अहो भक्तिर् अवस्तुनि,
न 'अद्य 'अप्य् एकोऽपि मे जातो, जातौ त्व् अस्या यमाव् इमौ । 49
एवं संचिन्तयन्ती च देवी सा स्नानकाङ्क्षिणी
ब्राह्मण्याश् चेटिकास् तस्याः स्नपनादौ समादिशत् । 50
स्नपिता दत्तवस्त्रा च ताभिः स्वादु च भोजिता
ब्राह्मणी सा 'अम्बुसिक्ता 'इव तप्ता भूः समुदश्वसत् । 51
समाश्वस्ता च सा युक्त्या कथालापैः परीक्षितुं
क्षणान्तरे निजगदे देव्या वासवदत्तया । 52
भोर् ब्राह्मणि कथा काचित् त्वया नः कथ्यताम् इति,
तच् छ्रुत्वा सा तथा 'इत्य् उक्त्वा कथां वक्तुं प्रचक्रमे । 53

पुरा 'अभूज् जयदत्ताख्यः सामान्यः कोऽपि भूपतिः,
देवदत्ताभिधानश् च पुत्रस् तस्य 'उदपद्यत । 54
यौवनस्थस्य तस्य 'अथ विवाहं तनयस्य सः
विधातुम् इच्छन् नृपतिर् मतिमान् इत्य् अचिन्तयत् । 55

वेश्या इव बलवद्भोग्या राजश्रीर् अतिचञ्चला,
बणिजां तु कुलस्त्री इव स्थिरा लक्ष्मीर् अनन्यगा । 56
तस्माद् विवाहं पुत्रस्य करोमि बणिजां गृहात्,
राज्ये ऽस्य बहुदायादे येन न आपद् भविष्यति । 57
इति निश्चित्य पुत्रस्य कृते वव्रे स भूपतिः
बणिजो वसुदत्तस्य कन्यां पाटलिपुत्रकात् । 58
वसुदत्तो ऽपि स ददौ श्लाघ्यसंबन्धवाञ्छया
दूरदेशान्तरे ऽप्य् अस्मै राजपुत्राय तां सुतां । 59
पूरयामास च तथा धनैर् जामातरं स तं,
अचलद्बहुमानो ऽस्य यथा स्वपितृवैभवे । 60
अवाप्ताढ्यबणिक्पुत्रीसहितेन अथ तेन सः
तनयेन समं तस्थौ जयदत्तनृपः सुखं । 61
एकदा तत्र च आगत्य सोत्कः संबन्धिसद्मनि
स बणिग् वसुदत्तस् तां निनाय स्वगृहं सुतां । 62
ततो ऽकस्मात् स नृपतिर् जयदत्तो दिवं ययौ,
उद्भूय गोत्रजैस् तस्य तच् च राज्यम् अधिष्ठितं । 63
तद्भीत्या तस्य तनयो जनन्या निजया निशि
देवदत्तस् तु नीतो ऽभूद् अन्यदेशम् अलक्षितः । 64
तत्र सा राजपुत्रं तं माता दुःखितमानसा,
देवो ऽस्ति चक्रवर्ती नः प्रभुः पूर्वदिगीश्वरः । 65

राज्ञा विसृष्टां बुद्ध्वा तां प्रतीहाराद् उपागतां
देवी वासवदत्ता सा ब्राह्मणीं श्रद्दधेतरां । 47
युग्मापत्यां च पश्यन्ती दीनाम् एतां व्यचिन्तयत्,
अहो वामैकवृत्तित्वं किमप्य् एतत् प्रजापतेः । 48
अहो वस्तुनि मात्सर्यम्, अहो भक्तिर् अवस्तुनि,
न अद्य अप्य् एकोऽपि मे जातो, जातौ त्व् अस्या यमाव् इमौ । 49
एवं संचिन्तयन्ती च देवी सा स्नानकाङ्क्षिणी
ब्राह्मण्यास् चेटिकास् तस्याः स्नपनादौ समादिशत् । 50
स्नपिता दत्तवस्त्रा च ताभिः स्वादु च भोजिता
ब्राह्मणी सा अम्बुसिक्ता इव तप्ता भूः समुदश्वसत् । 51
समाश्वस्ता च सा युक्त्या कथालापैः परीक्षितुं
क्षणान्तरे निजगदे देव्या वासवदत्तया । 52
भोर् ब्राह्मणि कथा काचित् त्वया नः कथ्यताम् इति,
तच् छ्रुत्वा सा तथा इत्य् उक्त्वा कथां वक्तुं प्रचक्रमे । 53

पुरा अभूज् जयदत्ताख्यः सामान्यः कोऽपि भूपतिः,
देवदत्ताभिधानश् च पुत्रस् तस्य उदपद्यत । 54
यौवनस्थस्य तस्य अथ विवाहं तनयस्य सः
विधातुम् इच्छन् नृपतिर् मतिमान् इत्य् अचिन्तयत् । 55

वेश्या इव बलवद्भोग्या राजश्रीर् अतिचञ्चला,
बणिजां तु कुलस्त्री इव स्थिरा लक्ष्मीर् अनन्यगा । 56
तस्माद् विवाहं पुत्रस्य करोमि बणिजां गृहात्,
राज्ये ऽस्य बहुदायादे येन न आपद् भविष्यति । 57
इति निश्चित्य पुत्रस्य कृते वव्रे स भूपतिः
बणिजो वसुदत्तस्य कन्यां पाटलिपुत्रकात् । 58
वसुदत्तो ऽपि स ददौ श्लाघ्यसंबन्धवाञ्छया
दूरदेशान्तरे ऽप्य् अस्मै राजपुत्राय तां सुतां । 59
पूरयामास च तथा धनैर् जामातरं स तं,
अचलद्बहुमानो ऽस्य यथा स्वपितृवैभवे । 60
अवाप्ताढ्यबणिक्पुत्रीसक्तेन अथ तेन सः
तनयेन समं तस्थौ जयदत्तनृपः सुखं । 61
एकदा तत्र च आगत्य सोत्कः संबन्धिसद्मनि
स बणिग् वसुदत्तस् तां निनाय स्वगृहं सुतां । 62
ततो ऽकस्मात् स नृपतिर् जयदत्तो दिवं ययौ,
उद्भूय गोत्रजैस् तस्य तच् च राज्यम् अधिष्ठितं । 63
तद्भीत्या तस्य तनयो जनन्या निजया निशि
देवदत्तस् तु नीतो ऽभूद् अन्यदेशम् अलक्षितः । 64
तत्र सा राजपुत्रं तं माता दुःखितमानसा,
देवो ऽस्ति चक्रवर्ती नः प्रभुः पूर्वदिगीश्वरः । 65

तत्पार्श्वं व्रज, राज्यं ते साधयिष्यति वत्स सः,
इत्य् उक्तः स तदा मात्रा राजपुत्रो जगाद् तां । 66
तत्र मां निष्परिकरं गतं को बहुमंस्यते?
तच् छ्रुत्वा पुनर् अप्य् एवं सा माता तम् अभाषत । 67
श्वशुरस्य गृहान् किं त्वं गत्वा प्राप्य ततो धनं
कृत्वा परिकरं गच्छ निकटं चक्रवर्तिनः । 68
इति स प्रेरितो मात्रा सलज्जो ऽपि नृपात्मजः
क्रमात् प्रतस्थे, सायं च प्राप तच् छ्वाशुरं गृहं । 69
पितृहीनो विनष्टश्रीर् वाष्पपाताभिशङ्कया
अकाले न 'अशकच् च 'अत्र प्रवेष्टुं लज्जया 'अपि च । 70
निकटे सत्त्रवाट्यां ऽथ स्थितः श्वशुरमन्दिरात्
नक्तं रज्ज्वा 'अवरोहन्तीम् अकस्मात् स्त्रियम् ऐक्षत । 71
क्षणाच् च भार्यां स्वाम् एव तां रत्नद्युतिभास्वरां
उल्काम् इव 'अभ्रपतितां परिज्ञाय 'अभ्यतप्यत । 72
सा तु तं धूसरक्षामं दृष्ट्वा 'अप्य् अपरिजानती,
को ऽसि 'इत्य् अपृच्छत्, तच् छ्रुत्वा, पान्थो ऽहम् इति सो ऽब्रवीत् । 73
ततः सा सत्त्रशालान्तः प्रविवेश वणिक्सुता,
अन्वगाद् राजपुत्रो ऽपि स तां गुप्तम् अवेक्षितुं । 74
सा च 'अत्र पुरुषं कंचिद् उपागात्, पुरुषो ऽपि तां,
त्वं चिरेण 'आगता 'असि 'इति पादाघातैर् अताडयत् । 75

ततः सा द्विगुणीभूतरागा पापा प्रसाद्य तं
पुरुषं तेन सहिता तत्र तस्थौ यदृच्छया । 76

तद् दृष्ट्वा तु स सुप्रज्ञो राजपुत्रो व्यचिन्तयत्,
कोपस्य अयं न कालो मे, साध्यम् अन्यद् धि वर्तते । 77

कथं च प्रसरेद् एतच् छस्त्रं कृपणयोर् द्वयोः
शत्रुयोग्यं स्त्रियाम् अस्याम् अस्मिन् वा उपपतौ मम । 78

किम् एतया कुवध्वा वा, कृतम् एतद् धि दुर्विधेः
मदीर्यालोकनक्रीडानैपुण्ये दुःखवर्षिणः । 79

अतुल्यकुलसंबन्धः सा एषा किं च अपराध्यति,
मुक्त्वा बलिभुजं काकी कोकिले रमते कथं । 80

इत्य् आलोच्य स तां भार्याम् उपेक्षत सकामुकां,
सतां गुरुजिगीषे हि चेतसि स्त्रीतृणं कियत् । 81

तत्कालं च रतावेगवशात् तस्याः किल अपतत्
वणिक्सुतायाः श्रवणात् सुरत्नाढ्यं विभूषणं । 82

तच् च सा न ददर्श एव सुरतान्ते च सत्वरा
ययौ यथागतं गेहम् आपृच्छ्य उपपतिं ततः । 83

तस्मिन्न् अपि गते क्वापि द्रुतं प्रछन्नकामुके
स राजपुत्रो दृष्ट्वा तद् रत्नाभरणम् अग्रहीत् । 84

स्फुरद्रत्नशिखाजालं स्फुरन्मोहतमोऽपहं
हस्तदीपम् इव प्राप्तं प्रनष्टश्रीगवेषणे । 85

मह्यार्घं च तद् आलोक्य राजपुत्रः स तत्क्षणं
निर्गत्य सिद्धकार्यः सन् कन्यकुब्जं ततो ययौ । 86
तत्र बन्धाय दत्वा तत् स्वर्णलक्षेण भूषणं
क्रीत्वा हस्त्यश्वम् अगमत् स पार्श्वं चक्रवर्तिनः । 87
तद्दत्तैश् च बलैः साकम् एत्य हत्वा रिपून् रणे
प्राप तत् पैतृकं राज्यं कृती मात्रा ऽभिनन्दितः । 88
तच् च बन्धाद् विनिर्मोच्य भूषणं श्वशुरान्तिकं
प्राहिणोत् प्रकटीकर्तुं रहस्यं तद् अशङ्कितं । 89
सो ऽपि तच्छ्वशुरो दृष्ट्वा स्वसुताकर्णभूषणं
तत् तथा ऽपागतं तस्यै संभ्रान्तः समदर्शयत् । 90
सा ऽपि पूर्वपरिभ्रष्टं चारित्रम् इव वीक्ष्य तत्
बुद्ध्वा च भर्त्रा प्रहितं व्याकुला ऽेव समस्मरत् । 91
इदं मे पतितं तस्यां रात्रौ सत्त्रगृहान्तरे,
यस्यां तत्र स्थितो दृष्टः स को ऽपि पथिको मया । 92
तन् नूनं सो ऽत्र भर्ता मे शीलं जिज्ञासुर् आययौ,
मया तु स न विज्ञातस्, तेन ऽिदं प्रापि भूषणं । 93
इत्य् एवं चिन्तयन्त्याश् च दुर्णयव्यक्तिविक्लवं
बणिक्सुताया हृदयं तस्याः कातरम् अस्फुटत् । 94
ततस् तस्या रहस्यज्ञां पृष्ट्वा चेटीं स्वयुक्तितः
तत्पिता स बणिग् बुद्ध्वा तत्त्वं तत्याज तच्छुचं । 95

राजपुत्रो ऽथ संप्राप्तराज्यो लब्धा गुणार्जितां
स चक्रवर्तितनयां भार्यां भेजे ऽपरां श्रियं । 96

तद् इत्थं साहसे स्त्रीणां हृदयं वज्रकर्कशं,
तद् एव साध्वसावेगसंपाति पुष्पपेलवं । 97
तासु तु काश्चन सद्वंशजाता मुक्ता इव ऽङ्गनाः
याः सुवृत्ताऽच्छहृदया यान्ति भूषणतां भुवि । 98
हरिणी इव च राजश्रीर् एवं विप्लविनी सदा,
धैर्यपाशेन बन्द्धुं च ताम् एवं जानते बुधाः । 99
तस्माद् आपत्स्व् अपि त्याज्यं न सत्त्वं संपदेषिभिः,
अयम् एव ऽत्र वृत्तान्तो मम ऽत्र च निदर्शनं । 100
यन् मया विधुरे ऽप्य् अस्मिंश् चारित्रं देवि रक्षितं,
युष्मद्दर्शनकल्याणप्राप्त्या तत् फलितं हि मे । 101
इति तस्या मुखाच् छ्रुत्वा ब्राह्मण्यास् तल्लक्षणं कथां
देवी वासवदत्ता सा सादरा समचिन्तयत् । 102
ब्राह्मणी कुलवत्य् एषा ध्रुवम्, अस्या ह्य् उदारतां
भङ्गिः स्वशीलोपक्षेपे वाचि प्रौढिश् च शंसति । 103
राजसंसत्प्रवेशे ऽस्याः प्रावीण्यम् अत एव च,
इति संचिन्त्य देवी तां ब्राह्मणीं पुनर् अब्रवीत् । 104

दारास् त्वं कस्य, को वा ते वृत्तान्तः, कथ्यतां त्वया,
तच् छ्रुत्वा ब्राह्मणी भूयः सा ऽथ वक्तुं प्रचक्रमे । 105

मालवे देवि को ऽप्य् आसीद् अग्निदत्त इति द्विजः
निलयः श्रीसरस्वत्योः स्वयमात्तधनो ऽर्थिभिः । 106
तस्य च स्वानुरूपौ द्वाव् उत्पन्नौ तनयौ क्रमात्,
ज्येष्ठः शङ्करदत्ताख्यो नाम्ना शान्तिकरो ऽपरः । 107
तयोः शान्तिकरो ऽकस्माद् विद्यार्थी स्वपितुर् गृहात्
स बाल एव निर्गत्य गतः क्वापि, यशस्विनि । 108
द्वितीयस्म् च स तद्भ्राता ज्येष्ठो मां परिणीतवान्
तनयां यज्ञदत्तस्य यज्ञार्थभृतसंपदः । 109
कालेन तस्य मद्भर्तुः सो ऽग्निदत्ताभिधः पिता
वृद्धो लोकान्तरं यातो भार्यया ऽनुगतः स्वया । 110
तीर्थोद्देशात्म् च मद्भर्ता धृतगर्भां विमुच्य मां
गत्वा सरस्वतीपूते शोकेन ऽग्नौ जुहौ तनुं । 111
वृत्तान्ते कथिते च ऽस्मिन्न् एत्य तत्सहयायिभिः
स्वजनेभ्यो मया लब्धं न ऽनुगन्तुं सगर्भया । 112
ततो मय्य् आर्द्रशोकायाम् अकस्माद् एत्य दस्युभिः
अस्मन्निवासः सकलो ऽप्य् अग्रहारो विलुण्ठितः । 113
तत्क्षणं तिसृभिः सार्धं ब्राह्मणीभिर् अहं ततः
शीलभ्रंशभयाद् आत्तस्वल्पवस्त्रा पलायिता । 114

देशभङ्गाद् विदूरं च गत्वा देशं तदन्विता
मासमात्रं स्थिता ऽभूवं कृच्छ्रकर्मोपजीविनी । 115
श्रुत्वा च ऽनाथशरणं लोकाद् वत्सेश्वरं ततः
सब्राह्मणीका शीलैकपाथेया च ऽहम् इह ऽागता । 116
ऽागत्य ऽएव प्रसूता ऽस्मि युगपत्तनयाव् उभौ
स्थितासु च ऽासु तिसृषु ब्राह्मणीषु सखीष्व् ऽपि । 117
शोको विदेशो दारिद्र्यं द्विगुणः प्रसवो ऽप्य् ऽयं,
ऽहो ऽपावृतं द्वारम् ऽापदां मम वेधसा । 118
तद् एतयोर् गतिर् न ऽस्ति बालयोर् वर्धनाय मे,
इत्य् ऽालोच्य परित्यज्य लज्जां योषिद्विभूषणं । 119
मया प्रविश्य वत्सेशो राजा सदसि याचितः,
कः शक्तः सोढुम् ऽापन्नबालापत्यार्तिदर्शनं । 120
तदादेशेन च प्राप्तं मया त्वच्चरणान्तिकं,
विपदश् च निवृत्ता मे द्वारात् प्रतिहता इव । 121
इत्य् एष मम वृत्तान्तो, नाम्ना पिङ्गलिका ऽप्य् ऽहं,
ऽाबाल्याग्निक्रियाधूमैर् यन् मे पिङ्गलिते दृशौ । 122
स तु शान्तिकरो देवि देवरो मे विदेशगः
कुत्र तिष्ठति देशे ऽसाव् इति न ऽद्य ऽपि बुध्यते । 123
एवम् उक्तस्ववृत्तान्तां कुलीना ऽइत्य् ऽवधार्य तां
प्रीत्या ऽएनां ब्राह्मणीं देवी सा वितर्क्य ऽएवम् ऽब्रवीत् । 124

इह शान्तिकरो नाम स्थितो ऽस्माकं पुरोहितः
वैदेशिकः, स जाने ऽहं देवरस् ते भविष्यति । 125
इत्य् उक्त्वा ब्राह्मणीम् उत्कां नीत्वा रात्रिं तदा एव तां
देवी शान्तिकरं प्रातर् आनाय्य अपृच्छद् अन्वयं । 126
उक्तान्वयाय तस्मै च सा संवादसुनिश्चया,
इयं ते भ्रातृजाया इति ब्राह्मणीं ताम् अदर्शयत् । 127
ज्ञातायां च परिज्ञातौ ज्ञातबन्धुहतो ऽथ सः
ब्राह्मणीं भ्रातृजायां तां निन्ये शान्तिकरो गृहं । 128
तत्र अनुशोच्य पितरौ भ्रातरं च यथोचितं
आश्वासयामास स तां बालकद्वितयान्वितां । 129
देवी वासवदत्ता अपि तस्यास् तौ बालकौ सुतौ
पुरोहितौ स्वपुत्रस्य भाविनः पर्यकल्पयत् । 130
ज्येष्ठस् तयोः शान्तिसोमो नाम्ना वैश्वानरो ऽपरः
कृतस् तया एव देव्या च वितीर्णबहुसंपदा । 131
अन्धस्य इव अस्य लोकस्य फलभूमिं स्वकर्मभिः
पुरोगैर् नीयमानस्य हेतुमात्रं स्वपौरुषं । 132
अथ प्रलब्धविभवास् तस्थुस् ते तत्र संगताः
बालकौ तौ तयोः सा च माता शान्तिकरश् च सः । 133
ततो गच्छत्सु दिवसेषु एकदा पञ्चभिः सुतैः
सह आगताम् उपादाय शरावान् कुम्भकारिकां । 134

दृष्ट्वा स्वमन्दिरे कांचिद् देव्या वासवदत्तया
सा ब्राह्मणी पिङ्गलिका जगदे पार्श्ववर्तिनी । 135
पश्य 'एतस्याः, सुतो ऽस्य 'अपि न 'एको मे सखि दृश्यतां,
पुण्यानाम् ईदृशं पात्रम् ईदृश्य् अपि न मादृशी । 136
ततः पिङ्गलिका 'अवादीद्, देवि दुःखाय जायते
प्रजा 'इयं पापभूयिष्ठा दरिद्रेष्व् एव भूयसी । 137
युष्मादृशेषु जायेत यः स कोऽप्य् उत्तमो भवेत्,
तद् अलं त्वरया, प्राप्स्यस्य् अचिरात् स्वोचितं सुतं । 138
इति पिङ्गलिकोक्ता 'अपि सोत्सुका सुतजन्मनि
अभूद् वासवदत्ता सा तच्चिन्ताक्रान्तमानसा । 139
गिरिशाराधनं प्राप्यपुत्रं ते नारदो ऽभ्यधात्,
तद् देवि वरदो नित्यम् आराध्यः स शिवो ऽत्र नः । 140
इत्य् उक्ता वत्सराजेन तत्कालम् आगतेन सा
देवी लब्धाशयेन 'आशु चकार व्रतनिश्चयं । 141
तस्याम् आत्तव्रतायां तु स राजा 'अपि समन्त्रिकः
सराष्ट्रश् च 'अपि विदधे शङ्कराराधनव्रतं । 142
त्रिरात्रोपोषितौ तौ च दम्पती स विभुस् ततः
प्रसादप्रकटीभूतः स्वयं स्वप्ने समादिशत् । 143
उत्तिष्ठतं स युवयोः कामांशो जनिता सुतः,
नाथो विद्याधराणां यो भविता मत्प्रसादतः । 144

इति वचनम् उदीर्य चन्द्रमौलौ
सपदि तिरोहिततां गते, प्रबुध्य
अधिगतवरम् आशु दम्पती तौ
प्रमदम् अकृत्रिमम् आपतुः कृतार्थौ । 145
उत्थाय च उषसि ततः प्रकृतीर् विधाय
तत्स्वप्नकीर्तनसुधारसतर्पितास् ताः,
देवी च सा नरपतिश् च सबन्धुभृत्यौ
बद्धोत्सवौ विदधतुर् व्रतपारणानि । 146
कतिपयदिवसापगमे
तस्याः स्वप्ने जटाधरः पुरुषः
कोऽप्य् अथ देव्या वासव-
दत्तायाः फलम् उपेत्य ददौ । 147
ततः स विनिवेदितस्फुटतथाविधस्वप्नया
सह प्रमुदितस् तया समभिनन्दितो मन्त्रिभिः
विचिन्त्य शशिमौलिना फलनिभेन दत्तं सुतं
मनोरथम् अदूरगं गणयति स्म वत्सेश्वरः । 148

। इति ।
॥ एकविंशस् तरङ्गः ॥

TARANGA. 22.

अथ वासवदत्ताया वत्सेशहृदयोत्सवः
संबभूव अचिराद् गर्भः कामांशावतारोज्ज्वलः । 1
सा बभौ लोलनेत्रेण मुखेन आपाण्डुकान्तिना
शशाङ्केन इव गर्भस्थकामप्रेमोपगामिना । 2
आसीनायाः प्रतिस्नेहाद् रतिप्रीती इव आगते
रेजतुः प्रतिमे तस्या मणिपर्यङ्कपार्श्वयोः । 3
भाविविद्याधराधीशगर्भसेवार्थमिष्टदाः
मूर्ता विद्या इव आयाताः सख्यस् तां पर्युपासत । 4
विलीनपल्लवश्याममुखौ सा अथ पयोधरौ
सूनुगर्भाभिषेकाय बभार कलशाव् इव । 5
स्वच्छस्फुरितसच्छायमणिकुट्टिमशोभिनः
सुखशय्यागता मध्ये मन्दिरस्य रराज सा । 6
भावितत्तनयाक्रान्तिशङ्काकम्पितवारिभिः
उपेत्य सेव्यमाना इव समन्ताद् रत्नराशिभिः । 7
तस्या विमानमध्यस्थरत्नोत्था प्रतिमा बभौ
विद्याधरश्रीर् नभसा प्रणामार्थम् इव आगता । 8

मन्त्रसाधनसंनद्धसाधकेन्द्रकथास्व् अपि
बभूव सा दोहृदिनी प्रसङ्गोपनतास्व् अपि । 9
सरसारब्धसंगीता विद्याधरवराङ्गनाः
स्वप्ने ताम् अम्बरोत्सङ्गम् आरूढाम् उपतस्थिरे । 10
प्रबुद्धा सेवितुं साक्षात् तद् एव ऽभिललाष सा
नभःक्रीडाविलसितं लब्धभूतलकौतुकं । 11
तं च दोहृदम् एतस्या देव्या यौगन्धरायणः
मन्त्रयन्त्रेन्द्रजालादिप्रयोगैः समपूरयत् । 12
विजहार च सा तैस् तैः प्रयोगैर् गगणास्थिता
पौरनारीजनोत्पक्ष्मलोचनाश्चर्यदायिभिः । 13
एकदा वासकस्थायास् तस्याश् च समजायत
हृदि विद्याधरोदारकथाश्रवणकौतुकं । 14
ततस् तया ऽर्थितो देव्या तत्र यौगन्धरायणः
तस्याः सर्वेषु शृण्वत्सु निजगाद कथाम् इमां । 15

अस्त्य् अम्बिकाजनयिता नगेन्द्रो हिमवान् इति,
न केवलं गिरीणां यो गुरुर् गौरीपतेर् अपि । 16
विद्याधरनिवासे च तस्मिन् विद्याधराधिपः
उवास राजा जीमूतकेतुर् नाम महाचले । 17

तस्य ऽभूत् कल्पवृक्षस् च गृहे पितृक्रमागतः
नाम्ना ऽन्वर्थेन विख्यातो यो मनोरथदायकः । 18
कदाचिच् च स जीमूतकेतू राजा ऽभ्युपेत्य तं
उद्याने देवतात्मानं कल्पद्रुमम् अयाचत । 19
सर्वदा प्राप्यते ऽस्माभिस् त्वत्तः सर्वम् अभीप्सितं,
तद् अपुत्राय मे देहि देव पुत्रं गुणान्वितं । 20
ततः कल्पद्रुमो ऽवादीद्, राजन् उत्पत्स्यते तव
जातिस्मरो दानवीरः सर्वभूतहितः सुतः । 21
तच् छ्रुत्वा स प्रहृष्टः सन् कल्पवृक्षं प्रणम्य तं
गत्वा निवेद्य तद् राजा निजां देवीम् अनन्दयत् । 22
अथ तस्य ऽचिराद् एव राज्ञः सूनुर् अजायत,
जीमूतवाहनं तं च नाम्ना स विदधे पिता । 23
ततः सहजया साकं सर्वभूतानुकम्पया
जगाम स महासत्त्वो वृद्धिं जीमूतवाहनः । 24
क्रमाच् च यौवराज्यस्थः परिचर्याप्रसादितं
लोकानुकम्पी पितरं विजने स व्यजिज्ञपत् । 25
जानामि तात यद् भावा भवे ऽस्मिन् क्षणभङ्गुराः,
स्थिरं तु महताम् एकम् आकल्पम् अमलं यशः । 26
परोपकृतिसंभूतं तद् एव यदि, हन्त तत्
किम् अन्यत् स्याद् उदाराणां धनं प्राणाधिकप्रियं । 27

संपच् च विद्युद् इव सा लोकलोचनखेदकृत्
लोला क्वापि लयं याति या परानुपकारिणी । 28
तद् एष कल्पविटपी कामदो यो ऽस्ति नः स चेत्
परार्थे विनियुज्येत, तद् आप्तं तत्फलं भवेत् । 29
तत् तथा अहं करोमि इह, यथा एतस्य समृद्धिभिः
अदरिद्रा भवत्य् एषा सर्वार्थिजनसंहतिः । 30
इति विज्ञप्य पितरं तदनुज्ञाम् अवाप्य सः
जीमूतवाहनो गत्वा तं कल्पद्रुमम् अब्रवीत् । 31
देव त्वं शश्वद् अस्माकम् अभीष्टफलदायकः,
तद् एकम् इदम् अद्य त्वं मम पूरय वाञ्छितं । 32
अदरिद्रां कुरुष्व एतां पृथिवीम् अखिलां सखे,
स्वस्त्य् अस्तु ते, प्रदत्तो ऽसि लोकाय द्रविणार्थिने । 33
इत्य् उक्तस् तेन धीरेण कल्पवृक्षो ववर्ष सः
कनकं भूतले भूरि, ननन्दुश् च अखिलाः प्रजाः । 34
दयालुर् बोधिसत्त्वांशः को ऽन्यो जीमूतवाहनात्
शक्नुयाद् अर्थिसात्कर्तुम् अपि कल्पद्रुमं कृती । 35
इति जातानुरागासु ततो दिक्षु विदिक्ष्व् अपि
जीमूतवाहनस्य उच्चैः पप्रथे विशदं यशः । 36
ततः पुत्रप्रथाबद्धमूलं राज्यं समत्सराः
दृष्ट्वा जीमूतकेतोस् तद्गोत्रजा विकृतिं ययुः । 37

दानोपयुक्तसत्कल्पवृक्षयुक्तास्पदं च तत्
मेनिरे निष्प्रभावत्वाज् जेतुं सुकरम् एव ते । 38
ततः संभूय युद्धाय कृतबुद्धिषु तेषु च
पितरं तम् उवाच ऽएवं धीरो जीमूतवाहनः । 39
यथा शरीरम् एव ऽइदं जलबुद्बुदसन्निभं,
प्रवातदीपचपलास् तथा कस्य कृते श्रियः । 40
ताश् च ऽअन्योपमर्देन मनस्वी को ऽभिवाञ्छति,
तस्मात् तात मया न ऽएव योद्धव्यं गोत्रजैः सह । 41
राज्यं मुक्त्वा तु गन्तव्यम् इतः क्वापि वनं मया,
आसतां कृपणा एते, मा भूत् स्वकुलसंक्षयः । 42
इत्य् उक्तवन्तं जीमूतवाहनं स पिता ततः
जीमूतकेतुर् अप्य् एवं जगाद कृतनिश्चयः । 43
मया ऽअपि पुत्र गन्तव्यं, का हि वृद्धस्य मे स्पृहा,
राज्ये तृण इव त्यक्ते यूना ऽअपि कृपया त्वया । 44
एवम् उक्तवता साकं सभार्येण तथा ऽइति सः
पित्रा जगाम जीमूतवाहनो मलयाचलं । 45
तत्र ऽअधिवासे सिद्धानां चन्दनच्छन्ननिर्झरे
स तस्थाव् आश्रमपदे परिचर्यापरः पितुः । 46
अथ सिद्धाधिराजस्य वशी विश्वावसोः सुतः
मित्रं मित्रावसुर् नाम तस्य ऽअत्र समपद्यत । 47

तत्स्वसारं च सो ऽपश्यद् एकान्ते जातु कन्यकां,
जन्मान्तरप्रियतमां ज्ञानी जीमूतवाहनः । 48
तत्कालं च तयोस् तुल्यम् यूनोर् अन्योन्यदर्शनं
अभून् मनो मृगीमन्दवागुराबन्धसन्निभं । 49
ततो ऽकस्मात् तम् अभ्येत्य त्रिजगत्पूज्यम् एकदा
जीमूतवाहनं प्रीतः स मित्रावसुर् अब्रवीत् । 50
कन्या मलयवत्याख्या स्वसा मे ऽस्ति कनीयसी,
ताम् अहं ते प्रयच्छामि, मम 'इच्छां मा 'अन्यथा कृथाः । 51
तच् छ्रुत्वा 'एव स जीमूतवाहनो ऽपि जगाद तं,
युवराज मम 'अभूत् सा भार्या पूर्वे ऽपि जन्मनि । 52
त्वं च तत्र 'एव मे जातो द्वितीयं हृदयं सुहृत्,
जातिस्मरो ऽस्म्य् अहं, सर्वं पूर्वजन्म स्मरामि तत् । 53
इत्य् उक्तवन्तं तत्कालं मित्रावसुर् उवाच तं,
जन्मान्तरकथां तावच् छंस 'एतां, कौतुकं हि मे । 54
एतन् मित्रावसोः श्रुत्वा तस्मै जीमूतवाहनः
सुकृती कथयामास पूर्वजन्मकथाम् इमां । 55
अस्ति पूर्वम् अहं व्योमचारी विद्याधरो ऽभवं,
हिमवच्छृङ्गमार्गेण गतो ऽभूवं कदाचन । 56
तदा च 'अधःस्थितस् तत्र क्रीडन् गौर्या समं हरः
शशाप 'उल्लङ्घनक्रुद्धो, मर्त्ययोनौ पत 'इति मां । 57

प्राप्य विद्याधरीं भार्यां नियोज्य स्वपदे सुतं
पुनर् वैद्याधरीं योनिं स्मृतजातिः प्रपत्स्यसे । 58
एवं विरम्य शापान्तम् उक्ता शर्वे तिरोहिते
अचिरेण 'एव जातो ऽहं भूतले बणिजां कुले । 59
नगर्यां वल्लभीनाम्न्यां महाधनबणिक्सुतः,
वसुदत्ताभिधानः सन् वृद्धिं च गतवान् अहं । 60
कालेन यौवनस्थश् च पित्रा कृतपरिच्छदः
द्वीपान्तरं गतो ऽभूवं बणिज्यायै तदाज्ञया । 61
आगच्छन्तं ततो ऽटव्यां तस्करा विनिपत्य मां
हृतस्वम् अनयन् बद्धा स्वपल्लीं चण्डिकागृहं । 62
विलोलदीर्घया घोरं रक्तांशुकपताकया
जिघत्सतः पशुप्राणान् कृतान्तस्य 'इव जिह्वया । 63
तत्र 'अहम् उपहारार्थम् उपनीतो निजस्य तैः
प्रभोः पुलिन्दकाख्यस्य देवीं पूजयतो ऽन्तिकं । 64
स दृष्ट्वा 'एव 'आर्द्रहृदयः शवरो ऽप्य् अभवन् मयि,
वक्ति जन्मान्तरप्रीतिं मनः स्निह्यद् अकारणं । 65
ततो मां मोचयित्वा 'एव बधात् स शवराधिपः
ऐच्छद् आत्मोपहारेण कर्तुं पूजासमापनं । 66
मा 'एवं कृथाः, प्रसन्ना 'अस्मि तव, याचस्व मां वरं,
इत्य् उक्तो दिव्यया वाचा प्रहृष्टश् च जगाद सः । 67

त्वं प्रसन्ना वरः को ऽन्यस्, तथा ऽप्य् एतावद् अर्थये,
जन्मान्तरे ऽपि मे सख्यम् अनेन वणिजा ऽस्त्व् इति । 68
एवम् अस्त्व् इति शान्तायां वाचि मां शवरो ऽथ सः
प्रदत्तसविशेषार्थं प्रणिधाय निजं गृहं । 69
मृत्योर् मुखात् प्रवासाच् च ततः प्रत्यागते मयि
अकरोज् ज्ञातवृत्तान्तः पिता मम महोत्सवं । 70
कालेन तत्र च ऽपश्यम् अहं सार्थावलुण्ठनात्
वष्टभ्य ऽानायितं राज्ञा तम् एव शवराधिपं । 71
तत्क्षणं पितुर् आवेद्य विज्ञप्य च महीपतिं
मोचितः स्वर्णलक्षेण स मया बधनिग्रहात् । 72
प्राणदानोपकारस्य कृत्वा ऽेवं प्रत्युपक्रियां
आनीय च गृहं प्रीत्या पूर्णं संमानितस् चिरं । 73
सत्कृत्य प्रेषितस् च ऽथ हृदयं प्रेमपेशलं
निधाय मयि पल्लीं स्वां प्रायात् स शवराधिपः । 74
तत्र प्रत्युपकारार्थं चिन्तयन् प्राभृतं मम
स्वल्पं स मेने स्वाधीनं मुक्ताकस्तूरिकाद्य् अपि । 75
ततः सातिशयं प्राप्तुं मुक्ताहारं स मत्कृते
धनुर्द्वितीयः प्रययौ गजान् हन्तुं हिमाचलं । 76
भ्रमंस् च तत्र तीरस्थदेवागारं महत् सरः
प्राप तुल्यैः कृतप्रीतिस् तदब्जैर् मित्ररागिभिः । 77

तत्र ऽऽशंक्य ऽम्बुपानार्थम् आगमं वन्यहस्तिनां
छन्नः स तस्थाव् एकान्ते सचापस् तज्जिघांसया । 78
तावत् तत्र सरस्तीरगतं पूजयितुं हरं
आगताम् अद्भुताकारां कुमारीं सिंहवाहनां । 79
स ददर्श तुषाराद्रिराजपुत्रीम् इव ऽपरां
परिचर्यापरां शम्भोः कन्यकाभाववर्तिनीं । 80
दृष्ट्वा च विस्मयाक्रान्तः शबरः स व्यचिन्तयत्,
का ऽइयं स्याद्, यदि मर्त्यस्त्री तत् कथं सिंहवाहना । 81
अथ दिव्या कथं दृश्या मादृशैस्, तद् इयं ध्रुवं
चक्षुषोः पूर्वपुण्यानां मूर्ता परिणतिर् मम । 82
अनया यदि मित्रं तं योजयेयम् अहं, ततः
काप्य् अन्या ऽएव मया तस्य कृता स्यात् प्रत्युपक्रिया । 83
तद् एताम् उपसर्पामि तावज् जिज्ञासितुं वरं,
इत्य् आलोच्य स मित्रं मे शबरस् ताम् उपाययौ । 84
तावच् च सा ऽवतीर्य ऽएव सिंहाच् छायानिषादिनः
कन्या ऽऽगत्य सरःपद्मान्य् अवचेतुं प्रचक्रमे । 85
तं च दृष्ट्वा ऽन्तिकप्राप्तं शबरं सा कृतानतिं
अपूर्वम् अतिथिप्रीत्या स्वागतेन ऽन्वरञ्जयत् । 86
कस् त्वं, किं च ऽऽगतो ऽस्य् एतां भूमिम् अत्यन्तदुर्गमां,
इति पृष्टवतीं तां च शबरः प्रत्युवाच सः । 87

अहं भवानीपदैकशरणः शवराधिपः,
आगतो ऽस्मि च मातङ्गमुक्ताहेतोर् इदं वनं । 88
त्वां च दृष्ट्वा ऽधुना ऽत्मीयो देवि प्राणप्रदः सुहृत्
सार्थवाहसुतः श्रीमान् वसुदत्तो मया स्मृतः । 89
स हि त्वम् इव रूपेण यौवनेन च सुन्दरि
अद्वितीयो ऽस्य विश्वस्य नयनामृतनिर्झरः । 90
सा धन्या कन्यका लोके, यस्यास् तेन ऽइह गृह्यते
मैत्रीदानदयाधैर्यनिधिना कङ्कणीकरः । 91
तत् त्वदाकृतिर् एषा चेत् तादृशेन न युज्यते,
व्यर्थं वहति तत् कामः कोदण्डम् इति मे व्यथा । 92
इति व्याधेन्द्रवचनैः सद्यो ऽपहृतमानसा
सा ऽभूत् कुमारी कन्दर्पमोहमल्लान्तरैर् इव । 93
उवाच तं च शवरं प्रेर्यमाणा मनोभुवा,
क्व स ते सुहृद्, आनीय तावन् मे दर्श्यताम् इति । 94
तच् छ्रुत्वा च तथा ऽइत्य् उक्त्वा ताम् आमन्त्र्य तदा ऽएव सः
कृतार्थमानी मुदितः प्रतस्थे शवरस् ततः । 95
प्राप्य स्वपल्लीम् आदाय मुक्तामृगमदादिकं
भूरिभारिशतैर् कार्यम् अस्मद्गृहम् अथ ऽआययौ । 96
सर्वैः पुरस्कृतस् तत्र प्रविश्य प्राभृतं च तत्
मत्पित्रे स बहुस्वर्णलक्षमूल्यं समर्पयत् । 97

उत्सवेन च याते ऽस्मिन् दिने रात्रौ स मे रहः

कन्यादर्शनवृत्तान्तं तम् आमूलाद् अवर्णयत् । 98

एहि तत्र 'एव गच्छाव इत्य् उक्त्वा च समुत्सुकं

माम् आदाय निशि स्वैरं स प्रायाच् छवरस् ततः । 99

प्रातश् च मां गतं क्वापि बुद्ध्वा सशवराधिपं

तत्प्रीतिप्रत्ययात् तस्थौ धृतिम् आलम्ब्य मत्पिता । 100

अहं च प्रापितो ऽभूवं क्रमात् तेन तरस्विना

शवरेण तुषाराद्रिं कृताध्वपरिकर्मणा । 101

तच् च प्राप्य सरः सायं स्नात्वा स्वादुफलाशनौ

अहं च स च ताम् एकां वने तत्र 'उषितौ निशां । 102

लताभिः कीर्णकुसुमं भृङ्गीसंगीतसुन्दरं

शुभगन्धवहं स्फारिज्वलितौषधिदीपिकं । 103

रतेस् तद् वासवेश्म 'इव विश्रान्त्यै गिरिकाननं

आवयोर् अभवन् नक्तं पिवतोस् तत्सरोजलं । 104

ततो ऽन्येद्युः प्रतिपदं तत्तदुत्कलिकाभृता

प्रत्युगता 'इव मनसा मम तन्मार्गधाविना । 105

चक्षुषा दक्षिणेन 'अपि सूचितागमना 'अमुना

दिदृक्षया 'इव स्फुरता सा कन्या 'अत्र 'आगता 'अभवत् । 106

सटालसिंहपृष्ठस्था सुभ्रूर् दृष्टा मया च सा

शरदम्भोधरोत्सङ्गसङ्गिनी 'इव 'ऐन्दवी कला । 107

उल्लसद्विस्मयौत्सुक्यसाध्वसं पश्यतस् च तां
मम 'अवर्तत तत्कालं न जाने हृदयं कथं । 108
अथ 'अवतीर्य सिंहात् सा पुष्पाण्य् उच्चित्य कन्यका
स्नात्वा सरसि तत्तीरगतं हरम् अपूजयत् । 109
पूजावसाने च 'उपेत्य स सखा शबरो मम
प्रणम्य 'आत्मानम् आवेद्य ताम् अवोचत् कृतादरां । 110
आनीतः स मया देवि सुहृद् योग्यो वरस् तव,
मन्यसे यदि तत् तुभ्यं दर्शयाम्य् अधुना 'एव तं । 111
तच् छ्रुत्वा दर्शय 'इत्य् उक्ते तया स शबरस् ततः
आगत्य निकटं नीत्वा मां तस्याः समदर्शयत् । 112
सा 'अपि मां तिर्यग् आलोक्य चक्षुषा प्रणयस्नुता
मदनावेशवशगा शबरेशं तम् अभ्यधात् । 113
सखा ते मानुषो न 'अयं, कामं कोऽप्य् अयम् आगतः
मद्वञ्चनाय देवो ऽत्र; मर्त्यस्य 'एषा 'आकृतिः कुतः । 114
तद् आकर्ण्य 'उक्तवान् अस्मि तां प्रत्याययितुं स्वयं,
सत्यं सुन्दरि मर्त्यो ऽहं, किं व्याजेन 'आर्जवे जने । 115
अहं हि सार्थवाहस्य वल्लभीवासिनः सुतः
महाधनाभिधानस्य महेश्वरवरार्जितः । 116
तपस्यन् स हि पुत्रार्थम् उद्दिश्य शशिशेखरं
समादिश्यत तेन 'एवं' स्वप्ने देवेन तुष्यता । 117

उत्तिष्ठ उत्पत्स्यते कोऽपि महात्मा तनयस् तव,
रहस्यं परमं च एतद् अलम् उक्का अत्र विस्तरं । 118
एतच् छ्रुत्वा प्रबुद्धस्य तस्य कालेन च आत्मजः
अहम् एष समुत्पन्नो वसुदत्त इति श्रुतः । 119
अयं च शवराधीशः स्वयंवरसुहृन् मया
देशान्तरगतेन प्राक् प्राप्तः कृच्छ्रैकबान्धवः । 120
एष मे तत्त्वसंक्षेप इत्य् उक्का विरते मयि
अभाषत अथ कन्या सा लज्जया अवनताननना । 121
अस्त्य् एतन् मां स जाने ऽद्य स्वप्ने ऽर्चितवतीं हरः,
प्रातः प्राप्स्यसि भर्तारम् इति तुष्टः किल आदिशत् । 122
तस्मात् त्वम् एव मे भर्ता भ्राता अयं च भवत्सुहृत्,
इति वाक्सुधया सा माम् आनन्द्य विरता अभवत् । 123
संमन्त्र्य अथ तया साकं विवाहाय यथाविधि
अकार्षं निश्चयं गन्तुं समित्रो ऽहं निजं गृहं । 124
ततः सा सिंहम् आहूय वाहनं तं स्वसंज्ञया,
तत्र आरोह आर्यपुत्र इति माम् अभाषत सुन्दरी । 125
अथ अहं तेन सुहृदा अनुज्ञातः शवरेण तं
सिंहम् आरुह्य दयिताम् उत्सङ्गे तां गृहीतवान् । 126
ततः प्रस्थितवान् अस्मि कृतकृत्यो गृहं प्रति
कान्तया सह सिंहस्थो मित्रे तस्मिन् पुरःसरे । 127

तदीयशरनिर्भिन्नहरिणामिषवृत्तयः
क्रमेण ते वयं सर्वे संप्राप्ता वल्लभीं पुरीं । 128
तत्र माम् आगतं दृष्ट्वा सिंहारूढं सवल्लभं
साश्चर्यस् तद् द्रुतं गत्वा मम पित्रे ऽब्रवीज् जनः । 129
सो ऽपि प्रत्युद्गतो हर्षाद् अवतीर्णां मृगेन्द्रतः
पादावनम्रं दृष्ट्वा माम् अभ्यनन्दत् सविस्मयः । 130
अनन्यसदृशीं तां च कृतपादाभिवन्दनां
पश्यन् मम ऽउचितां भार्यां न माति स्म मुदा क्वचित् । 131
प्रविश्य मन्दिरं च ऽअस्मान् वृत्तान्तं परिपृच्छ्य च
प्रशंसन् शबराधीशसौहार्दं च ऽउत्सवं व्यधात् । 132
ततो मौहूर्तिकादेशाद् अन्येद्युर् वरकन्यका
सा मया परिणीता ऽअभून् मिलिताखिलबन्धुना । 133
तद् आलोक्य च सो ऽकस्मान् मन्बधूवाहनस् तदा
सिंहः सर्वेषु पश्यत्सु संपन्नः पुरुषाकृतिः । 134
किम् एतद् इति विभ्रान्ते जने तत्र स्थिते ऽखिले
स दिव्यवस्त्राभरणो भवन् माम् एवम् अब्रवीत् । 135
अहं चित्राङ्गदो नाम विद्याधर, इयं च मे
सुता मनोवती नाम कन्या प्राणाधिकप्रिया । 136
एताम् अङ्के सदा कृत्वा विपिनेन भ्रमन्न् अहं
प्राप्तवान् एकदा गङ्गां भूरितीरतपोवनां । 137

तपस्विलङ्घनत्रासात् तस्या मध्ये न गछतः
अपतन् मम दैवाच् च पुष्पमाला तदम्भसि । 138
ततो ऽकस्मात् समुत्थाय नारदो ऽन्तर्जलस्थितः
पृष्ठे तया पतितया क्रुद्धो माम् अशपन् मुनिः । 139
औद्धत्येन अमुना पाप गछ सिंहो भविष्यसि,
हिमाचले गतश् च एतां सुतां पृष्ठेन वक्ष्यसि । 140
यदा च मानुषेण एषा सुता ते परिणेष्यते,
तदा तद्दर्शनाद् एव शापाद् अस्माद् विमोक्ष्यसे । 141
इत्य् अहं मुनिना शप्तः सिंहीभूय हिमाचले
अतिष्ठं तनयाम् एतां हरपूजापरां वहन् । 142
अनन्तरं यथा यत्नाच् छ्वराधिपतेर् इदं
संपन्नं सर्वकल्याणं, तथा विदितम् एव ते । 143
तत् साधयामि, भद्रं वस्, तीर्णः शापो मया एष सः,
इत्य् उक्त्वा सो ऽभ्युदपतत् सद्यो विद्याधरो नभः । 144
ततस् तद्विस्मयाक्रान्तो नन्दत्स्वजनबान्धवः
श्लाघ्यसंबन्धहृष्टो मे पिता अकार्षीन् महोत्सवं । 145
को हि निर्व्याजमित्राणां चरितं चिन्तयिष्यति,
सुहृत्सु न एव तृप्यन्ति प्राणैर् अप्य् उपकृत्य ये । 146
इति च अत्र न को नाम सचमत्कारम् अभ्यधात्
ध्यायं ध्यायम् उदारं तच् छ्वराधिपचेष्टितं । 147

राजा ऽपि तत् तथा बुद्ध्वा तत्रत्यस् तस्य सन्मतेः
अतुष्यद् अस्मत्स्नेहेन शवराधिपतेः परं । 148
तुष्टश् च तस्मै मत्पित्रा दापितः सहसा ऽएव सः
अशेषम् अटवीराज्यं रत्नोपायनदायिना । 149
ततस् तया मनोवत्या पत्न्या मित्रेण तेन च
कृतार्थः शवरेन्द्रेण तत्र ऽअतिष्ठम् अहं सुखी । 150
स च श्लथीकृतात्मीयदेशवासरसस् ततः
भूयसा ऽस्मद्गृहेष्व् एव न्यवसच् छवराधिपः । 151
परस्परोपकारेषु सर्वकालम् अतृप्तयोः
स द्वयोर् अगमत् कालो मम तस्य च मित्रयोः । 152
अचिराच् च मनोवत्यां तस्याम् अजनि मे सुतः
वह्निष्कृतः कुलस्य ऽइव कृत्स्नस्य हृदयोत्सवः । 153
हिरण्यदत्तनामा च स शनैर् वृद्धिम् आययौ,
कृतविद्यो यथावच् च परिणीतो ऽभवत् ततः । 154
तद् दृष्ट्वा जीवितफलं पूर्णं मत्वा च मत्पिता
वृद्धो भागीरथीं प्रायात् सदारो देहम् उज्झितुं । 155
ततो ऽहं पितृशोकार्तः कथंचिद् बान्धवैर् धृतिं
ग्राहितो गृहभारं तम् उद्वोढुं प्रतिपन्नवान् । 156
तदा मनोवतीमुग्धमुखदर्शनम् एकतः
अन्यतः शवरेन्द्रेण संगमो माम् अनन्दयत् । 157

ततः सत्पुत्रसानन्दाः सुकलत्रमनोरमाः
सुहृत्समागमसुखा गतास् ते दिवसा मम । 158
कालेन ऽथ प्रवृद्धं माम् अग्रहीच् चिबुके जरा,
किं गृहे ऽद्य ऽपि पुत्र ऽइति प्रीत्या ऽइव ब्रुवती हितं । 159
तेन ऽअहं सहसा ऽउत्पन्नवैराग्यस् तनयं निजं
कुटुम्बभारोद्वहने वनं वाञ्छन् अयोजयं । 160
सदारश् च गतो ऽभूवं गिरिं कालिञ्जरं ततः
मत्स्नेहत्यक्तराज्येन समं शबरभूभृता । 161
तत्र प्राप्तेन च ऽआत्मीया जातिर् वैद्याधरी मया
शापश् च प्राप्तपर्यन्तः स शार्वः सहसा स्मृतः । 162
तच् च पत्न्यै मनोवत्यै तदा ऽएव ऽआख्यातवान् अहं
सख्ये च शबरेन्द्राय मुमुक्षुर् मानुषीं तनुं । 163
भार्यामित्रे इमे एव भूयास्तां स्मरतो मम
अन्यजन्मन्य् अपि ऽइत्य् उक्त्वा हृदि कृत्वा च शङ्करं । 164
मया गिरितटात् तस्मान् निपत्य प्रसभं ततः
ताभ्यां स्वपत्नीमित्राभ्यां सह मुक्तं शरीरकं । 165
सो ऽहं ततः समुत्पन्नो नाम्ना जीमूतवाहनः
विद्याधरकुले ऽमुष्मिन् एष जातिस्मरो ऽधुना । 166
स च ऽअपि शबरेन्द्रस् त्वं जातो मित्रावसुः पुनः
त्वद्गुप्रसादात् सिद्धानां राज्ञो विश्वावसोः सुतः । 167

या 'अपि विद्याधरी मित्र मम भार्या मनोवती,
तव स्वसा समुत्पन्ना नाम्ना मलयवत्य् असौ । 168
एवं मे पूर्वपत्न्य् एषा भगिनी ते, भवान् अपि
पूर्वमित्रम्, अतो युक्ता परिणेतुम् असौ मम । 169
किंतु पूर्वम् इदं गत्वा मम पित्रोर् निवेदय,
तयोः प्रमाणीकृतयोः सिध्यत्य् एतत् तव 'ईप्सितं । 170

एवं निशम्य जीमूतवाहनात् प्रीतमानसः
गत्वा मित्रावसुः सर्वं तत्पितृभ्यां शशंस तत् । 171
अभिनन्दितवाक्यश् च ताभ्यां हृष्टस् तदा 'एव सः
उपगम्य तम् एव 'अर्थं स्वपितृभ्यां न्यवेदयत् । 172
तयोर् ईप्सितसंपत्तितुष्टयोः सत्वरं च सः
युवराजो विवाहाय संभारम् अकरोत् स्वसुः । 173
ततो जग्राह विधिवत् तस्या जीमूतवाहनः
पाणिं मलयवत्याः स सिद्धराजपुरस्कृतः । 174
बभूव च 'उत्सवस् तत्र चञ्चद्भूचरचारणः
संमिलत्सिद्धसंघातो वल्गद्विद्याधरोत्करः । 175
कृतोद्वाहस् ततस् तस्थौ तस्मिन् जीमूतवाहनः
मलयाद्रौ महार्हेण विभवेन बधूसखः । 176

एकदा च श्वशुर्येण स मित्रावसुना सह
वेलावनानि जलधेर् अवलोकयितुं ययौ । 177

तत्र ऽपश्यच् च पुरुषं युवानं विप्रम् आगतं
निवर्तयन्तं जननीं हा पुत्र इति विराविणीं । 178
अपरेण परित्यक्तं भटेन इव अनुयायिना
पुरुषेण पृथूत्तुङ्गं प्राप्य एकं शिलातलं । 179
कस् त्वम्, किम् ईहसे, किं च माता त्वां शोचति इति तं
स पप्रच्छ ततः सो ऽपि तस्मै वृत्तान्तम् अब्रवीत् । 180
पुरा कश्यपभार्ये द्वे कद्रूश् च विनता तथा
मिथःकथाप्रसङ्गेन विवादं किल चक्रतुः । 181
आद्या श्यामान् रवेर् अश्वान् अवादीद् अपरा सितान्,
अन्योन्यदासभावं च पणम् अत्र बबन्धतुः । 182
ततो जयार्थिनी कद्रूः स्वैरं नागैर् निजात्मजैः
विषफूत्कारमलिनान् अर्कस्य अश्वान् अकारयत् । 183
तादृशांश् च उपदर्श्य एतान् विनतां छद्मना जितां
दासीचकार, कष्टा हि स्त्रीणाम् अन्यासहिष्णुता । 184
तद् बुद्ध्वा आगत्य विनतातनयो गरुडस् तदा
सान्त्वेन मातुर् दासत्वमुक्तिं कद्रूम् अयाचत । 185
ततः कद्रूसुता नागा विचिन्त्य एवं तम् अब्रुवन्,
भो वैनतेय क्षीराब्धिः प्रारब्धो मथितुं सुरैः । 186
ततः सुधां समाहृत्य प्रतिवस्तु प्रयच्छ नः,
मातरं स्वीकुरुष्व अथ, भवान् हि बलिनां वरः । 187

एतन् नागवचः श्रुत्वा गत्वा च क्षीरवारिधिं
सुधार्थं दर्शयामास गरुडो गुरुपौरुषं । 188
ततः पराक्रमप्रीतो देवस् तत्र स्वयं हरिः,
तुष्टो ऽस्मि ते वरं कंचिद् वृणीष्व इत्य् आदिदेश तं । 189
नागा भवन्तु मे भक्ष्या इति सो ऽपि हरेस् ततः
वैनतेयो वरं वव्रे मातुर् दास्येन कोपितः । 190
तथा इति हरिणा आदिष्टो निजवीर्यार्जितामृतः
स च एवम् अथ शक्रेण गदितो ज्ञातवस्तुना । 191
तथा पक्षीन्द्र कार्यं ते, यथा मूढैर् न भुज्यते
नागैः सुधा, यथा च एनां तेभ्यः प्रत्याहराम्य् अहं । 192
एतच् छ्रुत्वा तथा इत्य् उक्त्वा स वैष्णववरोद्धुरः
सुधाकलशम् आदाय तार्क्ष्यो नागान् उपाययौ । 193
वरप्रभावभीतांश् च मुग्धान् आराज् जगाद तान्,
इदम् आनीतम् अमृतं मुक्त्वा अम्बां मम गृह्यतां । 194
भयं चेत् स्थापयाम्य् एतद् अहं वो दर्भसंस्तरे,
उन्मोच्य अम्बां गच्छामि, स्वीकुरुध्वम् इतः सुधां । 195
तथा इत्य् उक्ते च तैर् नागैः स पवित्रे कुशास्तरे
सुधाकलशम् आधत्त, ते च अस्य जननीं जहुः । 196
दास्यमुक्तां च कृत्वा एवं मातरं गरुडे गते,
यावद् आददते नागा निःशङ्कास् तत् किल अमृतं । 197

तावन् निपत्य सहसा तान् विमोच्य स्वशक्तितः
तं सुधाकलशं शक्रो जहार कुशसंस्तरात् । 198
विषस्मास् ते ऽथ नागास् तं लिलिहुर् दर्भसंस्तरं,
कदाचिद् अमृतश्च्योतलेपो ऽप्य् अस्मिन् भवेद् इति । 199
तेन पाटितजिह्वास् ते वृथा 'एव 'आपुर् द्विजिह्वतां,
हास्याद् ऋते किम् अन्यत् स्याद् अतिलौल्यवतां फलं । 200
अथ 'अलब्धामृतरसान् नागान् वैरी हरेर् वरात्
तार्क्ष्यः प्रववृते भोक्तुं तान् निपत्य पुनः पुनः । 201
तदापाते च पातालं त्रासनिर्जीविराजिलं
प्रभ्रष्टगर्भिणीगर्भम् अभूत् क्षयितपन्नगं । 202
तं दृष्ट्वा च 'अन्वहं तत्र वासुकिर् भुजगेश्वरः
कृत्स्नम् एकपदे नष्टं नागलोकम् अमन्यत । 203
ततो दुर्वारवीर्यस्य सह्यस् तस्य विचिन्त्य सः
समयं प्रार्थनापूर्वं चकार 'एवं गरुत्मतः । 204
एकम् एकं प्रतिदिनं नागं ते प्रेषयाम्य् अहं
आहारहेतोः पक्षीन्द्र पयोधिपुलिनाचले । 205
पाताले तु प्रवेष्टव्यं न त्वया मन्दकारिणा,
नागलोकक्षयात् स्वार्थस् तव 'एव हि विनश्यति । 206
इति वासुकिना प्रोक्तस् तथा 'इति गरुडो ऽन्वहं
तत्प्रेषितम् इह 'एकैकं नागं भोक्तुं प्रचक्रमे । 207

तेन क्रमेण च ऽसंख्याः फणिनो ऽत्र क्षयं गताः,
अहं च शङ्खचूडाख्यो नागो, वारो मम ऽद्य च । 208
अतो ऽहं गरुडाहारहेतोर् वध्यशिलाम् इमां
मातुश् च शोच्यतां प्राप्तो नागराजनिदेशतः । 209
इति तस्य वचः श्रुत्वा शङ्खचूडस्य दुःखितः
सान्तःखेदः स जीमूतवाहनस् तम् अभाषत । 210
अहो किमपि निःसत्त्वं राजत्वं बत वासुकेः,
यत् स्वहस्तेन नीयन्ते रिपोर् आमिषतां प्रजाः । 211
किं न प्रथमम् आत्मा ऽएव तेन दत्तो गरुत्मते,
क्लीबेन ऽभ्यर्थिता का ऽइयं स्वकुलक्षयसाक्षिता । 212
उत्पद्य कश्यपात् पापं तार्क्ष्यो ऽपि कुरुते कियत्,
देहमात्रकृते मोहः कीदृशो महताम् अपि । 213
तद् अहं तावद् अद्य ऽएकं रक्षामि त्वां गरुत्मतः
स्वशरीरप्रदानेन, मा विषादं कृथाः सखे । 214
तच् छ्रुत्वा शङ्खचूडो ऽपि धैर्याद् एतद् उवाच तं,
शान्तम् एतन् महासत्त्व, मा स्म ऽएवं भाषथाः पुनः । 215
न काचस्य कृते जातु युक्ता मुक्तामणेः क्षतिः,
न च ऽप्य् अहं गमिष्यामि कथां कुलकलङ्कितां । 216
इत्य् उक्त्वा तं निषिध्य ऽएव साधुर् जीमूतवाहनं
मत्वा गरुडवेलां च स क्षणान्तरगामिनीं । 217

शङ्खचूडो ययौ तत्र वारिधिम् तीरवर्तिनं
अन्तकाले नमस्कर्तुं गोकर्णाख्यम् उमापतिं । 218
गते तस्मिन् स कारुण्यनिधिर् जीमूतवाहनः
तत्त्राणाय ऽऽत्मदानस्य बुबुधे लब्धम् अन्तरं । 219
ततस् तद्विस्मृतम् इव क्षिप्रं कृत्वा स्वयुक्तितः
कार्यापदेशाद् व्यसृजन् निजं मित्रावसुं गृहं । 220
तत्क्षणं च समासन्नतार्क्ष्यपक्षानिलाहता
तत्सत्त्वदर्शनाश्चर्याद् इव सा भूर् अघूर्णत । 221
तेन ऽहिरिपुम् आयान्तं मत्वा जीमूतवाहनः
परानुकम्पी तां बध्यशिलाम् अध्यारुरोह सः । 222
क्षणाच् च ऽत्र निपत्य ऽएव महासत्त्वं जहार तं
आहत्य चञ्च्वा गरुडः स्वछायाछादिताम्बरः । 223
परिस्रवदसृग्धारं च्युतोत्खातशिखामणिं
नीत्वा भक्षयितुं च ऽएनम् आरेभे शिखरे गिरेः । 224
तत्कालं पुष्पवृष्टिश्च् च निपपात नभस्तलात्,
तद्दर्शनाच् च किं न्व् एतद् इति तार्क्ष्यो विसिस्मिये । 225
तावत् स शङ्खचूडो ऽत्र नत्वा गोकर्णम् आगतः
ददर्श रुधिरासारसिक्तं बध्यशिलातलं । 226
हा धिङ् मदर्थं तेन ऽआत्मा दत्तो नूनं महात्मना,
तत् कुत्र नीतस् तार्क्ष्येण क्षणे ऽस्मिन् स भविष्यति । 227

अन्विष्यामि द्रुतं तावत् कदाचित् तम् अवाप्नुयां,
इति साधुः स तद्रक्तधाराम् अनुसरन् ययौ । 228
अत्र ऽन्तरे च हृष्टं तं दृष्ट्वा जीमूतवाहनं
गरुडो भक्षणं मुक्त्वा सविस्मयम् अचिन्तयत् । 229
कश्चित् किम् अन्य एव ऽयं भक्ष्यमाणो ऽपि यो मया
विपद्यते न तु परं धीरः प्रत्युत हृष्यति । 230
इत्य् अत्र विमृशन्तं च तार्क्ष्यं तादृग्विधो ऽपि सः
निजगाद् निजाभीष्टसिद्धै जीमूतवाहनः । 231
पक्षिराज मम ऽस्त्य् एव शरीरे मांसशोनितं,
तद् अकस्माद् अतृप्तो ऽपि किं निवृत्तो ऽसि भक्षणात् । 232
तच् छ्रुत्वा ऽश्चर्यवशगस् तं स पप्रछ पक्षिराट्,
नागः साधो न तावत् त्वं ब्रूहि तत् को भवान् इति । 233
नाग ऽएव ऽस्मि, भुंक्ष्व त्वं, यथारब्धं समापय,
आरब्धा ह्य् असमाप्ता ऽएव किं धीरैस् त्यज्यते क्रिया । 234
इति यावच् च जीमूतवाहनः प्रतिवक्ति तं,
तावत् स शङ्खचूडो ऽत्र प्राप्तो दूराद् अभाषत । 235
मा मा गरुत्मन्, न ऽएव ऽएष नागो, नागो ह्य् अहं तव,
तद् एनं मुञ्च, को ऽयं ते जातो ऽकाण्डे बत भ्रमः । 236
तच् छ्रुत्वा ऽतीवविभ्रान्तो बभूव स खगेश्वरः,
वाञ्छितासिद्धिखेदं च भेजे जीमूतवाहनः । 237

ततो ऽन्योन्यसमालापकन्दद्विद्याधराधिपं
बुद्ध्वा तं भक्षितं मोहाद् गरुत्मान् अन्वतप्यत । 238
अहो वत नृशंसस्य पापम् आपतितं मम,
किं वा सुलभपापा हि भवन्त्य् उन्मार्गवृत्तयः । 239
श्लाघ्यस् त्व् एष महात्मैकः परार्थप्राणदायिना
समेत्य मोहैकवशं येन विश्वम् अदः कृतं । 240
इति तं चिन्तयन्तं च गरुडं पापशुद्धये
वह्निं विविक्षुं जीमूतवाहनो ऽथ जगाद सः । 241
पक्षीन्द्र किं विषण्णो ऽसि, सत्यं पापाद् बिभेषि चेत्,
तद् इदानीं न भूयस् ते भक्ष्या हि 'इमे भुजंगमाः । 242
कार्यश् च 'अनुशयस् तेषु पूर्वभुक्तेषु भोगिषु,
एषो ऽत्र हि प्रतीकारो, वृथा 'अन्यच् चिन्तितं तव । 243
इत्य् उक्तस् तेन स प्रीतस् तार्क्ष्यो भूतानुकम्पिना
तथा 'इति प्रतिपेदे तद् वाक्यं तस्य गुरोर् इव । 244
ययौ च 'अमृतम् आनेतुं नाकाज् जीवयितुं जवात्
क्षताङ्गं तत्र तं च 'अन्यान् अस्थिशेषान् अहीन् अपि । 245
ततश् च साक्षाद् आगत्य देव्या सिक्तो ऽमृतेन सः
जीमूतवाहनो गौर्या तद्भार्याभक्तितुष्टया । 246
तेन 'अधिकतरोद्भूतकान्तीन्य् अङ्गानि जज्ञिरे
तस्य सानन्दगीर्बाणदुन्दुभिध्वनिभिः सह । 247

स्वस्थोत्थिते ततस् तस्मिन्न् आनीय गरुडो ऽपि तत्
कृत्स्ने वेलातटे ऽप्य् अत्र ववर्ष अमृतम् अम्बरात् । 248
तेन सर्वे समुत्थस्थुर् जीवन्तस् तत्र पन्नगाः,
बभौ तच् च तदा भूरिभुजङ्गकुलसंकुलं । 249
वेलावनं विनिर्मुक्तवैनतेयभयं ततः
पातालम् इव जीमूतवाहनालोकनागतं । 250
ततो ऽक्षयेण देहेन यशसा च विराजितं
बुद्ध्वा अभ्यनन्दत् तं बन्धुजनो जीमूतवाहनं । 251
ननन्द तस्य भार्या च सज्ञातिः पितरौ तथा,
को न प्रहृष्येद् दुःखेन सुखत्वपरिवर्तिना । 252
विसृष्टस् तेन च ययौ शङ्खचूडो रसातलं
स्वच्छन्दम् अविसृष्टं च लोकांस् त्रीन् अपि तद्यशः । 253

ततः प्रीतिप्रह्वामरनिकरम् आगत्य गरुडं
प्रणेमुस् तं विद्याधरतिलकम् अभ्येत्य सभयाः
स्वदायादाः सर्वे हिमगिरिसुतानुग्रहवशान्
मतङ्गाख्याद्या, ये सुचिरम् अभजन्न् अस्य विकृतिं । 254
तैर् एव च अर्थ्यमानः
सुकृती जीमूतवाहनः स ततः
मलयाचलाद् अगच्छन्
निजनिलयं तुहिनशैलतटं । 255

तत्र पितृभ्यां सहितो
मित्रावसुना च मलयवत्या च
धीरश् चिराय बुभुजे
विद्याधरचक्रवर्तिपदं । 256

एवं सकलजगत्त्रय-
हृदयचमत्कारकारिचरितानां
स्वयम् अनुधावन्ति सदा
कल्याणपरम्पराः पदवीं । 257

इत्य् आकर्ण्य कथां किल
देवी यौगन्धरायणस्य मुखात्
मुमुदे वासवदत्ता
गर्भभरोदारदोहृदिनी । 258

तदनु तदनुषङ्गप्राप्तया प्रीतिभाजाम्
अनवरतनिदेशप्रत्ययाद् देवतानां
निजपतिनिकटस्था भाविविद्याधरेन्द्र-
स्वतनयकथया तं वासरं सा निनाय । 259

। इति ।

॥ द्वाविंशस् तरङ्गः ॥

TARANGA. 23.

ततो वासवदत्ता सा वत्सराजं समीपगं
विजने सचिवैर् युक्तम् अन्येद्युर् इदम् अब्रवीत् । 1
यतः प्रभृति गर्भो ऽयम् आर्यपुत्र धृतो मया,
ततः प्रभृति तद्रक्षा तीव्रा मां हृदि बाधते । 2
अद्य तच्चिन्तया च ऽअहं सुप्ता निशि कथंचन
जाने दृष्टवती कंचित् स्वप्ने पुरुषम् आगतं । 3
पिशङ्गजटया मूर्त्या शोभितं शूलहस्तया,
स च माम् अभ्युपेत्य ऽएव सानुकम्प इव ऽअवदत् । 4
पुत्रि गर्भकृते चिन्ता न कार्या काचन त्वया,
अहं तव ऽएनं रक्षामि, दत्तो ह्य् एष मया ऽएव ते । 5
किंच ऽअन्यच् छृणु वच्म्य् एव तव प्रत्ययकारणं,
श्वः कापि नारी विज्ञप्तिहेतोर् युष्मान् अपेक्षते । 6
अवष्टभ्य ऽएव साक्षेपम् आकर्षन्ती निजं पतिं
पञ्चभिस् तनयैर् युक्ता बहुबन्धुजनावृता । 7
सा च दुश्चारिणी योषित् स्वबान्धवबलात् पतिं
तं घातयितुम् इच्छन्ती सर्वं मिथ्या ब्रवीति तत् । 8

त्वं च ऽत्र पुत्रि वत्सेशं पूर्वं विज्ञापयेस् तथा,
तस्याः सकाशात् स यथा साधुर् मुच्येत कुस्त्रियः । 9
इत्य् आदिश्य गते तस्मिन् अन्तर्धानं महात्मनि
प्रबुद्धा सहसा ऽएव ऽअहं विभाता च विभावरी । 10
एवम् उक्ते तया देव्या शर्वानुग्रहवादिनः
तत्र ऽआसन् विस्मिताः सर्वे संवादापेक्षिमानसाः । 11
तस्मिन् एव क्षणे च ऽत्र प्रविश्य ऽआर्तानुकम्पिनं
वत्सराजं प्रतीहारमुख्यो ऽकस्माद् व्यजिज्ञपत् । 12
आगता देव विज्ञप्त्यै कापि स्त्री बान्धवैर् वृता
पञ्च पुत्रान् गृहीत्वा स्वम् आक्षिप्य विवशं पतिं । 13
तच् छ्रुत्वा नृपतिर् देवीस्वप्नसंवादविस्मितः,
प्रवेश्यताम् इह ऽएव ऽइति प्रतीहारं तम् आदिशत् । 14
स्वप्नसत्यत्वसंजातसत्पुत्रप्राप्तिनिश्चया
देवी वासवदत्ता ऽअपि सा संप्राप परां मुदं । 15
अथ द्वारोन्मुखैः सर्वैर् वीक्ष्यमाणा सकौतुकैः
प्रतीहाराज्ञया योषिद् भर्तृयुक्ता विवेश सा । 16
प्रविश्य ऽआश्रितदैन्या च यथाक्रमकृतानतिः
अथ संसदि राजानं सदेवीकं व्यजिज्ञपत् । 17
अयं निरपराधाया मम भर्ता भवन् अपि
न प्रयच्छत्य् अनाथाया भोजनाच्छादनादिकं । 18

इत्य् उक्तवत्यां तस्यां च स तद्भर्ता व्यजिज्ञपत्,
देव मिथ्या वदत्य् एषा सबन्धुर् मद्वेषिणी । 19
आवत्सरान्तं सर्वं हि दत्तम् अस्यै मया ऽग्रतः,
एतद्बन्धव एव ऽन्ये तटस्था मे ऽत्र साक्षिणः । 20
एवं विज्ञापितस् तेन राजा स्वयम् अभाषत,
देवीस्वप्ने कृतं साह्यं देवेन ऽएव ऽत्र शूलिना । 21
तत् किं साक्षिभिर् एव, ऽएषा निग्राह्या स्त्री सबान्धवा,
इति राज्ञा ऽउदिते ऽवादीद् धीमान् यौगन्धरायणः । 22
तथा ऽपि साक्षिवचनात् कार्यं देव यथोचितं,
लोको ह्य् एतदजानानो न प्रतीयात् कथंचन । 23
तच् छ्रुत्वा साक्षिणो राज्ञा तथा ऽइत्य् आनाय्य तत्क्षणात्
पृष्टाः शशंसुस् ते च ऽत्र तां मिथ्यावादिनीं स्त्रियं । 24
ततः प्रख्यातसद्भर्तृद्रोहाम् एतां सबान्धवां
सपुत्रां च स वत्सेशः स्वदेशान् निरवासयत् । 25
विससर्ज च तं साधुं तद्भर्तारं दयार्द्रधीः
विवाहान्तरपर्याप्तं वितीर्य विपुलं वसु । 26
पुमांसम् आकुलक्रूरा पतितं दुर्दशावटे
जीवन्तम् एव कुष्णाति वृकी ऽइव कुकुटुम्बिनी । 27
स्निग्धा कुलीना महती गृहिणी तापहारिणी
तरुच्छाया ऽइव मार्गस्था पुण्यैः कस्यापि जायते । 28

इति च 'एतत्प्रसङ्गेन वदन्तं तं महीपतिं
वसन्तकः स्थितः पार्श्वे कथापटुर् अवोचत । 29
किंच देव विरोधो वा स्नेहो वा 'अपि 'इह देहिनां
प्राग्जन्मवासनाभ्यासवशात् प्रायेण जायते । 30
तथा च श्रूयताम् अत्र कथा 'इयं वर्ण्यते मया.

आसीद् विक्रमचण्डाख्यो वाराणस्यां महीपतिः । 31
तस्य 'अभूद् वल्लभो भृत्यो नाम्ना सिंहपराक्रमः,
यो रणेष्व् इव सर्वेषु द्यूतेष्व् अप्य् असमो जयी । 32
तस्य 'अभवच् च विकृता वपुषि 'इव 'आशये ऽप्य् अलं
ख्याता कलहकारी 'इति नाम्ना 'अन्वर्थेन गेहिनी । 33
स तस्याः सततं भूरि राजतो द्यूततस् तथा
प्राप्य प्राप्य धनं धीरः सर्वम् एव समर्पयत् । 34
सा तु तस्य समुत्पन्नपुत्रत्रययुता शठा
तथा 'अपि क्षणम् अप्य् एकं न तस्थौ कलहं विना । 35
बहिः पिबसि भुङ्क्षे च, न 'एव किंचिद् ददासि नः,
इत्य् आरटन्ती ससुता सा तं नित्यम् अतापयत् । 36
प्रसाद्यमाना 'अप्य् आहारपानवस्त्रैर् अहर्निशं
दुरन्ताभोगतृष्णा 'इव भृशं जज्वाल तस्य सा । 37

ततः क्रमेण तन्मन्युखिन्नस् त्यक्त्वा 'एव तद्गृहं
स विन्ध्यवासिनीं द्रष्टुम् आगात् सिंहपराक्रमः । 38
सा तं स्वप्ने निराहारस्थितं देवी समादिशत्,
उत्तिष्ठ पुत्र, ताम् एव गच्छ वाराणसीं पुरीं । 39
तत्र सर्वमहान् एको यो ऽस्ति न्यग्रोधपादपः,
तन्मूलात् खन्यमानात् त्वं स्वैरं विधिम् अवाप्स्यसि । 40
तन्मध्याल् लप्स्यसे च 'एकं नभःखण्डम् इव च्युतं
पात्रं गरुडमाणिक्यमयं निस्त्रिंशनिर्मलं । 41
तत्र 'अर्पितेक्षणो हृद्यस्य् अन्तः प्रतिमिताम् इव
सर्वस्य जन्तोः प्राग्जातिं या स्याज् जिज्ञासिता तव । 42
तेन 'एव बुद्ध्वा भार्यायाः पूर्वजातिं तथा 'आत्मनः
अवाप्तार्थः सुखी तत्र गतखेदो निवत्स्यसि । 43
एवम् उक्तश् च देव्या स प्रबुद्धः कृतपारणः
वाराणसीं प्रति प्रायात् प्रातः सिंहपराक्रमः । 44
गत्वा च तां पुरीं प्राप्य तस्मान् न्यग्रोधमूलतः
लेभे निधानं तन्मध्यात् पात्रं मणिमयं महत् । 45
अपश्यच् च 'अत्र जिज्ञासुः पात्रे पूर्वत्रजन्मनि
घोराम् ऋक्षीं स्वकां भार्याम् आत्मानं च मृगाधिपं । 46
पूर्वजातिमहावैरशासनान् निश्चलं ततः
बुद्ध्वा भार्यात्मनोर् द्वेषं शोकमोहौ मुमोच सः । 47

अथ बह्वीः परिज्ञातास् तत्र पात्रप्रभावतः
प्राग्जन्मभिन्नजातीयाः परिहृत्य ऽएव कन्यकाः । 48
तुल्यां जन्मान्तरे सिंहीं परिणिन्ये विचित्य सः
भार्यां द्वितीयां सिंहश्रीनाम्नीं सिंहपराक्रमः । 49
कृत्वा कलहकारीं च तां स ग्रामिकभागिनीं
निधानप्राप्तिसुखितस् तस्थौ नवबधूसखः । 50
इत्थं दारादयो ऽपि ऽइह भवन्ति भुवने नृणां
प्राक्संस्कारवशायातवैरस्नेहा महीपते । 51

इत्य् आकर्ण्य कथां चित्रां वत्सराजो वसन्तकात्
भृशं तुतोष सहितो देव्या वासवदत्तया । 52
एवं दिनेषु गच्छत्सु राज्ञस् तस्य दिवानिशं
अतृप्तस्य लसद्गर्भदेवीवक्त्रेन्दुदर्शने । 53
मन्त्रिणाम् उदपद्यन्त सर्वेषां शुभलक्षणाः
क्रमेण तनयास् तत्र भाविकल्याणसूचकाः । 54
प्रथमं मन्त्रिमुख्यस्य जायते स्म किल ऽआत्मजः
यौगन्धरायणस्य ऽएव मरुभूतिर् इति श्रुतः । 55
ततो रुमण्वतो जज्ञे सुतो हरिशिखाभिधः,
वसन्तकस्य ऽअप्य् उत्पेदे तनयो ऽथ तपन्तकः । 56

ततो नित्योदिताख्यस्य प्रतीहाराधिकारिणः
इत्य् अकापरसंज्ञस्य पुत्रो ऽजायत गोमुखः । 57
वत्सराजसुतस्य ’इह भाविनश् चक्रवर्तिनः
मन्त्रिणो ऽमी भविष्यन्ति वैरिवंशावमर्दिनः । 58
इति तेषु च जातेषु वर्तमाने महोत्सवे
तत्र ’अशरीरा नभसो निःससार सरस्वती । 59
दिवसेषु च यातेषु वत्सराजस्य तस्य सा
देवी वासवदत्ता ’अभूद् आसन्नप्रसवोदया । 60
अध्यास्त सा च तच् चित्रं पुत्रिणीभिः परिष्कृतं
जातवासगृहं सार्कशमीगुप्तगवाक्षकं । 61
रत्नदीपप्रभासङ्गमङ्गलैर् विविधायुधैः
गर्भरक्षात्तमं तेजो ज्वलयद्भिर् इव ’आवृतं । 62
मन्त्रिभिस् तन्त्रितानेकमन्त्रतन्त्रादिरक्षितं
जातं मातृगणस्य ’इव दुर्गं दुरितदुर्जयं । 63
तत्र ’असूत च सा काले कुमारं कान्तदर्शनं
द्यौर् इन्दुम् इव निर्गच्छदच्छामृतमयद्युतिं । 64
येन जातेन न परं मन्दिरं तत् प्रकाशितं
यावद् धृदयम् अप्य् अस्या मातुर् निःशोकतामसं । 65
ततः प्रमोदे प्रसरत्य् अत्र ’अन्तःपुरवासिनां
वत्सेशः सुतजन्म ’एतच् छुश्राव ’अभ्यन्तराज् जनात् । 66

तस्मै स राज्यम् अपि यत् प्रीतः प्रियनिवेदिने
न ददौ, तद् अनौचित्यभयेन न तु तृष्णया । 67
एत्य च ऽन्तःपुरं सद्यो बह्वौत्सुक्येन चेतसा
चिरात् फलितसंकल्पः स ददर्श सुतं नृपः । 68
रक्तायताधरदलं चलोर्णाचारुकेसरं
मुखं दधानं साम्राज्यलक्ष्मीलीलाम्बुजोपमं । 69
प्राग् एव ऽन्यनृपश्रीभिर् भीत्या ऽइव निजलाञ्छनैः
उज्झितैर् अङ्कितं मृद्वोः पादयोश् छत्रचामरैः । 70
ततो हर्षभरापूरपीडनोत्फुल्लया दृशा
साश्रया स्रवति ऽइव ऽस्मिन् सुतस्नेहं महीपतौ । 71
नन्दत्स्व् अतीव यौगन्धरायणादिषु मन्त्रिषु
गगणाद् उच्चचार ऽएवं काले तस्मिन् सरस्वती । 72
कामदेवावतारो ऽयं राजन् जातस् तव ऽत्मजः,
नरवाहनदत्तं च जानीह्य् एनम् इह ऽख्यया । 73
अनेन भवितव्यं च दिव्यं कल्पम् अतन्द्रिणा
सर्वविद्याधरेन्द्राणाम् अचिराच् चक्रवर्तिना । 74
इत्य् उक्त्वा विरतं वाचा तत्क्षणं नभसः क्रमात्
पुष्पवर्षैर् निपतितं प्रसृतं दुन्दुभिस्वनैः । 75
ततः सुरकृतारम्भजनिताभ्यधिकादरं
स राजा सुतरां हृष्टश् चकार परम् उत्सवं । 76

बभ्रमुस् तूर्यनिनदा नभस्तो मन्दिरोद्गताः
विद्याधरेभ्यः सर्वेभ्यो राजजन्म इव शंसितुं । 77
सौधाग्रेष्व् अनिलोद्धूताः शोणरागाः स्वकान्तिभिः
पताका अपि सिन्दूरम् अन्योन्यम् अकिरन् इव । 78
भुवि साङ्गस्मरोत्पत्तितोषाद् इव सुराङ्गनाः
समागताः प्रतिपदं ननृतुर् वारयोषितः । 79
अदृश्यत च सर्वा सा समानविभवा पुरी
राज्ञो बद्धोत्सवात् प्राप्तैर् नववस्त्रविभूषणैः । 80
तदा व्यु अर्थान् नृपे तस्मिन् वर्षत्य् अर्थ्ये ऽनुजीविषु
कोषाद् ऋते न तत्र ऽन्यो दधौ कश्चन रिक्ततां । 81
मङ्गल्यपूर्वाः स्वाचारदक्षिणा नर्तितापराः
सत्प्राभृतोत्तरास् तैस् तैः सुरक्षिभिर् अधिष्ठिताः । 82
प्रसृतातोद्यनिर्ह्रादाः साक्षाद् दिश इव ऽखिलाः
समन्ताद् आययुश् च ऽत्र सामन्तान्तःपुराङ्गनाः । 83
चेष्टा नृत्तमयी तत्र, पूर्णपात्रमयं वचः,
व्यवहारो महात्यागमयस्, तूर्यमयो ध्वनिः । 84
चीनपिष्टमयो लोकश्, चारणीकमयी च भूः,
आनन्दमय्यां सर्वस्याम् अपि तस्याम् अभूत् पुरि । 85
एवं महोत्सवस् तत्र भूरिवासरवर्धितः
निर्वर्तते स्म स समं पूर्णैः पौरमनोरथैः । 86

सो ऽपि व्रजत्सु दिवसेष्व् अथ राजपुत्रो
वृद्धिं शिशुः प्रतिपदिन्दुर् इव आजगाम
पित्रा यथाविधिनिवेशितदिव्यवाणी-
निर्दिष्टपूर्वनरवाहनदत्तनाम्ना । 87
यानि स्फुरन्मसृणमुग्धनखप्रभाणि
द्वित्राणि यानि च खचद्दशनाङ्कुराणि
तानि स्खलन्ति ददतो वदतश् च तस्य
दृष्ट्वा निशम्य च पदानि पिता तुतोष । 88
अथ तस्मै मन्त्रिवराः
  स्वसुतान् आनीय राजपुत्राय
शिशवे शिशून् महीपति-
  हृदयानन्दान् समर्पयामासुः । 89
यौगन्धरायणः प्राङ्
  मरुभूतिं हरिशिखं रुमण्वांश् च,
गोमुखम् इत्य् अकनाम्ना,
  तपन्तकाख्यं वसन्तकश् च सुतं । 90
शान्तिकरो ऽपि पुरोधा
  भ्रातृसुतं शान्तिसोमम् अपरं च
वैश्वानरम् अर्पितवान्
  पिङ्गलिकापुत्रकौ यमजाव् उभौ । 91

तस्मिन् क्षणे च नभसो निपपात दिव्या
नान्दीनिनादसुभगा सुरपुष्पवृष्टिः,
राजा ननन्द च तदा महिषीसमेतः
सत्कृत्य तत्र सचिवात्मजमण्डलं तत् । 92
बाल्ये ऽपि तैर् अभिमतैर् अथ मन्त्रिपुत्रैः
षड्भिस् तदेकनिरतैश् च स राजपुत्रः
युक्तः सदा 'एव नरवाहनदत्त आसीद्
युक्तो गुणैर् इव महोदयहेतुभूतैः । 93
तं च क्रीडाकलितललिताव्यक्तनर्माभिलापं
यान्तं प्रीतिप्रवणमनसाम् अङ्कतो ऽङ्कं नृपानां
पुत्रं स्मेराननसरसिजं सादरं पश्यतस् ते
बद्धानन्दाः किमपि दिवसा वत्सराजस्य जग्मुः । 94

। इति ।
॥ त्रयोविंशस् तरङ्गः ॥

समाप्तो ऽयं
नरवाहनदत्तजननं नाम
चतुर्थो लम्बकः

अथ

श्री सोमदेव भट्ट विरचिते

कथा सरित् सागरे

चतुर्दारिका नाम

पञ्चमो लम्बकः

TARANGA. 24.

मदघूर्णितवक्त्रोत्थैः सिन्दूरैश् छुरयन् महीं
हेरम्बः पातु वो विघ्नान् स्वतेजोभिर् दहन् इव । 1

एवं स देवीसहितस् तस्थौ वत्सेश्वरस् तदा
नरवाहनदत्तं तम् एकपुत्रं विवर्धयन् । 2
तद्रक्षाकातरं तं च दृष्ट्वा राजानम् एकदा
यौगन्धरायणो मन्त्री विजनस्थितम् अब्रवीत् । 3
राजन् न राजपुत्रस्य कृते चिन्ता ऽधुना त्वया
नरवाहनदत्तस्य विधातव्या कदाचन । 4
असौ भगवता भावी भर्गेण हि भवद्गृहे
सर्वविद्याधराधीशचक्रवर्ती विनिर्मितः । 5
दिव्यप्रभावाद् एतच् च बुद्ध्वा विद्याधराधिपाः
गताः पापेच्छवः क्षोभं हृदयैर् असहिष्णवः । 6
तद् विदित्वा च देवेन रक्षार्थं शशिमौलिना
एतस्य स्तम्भको नाम गणेशः स्थापितो निजः । 7

स च तिष्ठत्य् अलक्ष्यः सन् रक्षन्न् एतं सुतं तव,
एतच् च क्षिप्रम् अभ्येत्य नारदो मे न्यवेदयत् । 8
इति तस्मिन् वदत्य् एव महिषी व्योममध्यतः
किरीटी कुण्डली दिव्यः खड्गी च ऽवातरत् पुमान् । 9
प्रणतं कल्पितातिथ्यं क्षणाद् वत्सेश्वरो ऽथ तं,
कस् त्वम्, किम् इह ते कार्यम् इत्य् अपृच्छत् सकौतुकं । 10
सो ऽप्य् अवादीद्, अहं मर्त्यो भूत्वा विद्याधराधिपः
संपन्नः शक्तिवेगाख्यः प्रभूताश् च मम ऽरयः । 11
सो ऽहं प्रभावाद् विज्ञाय भाव्यस्मच्चक्रवर्तिनं
भवतस् तनयं द्रष्टुम् आगतो ऽस्म्य् अवनीपते । 12
इत्य् उक्तवन्तं तं दृष्टभविष्यच्चक्रवर्तिनं
भीतं वत्सेश्वरो हृष्टः पुनः पप्रच्छ विस्मयात् । 13
विद्याधरत्वं प्राप्येत कथं, कीदृग्विधं च तत्,
त्वया च तत् कथं प्राप्तम्, एतत् कथय नः सखे । 14
तच् छ्रुत्वा वचनं राज्ञः स तदा विनयानतः
विद्याधरः शक्तिवेगस् तम् एवं प्रत्यवोचत । 15
राजन् इह ऽएव पूर्वं वा जन्मन्य् आराध्य शङ्करं
विद्याधरपदं धीरा लभन्ते तदनुग्रहात् । 16
तच् च ऽनेकविधं विद्याखड्गमालादिसाधनं,
मया च तद् यथा प्राप्तं कथयामि तथा शृणु । 17

एवम् उक्त्वा स्वसंबन्धां शक्तिवेगः स संनिधौ
देव्या वासवदत्तायाः कथाम् आख्यातवान् इमां । 18

अभवद् वर्धमानाख्ये पुरे, भूतलभूषणे
नाम्ना परोपकारी 'इति पुरा राजा परंतपः । 19
तस्य 'उन्नतिमतस् च 'अभून् महिषी कनकप्रभा,
विद्युद् धाराधरस्य 'इव, सा तु निर्मुक्तचापला । 20
तस्यां तस्य च कालेन देव्याम् अजनि कन्यका
रूपदर्पोपशान्त्यै या लक्ष्म्या धात्रा 'इव निर्मिता । 21
अवर्धत शनैः सा च लोकलोचनचन्द्रिका
पित्रा कनकरेखा 'इति मातृनाम्ना नृपात्मजा । 22
एकदा यौवनस्थायां तस्यां राजा स तत्पिता
विजनोपस्थितां देवीं जगाद कनकप्रभां । 23
वर्धमाना 'असह्या 'एव, 'एतत्समानोद्वाहचिन्तया
एषा कनकरेखा मे हृदयं देवि बाधते । 24
स्थानप्राप्तिविहीना हि गीतवत् कुलकन्यका
उद्वेजिनी परस्य 'अपि श्रूयमाणा 'एव कर्णयोः । 25
विद्या 'इव कन्यका मोहाद् अपात्रे प्रतिपादिता
यशसे न न धर्माय जायेत 'अनुशयाय तु । 26

तत् कस्मै दीयते क्व एषा मया नृपतये सुता,
को ऽस्याः समः स्याद् इति मे देवि चिन्ता गरीयसी । 27
तच् छ्रुत्वा सा विहस्य 'एवं बभाषे कनकप्रभा,
त्वम् एवम् आत्थ, कन्या तु न 'इच्छत्य् उद्वाहम् एव सा । 28
अद्य 'एव नर्मणा सा हि कृतकृत्रिमपुत्रिका,
वत्से कदा विवाहं ते द्रक्ष्यामि 'इत्य् उदिता मया । 29
सा तच् छ्रुत्वा 'एव साक्षेपम् एवं मां प्रत्यवोचत,
मा मा 'एवम् अम्ब, दातव्या न 'एव कस्मैचिद् अप्य् अहं । 30
मद्वियोगो न च 'आदिष्टः, कन्या 'एव 'अस्मि सुशोभना,
अन्यथा मां मृतां विद्धि, किंचिद् अस्त्य् अत्र कारणं । 31
एवं तया 'उक्ता त्वत्पार्श्वं राजन् विग्ना 'अहम् आगता,
तन् निषिद्धविवाहायाः का वरस्य विचारणा । 32
इति राज्ञीमुखाच् छ्रुत्वा समुद्भ्रान्तः स भूपतिः
कन्यकान्तःपुरं गत्वा ताम् अवादीत् तदा सुतां । 33
प्रार्थयन्ते ऽपि तपसा यं सुरासुरकन्यकाः,
भर्तृलाभः कथं वत्से स निषिद्धः किल त्वया । 34
एतत् पितुर् वचः श्रुत्वा भूतलन्यस्तलोचना
तदा कनकरेखा सा निजगाद नृपात्मजा । 35
तात न 'एव 'ईप्सितम् तावद् विवाहो मम साम्प्रतं,
तत् तातस्य 'अपि किं तेन कार्यं, कश् च 'अत्र वो ग्रहः । 36

इत्य् उक्तः स तया राज्ञा दुहित्रा धीमतां वरः
परोपकारी स पुनर् एवम् एताम् अभाषत । 37
कन्या दानाद् ऋते पुत्रि किं स्यात् किल्विषशान्तये,
न च बन्धुपराधीना कन्या स्वातन्त्र्यम् अर्हति । 38
जाता वै हि परस्य ऽर्थे कन्यका नाम रक्ष्यते,
बाल्याद् ऋते विना भर्तुः कीदृक् तस्याः पितुर् गृहं । 39
ऋतुमत्यां हि कन्यायां बान्धवा यान्त्य् अधोगतिं,
वृषली सा वरश् च ऽस्या वृषलीपतिर् उच्यते । 40
इति तेन ऽउदिता पित्रा राजपुत्री मनोगतां
वाचं कनकरेखा सा तत्क्षणं समुदैरयत् । 41
यद्य् एवं तात, तद् येन विप्रेण क्षत्रियेण वा
दृष्टा कनकपुर्याख्या नगरी कृतिना किल । 42
तस्मै त्वया ऽहं दातव्या, स मे भर्ता भविष्यति,
न ऽन्यथा मिथ्या ऽएव कर्तव्या मे कदर्थना । 43
एवं तया ऽउक्तः सुतया स राजा समचिन्तयत्,
दिष्ट्या दानस्य यत् तावत् प्रसङ्गो ऽङ्गीकृतो ऽनया । 44
नूनं च कारणोत्पन्ना देवी ऽइयं कापि मद्गृहे,
इयत् कथं विजानाति बाला भूत्वा ऽन्यथा ह्य् असौ । 45
इति संचिन्त्य तत्कालं तथा ऽइत्य् उक्त्वा च तां सुतां
उत्थाय दिनकर्तव्यं चकार स महीपतिः । 46

अन्येद्युर् आस्थानगतो ऽगाद् स च पार्श्वगान्,
दृष्टा कनकपुर्याख्या पुरी युष्मासु केनचित्। 47
येन दृष्टा च सा तस्मै विप्राय क्षत्रियाय वा
मया कनकरेखा च यौवराज्यं च दीयते। 48
श्रुता ऽपि न ऽएव सा ऽस्माभिर्, दर्शने देव का कथा,
इति ते च ऽवदन् सर्वे अन्योन्याननदर्शिनः। 49
ततो राजा प्रतीहारम् आनीय ऽदिशति स्म सः,
गच्छ भ्रमय कृत्स्ने ऽत्र पुरे पटहघोषणां। 50
जानीहि यदि केनापि दृष्टा सा नगरी न वा,
इत्य् आदिष्टः प्रतीहारः स तथा ऽइति विनिर्ययौ। 51
निर्गत्य च समादिश्य तत्क्षणं राजपूरुषान्
भ्रमयामास पटहं कृतश्रवणकौतुकं। 52

विप्रः क्षत्रयुवा वा
कनकपुरीं यो ऽत्र दृष्टवान् नगरीं,
वदतु स, तस्मै राजा
ददाति तनयां च यौवराज्यं च। 53

इति च ऽइतस् ततस् तत्र नगरे दत्तविस्मयं
तद् अघोष्यत सर्वत्र पटहानन्तरं वचः। 54
का ऽइयं पुरे ऽस्मिन् कनकपुरीनामा ऽद्य घोष्यते,
या वृद्धैर् अपि न ऽस्माभिर् दृष्टा जातु न च श्रुता। 55

इत्य् एवं च ऽवदन् पौराः श्रुत्वा तां तत्र घोषणां,
न पुनः कश्चिद् एको ऽपि, मया दृष्टा ऽइत्य् अभाषत । 56
तावच् च तन्निवास्य् एकः शक्तिदेव इति द्विजः
बलदेवतनूजस् ताम् अशृणोत् तत्र घोषणां । 57
स युवा व्यसनी सद्यो द्यूतेन विधनीकृतः
अचिन्तयद् राजसुताप्रदानाकर्णनोन्मनाः । 58
द्यूतहारितनिःशेषवित्तस्य मम न ऽअधुना
प्रवेशो ऽस्ति पितुर् गेहे न ऽअपि पण्याङ्गनागृहे । 59
तस्माद् अगतिकस् तावद् वरं मिथ्या ब्रवीम्य् अहं,
मया सा नगरी दृष्टा ऽइत्य् एवं पटहघोषकान् । 60
को मां प्रत्येत्य् अविज्ञानं, केन दृष्टा कदा हि सा,
स्याद् एवं च कदाचिन् मे राजपुत्र्या समागमः । 61
इति संचिन्त्य गत्वा तान् स राजपुरुषांस् तदा
शक्तिदेवो, मया दृष्टा सा पुरी ऽइत्य् अवदन् मृषा । 62
दिष्ट्या तर्हि प्रतीहारपार्श्वम् एहि ऽइति तत्क्षणं
उक्तवद्भिस् च तैः साकं स प्रतीहारम् अभ्यगात् । 63
तस्मै तथा ऽएव ऽअशंसत् तत्पुरीदर्शनं मृषा,
तेन ऽअपि सत्कृत्य ततो राजान्तिकम् अनीयत । 64
राजाग्रे ऽप्य् अविकल्पः संस् तथा ऽएव च तद् अब्रवीत्,
द्यूततान्तस्य किं नाम कितवस्य हि दुष्करं । 65

राज्ञा 'अपि निश्चयं ज्ञातुं ब्राह्मणं तं विसृष्टवान्
तस्याः कनकरेखाया दुहितुर् निकटं तदा । 66
तया च स प्रतीहारमुखाज् ज्ञात्वा 'अन्तिकागतः,
कश्चित् त्वया सा कनकपुरी दृष्टा 'इत्य् अपृच्छत । 67
वाढं मया सा नगरी दृष्टा विद्यार्थिना सता
भ्रमता भुवम् इत्य् एवं सो ऽपि तां प्रत्यभाषत । 68
केन मार्गेण तत्र त्वं गतवान्, कीदृशी च सा,
इति भूयस् तया पृष्टः स विप्रो ऽप्य् एवम् अभ्यधात् । 69
इतो हरपुरं नाम नगरं गतवान् अहं,
ततो ऽपि प्राप्तवान् अस्मि पुरीं वाराणसीं क्रमात् । 70
वाराणस्याश् च दिवसैर् नगरं पौण्ड्रवर्धनं,
तस्मात् कनकपुर्याख्यां नगरीं तां गतो ऽभवं । 71
दृष्टा मया च सा भोगभूमिः सुकृतकर्मणां
अनिमेषेक्षणास्वाद्यशोभा शक्रपुरी यथा । 72
तत्र 'अधिगतविद्यश् च कालेन 'अहम् इह 'आगमं,
इति तेन 'अस्मि गतवान् पथा, सा 'अपि पुरी 'ईदृशी । 73
एवं विरचितोक्तौ च धूर्ते तस्मिन् द्विजन्मनि
शक्तिदेवे सहासं सा व्याजहार नृपात्मजा । 74
अहो सत्यं महाब्रह्मन् दृष्टा सा नगरी त्वया,
ब्रूहि ब्रूहि पुनस् तावत् केन 'असि गतवान् पथा । 75

तच् छ्रुत्वा स यदा धार्ष्ट्यं शक्तिदेवो ऽकरोत् पुनः,
तदा तं राजपुत्री सा चेटीभिर् निरवासयत् । 76
निर्वासिते ययौ च ऽस्मिन् पितुः पार्श्वं तदा ऽएव सा,
किं सत्यम् आह विप्रो ऽसाव् इति पित्रा ऽप्य् अपृच्छ्यत । 77
ततश् च सा राजसुता जनकं निजगाद तं,
तात राजा ऽपि भूत्वा त्वम् अविचार्य ऽएव चेष्टसे । 78
किं न जानासि धूर्ता यद् वञ्चयन्ते जनान् ऋजून्,
स हि मिथ्या ऽएव विप्रो मां प्रतारयितुम् ईहते । 79
न पुनर् नगरी तेन दृष्टा सा ऽलीकवादिना,
धूर्तैर् अनेकाकाराश् च क्रियन्ते भुवि वञ्चनाः । 80
शिवमाधववृत्तान्तं तथा हि शृणु वच्मि ते,
इत्य् उक्त्वा राजकन्या सा व्याजहार कथाम् इमां । 81

अस्ति रत्नपुरं नाम यथार्थं नगरोत्तमं,
शिवमाधवसंज्ञौ तु धूर्तौ तत्र बभूवतुः । 82
परिवारीकृतानेकधूर्तौ तौ चक्रतुश् चिरं
मायाप्रयोगनिःशेषमुषिताढ्यजनं पुरं । 83
एकदा द्वौ च ताव् एवं मन्त्रं विदधतुर् मिथः,
इदं नगरम् आवाभ्यां कृत्स्नं तावद् विलुण्ठितं । 84

अतः सम्प्रति गच्छावो वस्तुम् उज्जयिनीं पुरीं,
तत्र तु श्रूयते राज्ञः पुरोधाः सुमहाधनः । 85
शङ्करस्वामिनामा च तस्माद् युक्त्या हृतैर् धनैः
मालवस्त्रीविलासानां यास्यामो ऽत्र रसज्ञतां । 86
आस्कन्दी दक्षिणार्धस्य स तत्र भ्रूकुटीमुखः
सप्तकुम्भीनिधानो हि कीनाशो गीयते द्विजैः । 87
कन्यारत्नं च तस्य ऽस्ति विप्रस्य ऽएकम् इति श्रुतं,
तद् अप्य् एतत्प्रसङ्गेन ध्रुवं तस्माद् अवाप्स्यते । 88
इति निश्चित्य कृत्वा च मिथः कर्तव्यसंविदं
शिवमाधवधूर्तौ तु पुरात् प्रययतुस् ततः । 89
शनैस् च ऽउज्जयिनीं प्राप्य माधवः सपरिच्छदः
राजपुत्रस्य वेशेन तस्थौ ग्रामे क्वचिद् बहिः । 90
शिवस् त्व् अविकलं कृत्वा वर्णिवेशं विवेश तां
नगरीम् एक एव ऽग्रे वक्रमायाविचक्षणः । 91
तत्र ऽध्युवास सिप्राया मठिकां तीरसीमनि
दृश्यस्थापितमृद्दर्भभिक्षाभाण्डमृगाजिनां । 92
स च प्रभातकालेषु घनया ऽङ्गं मृदा ऽलिपत्
अवीचिकर्दमालेपसूत्रपातम् इव ऽआचरन् । 93
सरित्तोये च स चिरं निमज्ज्य ऽआसीद् अवाङ्मुखः
कुकर्मणाम् इव ऽभ्यस्यन् भविष्यन्तीम् अधोगतिं । 94

स्नानोत्थितो ऽर्काभिमुखस् तस्थाव् ऊर्ध्वं चिरं च सः
शूलाधिरोपणौचित्यम् आत्मनो दर्शयन् इव । 95
ततो देवाग्रतो गत्वा कुशकूर्चकरो जपन्
आस्त पद्मासनासीनः सदम्भचतुराननः । 96
अन्तरा हृदयानि इव साधूनां कैतवेन सः
स्वच्छान्य् आहृत्य पुष्पाणि पुरारिं पर्यपूजयत् । 97
कृतपूजश् च भूयो ऽपि मिथ्या जपपरो ऽभवत्
दत्तावधानः कुसृतिषु इव ध्यानं ततान सः । 98
अपराह्णे च भिक्षार्थी कृष्णसाराजिनाम्बरः
पुरि तद्दम्भनामायाकटाक्ष इव सो ऽभ्रमत् । 99
आदाय द्विजगेहेभ्यो मौनी भिक्षात्रयं ततः
सदण्डाजिनकश् चक्रे त्रिसन्ध्याम् इव खण्डशः । 100
भागं ददौ च काकेभ्यो भागम् अभ्यागताय च
भागेन दम्भबीजेन कुक्षिभस्त्राम् अपूरयत् । 101
पुनः समं च पापानि निजानि गणयन् इव
जपन् आवर्तयामास चिरं मिथ्या ऽक्षमालिकां । 102
रजन्याम् अद्वितीयश् च तस्थौ स मठिकान्तरे
अपि सूक्ष्माणि लोकस्य तर्कस्थानानि चिन्तयन् । 103
एवं प्रतिदिनं कुर्वन् कष्टं व्याजमयं तपः
सर्वत्र ऽवर्जयामास नगरीवासिनां मनः । 104

अहो तस्मिन् शान्तो ऽयम् इति ख्यातिम् च सर्वतः
उत्पन्ना तत्र अस्य भक्तिनम्रे ऽखिले जने । 105
तावत् च स द्वितीयो ऽस्य सखा चारमुखेन तं
विज्ञाय माधवो ऽप्य् एतन्नगरीं प्रविवेश तां । 106
गृहीत्वा वसतिं च अत्र दूरे देवकुलान्तरे
स राजपुत्रछद्मा सन् स्नातुं सिप्रातटं ययौ । 107
स्नात्वा सानुचरो दृष्ट्वा देवाग्रे जपतत्परं
तं शिवं परमप्रह्वो निपपात अस्य पादयोः । 108
जगाद् च जनस्य अग्रे, न अस्ति ईदृक् तापसो ऽपरः,
असकृद् हि मया दृष्टस् तीर्थान्य् एष भ्रमन् इति । 109
शिवस् तु तं विलोक्य अपि दम्भस्तम्भितकन्धरः
तथा एव आसीत्, ततः सो ऽपि माधवो वसतिं ययौ । 110
रात्रौ मिलित्वा च एकत्र भुक्त्वा पीत्वा च तौ उभौ
मन्त्रयामासतुः शेषं कर्तव्यं यद् अतःपरं । 111
यामे च पश्चिमे स्वैरम् अगात् स्वमठिकां शिवः,
माधवो ऽपि प्रभाते स्वं धूर्तम् एकं समादिशत् । 112
एतद् गृहीत्वा गच्छ त्वं वस्त्रयुग्मम् उपायनं
शङ्करस्वामिनः पार्श्वम् इह राजपुरोधसः । 113
राजपुत्रः पराभूतो माधवो नाम गोत्रजैः
पित्र्यं बहु गृहीत्वा अर्थम् आगतो दक्षिणापथात् । 114

समेः कतिपयैर् अन्यै राजपुत्रैर् अनुद्रुतः
स च 'इह युष्मदीयस्य राज्ञः सेवां करिष्यति । 115
तेन त्वद्दर्शनाय 'अहं प्रेषितो यशसां निधे,
इति त्वया सविनयं स च वाच्यः पुरोहितः । 116
एवं स माधवेन 'उक्तो धूर्तः संप्रेषितस् तथा
जगाम 'उपायनकरो गृहं तस्य पुरोधसः । 117
उपेत्य 'अवसरे दत्वा प्राभृतं विजने च तत्
तस्मै माधवसंदेशं शंसति स्म यथोचितं । 118
सो ऽप्य् उपायनलोभात् तच् छ्रद्दधे कल्पितायतिः,
उपप्रदानं लिप्सूनाम् एकं ह्य् आकर्षणौषधं । 119
ततः प्रत्यागते तस्मिन् धूर्ते ऽन्येद्युः स माधवः
लब्धावकाशस् तम् अगात् स्वयं द्रष्टुं पुरोहितं । 120
धूर्तकार्पटिकाकारै राजपुत्रापदेशिभिः
वृतः पार्श्वचरैर् आत्तकाष्ठखण्डकलाञ्छनैः । 121
पुरोगाविदितश् च 'एनम् अभ्यगात् स पुरोहितं,
तेन 'अप्य् अभ्युद्गमानन्दस्वागतैर् अभ्यनन्द्यत । 122
ततस् तेन सह स्थित्वा कथालापैः क्षणं च सः
आययौ तदनुज्ञातो माधवो वसतिं निजां । 123
द्वितीये ऽह्नि पुनः प्रेष्य प्राभृतं वस्त्रयोर् युगं
भूयो ऽपि तम् उपागच्छत् पुरोहितम् उवाच च । 124

परिवारानुरोधेन किल सेवार्थिनो वयं,
तेन त्वम् आश्रितो ऽस्माभिर् अर्थमात्रा ऽस्ति नः पुनः । 125
तच् छ्रुत्वा प्राप्तिम् आशंक्य तस्मात् सो ऽथ पुरोहितः
प्रतिशुश्राव तत् तस्मै माधवाय समीहितं । 126
त्वणाच् च गत्वा राजानम् एतदर्थं व्यजिज्ञपत्,
तद्गौरवाच् च राज्ञा ऽपि तत् तथा प्रत्यपद्यत । 127
अपरे ऽह्नि च नीत्वा तं माधवं सपरिच्छदं
नृपाय ऽदर्शयत् तस्मै स पुरोधाः सगौरवं । 128
नृपो ऽपि माधवं दृष्ट्वा राजपुत्रोपमाकृतिं
आदरेण ऽनुजग्राह वृत्तिं च ऽस्य प्रदिष्टवान् । 129
ततो ऽत्र सेवमानस् तं नृपं तस्थौ स माधवः,
रात्रौ रात्रौ च मल्लाय शिवेन समगच्छत । 130
इह ऽएव वस मद्गेहे इति तेन पुरोधसा
सो ऽर्थितश् च ऽभवल् लोभाद् उपचारोपजीविना । 131
ततः सहचरैः साकं तस्य ऽएव ऽआशिश्रयद् गृहं
विनाशहेतुर् वासो ऽयम् आखोः स्कन्धे तरोर् इव । 132
कृत्वा कृत्रिममाणिक्यमयैर् आभरणैर् भृतिं,
भाण्डं च स्थापयामास तदीये कोशवेश्मनि । 133
अन्तरा च तद् उद्घाट्य तैस् तैर् व्याजार्धदर्शितैः
जहार ऽआभरणैस् तस्य शष्पैर् इव पशोर् मनः । 134

विश्वस्ते च ततस् तस्मिन् पुरोधसि चकार सः
मान्द्यम् अल्पतराहारकृशीकृततनुर् मृषा । 135
याते कतिपयाहे च तं शय्योपान्तवर्तिनं
पुरोहितं स वक्ति स्म धूर्तराजो ऽल्पया गिरा । 136
मम तावच् छरीरे ऽस्मिन् विषमा वर्तते दशा,
तद् विप्रवर कंचित् त्वं ब्राह्मणोत्तमम् आनय । 137
यस्मै दास्यामि सर्वस्वम् इह अमुत्र च शर्मणे,
अस्थिरे जीविते ह्य् आस्था का धनेषु मनस्विनः । 138
इत्य् उक्तः स पुरोधाश् च तेन दानोपजीवकः,
एवं करोमि इत्य् आह स्म, सो ऽपतच् च अस्य पादयोः । 139
ततः स ब्राह्मणं यं यं आनिनाय पुरोहितः
विशेषेहानिभात् तं तं अद्दधे न स माधवः । 140
तद् दृष्ट्वा तस्य पार्श्वस्थो धूर्त एको ऽब्रवीद् इदं,
न तावद् अस्मै सामान्यो विप्रः प्रायेण रोचते । 141
तद् यद्य् एष शिवो नाम सिप्रातीरे महातपाः
स्थितः सम्प्रति भात्य् अस्य न वा इत्य् एतन् निरूप्यतां । 142
तच् छ्रुत्वा माधवो ऽवादीत् कृतार्तिस् तं पुरोहितं,
हन्त प्रसीद आनय तं, विप्रो न अन्यो हि तादृशः । 143
इत्य् उक्तस् तेन च ययौ स शिवस्य अन्तिकं ततः
पुरोधास्, तम् अपश्यच् च रचितध्याननिश्चलं । 144

उपाविशच् च तस्य ऽग्रे ततः कृत्वा प्रदक्षिणं,
तत्क्षणं सो ऽपि धूर्तो ऽभूच् छनैर् उन्मीलितेक्षणः । 145
ततः प्रणम्य तं प्रह्वः स उवाच पुरोहितः,
न चेत् कुप्यसि, तत् किंचित् प्रभो विज्ञापयाम्य् अहं । 146
इह स्थितो दाक्षिणात्यो राजपुत्रो महाधनः
माधवाख्यः, स च ऽस्वस्थः सर्वस्वं दातुम् उद्यतः । 147
मन्यसे यदि, तत् तुभ्यं स तत् सर्वं प्रयच्छति
नानानर्घमहारत्नमयालंकरणोज्ज्वलं । 148
तच् छ्रुत्वा स शनैर् मुक्तमौनः किल शिवो ऽब्रवीत्,
ब्रह्मन् भिक्षाशनस्य ऽर्थैः को ऽर्थो मे ब्रह्मचारिणः । 149
ततः पुरोहितो ऽप्य् एवं स तं पुनर् अभाषत,
मा ऽएवं वादीर् महाब्रह्मन्, किं न वेत्स्य् आश्रमक्रमं । 150
कृतदारो गृहे कुर्वन् देवपित्रतिथिक्रियाः
धनैस् त्रिवर्गं प्राप्नोति, गृही ह्य् आश्रमिणां वरः । 151
ततः सो ऽपि शिवो ऽवादीत्, कुतो मे दारसंग्रहः,
न ह्य् अहं परिणेष्यामि कुलाद् यादृशतादृशात् । 152
तच् छ्रुत्वा सुखभोग्यं च मत्वा तस्य तथा धनं
संप्राप्तावसरो लुब्धः पुरोधास् तम् अभाषत । 153
अस्ति तर्हि सुता कन्या विनयस्वामिनी ऽइति मे,
अतिरूपवती सा च, तां च तुभ्यं ददाम्य् अहं । 154

यच् च प्रतिग्रहधनं तस्मात् प्राप्नोषि माधवात्,
तद् अहं तव रक्षामि, तद् भजस्व गृहाश्रमं । 155
इत्य् आकर्ण्य समुत्पन्नयथेष्टार्थः शिवो ऽब्रवीत्,
ब्रह्मन् ग्रहस् तव 'अयं चेत्, तत् करोमि वचस् तव । 156
हेमरत्नस्वरूपे तु मुग्ध एव 'अस्मि तापसः,
त्वद्वाचा 'एव प्रवर्ते ऽहं, यथा वेत्सि तथा कुरु । 157
एतच् छिववचः श्रुत्वा परितुष्टस् तथा 'इति तं
मूढो निनाय गेहं स्वं तथा 'एव स पुरोहितः । 158
संनिवेश्य च तत्र 'एवं शिवाख्यम् अशिवं ततः
यथाकृतं शशंस 'एतन् माधवाय 'अभिनन्दितः । 159
तदा 'एव च ददौ तस्मै सुतां क्लेशविवर्धितां
निजां शिवाय संपत्तिम् इव मूढत्वकारितां । 160
कृतोद्वाहं तृतीये ऽह्नि परिग्रहकृते च तं
निनाय व्याजमन्दस्य माधवस्य ततो ऽन्तिकं । 161
अतर्क्यतपसं वन्दे त्वाम् इत्य् अवितथं वदन्
माधवो ऽप्य् अपतत् तस्य शिवस्य 'उत्थाय पादयोः । 162
ददौ च तस्मै विधिवत् कोशागारात् तद् आहृतं
भूरिकृत्रिममाणिक्यमयाभरणभाण्डकं । 163
शिवो ऽपि प्रतिगृह्य 'एतत् तस्य हस्ते पुरोधसः,
न 'अहं वेद्मि त्वम् एव 'एतद् वेत्सि 'इत्य् उक्त्वा समर्पयत् । 164

अङ्गीकृतम् इदं पूर्वं मया, चिन्ता तव ऽत्र का,
इत्य् उक्त्वा तच् च जग्राह तल्लग्नं स पुरोहितः । 165
कृताशिषि ततो याति स्ववधूवासकं शिवे
नीत्वा च स्थापयामास तन् निजे कोशवेश्मनि । 166
माधवो ऽपि तद् अन्येद्युर् मान्द्यव्याजं शनैस् त्यजन्
रोगोपशान्तिं वक्ति स्म महादानप्रभावतः । 167
त्वया धर्मसहायेन समुत्तीर्णो ऽयम् आपदः,
इति च ऽन्तिकम् आयान्तं प्रशशंस पुरोहितं । 168
एतत्प्रभावाद् एतन् मे शरीरम् इति कीर्तयन्
प्रकाशम् एव चक्रे च शिवेन सह मित्रतां । 169
शिवो ऽपि यातेषु दिनेष्व् अवादीत् तं पुरोहितं,
एवम् एव भवद्गेहे भोक्ष्यते च कियन् मया । 170
तत् किम् त्वम् एव मूल्येन गृह्णास्य् आभरणं न तत्,
महार्घम् इति चेन् मूल्यं यथासंभवि देहि मे । 171
तच् छ्रुत्वा तद् अनर्घं च मत्वा तन्निष्क्रयं ददौ
तथा ऽइति तस्मै सर्वस्वं शिवाय स पुरोहितः । 172
तदर्थं च स्वहस्तेन शिवं लेख्यम् अकारयत्,
स्वयं च ऽप्य् अकरोद् बुद्ध्वा तद्धनं स्वधनाधिकं । 173
अन्योन्यलिखितं हस्ते गृहीत्वा स पुरोहितः
पृथग् आसीत्, पृथक् सो ऽपि शिवो भेजे गृहस्थितिं । 174

ततश् च स शिवः सो ऽपि माधवः संगताव् उभौ
पुरोहितार्थान् भुञ्जानौ यथेष्टं तत्र तस्थतुः । 175
याते काले च मूल्यार्थी पुरोधाः स किल ऽआपणे
ततो ऽलंकरणाद् एकं विक्रेतुं कटकं ययौ । 176
तत्र ऽएतद् रत्नतत्त्वज्ञाः परीक्ष्य बणिजो ऽब्रुवन्,
अहो कस्यापि विज्ञानं येन ऽएतद् कृत्रिमं कृतं । 177
काचस्फटिकखण्डा हि नानारागोपरञ्जिताः
रीतिबद्धा इमे, नं ऽएते मणयो न च काञ्चनं । 178
तच् छ्रुत्वा विह्वलो गत्वा स पुरोधास् तदा ऽएव तत्
आनीय ऽआभरणं गेहात् कृत्स्नं तेषाम् अदर्शयत् । 179
ते दृष्ट्वा तद्वद् एव ऽअस्य सर्वं कृत्रिमम् एव तत्
ऊचिरे च, स तच् छ्रुत्वा वज्राहत इव ऽअभवत् । 180
ततश् च गत्वा तत्कालं स मूढः शिवम् अभ्यधात्,
गृह्णीष्व स्वान् अलंकारांस्, तन् मे देहि निजं धनं । 181
कुतो मम ऽअद्य ऽअपि धनं, तद् ध्य् अशेषं गृहे मया
कालेन भुक्तम् इति तं शिवो ऽपि प्रत्यभाषत । 182
ततो विवदमानौ तौ पार्श्वावस्थितमाधवं
पुरोधाश् च शिवश् च ऽउभौ राजानम् उपजग्मतुः । 183
काचस्फटिकयोः खण्डै रीतिबद्धैः सुरञ्जितैः
रचितं देव तत्र ऽएव व्याजालंकरणं मकृत् । 184

शिवेन मम सर्वस्वम् अज्ञानानस्य भक्षितं,
इति विज्ञापयामास नृपतिं स पुरोहितः । 185
ततः शिवो ऽब्रवीद्, राजन् आबाल्यात् तापसो ऽभवं,
अनेन 'एव तद् अभ्यर्थ्य ग्राहितो ऽहं प्रतिग्रहं । 186
तदा 'एव 'आभाषितं च 'अस्य मुग्धेन 'अपि सता मया,
रत्नादिषु अनभिज्ञस्य प्रमाणं मे भवान् इति । 187
अहं स्थितस् तव 'अत्र 'इति प्रत्यपद्यत च 'एष तत्,
प्रतिगृह्य च तत् सर्वं हस्ते ऽस्य 'एव मया 'अर्पितं । 188
ततो ऽनेन गृहीतं तत् स्वेहं मूल्येन मे प्रभो,
विद्यते च 'आवयोर् अत्र स्वहस्तलिखितं मिथः । 189
इदानीं च 'एव साहाय्यं परं ज्ञानात्य् अतः प्रभुः,
एवं शिवे समाप्तोक्ताव् उवाच स च माधवः । 190
मा 'एवम् आदिश, मान्यस् त्वम्, अपराधो मम 'अत्र कः,
न गृहीतं मया किंचिद् भवतो वा शिवस्य वा । 191
पैतृकं धनम् अन्यत्र चिरं न्यासीकृतं स्थितं,
तदा तद् एव च 'आनीतं मया दत्तं द्विजन्मने । 192
सत्यं यदि न तत् स्वर्णं न च रत्नानि तानि, तत्
रीतिस्फटिककाचानां प्रदानाद् अस्तु मे फलं । 193
निर्व्याजहृदयत्वेन दाने च प्रत्ययो मम
दृष्ट एव, 'अवतीर्णो ऽस्मि यद् रोगम् अतिदुस्तरं । 194

इत्य् अभिन्नमुखच्छायम् उक्तवत्य् अत्र माधवे
जहास मन्त्रिसहितो राजा तस्मै तुतोष च । 195
न एवम् अन्यायतः किंचिन् माधवस्य शिवस्य वा,
इति तत्र सभासद्भिः सान्तर्हासम् उदीरिते । 196
पुरोहितः सो ऽथ ययौ हारितार्थो विलज्जितः,
कासां हि न आपदां हेतुर् अतिलोभान्धबुद्धिता । 197
तौ च धूर्तौ ततस् तत्र तस्थतुः शिवमाधवौ
परितुष्टनृपावाप्तप्रसादसुखितौ चिरं । 198

एवं सूत्रशतैस् तैस् तैर् जिह्मजालानि तन्वते
जालोपजीविनो धूर्ता धरायां धीवरा इव । 199
तत् तात मिथ्या कनकपुरीं दृष्टाम् इव ब्रुवन्
एषो ऽपि वञ्चयित्वा त्वां विप्रो मत्प्राप्तिम् इच्छति । 200
अतः सम्प्रति मा भूत् ते मद्विवाहकृते त्वरा,
स्थिता अस्मि तावत् कन्या एव, पश्यामो भविता अत्र किं । 201
इत्य् उक्तः सुतया राजा तया कनकरेखया
परोपकारी स तदा ताम् एवं प्रत्यभाषत । 202
यौवने कन्यकाभावस् चिरं पुत्रि न युज्यते,
मिथ्या वदन्ति दोषं हि दुर्जना गुणमत्सराः । 203

उत्तमस्य विशेषेण कलङ्कोत्पादको जनः,
रुद्रस्वामिकथाम् अत्र शृणु एतां कथयामि ते । 204

गङ्गोपकण्ठे कुसुमपुरं नाम अस्ति यत् पुरं,
रुद्रस्वामी इति कोऽप्य् आसीत् तीर्थार्थी तत्र तापसः । 205
स भैक्ष्यवृत्तिर् विप्रो ऽत्र गङ्गातीरकृतोटजः
तपःप्रकर्षाल् लोकस्य गौरवास्पदतां ददौ । 206
कदाचिच् च अत्र तं दृष्ट्वा दूराद् भिक्षाविनिर्गतं
जनमध्याज् जगाद एकस् तद्गुणासहनः खलः । 207
अपि जानीथ जातो ऽयं कीदृक् कपटतापसः,
अनेन एव अर्भकाः सर्वे नगरे ऽमुत्र भक्षिताः । 208
तच् छ्रुत्वा च द्वितीयो ऽत्र तत्र अवोचत तादृशः,
सत्यं श्रुतं मया अप्य् एतद् उच्यमानं जनैर् इति । 209
एवम् एतद् इति स्म आह तृतीयो ऽपि समर्थयन्,
बध्नात्य् आर्यपरीवादं खलसंवादशृङ्खला । 210
तेन एव च क्रमेण एष गतः कर्णपरम्परां
प्रवादो बहुलीभावं सर्वत्र अपि पुरे ययौ । 211
पौराश् च सर्वे गेहेभ्यो बलाद् बालान् न तत्यजुः,
रुद्रस्वामी शिशून् नीत्वा भक्षयत्य् अखिलान् इति । 212

ततश् च ब्राह्मणास् तत्र संततिक्षयभीरवः
संभूय मन्त्रयामासुः पुरात् तस्य प्रवासनं । 213
ग्रसेत कुपितः सो ऽस्मान् इति साक्षाद् भयान् न ते
यदा तस्य ऽशकन् वक्तुं, दूतान् विससृजुस् तदा । 214
ते च गत्वा तदा दूता दूराद् एव तम् अब्रुवन्,
नगराद् गम्यताम् अस्माद् इत्य् आहुस् त्वां द्विजातयः । 215
किं निमित्तम् इति प्रोक्ता विस्मितेन ऽथ तेन ते
पुनर् ऊचुस्, त्वम् अश्नासि बालदर्शम् इह ऽइति तं । 216
तच् छ्रुत्वा स हरस्वामी स्वयं प्रत्यायनेच्छया
विप्राणां निकटं तेषां भीतिनश्यज्जनो ययौ । 217
विप्राश् च ऽरुरुहुस् त्रासात् तं दृष्ट्वा ऽएव मठोपरि,
प्रवादमोहितः प्रायो न विचारक्षमो जनः । 218
अथ द्विजान् हरस्वामी तान् एकैकम् अधःस्थितः
नामग्राहं समाहूय स जगाद ऽउपरिस्थितान् । 219
को ऽयं मोहो ऽद्य वो विप्रा, न ऽवेक्षध्वं परस्परं,
कियन्तो बालकाः कस्य मया कति च भक्षिताः । 220
तच् छ्रुत्वा यावद् अन्योन्यं विप्राः परिमृशन्ति ते,
तावत् सर्वे ऽपि सर्वेषां जीवन्तो बालकाः स्थिताः । 221
क्रमान् नियुक्ताश् च ऽन्ये ऽपि पौरास् तत्र तथा ऽएव तत्
प्रत्यपद्यन्त, सर्वे ऽपि सविप्रवणिजो ऽब्रुवन् । 222

अहो विमूढैर् अस्माभिः साधुर् मिथ्या 'एव दूषितः,
जीवन्ति बालाः सर्वेषां, तत् कस्य 'अनेन भक्षिताः । 223
इत्य् उक्तवत्सु सर्वेषु हरस्वामी तदा 'एव सः
संपन्नशुद्धिर् नगराद् गन्तुं प्रववृते ततः । 224
दुर्जनोत्पादितावद्यविरक्तहृतचेतसः,
अविवेकिनि दुर्देशे रतिः का हि मनस्विनः । 225
ततो बणिग्भिर् विप्रैश् च प्रार्थितश् चरणानतैः,
कथंचित् स हरस्वामी तत्र वस्तुम् अमन्यत । 226

इत्थं सच्चरितावलोकनलसद्विद्वेषवाचालिता
मिथ्या दूषणम् एवम् एव ददति प्रायः सतां दुर्जनाः,
किंचित् किं पुनर् आप्नुवन्ति यदि ते तत्र 'अवकाशं मनाग्
दृष्टं तज्ज्वलिते ऽनले निपतितः प्राज्याज्यधारोत्करः । 227
तस्माद् विशल्ययितुम् इच्छसि मां यदि त्वं
वत्से, तद् उन्मिषति नूतनयौवने ऽस्मिन्
न स्वेच्छम् अर्हसि चिरं खलु कन्यका त्वम्
आसेवितुं सुलभदुर्जनदुःप्रवादं । 228
इत्य् उक्ता नरपतिना
पित्रा प्रायेण कनकरेखा सा

निजगाद राजतनया
तम् अवस्थितनिश्चया भूयः । 229
दृष्टा कनकपुरी सा
विप्रेण क्षत्रियेण वा येन,
तर्हि तम् आशु गवेषय,
तस्मै मां देहि, भाषितं हि मया । 230
तच् छ्रुत्वा, दृढनिश्चयां विगणयन् जातिस्मरां तां सुतां,
न अस्यास् च अन्यम् अभीष्टभर्तृघटने पश्यन् उपायक्रमं,
देशे तत्र ततः प्रभृत्य् अनुदिनं प्रष्टुं नवागन्तुकान्
भूयो भूमिपतिः स नित्यपटहप्रोद्घोषणाम् आदिशत् । 231
यो विप्रः क्षत्रियो वा ननु कनकपुरीं दृष्टवान्, सो ऽभिधत्तां,
तस्मै राजा किल स्वां वितरति तनयां यौवराज्येन साकं,
सर्वत्र अघोष्यत एवं पुनर् अपि पटहानन्तरं च अत्र शश्वन्,
न त्व् एकः कोऽपि तावत् कृतकनकपुरीदर्शनो लभ्यते स्म । 232

। इति ।
॥ चतुर्विंशस् तरङ्गः ॥

TARANGA. 25.

अत्र 'अन्तरे द्विजयुवा शक्तिदेवः सुदुर्मनाः
अचिन्तयद् अभिप्रेतराजकन्यावमानितः । 1
मया 'अद्य मिथ्या कनकपुरीदर्शनवादिना
विमानना परं प्राप्ता न तु असौ राजकन्यका । 2
तद् एतत्प्राप्तये तावद् भ्रमणीया मही मया,
यावत् सा नगरी दृष्टा, प्राणैर् वा 'अपि गतं मम । 3
तां हि दृष्ट्वा पुरीम् एत्य तत्पणोपार्जितां न चेत्
लभेय राजतनयाम् एतां, किं जीवितेन तत् । 4
एवंकृतप्रतिज्ञः सन् वर्धमानपुरात् ततः
दक्षिणां दिशम् आलम्ब्य स प्रतस्थे तदा द्विजः । 5
क्रमेण गच्छन् संप्राप सो ऽथ विन्ध्यमहाटवीं,
विवेश च निजां वाञ्छाम् इव तां गहनायतां । 6
तस्यां च मारुताधूतमृदुपादपपल्लवैः
वीजयन्त्याम् इव 'आत्मानं तप्तम् अर्ककरोत्करैः । 7

भूरिचौरपराभूतिदुःखाद् इव दिवानिशं
क्रोशन्त्यां तीव्रसिंहादिहन्यमानमृगारवैः । 8
स्वच्छन्दोच्छलदुद्दाममहामरुमरीचिभिः
जिगीषन्त्याम् इव ऽत्युग्राण्य् अपि तेजांसि भास्वतः । 9
जलसंगतिहीनायाम् अप्य् अहो सुलभापदि
सततोल्लंघ्यमानायाम् अपि दूरीभवद्भुवि । 10
दिवसैर् दूरम् अध्वानम् अतिक्रम्य ददर्श सः
एकान्ते शीतलस्वच्छसलिलं सुमहत् सरः । 11
पुण्डरीकोच्छ्रितच्छत्रं प्रोल्लसद्धंसचामरं
कुर्वाणम् इव सर्वेषां सरसाम् अधिराजतां । 12
तस्मात् स्नानादि कृत्वा च तत्पार्श्वे पुनर् उत्तरे
अपश्यद् आश्रमपदं सफलस्निग्धपादपं । 13
तत्र ऽश्वत्थतरोर् मूले निषण्णं तापसैर् वृतं
स सूर्यतपसं नाम स्थविरं मुनिम् ऐक्षत । 14
स्ववयोऽब्दशतग्रन्थिसंख्यया ऽइव ऽक्षमालया
जराधवलकर्णाग्रसंश्रयिण्या विराजितं । 15
प्रणामपूर्वकं तं च मुनिम् अभ्याजगाम सः,
तेन ऽप्य् अतिथिसत्कारैर् मुनिना सो ऽभ्यनन्द्यत । 16
अपृच्छत च तेन ऽएव संविभज्य फलादिभिः,
कुतः प्राप्तो ऽसि, गन्तासि क्व च भद्र ऽउच्यताम् इति । 17

वर्धमानपुरात् तावद् भगवन् अहम् आगतः,
गन्तुं प्रवृत्तः कनकपुरीं त्व् अस्मि प्रतिज्ञया । 18
न जाने क्व भवेत् सा तु, भगवान् वक्तु वेत्ति चेत्,
इति तं शक्तिदेवो ऽपि स प्रह्वो मुनिम् अभ्यधात् । 19
वत्स वर्षशतान्य् अष्टौ मम आश्रमपदे त्व् इह
अतिक्रान्तानि, न च सा श्रुता अपि नगरी मया । 20
इति तेन अपि मुनिना गदितः स विषादवान्
पुनर् एव अब्रवीत्, तर्हि मृतो ऽस्मि ह्मां भ्रमन् इह । 21
ततः क्रमेण ज्ञातार्थः स मुनिस् तम् अभाषत,
यदि ते निश्चयस्, तर्हि यद् अहं वच्मि तत् कुरु । 22
अस्ति काम्पिल्यविषयो योजनानां शतेषु इतः
त्रिषु, तत्र उत्तराख्यस् च गिरिस्, तत्र अपि च आश्रमः । 23
तत्र आर्यो ऽस्ति मम भ्राता ज्येष्ठो दीर्घतपा इति,
तत्पार्श्वं व्रज, जानीयात् स वृद्धो जातु तां पुरीं । 24
एतच् छ्रुत्वा तथा इत्य् उक्त्वा जातास्थस् तत्र तां निशां
नीत्वा प्रतस्थे स प्रातः शक्तिदेवो द्रुतं ततः । 25
क्लेशातिक्रान्तकान्तारस् आन्तस् च आसाद्य तं चिरात्
काम्पिल्यविषयं तस्मिन् आरुरोह उत्तरे गिरौ । 26
तत्र तं दीर्घतपसं मुनिम् आश्रमवर्तिनं
दृष्ट्वा प्रणम्य च प्रीतः कृतातिथ्यम् उपाययौ । 27

व्यजिज्ञपच् च, कनकपुरीं राजसुतोदितां
प्रस्थितो ऽहं, न जानामि भगवन् क्व ऽस्ति सा पुरी । 28
सा च मे ऽवश्यगन्तव्या, ततस् तदुपलब्धये
ऋषिणा सूर्यतपसा प्रेषितो ऽस्मि तव ऽन्तिकं । 29
इत्य् उक्तवन्तं तं शक्तिदेवं सो ऽप्य् अब्रवीन् मुनिः,
इयता वयसा पुत्र पुरी सा ऽद्य मया श्रुता । 30
देशान्तरागतैः कैः कैर् ज्ञातः परिचयो न मे,
न च तां श्रुतवान् अस्मि, दूरे तद्दर्शनं पुनः । 31
जानाम्य् अहं च नियतं दवीयसि तया क्वचित्
भाव्यं द्वीपान्तरे, वत्स तत्र ऽउपायं च वच्मि ते । 32
अस्ति वारिनिधेर् मध्ये द्वीपम् उत्स्थलसंज्ञकं,
तत्र सत्यव्रताख्यो ऽस्ति निषादाधिपतिर् धनी । 33
तस्य द्वीपान्तरेष्व् अस्ति सर्वेष्व् अपि गतागतं,
तेन सा नगरी ज्ञातु भवेद् दृष्टा श्रुता ऽपि वा । 34
तस्मात् प्रयाहि जलधेर् उपकण्ठप्रतिष्ठितं
नगरं प्रथमं तावद् विटङ्कपुरसंज्ञकं । 35
ततः केनापि वणिजा समं प्रवहणेन तत्
निषादस्य ऽआस्पदं गच्छ द्वीपं तस्य ऽइष्टसिद्धये । 36
इत्य् उक्तस् तेन मुनिना शक्तिदेवः स तत्क्षणं
तथा ऽइत्य् उक्त्वा तम् आमन्त्र्य प्रयाति स्म तदा ऽऽश्रमात् । 37

कालेन प्राप्य च उल्लंघ्य देशान् कोशान् बहूंस् च सः
वारिधेस् तीरतिलकं तद् विटङ्कपुरं पुरं । 38
तस्मिन् समुद्रदत्ताख्यम् उत्स्थलद्वीपयायिनं
अन्विष्य वणिजं तेन सह सख्यं चकार सः । 39
तदीयं यानपात्रं च समं तेन अधिरुह्य सः
तन्नारीनिपुणान्वेषः प्रतस्थे ऽम्बुधिवर्त्मना । 40
ततो ऽल्पदेशे गन्तव्ये समुत्तस्थाव् अशङ्कितं
कालो विद्युल्लताजिह्वो गर्जत्पर्जन्यराक्षसः । 41
लघून् उन्नमयन् भावान् गुरून् अप्य् अवपातयन्
वातुं विधिर् इव आरेभे प्रचण्डश् च प्रभञ्जनः । 42
वातास्फालाच् च जलधेर् उदतिष्ठन् महोर्मयः
आश्रयाभिभवक्रोधाद् इव शैलाः सपक्षकाः । 43
ययौ च तत् प्रवहणं क्षणम् ऊर्ध्वम् अधः क्षणं
उच्छ्रायपातपर्यायं धनिनां दर्शयन्न् इव । 44
क्षणान्तरे च वणिजाम् आक्रन्दैस् तीव्रपूरितं
भराद् इव तद् उत्पत्य वहनं समभज्यत । 45
भग्ने च तस्मिंस् तत्स्वामी स वणिक् पतितो ऽम्बुधौ
तीर्णः फलहकारूढः प्राप अन्यद्वहनं चिरात् । 46
शक्तिदेवं पतन्तं तु तं व्यात्तमुखकन्दरः
अपरिक्षतसर्वाङ्गं महामत्स्यो निगीर्णवान् । 47

स च मत्स्यो ऽब्धिमध्येन तत्कालं स्वेच्छया चरन्
उत्स्थलद्वीपनिकटं जगाम विधियोगतः । 48
तत्र तस्य ऽएव कैवर्तपतेः सत्यव्रतस्य सः
शफरग्राहिभिर् भृत्यैः प्राप्य दैवाद् अगृह्यत । 49
ते च तं सुमहाकायं निन्युर् आकृष्य कौतुकात्
तदा ऽएव धीवरास् तस्य निजस्य स्वामिनो ऽन्तिकं । 50
सो ऽपि तं तादृशं दृष्ट्वा तैर् एव सकुतूहलः
पाठीनं पाटयामास भृत्यैः सत्यव्रतो निजैः । 51
पाटितस्य ऽउदरात् जीवन् शक्तिदेवो ऽथ तस्य सः
अनुभूतापराश्चर्यगर्भवासो विनिर्ययौ । 52
निर्यातं च कृतस्वस्तिकारं तं च सविस्मयः
युवानं वीक्ष्य पप्रच्छ दाशः सत्यव्रतस् ततः । 53
कस् त्वं, कथं कुतश् च ऽएषा शफरोदरशायिता
ब्रह्मंस् त्वया ऽआप्ता, को ऽयं ते वृत्तान्तो ऽत्यन्तम् अद्भुतः । 54
तच् छ्रुत्वा शक्तिदेवस् तं दाशेन्द्रं प्रत्यभाषत,
ब्राह्मणः शक्तिदेवाख्यो वर्धमानपुराद् अहं । 55
अवश्यगम्या कनकपुरी च नगरी मया,
अजानानश् च तां दूराद् भ्रान्तो ऽस्मि सुचिरं भुवं । 56
ततो दीर्घतपोवाक्यात् संभाव्य द्वीपगां च तां,
तज्ज्ञप्तये दाशपतेर् उत्स्थलद्वीपवासिनः । 57

पार्श्वं सत्यव्रतस्य ऽअहं गच्छन् वहनभङ्गतः
मग्नो ऽम्बुधौ निगीर्णो ऽहं मत्स्येन प्रापितो ऽधुना । 58
इत्य् उक्तवन्तं तं शक्तिदेवं सत्यव्रतो ऽब्रवीत्,
सत्यव्रतो ऽहम् एव, ऽएतद् द्वीपं तच् च ऽइदम् एव ते । 59
किंतु दृष्टा बहुद्वीपा, दृष्टा ऽअद्य न सा मया
नगरी त्वदभिप्रेता द्वीपान्तेषु श्रुता पुनः । 60
इत्य् उक्त्वा शक्तिदेवं च विषण्णं वीक्ष्य तत्क्षणं
पुनर् अभ्यागतप्रीत्या तं स सत्यव्रतो ऽभ्यधात् । 61
ब्रह्मन् मा गा विषादं, त्वम् इह ऽएव ऽअद्य निशां वस,
प्रातः कंचिद् उपायं ते विधास्यामि ऽइष्टसिद्धये । 62
इत्य् आश्वास्य स तेन ऽएव दाशेन प्रहितस् ततः
सुलभातिथिसत्कारं द्विजो विप्रमठं ययौ । 63
तत्र तद्वासिना ऽएकेन कृताहारो द्विजन्मना
विष्णुदत्ताभिधानेन सह चक्रे कथाक्रमं । 64
तत्प्रसङ्गाच् च तेन ऽएव पृष्टस् तस्मै समासतः
निजं देशं कुलं कृत्स्नं वृत्तान्तं च शशंस सः । 65
तद् बुद्ध्वा परिरभ्य ऽएनं विष्णुदत्तः स तत्क्षणं
बभाषे हर्षवाष्पाम्बुघर्घराक्षरजर्जरं । 66
दिष्ट्या मातुलपुत्रस् त्वम् एकदेशभवश् च मे,
अहं च बाल्य एव प्राक् तस्माद् देशाद् इह ऽआगतः । 67

तद् इह एव आस्व नचिरात् साधयिष्यति च अत्र ते
इष्टं द्वीपान्तरागच्छद्वणिक्कर्णिपरम्परा । 68
इत्य् उक्त्वा अन्वयम् आवेद्य विष्णुदत्तो यथोचितैः
तं शक्तिदेवं तत्कालम् उपचारैर् उपाचरत् । 69
शक्तिदेवो ऽपि संप्राप विस्मृताधक्लमो मुदं,
विदेशे बन्धुलाभो हि मराव् अमृतनिर्झरः । 70
अमंस्त च निजाभीष्टसिद्धिम् अभ्यर्णवर्तिनीं,
अन्तरापाति हि श्रेयः कार्यसंपत्तिसूचकं । 71
ततो रात्राव् अनिद्रस्य शयनीये निषेदुषः
अभिवाञ्छितसंप्राप्तिगतचित्तस्य तस्य सः । 72
शक्तिदेवस्य पार्श्वस्थो विष्णुदत्तः समर्थनं
विनोदपूर्वकं कुर्वन् कथां कथितवान् इमां । 73

पुरा अभूत् सुमहाविप्रो गोविन्दस्वामिसंज्ञकः
महाग्रहारे कालिन्द्या उपकण्ठनिवेशिनि । 74
जायेते स्म च तस्य द्वौ सदृशौ गुणशालिनः
अशोकदत्तो विजयदत्तश् च इति सुतौ क्रमात् । 75
कालेन तत्र वसतां तेषाम् अजनि दारुणं
दुर्भिक्षं, तेन गोविन्दस्वामी भार्याम् उवाच सः । 76

अयं दुर्भिक्षदोषेण देशस् तावद् विनाशितः,
तन् न शक्नोम्य् अहं द्रष्टुं सुहृद्बान्धवदुर्गतिं । 77
दीयते च कियत् कस्य, तस्माद् अन्नं यद् अस्ति नः
तद् दत्वा बन्धुमित्रेभ्यो व्रजामो विषयाद् इतः । 78
वाराणसीं च वासाय सकुटुम्बाः श्रयामहे,
इत्य् उक्तया सो ऽनुमतो भार्यया ऽन्नम् अदान् निजं । 79
सदारसुतभृत्यश् च स देशात् प्रययौ ततः,
उत्सहन्ते न हि द्रष्टुम् उत्तमाः स्वजनापदं । 80
गछंश् च मार्गे जटिलं भस्मपाण्डुं कपालिनं
सार्धचन्द्रम् इव ऽईशानं महाव्रतिनम् ऐक्षत । 81
उपेत्य ज्ञानिनं तं च नत्वा स्नेहेन पुत्रयोः
शुभाशुभं स पप्रछ, सो ऽथ योगी जगाद तं । 82
पुत्रौ ते भाविकल्याणौ, किंत्व् एतेन कनीयसा
ब्रह्मन् विजयदत्तेन वियोगस् ते भविष्यति । 83
ततो ऽस्य ऽअशोकदत्तस्य द्वितीयस्य प्रभावतः
एतेन सह युष्माकं भूयो भावी समागमः । 84
इत्य् उक्तस् तेन गोविन्दस्वामी स ज्ञानिना तदा
सुखदुःखाद्भुताक्रान्तस् तम् आमन्त्र्य ततो ययौ । 85
प्राप्य वाराणसीं तां च तद्बाह्ये चण्डिकागृहे
दिनं तत्र ऽअतिचक्राम देवीपूजादिकर्मणा । 86

सायं च तत्र एव वह्निः सकुटुम्बस् तरोस् तले
समावसत् कार्पटिकैः सो ऽन्यदेशागतैः सह । 87
रात्रौ च तत्र सुप्तेषु सर्वेषु अधिगताध्वसु
श्रान्तेषु आस्तीर्णपर्णादिपान्थशय्यानिषादिषु । 88
तदीयस्य विबुद्धस्य तस्य अकस्मात् कनीयसः
सूनोर् विजयदत्तस्य महान् शीतज्वरो ऽजनि । 89
स तेन सहसा भाविबन्धुविश्लेषहेतुना
भयेन इव ज्वरेण अभूद् ऊर्ध्वरोमा सवेपथुः । 90
शीतार्तस् च प्रबोध्य एव पितरं स्वम् उवाच तं,
बाधते तात तीव्रो माम् इह शीतज्वरो ऽधुना । 91
तन् मे समिधम् आनीय शीतघ्नं ज्वलय अनलं,
न अन्यथा मम शान्तिः स्यान्, नयेयं न च यामिनीं । 92
तच् छ्रुत्वा तं स गोविन्दस्वामी तद्वेदनाकुलः,
तावत् कुतो ऽधुना वह्निर् वत्स इति च समभ्यधात् । 93
नन्व् अयं निकटे तात दृश्यते ऽग्निर् ज्वलन् इतः
भूयिष्ठे ऽत्र एव तद् गत्वा किं न अङ्गं तापयाम्य् अहं । 94
तस्मात् सकम्पं हस्ते मां गृहीत्वा प्रापय द्रुतं,
इत्य् उक्तस् तेन पुत्रेण पुनर् विप्रो ऽपि सो ऽब्रवीत् । 95
श्मशानम् एतद्, एषा च चिता ज्वलति, तत् कथं
गम्यते ऽत्र पिशाचादिभीषणे, त्वं हि बालकः । 96

एतच् छ्रुत्वा पितुर् वाक्यं वत्सलस्य विहस्य सः
वीरो विजयदत्तस् तं सावष्टम्भम् अभाषत । 97
किं पिशाचादिभिस् तात वराकैः क्रियते मम,
किम् अल्पसत्त्वः कोऽप्य् अस्मि, तद् अशङ्कं नय अत्र मां । 98
इत्य् आग्रहाद् वदन्तं तं स पिता तत्र नीतवान्,
सो ऽप्य् अङ्गं तापयन् बालस् चिताम् उपससर्प तां । 99
वहन्तीम् अनलज्वालाधूमव्याकुलमूर्धजां
नृमांसग्राहिणीं साक्षाद् इव रक्षोऽधिदेवतां । 100
क्षणात् तत्र समाश्वास्य सो ऽर्भकः पितरं च तं,
चितान्तर् दृश्यते वृत्तं किम् एतद् इति पृष्टवान् । 101
कपालं मानुषस्य एतच् चितायां पुत्र दह्यते,
इति तं प्रत्यवादीच् च सो ऽपि पार्श्वस्थितः पिता । 102
ततः स्वसाहसेन एव दीप्ताग्रेण निहत्य तत्
कपालं स्फोटयामास काष्ठेन एकेन सो ऽर्भकः । 103
तेन उच्चैः प्रसृता तस्मान् मुखे तस्य आविशद् वसा
श्मशानवह्निना नक्तंचरीसिद्धिर् इव अर्पिता । 104
तदास्वादेन बालस् च संपन्नो ऽभूत् स राक्षसः
ऊर्ध्वकेशः शिखोत्खातखड्गो दंष्ट्राविशङ्कटः । 105
आकृष्य च कपालं तद्वसां पीत्वा लिलेह सः
अस्थिलग्नानलज्वालालोलया निजजिह्वया । 106

ततस् त्यक्तकपालः सन् पितरं निजम् एव तं
गोविन्दस्वामिनं हन्तुम् उद्यतासिर् इयेष सः । 107
कपालस्फोट भोर् देव न हन्तव्यः पिता तव,
इत एहि 'इति तत्कालं श्मशानाद् उदभूद् वचः । 108
तच् छ्रुत्वा नाम लब्ध्वा च कपालस्फोट इत्य् अदः
स बटुः पितरं मुक्त्वा रक्षोभूतस् तिरोदधे । 109
तत्पिता सो ऽपि गोविन्दस्वामी, हा पुत्र हा गुणिन्
हा हा विजयदत्त 'इति मुक्ताक्रन्दस् ततो ययौ । 110
एत्य चण्डीगृहं तच् च प्रातः पत्न्यै सुताय च
ज्यायसे ऽशोकदत्ताय यथावृत्तं शशंस सः । 111
ततस् ताभ्यां सह 'अभ्रविद्युत्पातदारुणां
तथा शोकानलावेगम् आजगाम स तापसः । 112
यथा वाराणसीसंस्थो देवीसंदर्शनागतः
तत्र 'उपेत्य जनो ऽप्य् अन्यो ययौ तत्समदुःखतां । 113
तावच् च देवीपूजार्थम् आगत्य 'एको महाबणिक्
अपश्यद् अत्र गोविन्दस्वामिनं तं तथाविधं । 114
समुद्रदत्तनामा 'असाव् उपेत्य 'आश्वास्य तं द्विजं
तदा 'एव स्वं गृहं साधुर् निनाय सपरिच्छदं । 115
स्नानादिना 'उपचारेण तत्र च 'एनम् उपाचरत्,
निसर्गो ह्य् एष महतां यद् आपन्नानुकम्पनं । 116

सो ऽपि ज्ञग्राह गोविन्दस्वामी पत्न्या समं धृतिं
महाव्रतिवचः श्रुत्वा ज्ञातास्थः सुतसंगमे । 117
ततः प्रभृति च एतस्यां वाराणस्याम् उवास सः
अभ्यर्थितो महाव्रस्य तस्य एव बणिज्ञो गृहे । 118
तत्र च अधीतविद्यो ऽस्य स सुतः प्राप्तयौवनः
द्वितीयो ऽशोकदत्ताख्यो बाहुयुद्धम् अशिक्षत । 119
क्रमेण च ययौ तत्र प्रकर्षं स तथा, यथा
अजीयत न केनापि प्रतिमल्लेन भूतले । 120
एकदा देवयात्रायां तत्र मल्लसमागमे
आगाद् एको महामल्लः ख्यातिमान् दक्षिणापथात् । 121
तेन अत्र निखिला मल्ला राज्ञो वाराणसीपतेः
प्रतापमुकुटाख्यस्य पुरतो ऽन्ये पराजिताः । 122
ततः स राजा मल्लस्य युद्धे तस्य समादिशत्
आनाय्य अशोकदत्तं तं द्रुतं तस्माद् बणिग्वरात् । 123
सो ऽपि मल्लो भुजं हत्वा हस्तेन आरभत आहवं,
मल्लं च अशोकदत्तस् तु भुजं हत्वा न्यपातयत् । 124
ततस् तत्र महामल्लनिपातोत्थितशब्दया
युद्धभूम्या अपि संतुष्य साधुवाद इव उदिते । 125
स राजा अशोकदत्तं तं तुष्टो रत्नैर् अपूरयत्,
चकार च आत्मनः पार्श्ववर्तिनं दृष्टविक्रमं । 126

सो ऽपि राज्ञः प्रियो भूत्वा दिनैः प्राप परां श्रियं,
शेवधिः शूरविद्यस्य विशेषज्ञो विशांपतिः । 127
सो ऽथ जातु ययौ राजा चतुर्दश्यां बहिः पुरे
सुप्रतिष्ठापितं दूरे देवम् अर्चयितुं शिवं । 128
कृतार्चनस् ततो नक्तं श्मशानस्य अन्तिकेन सः
आगच्छन् अशृणोद् एतां तन्मध्याद् उद्गतां गिरं । 129
अहं दण्डाधिपेन इह मिथ्याबध्यानुकीर्तनात्
द्वेषेण विद्धः शूलायां तृतीयं दिवसं प्रभो । 130
अद्य अपि न च निर्यान्ति प्राणा मे ऽपापकर्मणः,
तद् देव तृषितो ऽत्यर्थम् अहं, दापय मे जलं । 131
तच् छ्रुत्वा कृपया राजा स पार्श्वस्थम् उवाच तं
अशोकदत्तम्, अस्य अम्भः प्रहिणोतु भवान् इति । 132
को ऽत्र रात्रौ व्रजेद् देव, तद् गच्छाम्य् अहम् आत्मना,
इत्य् उक्त्वा अशोकदत्तः स गृहीत्वा अम्बु ततो ययौ । 133
याते च स्वपुरीं राज्ञि स वीरो गहनान्तरं
महत्तरेण तमसा सर्वतो ऽन्तर् अधिष्ठितं । 134
शिवावकीर्णपिशितप्रत्तसन्ध्यामहाबलि
क्वचित् क्वचिच् चिताज्योतिर्दीप्रदीपप्रकाशितं । 135
लसदुत्तालवेतालतालवाद्यं विवेश तत्
श्मशानं कृष्णरजनीनिवासभवनोपमं । 136

केन ऽम्भो याचितं भूपाद् इत्य् उचेस् तत्र स ब्रुवन्,
मया याचितम् इत्य् एवम् अश्रृणोद् वाचम् एकतः । 137
गत्वा तदनुसारेण निकटस्थं चितानलं
ददर्श तत्र शूलाग्रे विद्धं कंचित् स पूरुषं । 138
अधश् च तस्य रुदतीं सदलंकारभूषितां
अदृष्टपूर्वां सर्वाङ्गसुन्दरीं स्त्रियम् ऐक्षत । 139
कृष्णपक्षपरिक्षीणे गते ऽस्तं रजनीपतौ
चितार्चाय तद्रश्मिरम्यां रात्रिम् इव ऽआगतां । 140
का त्वम् अम्ब, कथं च ऽइह रुदत्य् एवम् असि स्थिता,
इति पृष्टा च सा तेन योषिद् एवं तम् अब्रवीत् । 141
अस्य ऽअहं शूलविद्धस्य भार्या विगतलक्षणा
निश्चिताशा स्थिता ऽस्मि ऽइह चितारोहे सह ऽअमुना । 142
कंचित् कालं प्रतीक्षे च प्राणानाम् अस्य निष्क्रमं,
तृतीये ऽह्नि गते ऽप्य् अद्य यान्त्य् एतस्य हि न ऽअसवः । 143
याचते च मुहुस् तोयम् आनीतं च मया ऽइह तत्,
किंत्व् अहं न ऽउन्नते शूले प्राप्नोम्य् अस्य मुखं सखे । 144
इति तस्या वचः श्रुत्वा स प्रवीरो ऽप्य् उवाच तां,
इदं त्व् अस्य नृपेन ऽअपि हस्ते मे प्रेषितं जलं । 145
तन् मे पृष्ठे पदं दत्वा देह्य् एतस्य तद् आनने,
न परस्पर्शमात्रं हि स्त्रीणाम् आपदि दूषणं । 146

एतच् छ्रुत्वा तथा 'इत्य् आत्तजला दत्वा पदद्वयं
शूलमूलावनम्रस्य पृष्ठं तस्य 'आरुरोह सा । 147
क्षणाद् भुवि स्वपृष्ठे च रक्तबिन्दुष्व् अशङ्कितं
पतत्सु मुखम् उन्नम्य स वीरो यावद् ईक्षते । 148
तावत् स्त्रियम् अपश्यत् तां छित्वा छुरिकया मुहुः
खादन्तीं तस्य मांसानि पुंसः शूलाग्रवर्तिनः । 149
ततस् तां विकृतिं मत्वा क्रोधाद् आकृष्य स क्षितौ
आस्फोटयिष्यन् जग्राह पदे रणितनूपुरे । 150
सा 'अपि तं तरसा पादम् आक्षिप्य 'एव स्वमायया
क्षिप्रं गगणम् उत्पत्य जगाम क्वाप्य् अदर्शनं । 151
तस्य च 'अशोकदत्तस्य तत्पादान् मणिनूपुरं
तस्माद् आकर्षणात्स्रस्तम् अवतस्थे करान्तरे । 152
ततस् तां पेशलाम् आदाव् अघकर्त्रीं च मध्यतः
अन्ते विकारघोरां च दुर्जनैर् इव संगतिं । 153
नष्टां विचिन्तयन् पश्यन् हस्ते दिव्यं च नूपुरं
सविस्मयः साभितापः सहर्षश्च् च बभूव सः । 154
ततः श्मशानतस् तस्मात् स जगाम 'आत्तनूपुरः
निजगेहं प्रभाते च स्नातो राजकुलं ययौ । 155
किं तस्य शूलविद्धस्य दत्तं वारि 'इति पृष्टते
राज्ञि च स तथा 'इत्य् उक्त्वा तं नूपुरम् उपानयत् । 156

एतत् कुत इति स्वैरं पृष्टस् तेन स भूभृता
तस्मै स्वरात्रिवृत्तान्तं शशंस 'अद्भुतभीषणं । 157
ततश् च 'अनन्यसामान्यं सत्वं तस्य 'अवधार्य सः
तुष्टो ऽप्य् अन्यगुणोत्कर्षात् तुतोष सुतरां नृपः । 158
गृहीत्वा नूपुरं तं च गत्वा देव्यै ददौ स्वयं
हृष्टस् तत्प्राप्तिवृत्तान्तं तस्यै च समवर्णयत् । 159
सा च तद् बुद्ध्वा च दृष्ट्वा च तं दिव्यमणिनूपुरं
अशोकदत्तश्लाघैकतत्परा मुमुदे रहः । 160
ततो जगाद तां राजा, देवि ज्ञात्या 'एव विद्यया
सत्येन 'एव च रूपेण महताम् अप्य् अयं महान् । 161
अशोकदत्तो भव्यायाः भर्ता च दुहितुर् यदि
भवेन् मदनलेखायास्, तद् भद्रम् इति मे मतिः । 162
वरस्य 'अमी गुणाः प्रेक्ष्या न लक्ष्मीः क्षणभङ्गिनी,
तद् एतस्मै प्रवीराय ददाम्य् एतां सुताम् अहं । 163
इति भर्तुर् वचः श्रुत्वा देवी सा सादरा 'अवदत्,
युक्तम् एतद्, असौ ह्य् अस्या युवा भर्ता 'अनुरूपकः । 164
सा च तेन मधूद्यानदृष्टेन हृतमानसा
शून्याशया दिनेष्व् एषु न शृणोति न पश्यति । 165
तत्सखीतश् च तद् बुद्ध्वा सचिन्ता 'अहं निशाक्षये
सुप्ता जाने स्त्रिया स्वप्ने कयाप्य् उक्ता 'अस्मि दिव्यया । 166

वत्से मदनलेखा ऽइयं देया ऽन्यस्मै न कन्यका,
एषा ह्य् अशोकदत्तस्य भार्या जन्मान्तरार्जिता । 167
तच् च श्रुत्वा प्रबुध्य ऽएव गत्वा प्रत्यूष एव च
स्वयं तत्प्रत्ययाद् वत्सां समाश्वासितवत्य् अहं । 168
इदानीं च ऽआर्यपुत्रेण स्वयम् एव मम ऽउदितं
तस्मात् समेतु तेन ऽअसौ वृत्तेन ऽइव ऽआर्तवी लता । 169
इत्य् उक्तः प्रियया प्रीतः स राजा रचितोत्सवः
आहूय ऽअशोकदत्ताय तस्मै तां तनयां ददौ । 170
तयोश् च सो ऽभूद् राजेन्द्रपुत्रीविप्रेन्द्रपुत्रयोः
संगमो ऽन्योन्यशोभायै लक्ष्मीविनययोर् इव । 171
ततः कदाचिद् राजानं तं देवी वदति स्म सा
अशोकदत्तानीतं तम् उद्दिश्य मणिनूपुरं । 172
आर्यपुत्र ऽअयम् एकाकी नूपुरो न विराजते,
अनुरूपस् तद् एतस्य द्वितीयः परिकल्प्यतां । 173
तच् छ्रुत्वा हेमकारादीन् आदिदेश स भूपतिः,
नूपुरस्य ऽअस्य सदृशो द्वितीयः क्रियताम् इति । 174
ते तन् निरूप्य जगदुर्, न ऽईदृशो देव शक्यते
अपरः कर्तुम्, एतद् धि दिव्यं शिल्पं न मानुषं । 175
रत्नानि ऽईदृशि भूयांसि न भवन्त्य् एव भूतले,
तस्माद् एष यतः प्राप्तस् तत्र ऽएव ऽअन्यो गवेष्यतां । 176

एतच् छ्रुत्वा सदेवीके विषण्णे राज्ञि तत्क्षणं
अशोकदत्तस् तत्रस्थस् तद् दृष्ट्वा सहसा अब्रवीत् । 177
अहम् एव आनयाम्य् अस्य द्वितीयं नूपुरस्य ते,
एवंकृतप्रतिज्ञश् च राज्ञा साहसशङ्किना । 178
स्नेहान् निवार्यमाणो ऽपि निश्चयान् न चचाल सः,
गृहीत्वा नूपुरं तच् च श्मशानं स पुनर् ययौ । 179
निशि कृष्णचतुर्दश्यां यत्र एव तम् अवाप्तवान्
प्रविश्य तत्र एव प्राज्यचिताधूममलीमसैः । 180
पाशोपवेष्टितगलस्कन्धोल्लम्बितमानुषैः
पादपैर् इव रक्षोभिर् आकीर्णे पितृकानने । 181
अपश्यन् पूर्वदृष्टां तां स्त्रियं, तन्नूपुराप्तये
उपायम् एकं बुबुधे स महामांसविक्रयं । 182
तरुपाशाद् गृहीत्वा अथ शवं बभ्राम तत्र सः,
विक्रीणीते महामांसं गृह्यताम् इति घोषयन् । 183
महासत्त्व गृहीत्वा एतद् एहि तावन् मया सह,
इति क्षणाच् च जगदे स दूराद् एकया स्त्रिया । 184
तच् छ्रुत्वा स तथा एव एताम् उपेत्य अनुसरन् स्त्रियं
आरात् तरुतले दिव्यरूपां योषितम् ऐक्षत । 185
स्त्रीभिर् वृताम् आसनस्थां रत्नाभरणभास्वरां
असंभाव्यस्थितिं तत्र मराव् अम्भोजिनीम् इव । 186

स्त्रिया तया 'उपनीतम् च ताम् उपेत्य तथास्थितां,
नृमांसम् अस्मि विक्रीणे गृह्यताम् इत्य् उवाच सः । 187
भोः महासत्त्व मूल्येन केन 'एतद् दीयते त्वया,
इति सा 'अपि तदा 'आह स्म दिव्यरूपा किल 'अङ्गना । 188
ततः स वीरो हस्तस्थं तम् एकं मणिनूपुरं
संदर्श्य स्कन्धपृष्ठस्थप्रेतकायो जगाद तां । 189
यो ददात्य् अस्य सदृशं द्वितीयं नूपुरस्य मे,
मांसं तस्य ददामि 'इदम्, अस्त्य् असौ यदि गृह्यतां । 190
तच् छ्रुत्वा सा 'अप्य् अवादीत् तम्, अस्त्य् अन्यो नूपुरो मम,
असौ मदीय एव 'एको नूपुरो हि हृतस् त्वया । 191
सा 'एव 'अहं या त्वया दृष्टा शूलविद्धस्य पार्श्वतः
कृतान्यरूपा भवता परिज्ञाता 'अस्मि न 'अधुना । 192
तत् किं मांसेन, यद् अहं वच्मि ते, तत् करोषि चेत्,
तद् द्वितीयं ददाम्य् अस्य तुल्यं तुभ्यं स्वनूपुरं । 193
इत्य् उक्तः स तया वीरः प्रतिपद्य तद् अब्रवीत्,
यत् त्वं वदसि, तत् सर्वं करोम्य् एव क्षणाद् इति । 194
ततस् तस्मै जगाद 'एवम् आमूलात् सा मनीषितं,
अस्ति भद्र त्रिघण्टाख्यं हिमवच्छिखरे पुरं । 195
तत्र 'आसील् लम्बजिह्वाख्यः प्रवीरो राक्षसाधिपः,
तस्य विद्युच्छिखा नाम भार्या 'अहं कामरूपिणी । 196

स च एतस्यां सुतायां मे जातायां दैवतः पतिः
प्रभोः कपालस्फोटस्य पुरतो निहतो रणे । 197
ततो नित्रपुरं तन् मे प्रभुणा तेन तुष्यता
प्रदत्तं, तेन च सुखं स्थिता अस्मि ससुता अधुना । 198
सा च मद्दुहिता इदानीम् आरूढा नवयौवनं,
तत्प्रवीरवरप्राप्तिचिन्ता च मम मानसे । 199
अतस् तदा समं राज्ञा आयातं त्वाम् अमुना पथा
दृष्ट्वा नक्तं चतुर्दश्याम् इहस्था अहम् अचिन्तयं । 200
अयं भव्यो युवा वीरो योग्यो मे दुहितुः पतिः,
तद् एतत्प्राप्तये कंचिद् उपायं किं नु कल्पये । 201
इति संकल्प्य याचित्वा शूलविद्धवचोमिषान्
त्वं मध्ये श्मशानं त्वम् आनीतो ऽभूर् मया मृषा । 202
मायादर्शितदूरादिग्रथत्वा आलोकवादिनी
विप्रलम्भवती च अस्मि तत्र त्वां क्षणमात्रकं । 203
आकर्षणाय भूयस् तं युक्त्या च एकं स्वनूपुरं
संन्यस्य शृङ्खलापाशम् इव आयाता ततो ऽत्र अहं । 204
अद्य च इत्थं मया प्राप्तो भवांस्, तद् गृहम् एतु नः,
भजस्व मे सुतां, किंच गृहाण अपरनूपुरं । 205
इत्य् उक्तः स निशार्कया तया इत्य् उक्ता तया सह
वीरो गगनमार्गेण तन्मित्रा तत्पुरं ययौ । 206

सौवर्णं तद् अपश्यच् च शृङ्गे हिमवतः पुरं
नभोऽध्वखेदविश्रान्तम् अर्कबिम्बम् इव ऽचलं । 207
रक्षोऽधिपसुतां तत्र नाम्ना विद्युत्प्रभां स तां
स्वसाहसमहासिद्धिम् इव मूर्ताम् अवाप्तवान् । 208
तया च सह तत्र ऽएव कंचित् कालम् उवास सः
अशोकदत्तः प्रियया श्वश्रूविभवनिर्वृतः । 209
ततो जगाद तां श्वश्रूं, मह्यं तं देहि नूपुरं,
यतः सम्प्रति गन्तव्या पुरी वाराणसी मया । 210
तत्र ह्य् एतत् प्रतिज्ञातं स्वयं नरपतेः पुरः
एकनूपुरस्पर्द्धिद्वितीयानयनं मया । 211
इत्य् उक्ता तेन सा श्वश्रूर् द्वितीयं तं स्वनूपुरं
तस्मै दत्त्वा पुनश् च ऽएकं सुवर्णकमलं ददौ । 212
प्राप्ताब्जनूपुरस् तस्मात् स पुरान् निर्ययौ ततः
अशोकदत्तो वचसा नियम्य ऽआगमनं पुनः । 213
तया श्वश्वा ऽएव च ऽआकाशपथेन पुनर् एव तत्
श्मशानं प्रापितः सो ऽभून् निजसिद्धिप्रभावतः । 214
तरुमूले च तत्र ऽएव स्थित्वा सा तं ततो ऽब्रवीत्,
सदा कृष्णचतुर्दश्याम् इह रात्राव् उपैम्य् अहं । 215
तस्मान् निशि च भूयो ऽपि त्वम् एष्यसि यदा यदा,
तदा तदा वटतरोर् मूलात् प्राप्स्यसि माम् इतः । 216

स च एतस्यां सुतायां मे जातायां दैवतः पतिः
प्रभोः कपालस्फोटस्य पुरतो निहतो रणे । 197
ततो निजपुरं तन् मे प्रभुणा तेन तुष्यता
प्रदत्तं, तेन च सुखं स्थिता अस्मि ससुता अधुना । 198
सा च मद्दुहिता इदानीम् आरूढा नवयौवनं,
तत्प्रवीरवरप्राप्तिचिन्ता च मम मानसे । 199
अतस् तदा समं राज्ञा आयान्तं त्वाम् अमुना पथा
दृष्ट्वा नक्तं चतुर्दश्याम् इहस्था अहम् अचिन्तयं । 200
अयं भव्यो युवा वीरो योग्यो मे दुहितुः पतिः,
तद् एतत्प्राप्तये कंचिद् उपायं किं नु कल्पये । 201
इति संकल्प्य याचित्वा शूलविद्धवचोमिषात्
जलं मध्ये श्मशानं त्वम् आनीतो ऽभूर् मया मृषा । 202
मायादर्शितरूपादिप्रपञ्चा आलीकवादिनी
विप्रलब्धवती च अस्मि तत्र त्वां क्षणमात्रकं । 203
आकर्षणाय भूयस् तं युक्त्या च एकं स्वनूपुरं
संत्यज्य शृङ्खलापाशम् इव आयाता ततो ऽप्य् अहं । 204
अद्य च इत्थं मया प्राप्तो भवांस्, तद् गृहम् एतु नः,
भजस्व मे सुतां, किंच गृहाण अपरनूपुरं । 205
इत्य् उक्तः स निशाचर्या तथा इत्य् उक्त्वा तया सह
वीरो गगणमार्गेण तत्सिद्ध्या तत्पुरं ययौ । 206

सौवर्णं तद् अपश्यच् च शृङ्गे हिमवतः पुरं
नभोऽध्वखेदविश्रान्तम् अर्कबिम्बम् इव ऽचलं । 207
रक्षोऽधिपसुतां तत्र नाम्ना विद्युत्प्रभां स तां
स्वसाहसमहासिद्धिम् इव मूर्ताम् अवाप्तवान् । 208
तया च सह तत्र ऽएव कंचित् कालम् उवास सः
अशोकदत्तः प्रियया श्वश्रूविभवनिर्वृतः । 209
ततो जगाद तां श्वश्रूं, मह्यं तं देहि नूपुरं,
यतः सम्प्रति गन्तव्या पुरी वाराणसी मया । 210
तत्र ह्य् एतत् प्रतिज्ञातं स्वयं नरपतेः पुरः
एकत्वनूपुरस्पर्द्धिद्वितीयानयनं मया । 211
इत्य् उक्ता तेन सा श्वश्रूर् द्वितीयं तं स्वनूपुरं
तस्मै दत्वा पुनश् च ऽएकं सुवर्णकमलं ददौ । 212
प्राप्ताब्जनूपुरस् तस्मात् स पुरान् निर्ययौ ततः
अशोकदत्तो वचसा नियम्य ऽआगमनं पुनः । 213
तया श्वश्र्वा ऽएव च ऽआकाशपथेन पुनर् एव तत्
श्मशानं प्रापितः सो ऽभून् निजसिद्धिप्रभावतः । 214
तरुमूले च तत्र ऽएव स्थित्वा सा तं ततो ऽब्रवीत्,
सदा कृष्णचतुर्दश्याम् इह रात्राव् उपैम्य् अहं । 215
तस्मान् निशि च भूयो ऽपि त्वम् एष्यसि यदा यदा,
तदा तदा वटतरोर् मूलात् प्राप्स्यसि माम् इतः । 216

एतच् छ्रुत्वा तथा ऽइत्य् उक्त्वा ताम् आमन्त्र्य निशाचरीं
अशोकदत्तः स ततो ययौ तावत् पितुर् गृहं । 217
कनीयःसुतविश्लेषदुःखद्वैगुण्यदायिना
तादृशा तत्प्रवासेन पितरौ तत्र दुःखितौ । 218
अतर्कितागतो यावद् आनन्दयति तत्क्षणात्,
तावत् स बुद्ध्वा श्वशुरस् तत्र ऽएव ऽअस्य ऽआययौ नृपः । 219
स तं साहसिकस्पर्शभीतैर् इव सकण्टकैः
अङ्गैः प्रणतम् आलिंग्य मुमुदे नृपतिश् चिरं । 220
ततस् तेन समं राज्ञा विवेश नृपमन्दिरं
अशोकदत्तः स तदा प्रमोदो रूपवान् इव । 221
ददौ च राज्ञे संयुक्तं तद् दिव्यनूपुरद्वयं
कुर्वाणम् इव तद्वीर्यस्तुतिं कणकणारवैः । 222
अर्पयामास तच् च ऽअस्मै कान्तं कनकपङ्कजं
रक्षःकोशश्रियो हस्ताल् लीलाम्बुजम् इव ऽआहृतं । 223
पृष्टो ऽथ कौतुकात् तेन राज्ञा देवीयुतेन सः
अवर्णयद् यथावृत्तं स्वं कर्णामृतदायि तत् । 224
विचित्रचरितोल्लेखचमत्कारितचेतनं
प्राप्यते किं यशः शुभ्रम् अनङ्गीकृत्य साहसं । 225
एवं वदंस् ततस् तेन जामात्रा कृतकृत्यतां
मेने स राजा देवी च प्राप्तनूपुरयुग्मका । 226

उत्सवातोद्यनिर्ह्रादि तदा राजगृहं च तत्
अशोकदत्तस्य गुणान् उद्गायद् इव निर्बभौ । 227
अन्येद्युश् च स राजा तत् स्वकृते सुरसद्मनि
हेमाब्जं स्थापयामास सद्रौप्यकलशोपरि । 228
उभौ कलशपद्मौ च शुशुभाते सितारुणौ
यशःप्रतापाव् इव तौ भूपालाशोकदत्तयोः । 229
तादृशौ च विलोक्य 'एतौ सहर्षोत्फुल्ललोचनः
राजा माहेश्वरो भक्तिरसावेशाद् अभाषत । 230
अहो विभाति पद्मेन तुङ्गो ऽयं कलशो ऽमुना
भूतिशुभ्रः कपर्दी 'इव जटाजूटेन बभ्रुणा । 231
अभविष्यद् द्वितीयं चेद् ईदृशं कनकाम्बुजं,
आस्थापयिष्यं च 'अमुष्मिन् द्वितीये कलशे ऽपि तत् । 232
इति राजवचः श्रुत्वा 'अशोकदत्तस् ततो ऽब्रवीत्,
आनेष्याम्य् अहम् अम्भोजं द्वितीयम् अपि देव ते । 233
तच् छ्रुत्वा, न मम 'अन्येन पङ्कजेन प्रयोजनं,
अलं ते साहसेन 'इति राजा 'अपि प्रत्युवाच तं । 234
दिवसेष्व् अथ यातेषु हेमाब्जहरणैषिणि
अशोकदत्ते सा भूयो ऽप्य् आगात् कृष्णचतुर्दशी । 235
तस्यां च 'अस्य सुवर्णाब्जवाञ्छां बुद्ध्वा भयाद् इव
द्युसरःस्वर्णकमले याते ऽस्तशिखरं रवौ । 236

सन्ध्यारुणाश्रपिशितग्रासगर्वाद् इव क्षणां
तमो रक्षःसु धावत्सु धूमधूम्रेषु सर्वतः । 237
स्फुरद्दीपावलीदंष्ट्रे तमालभासुरभीषणे
जृम्भमाणे महारौद्रनिशा नक्तंचरीमुखे । 238
प्रसुप्तराजपुत्रीकात् स्वैरं निर्गत्य मन्दिरात्
अशोकदत्तः स ययौ श्मशानं पुनर् एव तत् । 239
तत्र तस्मिन् वटतरोर् मूले तां पुनर् आगतां
ददर्श राक्षसीं श्वश्रूं विहितस्वागतादरां । 240
तया च सह भूयस् तद् अगमत् तन्निकेतनं
स युवा हिमवच्छृङ्गं मार्गोन्मुखबधूजनं । 241
कंचित् कालं समं बधा तत्र स्थित्वा ऽब्रवीच् च तां
श्वश्रूं, देहि द्वितीयं मे कुतश्चित् कनकाम्बुजं । 242
तच् छ्रुत्वा सा ऽप्य् अवादीत् तं, कुतो ऽन्यत् पङ्कजं मम,
एतत् कपालस्फोटस्य विद्यते ऽस्मत्प्रभोः सरः । 243
यत्र ईदृशानि जायन्ते हेमाब्जानि समन्ततः,
तस्मात् तद् एकं मद्भर्त्रे प्रीत्या पद्मं स दत्तवान् । 244
एवं तया उक्ते सो ऽवादीत्, तर्हि तन् मां सरोवरं
नय, यावत् स्वयं तस्माद् आदास्ये कनकाम्बुजं । 245
न शक्यम् एतद्, रक्षोभिर् दारुणैस् तद् धि रक्ष्यते,
एवं निषिद्धो ऽपि तया निर्बन्धं न स तं जहौ । 246

ततः कथंचिन् नीतस् च तया श्वश्वा ददर्श तं
दूरात् सरोवरं दिव्यं तुङ्गाद्रिकटकाश्रितं । 247
छन्नं निरन्तरोद्दण्डदीप्तहेमसरोरुहैः
सततोन्मुखतापीतसंक्रान्तार्कप्रभैर् इव । 248
गत्वा 'एव तत्र यावच् च पद्मान्य् अवचिनोति सः,
तावत् तद्रक्षिणो घोरा रुरुधुस् तं निशाचराः । 249
सशस्त्रः सो ऽवधीच् च 'एतान् अन्यान्, अन्ये पलाय्य च
गत्वा कपालस्फोटाय स्वामिने तन् न्यवेदयन् । 250
स तद् बुद्ध्वा 'एव कुपितस् तत्र रक्षःपतिः स्वयं
आगत्य 'अशोकदत्तं तम् अपश्यल् लुण्ठिताम्बुजं । 251
कथं भ्राता मम 'अशोकदत्तः सो ऽयम् इह 'आगतः,
इति प्रत्यभ्यजानच् च तत्क्षणं तं सविस्मयः । 252
ततः शस्त्रं समुत्सृज्य हर्षवाष्पाप्लुतेक्षणः
धावित्वा पादयोः सद्यः पतित्वा च जगाद तं । 253
अयं विजयदत्ताख्यः सोदर्यः स तव 'अनुजः,
आवां द्विजवरस्य 'उभौ गोविन्दस्वामिनः सुतौ । 254
इयच् चिरं च जातो ऽहं दैवाद् ईदृङ् निशाचरः
चिताकपालदलनात् कपालस्फोटनामकः । 255
त्वद्दर्शनाद् इदानीं च ब्राह्मण्यं तत् स्मृतं मया,
गतं च राक्षसत्वं मे मोहाच् छादितचेतनं । 256

एवं विजयदत्तस्य वदतः परिरभ्य सः
यावत् ज्ञालयति इव अङ्गं राक्षसीभावदूषितं । 257
अशोकदत्तो वाष्पाम्बुपूरैस्, तावद् अवातरत्
आम्नातः कौशिको नाम विद्याधरगुरुर् दिवः । 258
स तौ द्वाव् अप्य् उपेत्य एव भ्रातरौ गुरुर् अब्रवीत्,
यूयं विद्याधराः सर्वे शापाद् एतां दशां गताः । 259
अधुना च स शापो वः सर्वेषां शान्तिम् आगतः,
तद् गृह्णीतं निजा विद्या बन्धुसाधारणीर् इमाः । 260
व्रजतं च स्वकं धाम स्वीकृतस्वजनौ युवां,
इत्य् उक्त्वा दत्तविद्यो ऽसौ तयोर् द्याम् उद्ययौ गुरुः । 21
तौ च विद्याधरीभूतौ प्रबुद्धौ जग्मतुस् ततः
व्योम्ना तद् धिमवच्छृङ्गं गृहीतकनकाम्बुजौ । 262
तत्र च अशोकदत्तस् तां रक्षःपतिसुतां प्रियां
उपागात्, सा अप्य् अभूत् क्षीणशापा विद्याधरी तदा । 2
तया च साकं सुदृशा भ्रातरौ ताव् उभाव् अपि
वाराणसीं प्रययतुः क्षणाद् गगणगामिनौ । 264
तत्र च उपेत्य पितरौ विप्रयोगाग्नितापितौ
निरवापयतां सद्यो दर्शनामृतवर्षिणौ । 265
अदेहभेदे ऽप्य् आक्रान्तचित्रजन्मान्तरौ च तौ
न पित्रोर् एव लोकस्य अप्य् उत्सवाय बभूवतुः । 266

चिराद् विजयदत्तश् च गाढम् आश्लिष्यतः पितुः
भुजमध्यम् इव 'अत्यर्थं मनोरथम् अपूरयत् । 267
ततस् तत्र 'एव तद् बुद्ध्वा प्रतापमुकुटो ऽपि सः
अशोकदत्तश्वशुरो राजा हर्षाद् उपाययौ । 268
तत्सत्कृतश् च तद्राजधानीं सोत्कस्थितप्रियां
अशोकदत्तः स्वजनैः सार्धं बद्धोत्सवाम् अगात् । 269
ददौ च कनकाब्जानि राज्ञे तस्मै बहूनि सः
अभ्यर्थिताधिकप्राप्तिहृष्टः सो ऽप्य् अभवन् नृपः । 270
ततो विजयदत्तं तं सर्वेष्व् अत्र स्थितेषु सः
पिता पप्रच्छ गोविन्दस्वामी साश्चर्यकौतुकः । 271
तदा श्मशाने यामिन्यां राक्षसत्वं गतस्य ते
अभवत् कीदृशो वत्स वृत्तान्तो वर्ण्यताम् इति । 272
ततो विजयदत्तस् तं बभाषे तात चापलात्
प्रस्फोटितचितादीप्तकपालो ऽहं विधेर् वशात् । 273
मुखप्रविष्टया सद्यस् तद्वसाच्छटया तदा
रक्षोभूतस् त्वया तावद् दृष्टो मायाविमोहितः । 274
कपालस्फोट इत्य् एवं नाम कृत्वा हि राक्षसैः
ततो ऽन्यैर् अहम् आहूतस् तन्मध्ये मिलितो ऽभवं । 275
तैश् च नीतो निजस्य 'अस्मि पार्श्वं रक्षःपतेः क्रमात्
सो ऽपि दृष्ट्वा 'एव मां प्रीतः सेनापत्ये न्ययोजयत् । 276

ततः कदाचिद् गन्धर्वान् अभियोक्तुं मदेन सः
गतो रक्षःपतिस् तत्र संग्रामे निहतो ऽरिभिः । 277
तदा एव प्रतिपन्नं च तद्भृत्यैर् मम शासनं,
ततो ऽहं रक्षसां राज्यम् अकार्षं तत्पुरे स्थितः । 278
तत्र अकस्माच् च हेमाब्जहेतोः प्राप्तस्य दर्शनात्
आर्यस्य अशोकदत्तस्य प्रशान्ता सा दशा मम । 279
अनन्तरं यथा अस्माभिः शापमोक्षवशान् निजाः
विद्याः प्राप्तास्, तथा आर्यो वः कृत्स्नम् आवेदयिष्यति । 280
एवं विजयदत्तेन तेन तत्र निवेदिते
अशोकदत्तः स तदा तद् आमूलाद् अवर्णयत् । 281
पुरा विद्याधरौ सन्तौ गगणाद् गालवाश्रमे
आवां स्नान्तीर् अपश्याव गङ्गायां मुनिकन्यकाः । 282
तुल्याभिलाषास् तास्व् च अत्र वाञ्छन्तौ सहसा रहः
बुद्ध्वा तद्बन्धुभिः क्रोधाच् छप्तौ स्वो दिव्यदृष्टिभिः । 283
पापचारौ प्रजायेथां मर्त्ययोनौ युवाम् उभौ,
तत्र अपि विप्रयोगस् च विचित्रो वां भविष्यति । 284
मानुषागोचरे देशे विप्रकृष्टे ऽप्य् उपागतं
एकं दृष्ट्वा द्वितीयो वां यदा प्रज्ञानम् आप्स्यति । 285
तदा विद्याधरगुरोर् विद्यां प्राप्य भविष्यथः
पुनर् विद्याधरौ युक्तौ शापमुक्तौ स्वबन्धुभिः । 286

एवं तैर् मुनिभिः शप्तौ जातावू आवाम् उभावू इह,
वियोगो ऽत्र यथा भूतस्, तत् सर्वं विदितं च वः । 287
इदानीं पद्महेतोश् च श्वश्रूसिद्धिप्रभावतः
रक्षःपतेः पुरं गत्वा प्राप्तो ऽयं च ऽनुज्ञो मया । 288
तत्र 'एव च गुरोः प्राप्य विद्याः प्रज्ञप्तिकौशिकात्
सद्यो विद्याधरीभूय वयं क्षिप्रम् इह 'आगताः । 289
इत्य् उक्त्वा पितरौ च तौ प्रियतमां तां च 'आत्मजां भूपतेः
सद्यः शापतमोविमोक्षमुदितो विद्याविशेषैर् निजैः
तैस् तैः संव्यभजद् विचित्रचरितः सो ऽशोकदत्तस् तदा,
येन 'एते सपदि प्रबुद्धमनसो ऽजायन्त विद्याधराः । 290
ततस् तम् आमन्त्र्य नृपं स साकं
भ्रात्रा पितृभ्यां दयिताद्वयेन
उत्पत्य धन्यो निजचक्रवर्ति-
धाम द्युमार्गेण जवी जगाम । 291
तत्र 'आलोक्य तम् आज्ञां
प्राप्य च तस्माद् अशोकवेग इति
नाम स बिभ्रत्, सो ऽपि च
तद्भ्राता विजयवेग इति । 292
विद्याधरवरतरुणौ
स्वजनानुगतावू उभौ निजनिवासं

गोविन्दकूटसंज्ञकम्
अचलवरं भ्रातरौ ययतुः । 293
सो ऽप्य् आश्चर्यवशः प्रतापमुकुटो वाराणसीभूपतिः
स्वस्मिन् देवकुले द्वितीयकलशन्यस्तैकहेमाम्बुजः
तद्दत्तैर् अपरैः सुवर्णकमलैर् अभ्यर्चितत्र्यम्बकस्
तत्संबन्धमहत्तया प्रमुदितो मेने कृतार्थं कुलं । 294

एवं दिव्याः कारणेन ऽवतीर्णा
जायन्ते ऽस्मिन् जन्तवो जीवलोके,
सत्त्वोत्साहौ स्वोचितौ ते दधाना
दुष्प्रापाम् अप्य् अर्थसिद्धिं लभन्ते । 295
तत् सत्त्वसागरभवान् अपि कोऽपि जाने
देवांश एव, भविता च यथेष्टसिद्धिः,
प्रायः क्रियासु महताम् अपि दुष्करासु
सा ऽउत्साहता कथयति प्रकृतेर् विशेषं । 296
सा ऽपि त्वदीप्सिता ननु
दिव्या राजात्मजा कनकरेखा,
बाला ऽन्यथा ऽभिवाञ्छति
कनकपुरीदर्शिनं कथं हि पतिं । 297

इति रहसि निशम्य विष्णुदत्तात्
सरसकथाप्रकरं स शक्तिदेवः
हृदि कनकपुरीविलोकनैषी
धृतिम् अवलम्ब्य निनाय च त्रियामां । 298

। इति ।
॥ पञ्चविंशस् तरङ्गः ॥

TARANGA. 26.

ततस् तत्र 'उत्स्थलद्वीपे प्रभाते तं मठस्थितं
शक्तिदेवं स दाशेन्द्रः सत्यव्रत उपाययौ । 1
स च प्राक् प्रतिपन्नः सन् उपेत्य 'एनम् अभाषत,
ब्रह्मंस् त्वदिष्टसिद्ध्यर्थम् उपायश् चिन्तितो मया । 2
अस्ति द्वीपवरं मध्ये रत्नकूटाख्यम् अम्बुधेः,
कृतप्रतिष्ठस् तत्र 'आस्ते भगवान् हरिर् अब्धिना । 3
आषाढशुक्लद्वादश्यां तत्र यात्रोत्सवे सदा
आयान्ति सर्वद्वीपेभ्यः पूजायै यत्नतो जनाः । 4
तत्र ज्ञायेत कनकपुरी सा जातुचित् पुरी,
तद् एहि तत्र गच्छावः प्रत्यासन्ना हि सा तिथिः । 5
इति सत्यव्रतेन 'उक्तः शक्तिदेवस् तथा 'इति सः
जग्राह हृष्टः पाथेयं विष्णुदत्तोपकल्पितं । 6
ततो वहनम् आरुह्य स सत्यव्रतढौकितं
तेन 'एव साकं त्वरितः प्रायाद् वारिधिवर्त्मना । 7
गच्छंश् च तत्र स द्वीपनिभनक्रे ऽद्भुतालये
सत्यव्रतं तं पप्रच्छ कर्णधारतया स्थितं । 8

इतो दूरं महाभोगं किम् एतद् दृश्यते ऽम्बुधौ
यदृक्षाप्रोद्गतोदग्रसपक्षगिरिसंभ्रमं । 9
ततः सत्यव्रतो ऽवादीद्, असौ देव वटद्रुमः,
अस्य आहुः सुमहावर्तम् अधस्ताद् बडवामुखं । 10
एतं च परिहृत्य एव प्रदेशम् इह गम्यते,
अत्र आवर्ते गतानां हि न भवत्य् आगमः पुनः । 11
इति सत्यव्रते तस्मिन् वदत्य् एव वायुवेगतः
तस्याम् एव प्रववृते गन्तुं तद् वहनं दिशि । 12
तद् दृष्ट्वा शक्तिदेवं स पुनः सत्यव्रतो ऽब्रवीत्,
ब्रह्मन् विनाशकालो ऽयं ध्रुवम् अस्माकम् आगतः । 13
यद् अकस्मात् प्रवहणं पश्य अत्र एव प्रयात्य् अदः,
शक्यते न एव रोद्धुं च कथमप्य् अधुना मया । 14
तद् आवर्ते गभीरे ऽत्र वयं मृत्योर् इव आनने
क्षिप्ता एव अम्बुना आकृष्य कर्मणा इव बलीयसा । 15
एतच् च न एव मे दुःखं, शरीरं कस्य हि स्थिरं,
दुःखं तु यन् न सिद्धस् ते कृच्छ्रेण अपि मनोरथः । 16
तद् यावद् धारयाम्य् एतद् अहं प्रवहणं मनाक्,
तावद् अस्य अवलम्बेथाः शाखां वटतरोर् द्रुतं । 17
कदाचिज् जीवितोपायो भवेद् भव्याकृतेस् तव,
विधेर् विलासान् अब्धेश् च तरङ्गान् को हि तर्कयेत् । 18

इति सत्यव्रतस्य ऽस्य धीरसत्त्वस्य जल्पतः
बभूव निकटे तस्य तरोः प्रवहणं ततः । 19
तल्लग्नं स कृतोत्फालः शक्तिदेवो ऽथ साध्वसात्
पृथुलाम् अग्रहीच् छाखां तस्य ऽब्धिवटशाखिनः । 20
सत्यव्रतस् तु वहता देहेन वहनेन च
परार्थकल्पितेन ऽत्र विवेश बडवामुखं । 21
शक्तिदेवस् तु शाखाभिः पूरिताशस्य तस्य सः
आश्रित्य ऽपि तरोः शाखां निराशः समचिन्तयत् । 22
न तावत् सा च कनकपुरी दृष्टा मया पुरी
अपदे नश्यता यावद् दाशेन्द्रो ऽप्य् एव नाशितो । 23
यदि वा सततन्यस्तपदा सर्वस्य मूर्धनि
कामं भगवती केन भङ्यते भवितव्यता । 24
इत्य् अवस्थोचितं तस्य ततश् चिन्तयतस् तदा
विप्रयूनस् तरुस्कन्धे दिनं तत् पर्यहीयत । 25
सायं च सर्वतस् तस्मिन् स महाविहगान् बहून्
वटवृक्षे प्रविशतः शब्दपूरितदिक्तटान् । 26
अपश्यत् पृथुतत्पक्षवातधूतार्णवोर्मिभिः
गृध्रान् परिचयप्रीत्या कृतप्रत्युद्गमान् इव । 27
ततः शाखाविलीनानां स तेषां पक्षिणां मिथः
मनुष्यवाचा संलापं पत्त्रौघैस् छादितो ऽशृणोत् । 28

कश्चिद् द्वीपान्तरं कश्चिद् गिरिं कश्चिद् दिगन्तरं
तदहश्चरणास्थानम् एकैकः समवर्णयत् । 29
एकस् च वृद्धविहगस् तेषां मध्याद् अभाषत,
अहं विहर्तुं कनकपुरीम् अद्य गतो ऽभवं । 30
प्रातः पुनस् च तत्र 'एव गन्तास्मि चरितुं सुखं
अमावहेन को ऽर्थो मे विदूरगमनेन हि । 31
इत्य् अकाण्डसुधासारसदृशेन 'अस्य पक्षिणः
वचसा शान्ततापः सन् शक्तिदेवो व्यचिन्तयत् । 32
दिष्ट्या सा 'अस्त्य् एव नगरी तत्प्राप्तौ च 'अयम् एव मे
उपायः सुमहाकायो विहगो वाहनीकृतः । 33
इत्य् आलोच्य शनैर् एत्य तस्य सुप्तस्य पक्षिणः
पृष्ठपक्षान्तरे सो ऽथ शक्तिदेवो व्यलीयत । 34
प्रातस् च 'इतस् ततस् तेषु गतेष् अन्येषु पक्षिषु
स पक्षी दर्शिताश्चर्यपक्षपातो विधिर् यथा । 35
दत्तास्कन्दे वहन् पृष्ठे शक्तिदेवम् अलक्षितं
क्षणाद् अगच्छत् कनकपुरीं तां चरितुं पुनः । 36
तत्र 'उद्यानान्तरे तस्मिन्न् उपविष्टे विहङ्गमे
स शक्तिदेवो निभृतं तस्य पृष्ठाद् अवातरत् । 37
अपसृत्य च तत्पार्श्वाद् यावद् भ्राम्यति तत्र सः,
द्वे पुष्पावचयव्यग्रे तावद् ऐक्षत योषितौ । 38

उपगम्य शनैस् ते च तद्विलोकनविस्मिते
सो ऽपृच्छत्, कः प्रदेशो ऽयं, के च भद्रे युवाम् इति । 39
इयं कनकपुर्याख्या पुरी विद्याधरास्पदं
चन्द्रप्रभा 'इति च 'एतस्याम् आस्ते विद्याधरी सखे । 40
तस्याश् च 'आवाम् इह 'उद्याने जानीह्य् उद्यानपालिके
पुष्पोच्चयस् तदर्थो ऽयम् इति ते च तम् ऊचतुः । 41
ततः सो ऽप्य् अवदद् विप्रो, युवां मे कुरुतं तथा,
यथा 'अहम् अद्य पश्यामि तां युष्मत्स्वामिनीम् इह । 42
एतच् छ्रुत्वा तथा 'इत्य् उक्त्वा नीतवत्याव् उभे च ते
स्त्रियाव् अन्तर् नगर्यास् तं युवानं राजमन्दिरं । 43
सो ऽपि प्राप्तस् तद् अद्राक्षीन् माणिक्यस्तम्भभास्वरं
सौवर्णभित्तिं संकेतकेतनं संपदाम् इव । 44
तत्र 'आगतं च दृष्ट्वा तं सर्वः परिजनो ऽब्रवीत्
गत्वा चन्द्रप्रभायास् तन् मानुषागमनाद्भुतं । 45
सा 'अप्य् आदिश्य प्रतीहारीम् अविलम्बितम् एव तं
अभ्यन्तरं स्वनिकटं विप्रं प्रावेशयत् ततः । 46
प्रविष्टः सो ऽप्य् अपश्यत् तां तत्र नेत्रोत्सवप्रदां
धातुर् अद्भुतनिर्माणपर्याप्तिम् इव रूपिणीं । 47
सा च सद्रत्नपर्यङ्काद् दूराद् उत्थाय तं स्वयं
स्वागतेन 'आदृतवती तद्दर्शनवशीकृता । 48

उपविष्टम् अपृच्छच् च, कल्याणिन् कस् त्वम् ईदृशः,
कथं च मानुषागम्याम् इमां प्राप्तो भवान् भुवं । 49
इत्य् उक्तः स तया चन्द्रप्रभया सकुतूहलं
शक्तिदेवो निजं देशं जातिं च ऽऽवेद्य नाम च । 50
तत्पुरीदर्शनपणात् प्राप्तुं तां राजकन्यकां
यथा कनकरेखाख्याम् आगतस्, तद् अवर्णयत् । 51
तद् बुद्ध्वा किमपि ध्यात्वा दीर्घं निःश्वस्य सा ततः
चन्द्रप्रभा तं विजने शक्तिदेवम् अभाषत । 52
श्रूयतां वच्मि ते किंचिद् इदं सुभग सम्प्रति,
अस्त्य् अस्यां शशिखण्डाख्यो विद्याधरपतिर् भुवि । 53
वयं तस्य चतस्रश् च जाता दुहितरः क्रमात्,
ज्येष्ठा चन्द्रप्रभा ऽऽत्य् अस्मि, चन्द्ररेखा ऽऽति च ऽपरा । 54
शशिरेखा तृतीया च, चतुर्थी च शशिप्रभा,
ता वयं क्रमशः प्राप्ता वृद्धिम् अत्र पितुर् गृहे । 55
एकदा च भगिन्यो मे स्नातुं तिस्रो ऽपि ताः समं
मयि कन्याव्रतस्थायां जग्मुर् मन्दाकिनीतटं । 56
तत्र ऽग्र्यतपसं नाम मुनिं यौवनदर्पतः
तोयैर् जलस्थम् असिचन् आरब्धजलकेलयः । 57
अतिनिर्वर्तिनीस् ताश् च मुनिः क्रुद्धः शशाप सः,
कुकन्यकाः प्रजायध्वं मर्त्यलोके ऽखिला इति । 58

तद् बुद्ध्वा सो ऽस्मदीयेन पित्रा गत्वा प्रसादितः,
पृथक् पृथक् स शापान्तम् उक्त्वा तासां यथायथं । 59
जातिस्मरत्वं दिव्येन विज्ञानेन 'उपबृंहितं
मर्त्यभावेन सर्वासाम् आदिदेश महामुनिः । 60
ततस् तासु तनूस् त्यक्त्वा मर्त्यलोकं गतासु सः
दत्त्वा मे नगरीम् एतां पिता खेदाद् गतो वनं । 61
अथ 'इह निवसन्तीं मां देवी स्वप्ने किल 'अम्बिका,
मानुषः पुत्रि भर्ता ते भविता 'इति समादिशत् । 62
तेन विद्याधरांस् तांस् तान् वरान् उद्दिशतो बहून्
पितुर् विदारणं कृत्वा कन्या 'एव 'अद्य 'अप्य् अहं स्थिता ।
इदानीं च 'अमुना 'आश्चर्यमयेन 'आगमनेन ते
वपुषा च वशीकृत्य तुभ्यम् एव 'अहम् अर्पिता । 64
तद् व्रजामि चतुर्दश्याम् आगामिन्यां भवत्कृते
कर्तुं तातस्य विज्ञप्तिम् ऋषभाख्यं महागिरिं । 65
तत्र ह्य् अस्यां तिथौ सर्वे मिलन्ति प्रतिवत्सरं
देवं हरं पूजयितुं दिग्भ्यो विद्याधरोत्तमाः । 66
तातस् तत्र 'एव च 'आयाति, तदनुज्ञाम् अवाप्य च
इह 'आगछाम्य् अहं तूर्णं, ततः परिणयस्व मां । 67
उत्तिष्ठ तावद् इत्य् उक्त्वा सा तं विद्याधरोचितैः
चन्द्रप्रभा शक्तिदेवं भोगैस् तैस् तैर् उपाचरत् । 68

तस्य च ऽभूत् तथा ऽत्य् ग्रत्र तिष्ठतस् तत् तदा सुखं,
यद् दावानलतप्तस्य सुधाह्रदनिमज्जने । 69
प्राप्तायां च चतुर्दश्यां सा तं चन्द्रप्रभा ऽब्रवीत्,
ग्रद्य गच्छामि विज्ञप्त्यै तातस्य ऽहं भवत्कृते । 70
सर्वः परिजनश् च ऽयं मया ऽव सह यास्यति,
त्वया च ऽकाकिना दुःखं न भाव्यं दिवसद्वयं । 71
एकेन पुनर् एतस्मिन् मन्दिरे ऽप्य् एव तिष्ठता
मध्यमा भवता भूमिर् न ऽरोढव्या कथंचन । 72
इत्य् उक्त्वा सा युवानं तं न्यस्तचित्ता तदन्तिके
तदीयचित्तानुगता ययौ चन्द्रप्रभा ततः । 73
सो ऽप्य् एकाकी ततस् तत्र स्थितश् चेतो विनोदयन्
स्थानस्थानेषु बभ्राम शक्तिदेवो महर्द्धिषु । 74
किंस्विद् ग्रत्र निषिद्धं मे तया पृष्ठे ऽधिरोहणं
विद्याधरदुहित्रा ऽति ज्ञातकुतूहलो ऽथ सः । 75
तस्य ऽव मध्यमां भूमिं मन्दिरस्य ऽरुरोह तां,
प्रायो वारितवामा हि प्रवृत्तिर् मनसो नृणां । 76
ग्रारूढस् तत्र च ऽपश्यद् गुप्तांस् त्रीन् गर्भमण्डपान्,
एकं च ऽद्घाटितद्वारं तन्मध्यात् प्रविवेश सः । 77
प्रविश्य च ऽन्तः सद्रत्नपर्यङ्के न्यस्ततूलिके
पटावगुण्ठिततनुं शयानां कांचिद् ऐक्षत । 78

वीक्षते यावद् उत्क्षिप्य पटं, तावन् मृतां तथा
परोपकारिनृपतेस् तनयां वरकन्यकां । 79
दृष्ट्वा च ऽचिन्तयत् सो ऽत्र, किम् इदं महद् अद्भुतं,
किम् अप्रबोधसुप्ता इयं, किं वा भ्रान्तिर् अबाधका । 80
यस्याः कृते प्रवासो ऽयं मम, सा एव इह तिष्ठति
असाव् अपगतप्राणा, तत्र देशे च जीवति । 81
अम्लानकान्तिर् अस्याश् च, तद् विधात्रा मम ध्रुवं
केनापि कारणेन इदम् इन्द्रजालं वितन्यते । 82
इति संचिन्त्य निर्गत्य ताव् अन्यौ मण्डपौ क्रमात्
प्रविश्य अन्तः स ददृशे तद्वद् अन्ये च कन्यके । 83
ततो ऽपि निर्गतस् तस्य साश्चर्यो मन्दिरस्य सः
उपविष्टः स्थितो ऽपश्यद् वापीम् अत्युत्तमाम् अधः । 84
तत्तीरे रत्नपर्याणं ददर्श एकं च वाजिनं,
तेन अवतीर्य एव ततस् तत्पार्श्वं कौतुकाद् ययौ । 85
इयेष च तम् आरोढुं शून्यं दृष्ट्वा, स तेन च
अश्वेन आहत्य पादेन तस्यां वाप्यां निचिक्षिपे । 86
तन्निमग्नः स च क्षिप्रं वर्धमानपुरान् निजात्
उद्यानदीर्घिकामध्याद् उन्ममज्ज ससंभ्रमः । 87
ददर्श जन्मभूमौ च सद्यो वापीजले स्थितं
आत्मानं कुमुदैस् तुल्यं दीनं चन्द्रप्रभां विना । 88

वर्धमानपुरं क्व ऽइदं, क्व सा वैद्याधरी पुरी,
अहो किम् एतद् आश्चर्यमायाडम्बरजृम्भितं । 89
कष्टं किमपि केनापि मन्दभाग्यो ऽस्मि वञ्चितः,
यदि वा को ऽत्र जानाति कीदृशी भवितव्यता । 90
इत्यादि चिन्तयन् सो ऽथ वापीमध्यात् समुत्थितः
सविस्मयः शक्तिदेवो ययौ पितृगृहं निजं । 91
तत्र ऽअपदिष्टपटहभ्रमणाः कृतकैतवः
पित्रा ऽअभिनन्दितस् तस्थौ सोत्सवैः स्वजनैः सह । 92
द्वितीये ऽह्नि बहिर् गेहान् निर्गतश् च ऽअशृणोत् पुनः
घोष्यमाणं सपटहं पुरे तस्मिन्न् इदं वचः । 93

विप्रक्षत्रियमध्यात्
कनकपुरी येन तत्त्वतो दृष्टा,
वक्तु स, तस्मै तनयां
सयौवराज्यां ददाति नृपः । 94

तच् छ्रुत्वा ऽएव स गत्वा तान् पटहघोषकान् कृती,
मया दृष्टा पुरी सा ऽइति शक्तिदेवो ऽब्रवीत् पुनः । 95
तैर् एतन्नृपतेर् अग्रं स नीतो ऽभून्, नृपो ऽपि तं
प्राग्वन् मेने परिज्ञाय पुनर् वितथवादिनं । 96
मिथ्या चेद् वच्मि, न मया दृष्टा सा नगरी यदि,
तद् इदानीं शरीरस्य निग्रहेण पणो मम । 97

अथ सा राजपुत्री मां पृष्ट्वा इत्य् उदिते ततः
गत्वा च ऽनुचरै राजा तत्र ऽएव ऽआनाययत् सुतां । ९८
सा दृष्ट्वा दृष्टपूर्वं तं विप्रं राजानम् अभ्यधात्,
तात मिथ्या ऽएव भूयो ऽपि किंचिद् वक्त्य् असाव् इति ।
शक्तिदेवस् ततो ऽवादीद्, अहं सत्यं मृषा ऽएव वा
वच्मि राजसुते, त्वं तु वद ऽएवं मम कौतुकं । 100
मया कनकपुर्यां त्वं पर्यङ्के गतजीविता
दृष्टा च, ऽइह च पश्यामि जीवन्तीं भवतीं कथं । 101
इत्य् उक्ता शक्तिदेवेन साभिज्ञानं नृपात्मजा
सद्यः कनकरेखा सा जगाद ऽएवं पितुः पुरः । 102
तात दृष्टा ऽमुना सत्यं नगरी सा महात्मना,
अचिराच् च ऽएष भर्ता मे तत्रस्थाया भविष्यति । 103
तत्र मद्भगिनीस् च ऽअन्यास् तिस्रो ऽयं परिणेष्यति,
विद्याधराधिराज्यं च तस्यां पुरि करिष्यति । 104
मया त्व् अद्य प्रवेष्टव्या स्वा तनुस् च पुरी च सा,
मुनेः शापाद् अहं ह्य् अत्र जाता ऽअभूवं भवद्गृहे । 105
यदा कनकपुर्यां ते देहम् आलोक्य मानुषः
मर्त्यभावभृतस् तत्त्वप्रतिभेदं करिष्यति । 106
तदा ते शापमुक्तिस् च, स च स्यान् मानुषः पतिः,
इति मे च स शापान्तं पुनर् एव ऽआदिशन् मुनिः । 107

ज्ञातिस्मरा च मानुष्ये ऽप्य् अहं ज्ञानवती तथा,

तद् व्रजाम्य् अधुना सिद्धौ निजं वैद्याधरं पदं । 108

इत्य् उक्ता राजपुत्री सा तनुं त्यक्ता तिरोदधे,

तुमुलश् च उदभूत् तस्मिन् आक्रन्दो राजमन्दिरे । 109

शक्तिदेवो ऽप्य् उभयतो भ्रष्टस् तैस् तैर् दुरुत्तरैः

क्लेशैः प्राप्य अपि न प्राप्ते ध्यायंस् ते द्वे अपि प्रिये । 110

निन्दन् खिन्नो ऽपि च आत्मानम् असंपूर्णमनोरथः

निर्गत्य राजभवनात् क्षणाम् एवम् अचिन्तयत् । 111

अभीष्टं भावि मे तावद् उक्तं कनकरेखया,

तत् किमर्थं विषीदामि, सत्त्वाधीना हि सिद्धयः । 112

पथा तेन एव कनकपुरीं गच्छामि तां पुनः,

भूयो ऽप्य् अवश्यं दैवं मे तत्र उपायं करिष्यति । 113

इत्य् आलोच्य एव स प्रायाच् छक्तिदेवः पुरात् ततः,

असिद्धार्था निवर्तन्ते न हि धीराः कृतोद्यमाः । 114

गच्छंश् चिराच् च संप्राप जलधेः पुलिने स्थितं

तद् विटङ्कपुरं नाम नगरं पुनर् एव सः । 115

तत्र अपश्यच् च बणिजं तं संमुखम् अथ आगतं,

येन साकं गतस्य अब्धिं पोतम् आदाव् अभज्यत । 116

सो ऽयं समुद्रदत्तः स्यात्, कथं च पतितो ऽम्बुधौ

उत्तीर्णो ऽयं न वा, चित्रम् अहम् एव निदर्शनं । 117

इत्य् आलोच्य स यावत् तम् अभ्येति बणिजं द्विजः,
तावत् स तं परिज्ञाय हृष्टः कण्ठे ऽग्रहीद् बणिक् । 118
अनैषीच् च निजं गेहं कृतातिथ्यश् च पृष्टवान्,
पोतभङ्गे त्वम् अम्भोधेः कथम् उत्तीर्णवान् इति । 119
शक्तिदेवो ऽपि वृत्तान्तं तथा तं कृत्स्नम् अब्रवीत्,
यथा मत्स्यनिगीर्णः प्राग् उत्स्थलद्वीपम् आप सः । 120
अनन्तरं च तम् अपि प्रत्यपृच्छद् बणिग्वरं,
कथं तदा त्वम् अप्य् अब्धिम् उत्तीर्णो वर्ण्यताम् इति । 121
अथ ऽब्रवीत् सो ऽपि बणिक्, तदा ऽहं पतितो ऽम्बुधौ
दिनत्रयं प्लवन्न् आसम् एकं फलकहकं श्रितः । 122
ततस् तेन पथा ऽकस्माद् एकं वहनम् आगतं
तत्रस्थैश् च ऽहम् आक्रन्दन् दृष्ट्वा च ऽत्र ऽधिरोपितः । 1[illegible]
आरूढश् च ऽत्र पितरं स्वम् अपश्यम् अहं तदा
गत्वा द्वीपान्तरं पूर्वं चिरात् तत्कालम् आगतं । 124
स मां दृष्ट्वा परिज्ञाय कृतकण्ठग्रहः पिता
रुदन्न् अपृच्छद् वृत्तान्तम्, अहं च एवं तम् अब्रुवं । 125
चिरकालप्रयाते ऽपि तात त्वय्य् अनुपागते
स्वधर्म इति बाणिज्ये स्वयम् अस्मि प्रवृत्तवान् । 126
ततो द्वीपान्तरं गच्छन् अहं वहनभङ्गतः
अद्य ऽम्बुधौ निमग्नः सन् प्राप्य युष्माभिर् उद्धृतः । 127

एवं मया ऽउक्तस् तातो मां सोपालम्भम् अभाषत,
आरोहसि किमर्थं त्वम् ईदृशान् प्राणसंशयान् । 128
धनम् अस्ति हि मे पुत्र, स्थितश् च ऽअहं तदर्जने,
पश्य ऽआनीतं मया ऽइदं ते वहनं हेमपूरितं । 129
इत्य् उक्त्वा ऽआश्वास्य तेन ऽएव वहनेन निजं गृहं
विटङ्कपुरम् आनीतस् तातेन ऽइदम् अहं ततः । 130
इत्य् एतद् बणिजस् तस्माच् छक्तिदेवो निशम्य सः
विश्रम्य च त्रियामां ताम् अन्येद्युस् तम् अभाषत । 131
गन्तव्यम् उत्स्थलद्वीपं सार्थवाह पुनर् मया,
तत् कथं तत्र गच्छामि साम्प्रतं कथ्यताम् इति । 132
गन्तुं प्रवृत्तास् तत्र ऽअद्य मदीया व्यवहारिणः,
तद् यानपात्रम् आरुह्य प्रयातु सह तैर् भवान् । 133
इत्य् उक्तस् तेन बणिजा स तैस् तद्व्यवहारिभिः
साकं तद् उत्स्थलद्वीपं गन्तुं प्रावर्तत द्विजः । 134
तावच् च तत्र दैवात् तं दृष्ट्वा दाशपतेः सुताः
सत्यव्रतस्य तस्य ऽआरात् परिज्ञाय ऽएवम् अब्रुवन् । 135
तातेन साकं कनकपुरीं चिन्वन्न् इतस् ततः
ब्रह्मन् अगास् त्वम्, एकश् च कथम् अद्य ऽआगतो भवान् । 136
शक्तिदेवस् ततो ऽवादीद्, अम्बुराशौ स वः पिता
पतितो ऽम्बुभराकृष्टवहनो बडवामुखे । 137

तच् छ्रुत्वा दाशपुत्रास् ते क्रुद्धा भृत्यान् बभाषिरे,
बध्नीत एतं दुरात्मानं, हतो ऽनेन स नः पिता। 138
अन्यथा कथम् एकस्मिन् सति प्रवहणे द्वयोः
बडवाग्नौ पतेद् एको, द्वितीयस् च उत्तरेत् ततः। 139
तद् एष चण्डिकादेव्याः पुरस्तात् पितृघातकः
अस्माभिर् उपहन्तव्यः श्वः प्रभाते पशूकृतः। 140
इत्य् उक्त्वा दाशपुत्रास् ते भृत्यान् बद्ध्वा एव तं तदा
शक्तिदेवं ततो निन्युर् भयकृच् चण्डिकागृहं। 141
शश्वत्कवलितानेकजीवं प्रविततोदरं
खचद्रत्नावलीछ्नमालं मृत्योर् इव आननं। 142
तत्र बद्धः स्थितो रात्रौ संशयानः स्वजीविते
स शक्तिदेवो देवीं तां चण्डीम् एवं व्यजिज्ञपत्। 143

बालार्कबिम्बनिभया
भगवति मूर्त्या त्वया परित्रातं
निर्भरपीतप्रविसृत-
रुरुदानवकण्ठरुधिरया इव जगत्। 144
तन् मां सततप्रणतं
निष्कारणविधुरवर्गहस्तगतं
रक्षस्व सुदूरागतम्
इष्टजनप्राप्तितृष्णया वरदे। 145

इति देवीं स विज्ञप्य प्राप्य निद्रां कथंचन
अपश्यद् योषितं स्वप्ने तद्गर्भगृहनिर्गतां । 146
सा दिव्याकृतिर् अभ्येत्य सदया 'इव जगाद तं,
भोः शक्तिदेव मा भैषीर्, न ते ऽनिष्टं भविष्यति । 147
अस्त्य् एषां दाशपुत्राणां नाम्ना विन्दुमती स्वसा,
सा प्रातर् वीक्ष्य कन्या त्वां भर्तृत्वे ऽभ्यर्थयिष्यति । 148
तच् च त्वं प्रतिपद्येथाः, सा 'एव त्वां मोचयिष्यति,
न च सा धीवरी, सा हि दिव्या स्त्री शापतश् च्युता । 149
एतच् छ्रुत्वा प्रबुद्धस्य तस्य नेत्रामृतच्छटा
प्रभाते दाशकन्या सा तद् देवीगृहम् आययौ । 150
बभाषे च 'एनम् अभ्येत्य निवेद्य 'आत्मानम् उत्सुका,
इतो ऽहं मोचयामि त्वां, तत् कुरुष्व 'ईप्सितं मम । 151
भ्रातॄणां संमता ह्य् एते प्रत्याख्याता वरा मया,
त्वयि दृष्टे तु मे प्रीतिः संजाता, तद् भजस्व मां । 152
इत्य् उक्तः स तया विन्दुमत्या दाशेन्द्रकन्यया
शक्तिदेवः स्मरन् स्वप्नं हृष्टस् तत् प्रत्यपद्यत । 153
तया 'एव मोचितस्, तां च सुमुखीं परिणीतवान्
स्वप्नलब्धाम्बिकादेशैर् भ्रातृभिर् विहितेप्सितां । 154
तस्थौ च सुखसिद्ध्या 'इव तत्र पुण्यैकलब्धया
रूपान्तरोपागतया स तया सह दिव्यया । 155

एकदा कूर्म्यपृष्ठस्थो धृतगोमांसभारकं
मार्गागतं स चण्डालं दृष्ट्वा ताम् अब्रवीत् प्रियां । 156
वन्द्यास् त्रिजगतो ऽप्य् एता याः कृशोदरि धेनवः,
तासां पिशितम् अश्नाति पश्य अयं पापकृत् कथं । 157
तच् छ्रुत्वा सा अप्य् अवादीत् तं पतिं विन्दुमती तदा,
अचिन्त्यम् आर्यपुत्र एतत् पापम् अत्र किम् उच्यते । 158
अहं गवां प्रभावेण स्वल्पाद् अप्य् अपराधतः
जाता दाशकुले ऽमुष्मिन्, का त्व् एतस्य अत्र निष्कृतिः । 159
एवम् उक्तवतीम् एव शक्तिदेवो जगाद तां,
चित्रं ब्रूहि प्रिये का त्वं, दाशजन्म कथं च ते । 160
अतिनिर्बन्धतस् च एवं पृच्छन्तं तम् उवाच सा,
वदामि, गोप्यम् अप्य् एतद् वचनं मे करोषि चेत् । 161
वाढं प्रिये करोमि इति तेन उक्ते शपथोत्तरं
सा तदा एनं जगाद एवम् आदौ तावत् समीहितं । 162
अस्मिन् द्वीपे द्वितीया अपि भार्या त्वे भविता अधुना,
सा च आर्यपुत्र नचिराद् धृतगर्भा भविष्यति । 163
अष्टमे गर्भमासे च पाटयित्वा उदरं त्वया
तस्याः स गर्भः क्रष्टव्यो, न एव कार्या घृणा अत्र च । 164
एवम् उक्तवती तस्मिन्, किम् एतद् इति विस्मिते
त्वसद्घृणे च भूयः सा दाशेन्द्रतनया अब्रवीत् । 165

इत्य् एतत् तव कर्तव्यं हेतोः कस्यापि मद्वचः,
अथ इदं शृणु या च अहं, दाशजन्म यथा च मे । 166
अहं जन्मान्तरे ऽभूवं कापि विद्याधरी पुरा,
मर्त्यलोके च शापेन परिभ्रष्टा अस्मि साम्प्रतं । 167
विद्याधरत्वे च यदा छित्त्वा दन्तैर् अयोजयं
वीणासु तन्त्रीस् तेन इह जाता अहं दाशवेश्मनि । 168
तद् एवं वदने स्पृष्टे शुष्केण स्नायुना गवां
ईदृश्य् अधोगतिः, का तु वार्ता तन्मांसभक्षणे । 169
इत्य् एवं कथयन्त्यां च तत्र तस्यां ससंभ्रमं
स कोऽप्य् उपेत्य तद्भ्राता शक्तिदेवम् अभाषत । 170
उत्तिष्ठ सुमहान् एष कुतोऽप्य् उत्थाय सूकरः
हतानेकजनो दर्पाद् इतो ऽभिमुखम् आगतः । 171
तच् छ्रुत्वा सो ऽवतीर्य एव शक्तिदेवः स्वहर्म्यतः
आरुह्य शक्तिदेवो ऽश्वम् अधावत् सूकरं प्रति । 172
प्रजहार च दृष्ट्वा एव तस्मिन् वीरे ऽभिधावति
पलाय्य व्रणितः सो ऽपि वराहः प्राविशद् बिलं । 173
शक्तिदेवो ऽपि तत्र एव तदन्वेषी प्रविश्य च
क्षणात् स पश्यन् सावासम् उद्यानगहनं महत् । 174
तत्रस्थश् च ददर्श एकां कन्याम् अत्यद्भुताकृतिं
ससंभ्रमम् उपायातां प्रीत्या इव वनदेवतां । 175

ताम् अपृच्छच् च, कल्याणि का त्वं, किं संभ्रमश् च ते,
तच् छ्रुत्वा सा ऽपि सुमुखी तम् एवं प्रत्यभाषत । 176
अस्ति दक्षिणदिङ्नाथो नृपतिश् चण्डविक्रमः,
तस्य ऽहं विन्दुरेखाख्या सुता सुभगकन्यका । 177
इह अकस्माच् च पापो मां दैत्यो ज्वलितलोचनः
अपहृत्य छलेन ऽद्य पितुर् अनीतवान् गृहात् । 178
स च ऽमिषार्थी वाराहं रूपं कृत्वा वहिर्गतः
विद्धो ऽद्य एव क्षुधार्तः सन् शक्त्या वीरेण केनचित् । 17[illegible]
विद्धमात्रः प्रविश्य इह पश्यताम् आगतश् च सः,
तद्दूषितकौमारा पलाय्य ऽहं च निर्गता । 180
तच् छ्रुत्वा शक्तिदेवस् ताम् ऊचे, कस् तर्हि संभ्रमः,
मया एव स वराहो हि हतः शक्त्या नृपात्मजे । 181
ततः सा ऽप्य् अवदत्, तर्हि ब्रूहि मे को भवान् इति,
विप्रो ऽहं शक्तिदेवाख्य इति प्रत्यब्रवीच् च सः । 182
तर्हि त्वम् एव मे भर्ता इत्य् उदितः स तया ततः,
तथा इत्य् आदाय तां वीरो विलद्वारेण निर्ययौ । 183
गृहं गत्वा च भार्यायै विन्दुमत्यै निवेद्य तत्
तच्छ्रद्धितः कुमारीं तां विन्दुरेखाम् उदूढवान् । 184
ततस् तस्य द्विभार्यस्य शक्तिदेवस्य तिष्ठतः
तत्र एका विन्दुरेखा सा भार्या गर्भम् अधारयत् । 185

अष्टमे गर्भमासि च तस्याः स्वैरम् उपेत्य तं
आद्या विन्दुमती भार्या शक्तिदेवम् उवाच सा । 186
वीर तत् स्मर यन् मह्यं प्रतिश्रुतम् अभूत् त्वया,
सो ऽयं द्वितीयभार्याया गर्भमासो ऽष्टमस् तव । 187
तद् गत्वा गर्भम् एतस्या विपाट्य उदरम् आहर,
अनतिक्रमणीयं हि नित्यं सत्यवचस् तव । 188
एवम् उक्तस् तया शक्तिदेवः स्नेहकृपाकुलः
प्रतिज्ञापरतन्त्रश् च क्षणम् आसीद् अनुत्तरः । 189
ज्ञातोद्विग्नश् च निर्गत्य विन्दुरेखान्तिकं ययौ,
सा अपि खिन्नम् उपायान्तं तं विलोक्य एवम् अब्रवीत् । 190
आर्यपुत्र विषण्णो ऽसि किम् अद्य, ननु वेद्म्य् अहं,
विन्दुमत्या प्रयुक्तस् त्वं गर्भस्य उत्पाटने मम । 191
तच् च ते ऽवश्यकर्तव्यं, कार्यं किंचिद् धि विद्यते,
नृशंसता च न अस्त्य् अत्र काचित्, तन् मा घृणां कृथाः । 192
तथा हि शृणु नाथ अत्र देवदत्तकथाम् इमां.

पुरा अभूद् धरिदत्ताख्यः कम्बुकाख्ये पुरे द्विजः । 193
तस्य च श्रीमतः पुत्रः कृतविद्यो ऽपि शैशवे
देवदत्ताभिधानो ऽभूद् द्यूतिकव्यसनी युवा । 194

द्यूतहारितवस्त्रादिर् गन्तुं न अलं पितुर् गृहं
एकदा च विवेश एकं स शून्यं देवतागृहं । 195
तत्र च अपश्यद् एकान्ते साधितानेककामनं
जपन्तं जालपादाख्यं महाव्रतिनम् एककं । 196
चकार च शनैस् तस्य प्रणामम् उपगम्य सः
तेन अप्य् अपास्तमौनेन स्वागतेन अभ्यनन्द्यत । 197
स्थितः क्षणाच् च तेन एव पृष्टो वैधुर्यदर्शिना
शशंस अस्मै स्वविपदं व्यसनक्षीणवित्ततां । 198
ततस् तं जगाद एवं देवदत्तं महाव्रती,
न अस्ति व्यसनिनां वत्स भुवि पर्याप्तये धनं । 199
इच्छा च विपदं हातुं यदि ते, कुरु मद्वचः,
विद्याधरत्वं प्राप्तुं यत् कृतः परिकरो मया । 200
तत् साधय त्वम् अप्य् एतन् मया सह सुलक्षण,
मच्छासनं तु पाल्यं ते नश्यन्ति विपदस् तव । 201
इत्य् उक्तो व्रतिना तेन प्रतिश्रुत्य तथा इति तत्
स देवदत्तस् तत्पार्श्वे तदा एव स्थितिम् अग्रहीत् । 202
अन्येद्युश् च श्मशानान्ते गत्वा वटतरोर् अधः
विधाय रजनौ पूजां परमान्नं निवेद्य च । 203
बलीन् दिक्षु च विक्षिप्य संपादिततदर्चनः
तं पार्श्ववर्तिनं विप्रम् उवाच स महाव्रती । 204

एवम् एव त्वया कार्यम् इह प्रत्यहम् अर्चनं,
विद्युत्प्रभे गृहाण 'इमां पूजाम् इत्य् अभिधायिना । 205
अतःपरं च जाने ऽहं सिद्धिम् च 'एवं ध्रुवा 'आवयोः,
इत्य् उक्त्वा स ययौ तेन समं स्वनिलयं व्रती । 206
सो ऽपि नित्यं तरोस् तस्य मूले गत्वा तथा 'एव तत्
देवदत्तो ऽर्चनं चक्रे तथा 'इति विधिना ततः । 207
एकदा च सपर्यान्ते द्विधाभूतात् तरोस् ततः
अकस्मात् पश्यतस् तस्य दिव्या नारी विनिर्ययौ । 208
एह्य् अस्मत्स्वामिनी भद्र वक्ति त्वाम् इति वादिनी
सा तं प्रवेशयामास तस्य 'एव 'अभ्यन्तरे तरोः । 209
स प्रविश्य ददर्श 'अत्र दिव्यं मणिमयं गृहं,
पर्यङ्कवर्तिनीम् एकां तत्र च 'अन्तर् वरस्त्रियं । 210
रूपिणी सिद्धिर् अस्माकम् इयं स्याद् इति स क्षणात्
यावद् ध्यायति, तावत् सा कृतातिथ्या वराङ्गना । 211
रणिताभरणैर् अङ्गैर् विहितस्वागतैर् इव
उत्थाय निजपर्यङ्के तम् उपावेशयत् स्वयं । 212
जगाद च, महाभाग सुता यक्षपतेर् अहं
कन्या हि रत्नवर्षस्य ख्याता विद्युत्प्रभाख्यया । 213
आराधयच् च माम् एष जालपादो महाव्रती,
तस्य 'अर्थसिद्धिदा 'एव 'अस्मि, त्वं प्राणेष्व् अपि मे प्रभुः । 214

तस्माद् दृष्टानुरागिण्याः कुरु पाणिग्रहं मम.
इत्य् उक्तः स तया चक्रे देवदत्तस् तथा इति तत् । 215
स्थित्वा च कंचित् कालं स गर्भभारे तया धृते
जगाम पुनर् आगन्तुं तं महाव्रतिनं प्रति । 216
शशंस च यथावृत्तं तत् तस्मै सभयं ततः,
सो ऽप्य् एवम् आत्मसिद्ध्यर्थी जगाद एनं महाव्रती । 217
भद्र साधु कृतं, किंतु गत्वा अस्या यक्षयोषितः
विपाट्य उदरम् आकृष्य शीघ्रं गर्भं तम् आनय । 218
इत्य् उक्त्वा स्मारयित्वा च व्रतिना पूर्वसंगरं
प्रेषितस् तेन भूयस् तां देवदत्तो ऽप्य् अगात् प्रियां । 219
तत्र तिष्ठति यावच् च तद्विभावनदुर्मनाः,
तावद् विद्युत्प्रभा सा तु यक्षी स्वयम् अभाषत । 220
आर्यपुत्र विषण्णो ऽसि किमर्थं, विदितं मया
आदिष्टं जालपादेन तव मद्गर्भपाटनं । 221
तद् गर्भम् एतम् आकर्ष पाटयित्वा मम उदरं,
न चेत् स्वयं करोम्य् एतत्, कार्यं ह्य् अस्त्य् अत्र किंचन । 222
एवं तया उक्तः स यदा कर्तुं तन् न अशकद् द्विजः,
तदा आकृष्टवती गर्भं सा स्वयं पाटितोदरा । 223
तं च कृष्टं पुरस् त्यक्त्वा देवदत्तं तम् अभ्यधात्,
भोक्तुर् विद्याधरत्वस्य कारणं गृह्यताम् अयं । 224

अहं च शापाद् यक्षीत्वे जाता विद्याधरी सती,
अयम् ईदृक् च शापान्तो मम, जातिस्मरा ह्य् अहं । 225
इदानीं यामि धाम स्वं, संगमश् च आवयोः पुनः
तत्र एव इत्य् अभिधाय एषा क्वापि विद्युत्प्रभा ययौ । 226
देवदत्तो ऽपि तं गर्भं गृहीत्वा खिन्नमानसः
जगाम जालपादस्य स तस्य व्रतिनो ऽन्तिकं । 227
उपानयच् च तं गर्भं तस्मै सिद्धिप्रदायिनं,
भजन्त्य् आत्मंभरित्वं हि दुर्लभे ऽपि न साधवः । 228
सो ऽपि तत् पाटयित्वा गर्भमांसं महाव्रती
व्यसृजद् देवदत्तं तं भैरवार्चाकृते ऽटवीं । 229
ततो दत्तबलिर् यावद् एत्य पश्यति स द्विजः,
तावन् मांसम् अशेषं तद् व्रतिना तेन भक्षितं । 230
कथं सर्वं त्वया भुक्तम् इति च अत्र अस्य जल्पतः
जिह्मो विद्याधरो भूत्वा जालपादः खम् उद्ययौ । 231
व्योमश्यामलनिस्त्रिंशे हारकेयूरराजिते
तस्मिन्न् उत्पतिते सो ऽथ देवदत्तो व्यचिन्तयत् । 232
कष्टं कीदृग् अनेन अहं वञ्चितः पापबुद्धिना,
यदि वा अत्यन्तमृदुता न कस्य परिभूतये । 233
तद् एतस्य अपकारस्य कथम् अस्य प्रतिक्रियां
कुर्यां, विद्याधरीभूतम् अप्य् एनं प्राप्नुयां कथं । 234

तन् न ऽस्त्य् उपायो वेतालसाधनाद् अपरो ऽत्र मे,
इति निश्चित्य स ययौ रात्रौ पितृवनं ततः । 235
तत्र ऽआहूय तरोर् मूले वेतालं नृकलेवरे
पूजयित्वा ऽकरोत् तस्य नृमांसबलितर्पणं । 236
अतृप्यन्तं च वेतालं तम् अन्यानयनासहं
तर्पयिष्यन् स्वमांसानि छेत्तुम् आरभते स्म सः । 237
तत्क्षणं तं स वेतालो महासत्त्वम् अभाषत,
सत्त्वेन ऽनेन तुष्टो ऽस्मि तव, मा साहसं कृथाः । 238
तद् भद्र किम् अभिप्रेतं तव, यत् साधयामि ते?
इत्य् उक्तवन्तं वेतालं स वीरः प्रत्युवाच तं । 239
विश्वस्तवञ्चको यत्र जालपादो व्रती स्थितः,
विद्याधरनिवासं तं नय तन्निग्रहाय मां । 240
तथा ऽइत्य् उक्तवता तेन वेतालेन क्षणात् स तं
स्कन्धे ऽधिरोप्य नभसा निन्ये वैद्याधरं पदं । 241
तत्र ऽपश्यच् च तं जालपादं प्रासादवर्तिनं
स विद्याधरराजत्वदृप्तं रत्नासनस्थितं । 242
प्रतारयन्तं ताम् एव लब्धविद्याधरीपदां
विद्याधरीम् अनिच्छन्तीं भार्यात्वे तत्तदुक्तिभिः । 243
दृष्ट्वा ऽएव च सवेतालो ऽप्य् अभ्यधावत् स तं युवा
क्रुष्यद्विद्युत्प्रभानेत्रचकोरामृतचन्द्रमाः । 244

ज्ञालपादो ऽपि सो ऽकस्मात् तं दृष्ट्वा 'एव 'आगतं तथा
वित्रासाद् भ्रष्टनिस्त्रिंशो निपपात 'आसनाद् भुवि । 245
देवदत्तो ऽपि तत्खड्गं स लब्ध्वा अप्य् अबधीन् न तं,
रिपुष्व् अपि हि भीतेषु सानुकम्पा महाशयाः । 246
तं जिघांसुं च वेतालं तं जगाद स वारयन्,
पाषण्डिना किम् एतेन कृपणेन हतेन नः । 247
स्थाप्यतां भुवि नीत्वा 'अयं तस्मात् स्वनिलये त्वया,
आस्तां भूयो ऽपि तत्र 'एव पापः कापालिको वरं । 248
इत्य् एवं वदतस् तस्य देवदत्तस्य तत्क्षणं
दिवो ऽवतीर्य शर्वाणी देवी प्रत्यक्षतां ययौ । 249
सा जगाद च तं प्रह्वं, पुत्र तुष्टा 'अस्मि ते ऽधुना
अनन्यसदृशेन 'इह सत्त्वोत्कर्षेण सम्प्रति । 250
तद् विद्याधरराजत्वं मया दत्तम् इह 'एव ते,
इत्य् उक्त्वा 'अर्पितविद्या सा देवी सद्यस् तिरोऽभवत् । 251
ज्ञालपादश् च नीत्वा 'एव वेतालेन स भूतले
विभ्रष्टसिद्धिर् निदधे, न 'अधर्मश् चिरम् ऋद्धये । 252
देवदत्तो ऽपि सहितः स विद्युत्प्रभया तया
विद्याधराधिराज्यं तत् प्राप्य तत्र व्यजृम्भत । 253

इत्य् आख्याय कथां पत्ये शक्तिदेवाय सत्वरा
सा विन्दुरेखा भूयस् तं बभाषे मृदुभाषिणी । 254
इति ईदृशि भवन्त्य् एव कार्याणि, तद् इदं मम
विन्दुमत्युदितं गर्भं मुक्तशोकं विपाटय । 255
इत्य् एवं विन्दुरेखायां वदन्त्यां पापशङ्किते
शक्तिदेवे च गगणाद् उदभूत् तत्र भारती । 256
भोः शक्तिदेव निःशङ्कं गर्भो ऽस्याः कृष्यतां त्वया,
कण्ठे मुष्ट्या गृहीतो हि खड्गो ऽसौ ते भविष्यति । 257
इति दिव्यां गिरं श्रुत्वा पाटितोदरम् आशु सः
गर्भं तस्याः समाकृष्य पाणिना कण्ठतो ऽग्रहीत् । 258
गृहीतमात्रो जज्ञे च स खड्गस् तस्य हस्तगः
आकृष्टः सततः सिद्धेः केशपाश इव आयतः । 259
ततो विद्याधरः क्षिप्रात् स विप्रः समजायत,
विन्दुरेखा च तत्कालम् अदर्शनम् इयाय सा । 260
तद् दृष्ट्वा च स गत्वा एव दाशपुत्र्यै तथाविधः
विन्दुमत्यै द्वितीयस्यै पत्न्यै सर्वं न्यवेदयत् । 261
सा तम् आह, वयं नाथ विद्याधरपतेः सुताः
तिस्रो भगिन्यः कनकपुरीतः शापतश् च्युताः । 262
एका कनकरेखा सा वर्धमानपुरे त्वया
यस्या दृष्टः स शापान्तः, सा च तां स्वां पुरीं गता । 263

शापान्तो हि ऽईदृशस् तस्या विचित्रो विधियोगजः,
अहम् एव तृतीया च, शापान्तश् च ऽअधुना ऽएव मे । 264
मया च ऽअद्य ऽएव गन्तव्या निजा सा नगरी प्रिय,
विद्याधरशरीराणि तत्र ह्य् अस्माकम् आसते । 265
चन्द्रप्रभा ऽअपि भगिनी ज्यायसी हि स्थिता ऽअत्र नः,
तद् आयाहि त्वम् अप्य् आशु खड्गसिद्धिप्रभावतः । 266
तत्र ह्य् अस्मांश् चतस्रो ऽपि भार्याः संप्राप्य च ऽअधिकाः
वनस्थेन ऽअर्पिताः पित्रा पुरि राज्यं करिष्यसि । 267

इति निजपरमार्थम् उक्तवत्या
समम् अनया पुनर् एव विन्दुमत्या
अथ कनकपुरीं स शक्तिदेवो
गगणपथेन तथा ऽइति तां जगाम । 268

तस्यां च यानि योषिद्-
वपूंषि पर्यङ्कतल्पवर्तीनि
निर्जीवितान्य् अपश्यत्
पूर्वं तृषु मण्डपेषु दिव्यानि । 269

तानि यथावत् स्वात्मभिर्
अनुप्रविष्टाः स कनकरेखाद्याः
प्राप्तो भूयः प्रणाता
अद्राक्षीत् ता निजप्रियास् तिस्रः । 270

तां च चतुर्थीम् ऐचत
तज्ज्येष्ठां रचितमङ्गलां तत्र
चन्द्रप्रभां पिवन्तीं
चिरदर्शनसोत्कया दृष्ट्या । 271
स्वस्वनियोगव्यापृत-
परिजनवनिताभिनन्दितागमनः
वासगृहप्राप्तश् च स
चन्द्रप्रभया तया जगदे । 272
या तत्र कनकरेखा
राजसुता सुभग वर्धमानपुरे
दृष्टा भवता, सा 'इयं
भगिनी मे चन्द्ररेखाख्या । 273
या दाशाधिपपुत्री
विन्दुमती प्रथमम् उत्स्थलद्वीपे
परिणीता 'अभूद् भवता,
शशिरेखा मत्स्वसा सा 'इयं । 274
या तदनु विन्दुरेखा
राजसुता तत्र दानवानीता
भार्या ते च तदा 'अभूच्,
छशिप्रभा सा 'इयम् अनुजा मे । 275

तद् इदानीम् एहि कृतिन्
  अस्मत्पितुर् अन्तिकं सह 'अस्माभिः,
तेन प्रत्ताश् च 'एता
  द्रुतम् अखिलाः परिणायस्व 'अस्मान् । 276
इति कुसुमशराज्ञां सप्रगल्भं च तस्यां
त्वरितम् उदितवत्याम् अत्र चन्द्रप्रभायां,
अपि चतसृभिर् आभिः साकम् एतत्पितुस् तनू-
निकटम् अनुवनान्तं शक्तिदेवो जगाम । 277
स च चरणनताभिस् ताभिर् आवेदितार्थो
दुहितृभिर् अखिलाभिर् दिव्यवाक्प्रेरितश् च
युगपद् अथ ददौ ताः शक्तिदेवाय तस्मै
मुदितमतिर् अशेषास् तत्र विद्याधरेन्द्रः । 278
तदनु कनकपुर्याम् ऋद्धम् अस्यां स्वराज्यं
सपदि स विततार, स्वाश् च विद्याः समस्ताः,
अपि च कृतिनम् एनं शक्तिदेवं स्वनाम्ना
व्यधित समुदितेन स्वेषु विद्याधरेषु । 279
अन्यो न जेष्यति भवन्तम्, अतिप्रभावाद्
वत्सेश्वरात् पुनर् उदेष्यति चक्रवर्ती,
युष्मासु यो ऽत्र नरवाहनदत्तनाम्ना
भावी विभुः स तव, तस्य नतिं विदध्याः । 280

इत्य् ऊचिवांश् च विससर्ज महाप्रभावो
विद्याधराधिपतिर् आत्मतपोवनात् तं
सत्कृत्य सप्रियतमं निजराजधानीं
जामातरं स शशिखण्डपदाभिधानः । 281

अथ सो ऽपि शक्तिवेगो
राजा भूत्वा विवेश कनकपुरीं
स्ववधूभिः सह गत्वा
विद्याधरलोकवैजयन्तीं तां । 282

तस्यां तिष्ठन् कनकरचनाविस्फुरन्मन्दिरायाम्
अत्यौन्नत्याद् इव पटुपतत्पिण्डितार्कप्रभायां
वामाक्षीभिश् चतसृभिर् असौ रत्नसोपानवापी-
हृद्योद्यानेषु अलभततरां निर्वृतिं प्रेयसीभिः । 283

इति कथयित्वा चरितं
निजम् एव विचित्रम् एष तत्कालं
निजगाद शक्तिवेगो
वाग्मी वत्सेश्वरं भूयः । 284

त्वं मां शशाङ्ककुलभूषण शक्तिवेगं
जानीह्य् उपागतम् इमं खलु वत्सराज

उत्पन्नभाविनिजनूतनचक्रवर्ति-
युष्मत्सुतांघ्रियुगदर्शनसाभिलाषं । 285
इत्थं मया 'इह मनुजेन सता 'अपि लब्धा
विद्याधराधिपतिता पुरजित्प्रसादात्,
गच्छामि च 'अहम् अधुना नृपते स्वधाम,
दृष्टः प्रभुर्, भवतु भद्रम् अभङ्गुरं वः । 286
इत्य् उक्त्वा रचिताञ्जलौ च वदति प्राप्ताभ्यनुज्ञे ततः
तस्मिन् उत्पतिते मृगाङ्कमहसि द्यां शक्तिवेगे क्षणात्
देवीभ्यां सहितः सबालतनयो वत्सेश्वरो मन्त्रिभिः
साकं कामपि तत्र संमदमयीं भेजे तदानीं दशां । 287

। इति ।
॥ षड्विंशस् तरङ्गः ॥

समाप्तो ऽयं
चतुर्दारिका नाम
पञ्चमो लम्बकः



Gedruckt in der Druckerei der Königl. Akademie der Wissenschaften
zu Berlin.

Druckfehler.

---

p. 82. sloka 58, b. statt: अतन्द्रत: lies: अतन्द्रित:

- 166. - 61, b. - निनिद् lies: निनिन्द्

- 202. - 88, b. - कृप्त — lies: क्लृप्त —

- 220. - 104, a. - तद्वारस्थितं महत्तरं lies: तद्द्वारस्थितमहत्तरं

- 290. - 65, b. - अखाण्ड — lies: अकाण्ड —

- 304. - 68, a. - वदत ’एव lies: वदत एव

- 336. - 112, b. - सगर्भयया lies: सगर्भया

- 341. - 2, a. - आपण्डु lies: आपाण्डु

- 351. - 105, b. - प्रत्युगता lies: प्रत्युद्गता

- 354. - 134, b. - मन्बृध — lies: मद्वृध् —

- 355. - 138, a. - मध्ये न lies: मध्येन

- 366. - 249, a. - समुत्थस्थुर् lies: समुत्तस्थुर्


- 372. - 40, b. - विधिं lies: निधिं

- 377. - 90, c. - इत्य् अकनाम्ना lies: इत्यकनामा

- 426. - 203, a. - आलीक — lies: अलीक —


- 432. - 257, a. - वद्दत: lies: वदत:

- 456. - 178, b. - अनीतवान् lies: आनीतवान्



Erstes Buch.

Ursprung der Mährchen.



Erstes Capitel.

Möge des Sambhu dunkler Hals, umschlungen von den Blickes Banden der Pârvatî, wenn sie auf seinem Schoose ruht, das Glück Euch zeigen durch die Liebe.

Möge der Zerstörer der Hindernisse, Ganesa, Euch beschützen, der zum heitern Reihentanze in der Dämmerung die Sterne führt, und fröhlich murmelnd Wasserstrahlen emporschiessend neue Sterne bildet.

Mich ehrfurchtsvoll verbeugend vor Sarasvatî, der Fackel um aller Worte Sinn zu erleuchten, beginne ich diese Sammlung, die das Mark der Vrihat Kathâ enthält.

Das 1ste Buch heisst Kathâ pîtha.
- 2te - - Kathâ mukha.
- 3te - - Lâvânaka.
- 4te - - Naravâhanadatta janana.
- 5te - - Chaturdârikâ.
- 6te - - Madanamanchukâ.
- 7te - - Ratnaprabhâ.
- 8te - - Sûryaprabha.
- 9te - - Alankâravatî.
- 10te - - Saktiyasas.
- 11te - - Velâ.
- 12te - - Sasânkavatî.
- 13te - - Madirâvatî.
- 14te - - Pancha.
- 15te - - Mahâbhisheka.
- 16te - - Suratamanjarî.
- 17te - - Padmâvatî.
- 18te - - Vishamasila.

Wie das ursprüngliche Werk, so ist auch dieses, man wird nirgends die geringste Auslassung bemerken; nur die Sprache ist gedrängter, um die zu grosse Ausdehnung des Buches zu vermeiden. Den Kräften gemäss habe ich mich bemüht, den passendsten Ausdruck zu wählen, und indem die verschiedensten Gemüthsstimmungen in den Erzählungen dargestellt worden, ist ein Werk entstanden, das zu den **Gedichten** gerechnet werden kann. Meine Arbeit entsprang nicht aus Begierde nach dem Ruhme der Gelehrsamkeit, sondern um leichter dem Gedächtniss das bunte Mährchennetz zu bewahren.

Von Kinnaras, Gandharvas und Vidyâdharas verehrt, wird Himavân als Herrscher unter den Bergesfürsten gepriesen; sein nördlichster Gipfel ist der grosse Berg Kailâsa, tausende von Meilen sich erhebend, strahlend im Glanze ewigen Schnees. Dort wohnt mit Pârvatî vereint, von Ganas, Vidyâdharas und Siddhas bedient, der Herrscher des Weltalls, Siva; auf dessen Hauptbaare der Mond strahlt, emporragend über die Nordberge, wenn sie glühen im Abendroth; den Suras und Asuras umgeben, als schönsten Stirnschmuck den Abglanz der Nägel seiner Füsse tragend.

Einst als Pârvatî mit ihrem Gemahle allein war, erfreute sie ihn voll Hingebung durch Gesänge zu seinem Lobe, und Siva ihren Lobpreisungen aufmerksam zuhörend, erfreut setzte sie auf seinen Schoos, und sagte: „Was soll ich dir Liebes erweisen?“ Da sagte Pârvatî: „Wenn du gnädig sein willst, o Herr, so erzähle mir irgend ein ganz neues Mährchen.“ Siva erwiderte ihr: „Was da war, und ist, und sein wird, was sollte es irgend in der Welt geben, das du nicht wüsstest, Herrin.“ Da aber

bat sie ihn dringend, und aus Rücksicht auf ihre schmeichelnden Worte, erzählte er ihr nun eine kleine Erzählung, die ihre Macht zum Gegenstande hatte.

Vordem durchwanderten Brahmâ und Nârâyana die Erde, um mich zu sehen, und gelangten so an den Fuss des Himâlaya. Dort sahen sie einen mir geweihten grossen Tempel, und um das Ende desselben zu sehen, ging der eine nach oben, der andere nach unten; als sie aber das Ende nicht erreichen konnten, erfreuten mich beide durch strenge Bussübungen. Da erschien ich ihnen und sagte: „Bittet Euch eine Gnade aus." Sogleich sprach Brahmâ: „Möchtest du mein Sohn sein!" Deswegen wird er von den Menschen nicht verehrt, seines Übermuthes wegen verachtet. Nârâyana aber bat mich um die Gabe: „Möchte ich, Hochheiliger, nur stets mit deiner Bedienung beschäftigt sein!" Darauf wurde er unter körperlicher Gestalt mir in dir geboren; denn der Nârâyana war, das bist du, die Kraft von mir dem Kräftigen.

Als nun ferner Siva sagte: „Du warst auch schon in einer früheren Geburt meine Gemahlin", und Pârvatî fragte, wie dies gewesen, da erzählte er: Vordem wurden dem Urvater Daksha du, Herrin, und viele andere Töchter geboren. Dich gab er mir zur Gemahlin, und dem Dharma und den andern Göttern die übrigen Töchter. Einst wurden alle seine Schwiegersöhne zu einem Opfer eingeladen, nur ich allein nicht. Da fragtest du ihn: „Sprich, Vater, warum ist mein Gemahl nicht zu dem Opfer eingeladen worden?" und er antwortete dir: „Dein Gemahl trägt eine Schnur von Schädeln, wie kann man ihn zu einem Opfer einladen?" Bei diesen Worten, die wie eine giftige Nadel dein Ohr durchbohrten, riefst du aus: „Du bist ein Schändlicher; was soll mir noch ferner dieser Leib, den du mir gabst!" und mit diesen Worten warfst du dich voll Zorn in die Flammen. Das Opfer des Daksha aber wurde von mir voll Ingrimm zerstört. Darauf wurdest du als Tochter des Himavân geboren, gleichwie der Mond aus den Wellen steigt. Nun, erinnere dich, kam ich der Busse wegen zu dem Schneegebirge, und dein Vater befahl dir mich als Gast zu bedienen. Dort wurde Kâma, den die Götter abgesandt hatten, um von mir einen Sohn zu erlangen, der den Târaka tödten könnte, als er mich bei günstiger Gelegenheit mit seinen Pfeilen durchbohrte, von mir verbrannt. Darauf wurde ich von dir durch ausdauernde harte Busse erkauft. So warst du also schon in einer früheren Geburt meine Gemahlin. Was soll ich dir noch ferner erzählen?

